ततोऽवतीर्य गुरवे पूर्वमर्घं निवेदयेत् ।
[ऋत्विग्भ्योऽपरमर्धन्तु दद्यादुदकपूर्वकम् ॥६६॥

[1]पूर्वमर्घं निवेदयेत् अर्घं प्रथमं निवेदयेदित्यर्थः ।

गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत् ।][2]
प्राप्य तेषामनुज्ञां वा[3] तथाऽन्येभ्योऽपि दापयेत् ॥६७॥

अन्येभ्योऽपि ब्राह्मणेभ्य एव ।

दीनानाथविशिष्टादीन् पूजयेद् ब्राह्मणैः सह ॥६८॥

तत्समयोपस्थितदीनानाथविशिष्टब्राह्मणान् पूजयेदिति बोद्धव्यम् ।

न चिरं धारयेद् गेहे हेम संप्रोक्षितं बुधः ।
तिष्ठद् भयावहं यस्माच्छोकव्याधिकरं नृणाम् ।

संप्रोक्षितमुत्सृष्टम् ।

शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलम् ॥६९॥
अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥७०॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ।
कल्पकोटिशतं यावत् तस्मिंल्लोके महीयते ॥७१॥

कर्मक्षयादिह पुनर्भुवि राजराजो
भूपालमौलिमणिरञ्जितपादपीठः ।
श्रद्धान्वितो भवति यज्ञसहस्रयाजी
दीप्तप्रतापजितसर्वमहीपलोकः ॥७२॥
यो दीयमानमपि पश्यति भक्तियुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानरूपः
प्राप्नोति [4]धाम स पुरन्दरदेवजुष्टम् ॥७३॥

---

1 I. O. पूर्व्वमर्द्धं निवेशयेत्

2 A omits the bracketed portion

3 I. O. ०मनुज्ञाप्य

4 A वासवपुरं परदेवजुष्ट ; I. O. वामनपुरन्दरदेवजुष्टः

[अथ प्रयोगः । प्रथमदिनकृत्यम् ।][1]

अत्र यजमानः समुपजाततुलापुरुषमहादानेच्छः प्रथमं विष्णुशिवविनायकानां पूजार्थं गन्धपुष्पादिसामग्रीवस्त्रनैवेद्यानि ब्राह्मणार्चनार्थं गन्धमाल्यसामग्रीवस्त्राणि वृद्धिश्राद्धसामग्रीं [2]स्वस्तिवाचनार्थं गन्धमाल्यसामग्रीं सपटोकवासोयुगलयं सुवर्णतोलकत्रयञ्च तीर्थादिषु परिशोधितायां भूमौ चतुर्भद्रमण्डपघटनार्थं स्तम्भवंशचालादिकं वेदीकुण्डघटनार्थं[3]मिष्टकां चूर्णञ्च कुण्डपार्श्वस्थापनार्थं कुम्भचतुष्टयमृत्विजामष्टावासनानि होमार्थमष्टौ शोभनताम्रपात्राणि [4]स्रुवचतुष्टयं [5]स्रुक्चतुष्टयं तिलान् घृतञ्च कुशं यथोप[6]योगेध्मसमिदग्निज्वालनकाष्ठ- [धूपपुष्पादिसामग्रीं[7]] वेदीस्थदेवपूजार्थं [द्वापञ्चाशतं वस्त्राणि[8]] पूजोचितसामग्रीञ्च ब्रह्मशिवविष्णुप्रतिमात्रयं मण्डपचालोपरि पूर्वादिदिक्षु दानार्थं पीतरक्तकृष्णातिकृष्णश्वेतकृष्णहरितपञ्चवर्णश्वेतरक्ता दश पताकाः चालमध्यारोपणार्थं किङ्किणीयुक्तमुत्कृष्टं ध्वजं द्वारचतुष्टयालङ्करणार्थं प्लक्षोडुम्बराश्वत्थवटानां[9] तोरणचतुष्टयं मृन्मयान् शोभनानष्टौ कुम्भान् कुम्भमण्डनार्थं पुष्पमाल्यसामग्रीचन्दनवस्त्ररत्नानि तद्धूपनार्थं गुग्गुलुं कुम्भपूरणार्थं तीर्थजलञ्च [10]सालपुत्रजीवचन्दनदेवदारुगाम्भारीविल्व[11]कदम्बबकुलानामन्यतमस्य सारदारुणा निर्मितं सप्तहस्तोच्छ्रितं दृढम् ऋजु उपरि हस्तमेकं परित्यज्य कृतच्छिद्रं स्तम्भद्वयं तद्दारुमयीमेव तुलाधारणसमर्थां मध्यस्थितकटकामर्गलां तद्दारुमयीं चतुर्हस्तायतां दशाङ्गुलप्रस्तारां चतुरस्रां मध्यार्पितधारणसमर्थ[12]बडिशाकृतिलोहां मध्ये प्रान्तद्वये च सुवर्णपत्रवेष्टितां पार्श्वद्वयस्थलोहपाशद्वयलम्बमानशृङ्खलाष्टकनिबद्धार्धपट्टद्वयां तुलां तदलङ्करणार्थं माल्यसामग्रीं चन्दनं मौक्तिकप्रबालमालाञ्च[13] तुलामध्यस्थापनार्थं सुवर्णपत्रनिर्मितां[14] विष्णुप्रतिमां चक्रलिखनार्थं पञ्चवर्णतण्डुलगुण्डिकां चक्रालङ्करणार्थं [15]पुष्पादिसामग्रीं तुलाया ऊर्ध्वस्थापनार्थं पञ्चवर्णं चन्द्रातपं [16]तद्बन्धनार्थं फलपुष्पसामग्रीञ्च [17]गुरोरर्चनार्थं

---

1 A and I. O. omit the bracketed portion
2 I. O. स्वस्तिक०
3 I. O. ०मिष्टकाचूर्णञ्च
4 I. O. स्रु०
5 I. O. विष्टर०
6 I. O. योगसमिद०
7 B and I. O. ०ध्वजनादिसामग्रीं
8 A विष्णवादि
9 I. O. ०वटान्
10 I. O. शाल०
11 I. O. ०कदम्बाञ्जनानाम्
12 I. O. वडिशा०
13 I. O. ०मालां
14 I. O. यन्त्रनिर्मित०
15 I. O. पुष्पार्जनसामग्रीं
16 I. O. तद्बन्धनार्थं
17 I. O. गुरोर्व्वरणार्थं

श्वेतं सपटीकवासोयुगं यथेष्टसुवर्णघटितकुण्डलद्वयं हैमयज्ञोपवीतकेयूरकण्ठाभरणानि च ऋत्विजां वरणार्थम् अष्टौ सितानि सपटीकवासोयुगानि यथेष्टसुवर्णघटितान्यष्टौ [कुण्डल-युगानि अष्टौ][1] हेमयज्ञसूत्राणि अष्टावङ्गदानि अष्टौ कण्ठाभरणानि च जापकानाञ्च वरणार्थ-मभिमतसुवर्णघटिताङ्गुरीयकचतुष्टयं वस्त्रस्थानचतुष्टयञ्च, गुरोऋत्विजाञ्च मधुपर्कसामग्रीं ; [2]लोकपालावाहनार्थं पुष्पधूपादीनि[3] वल्यर्थं माषभक्त-[4]वलिसामग्रीम् ; ऋत्विग्भ्योऽधिवासन-दक्षिणार्थमभिमतसुवर्ण[5]कृतकुण्डलयुगाष्टक-हैमयज्ञसूत्राष्टक-हैमकटका[ष्टका][6]ङ्गुरीयाष्टकानि, अष्टौ नानावर्णवस्त्र-[7]स्थानानि, अष्टा पटीकम्बलोपधानसहिताः शय्याः ; गुरवे दानार्थमेकर्त्विग्-देयसामग्रीतो द्विगुणद्रव्यघटितां कुण्डलयुगादिसामग्रीं, द्विगुणसपटीकवस्त्रं, द्विगुणद्रव्यरचि-तामुक्तरूपां शय्यां ; मध्यस्वस्तिवाचनार्थं सपटीकवासोयुगलयं सुवर्णतोलकत्रयञ्च[8] ; माङ्गल्यार्थं [9]वाद्यादिसामग्रीम् ; आत्ममण्डनार्थं यथेष्टमाभरणानि, धारणार्थं खड्गं [10]चर्ममयढालं सन्ना-हञ्च, हस्तद्वयधारणार्थमभिमतसुवर्ण-घटिते धर्मराज-सूर्यप्रतिमे, आत्मतुलनार्थं निर्मलं सुवर्णं, गुर्वृत्विग्भ्यो दक्षिणार्थमभिमतोत्पत्तियोग्यां भूमिं यथेष्टं रत्नानि च ; जापकदक्षि-णार्थं सुवर्णं ; दीनानाथादितर्पणार्थं [11]यथेष्टं तण्डुलान् कपर्दकञ्च ; [12]शेषब्राह्मणत्रयवाच-नार्थं सपटीकवस्त्रयुगलत्रयं सुवर्णतोलकत्रयञ्च[13] उत्पाद्य, सम्भृतसम्भारोऽ[यनाद्युक्त-समया][14]नामन्यतमस्य पूर्वतरदिने कृतनित्यो घटिकाधिकप्रहरत्रये हविष्यं भुक्त्वाऽऽचम्य, शुचौ देशे उपविश्य पादौ प्रक्षाल्याऽऽचम्य, प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः—ॐसूर्यसोमयम-कालपञ्चभूतानि मत्स्यपुराणोक्त-तुलापुरुषमहादानकर्म कर्तुं श्वो मयोपवासः कर्तव्य इति निवेदनं कृत्वा, [15]गृहीतोदकपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्यात् ।

तद् यथा—ॐमत्स्यपुराणोक्त-तुलापुरुष-महादानकर्म कर्तुं श्वोऽहमुपवासं करिष्ये । एवं गुर्वृत्विग्जापका अपि सङ्कल्पं कुर्युः । तत्र निवेदनसङ्कल्पवाक्ययोर्यथाक्रमं तुलापुरुष-महादानकर्मणि गुरुकर्म कर्तुं, [ऋत्विक्कर्म कर्तुं,][16]शान्तिकाध्यायजपकर्म कर्तुमिति च

1 I. O. omits the bracketed portion
2 I. O. adds नव here
3 I. O, पुष्पधूपौ
4 I. O. omits वलि
5 I. O. omits कृत
6 I. O. omits the b. p.
7 I. O. adds प्र here
8 A सुवर्णस्थानत्रयञ्च
9 I. O. वाद्यादि०
10 I. O. चर्ममयार्जुनं
11 I. O. यथेच्छं
12 I. O. शेषे०
13 A सुवर्णस्थानत्रयञ्च
14 A ०क्तदीना०
15 I. O. गृहीतोदपूर्णं
16 I. O. omits the bracketed portion

विशेषः। एवं सर्वेष्वेव वक्ष्यमाणमहादानेषु तुलापुरुषपदस्थाने हिरण्यगर्भादिपदं प्रक्षिप्य निवेदन-सङ्कल्पौ कर्तव्यौ। एतावतैव सर्वेषां वक्ष्यमाण—महादानानां वाक्यानि सम्पद्यन्ते, अतस्तेषु न [1]लिखितव्यानि।

[द्वितीयादिनकृत्यम्।][2]

ततोऽपरदिने यजमानः कृतनित्यक्रियः ॐ गोविन्दाय नमः, ॐ उपापतये ममः, ॐ बिनायकाय नमः इति वस्त्रादिना सम्पूज्य, भगवन् गोविन्द, भगवन्नुमापते, भगवन् विनायक, तुलापुरुष-महादानमखो मया कर्तव्यः, स निर्विघ्नं भवत्प्रसादात् सम्पद्यताम् इत्याशास्य प्रणम्य, अभिमतसंख्यब्राह्मणान् बस्त्रादिभिरभ्यर्च्य तुलापुरुषमहादानमखो मया कर्तव्यः, तद्भवन्तो मामनुजानन्तु इति वदेत्। ततस्ते क्रियतामिति [3]सहर्षं ब्रूयुः। ततो यजमानो गृहीतोदक[4]पूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्यात्। तद्यथा ॐ मत्स्यपुराणोक्त—तुलापुरुष-महादानकर्माहं करिष्ये। ततो यथाविधि सगणाधिपमातृपूजापूर्वकं वृद्धिश्राद्धं कृत्वा, ब्राह्मणत्रयं वस्त्रकाञ्चनादिभिरभ्यर्च्य, तुलापुरुषमहादानकर्मणि पुण्याहं भवन्तो ब्रुवन्त्विति वदेत्। [5]पुण्याहमिति तैस्त्रिः प्रत्येकमुक्ते, स्वस्ति भवन्तो ब्रुवन्त्विति वदेत्। तैश्च [6]त्रिः स्वस्तीत्युक्ते,ऋद्धिं भवन्तो ब्रुवन्त्विति वदेत। ते च प्रत्येकम् ऋध्यतामिति त्रिर्ब्रूयुः। अत्रापि सर्वेष्वेव महादानेषु देवताब्राह्मणानुज्ञा[7]भ्यर्चनदानसङ्कल्प-[8]पुण्याहवाचनेषु तुला-पुरुषपदस्थाने तत्तन्महादाननामप्रक्षेपः कर्तव्यः। ततः पूर्वशोधितायां भूमौ स्वहस्तेनोभयतः षोडशारत्निमात्रं द्वादशहस्तं दशहस्तं वा चतुर्भद्रानन[9]मण्डपं कारयेत्। तन्मध्ये सप्तहस्तां [पञ्चहस्तां वा][10] वेदीं कारयेत्। तस्याश्चतुर्दिशं चत्वारि हस्तप्रमाणानि [11]हस्तनिम्नानि चतुरस्राणि [12]सुरूपाणि विस्तारो[13]च्छ्रायचतुरङ्गल-पूर्वोत्तरकोणावनत-सर्व[14][समै[15]कदेशमेखला

---

1 I. O. लिखितानि, A लिखितव्यं
2 I. O. and A omit the bracketed portion
3 A सहर्षं
4 I. O. omits क
5 I. O. adds ॐ here
6 A and B omit it
7 I. O. omits भ्य
8 I. O. पुण्याहानि वाचनेषु
9 I. O. and A ०भद्रासन०
10 I. O. omits it
11 A हस्तानिम्नानि, I. O. हस्तविहस्त
12 I. O. and A स्वरूपाणि
13 I. O. ०च्छ्र्य०
14 A omits the bracketed portion
15 I. O. समैक०

युतानि वितस्ति]दीर्घ-सप्ताङ्गुलप्रस्तार-कूर्मपृष्ठोन्नतमध्याङ्गुलोच्छ्रित[[1]प्रान्त-गजोष्ठ]सदृश-दीर्घ[2][प्रणाल्योद्धोष्ठ]योनियुतानि पार्श्वस्था[3]म्रपल्लव-पिहितमुखैकैक-पूर्णकुम्भानि होतृ-ब्रह्मोपवेशनार्थमासनद्वयद्वययुतानि होमार्थं घृताक्ततिल-स्थापनार्थं प्रणीतास्थापनार्थञ्च शोभन-ताम्र[4]पात्रद्वयद्वययुतानि प्रत्येकं [5]स्रुक्स्रुवसहितानि ब्रह्मोपवेशनार्थमेकैक-[6]विष्टरयुतानि [7]पार्श्व-स्थापिततिल-घृत-धूप-पुष्पसामग्री-कुश-यथासम्भव[8]समिदग्निज्वालनार्थेन्धनादीनि [9]कुण्डानि कारयेत् ।

वेद्या ईशानकोणे चापरां सर्वतोहस्तपरिमितां चतुरस्रां वक्ष्यमाणविनायकादिदेवार्चनाय वेदीं कारयेत् । मण्डपचालोपरि [10]पूर्वस्यां [11][पीताम्, आग्नेय्यां रक्तां, याम्यां] कृष्णां, नैर्ऋत्यामतिकृष्णां, वारुण्यां सितां, [12]वायव्यां कृष्णाम्, उत्तरस्यां हरिताम्, ऐशान्यां पञ्चवर्णां, [13]निर्ऋतिवरुणयोर्मध्ये [14]श्वेताम्, [15]इन्द्रेशानयोर्मध्ये लोहितां पताकां, मण्डपमध्यभागोपरि च किङ्किणीयुक्तं[16] ध्वजं दद्यात् ।

मण्डपद्वारेषु पूर्वादिक्रमेण प्लक्षोडुम्बराश्वत्थवटानाम्, अश्वत्थोडुम्बरप्लक्षवटानां वा तोरण-चतुष्टयम्; द्वारपार्श्वद्वयेषु च पुष्पमालालङ्कृतं [17]चन्दनप्रोक्षितं [18]धूपितं वस्त्रवेष्टितग्रीवम् अभिमतपञ्च[19]रत्नगर्भं पूर्णकुम्भद्वयद्वयं दद्यात् ।

एतच्च सर्वमहा[20]दानसाधारणम् ।

[21][ततः प्रधान]वेदीमध्ये हस्तद्वयमित-खातद्वयं कृत्वा, तत्र[22]यथोक्तं तोरणमारोप्य, तत्रोक्त[23]प्रकारघटितां तुलामवलम्ब्य, पुष्पमाला[24]भिश्चन्दनेन मुक्ताप्रवालमालया

---

1 A पान्ते गजोष्ठ
2 I. O. ०प्रणालोर्द्धस्त and A ०प्रमाणोर्द्धस्थ
3 A स्थ for स्थाम्र
4 I. O. and A ०पात्रद्वययुतानि
5 A omits स्रुक्
6 I. O. विस्तर
7 A होमार्थं before this
8 A यथासम्भवेधा०
9 A omits it
10 I. O. पूर्वतः
11 A omits the bracketed portion
12 I. O. वायवीयां
13 I. O. नैर्ऋतिवरुणयोर्मध्ये, A निर्ऋति वरुणमध्ये
14 A श्वेत
15 A ऐन्द्रेशानमध्ये
16 A omits युक्तं
17 A चन्दनप्रक्षितं, I. O. चन्दनार्चितं
18 A omits it
19 A बाल for रत्न
20 A omits महा
21 A omits the bracketed portion
22 I. O. omits it
23 A omits प्रकार
24 A ०दिं चन्दनेन

चालङ्कुर्यात्। तुलातलभागमध्ये यथोक्तविष्णु[1][प्रतिमां पृष्ठनिहित]-गुग्गुलुपिण्डां कृत्वाऽऽरोपयेत्। तुलोपरि च[2]यथोक्तं बहुफलपुष्पमालं चन्द्रातपं वितत्य बध्नीयात्। तुलाधोभूभागे[3][यथोक्तं [4]चक्रं लिखित्वा[5]पुष्पैरवकिरेत्।

एवं सर्वमनुष्ठानं कृत्वा,] गुरुमृत्विजो जापकांश्च वरणार्थोपकल्पितवस्त्रालङ्कारैर्य[6]थायथमभ्यर्च्य, प्रथमं गुरुं दक्षिणजानुनि[7]विधृत्य [8]वरयेत्। ॐअद्यामुक[9]सगोत्रम् अमुकवेदामुक[10]शाखाध्यायिनम् अमुकदेवशर्माणम् अस्मिंस्तुलापुरुषमहादानकर्मणि गुरुकर्म कर्तुं त्वामहं वृणे। [11]ॐवृतोऽस्मीति[12]प्रतिवचनम्। ततो यजमानो [13][यथाविहितं कर्म कुर्विति वदेत्। ॐ यथाज्ञानं करवाणीति] गुरुः। ऋत्विग्जापकानां[14] वरणे वरणवाक्ये गुरुकर्म कर्तुमिति स्थाने [15]ऋत्विक्कर्म [16]कर्तुं शान्तिकाध्यायजपकर्म कर्तुमिति यथाक्रमं निवेशो विशेषः। ततो गुरवे ऋत्विग्भ्यो [17]जापकेभ्यश्च यथाशास्त्रं मधुपर्कं दद्यात्।

[18]ततो गुर्वृत्विग्यजमानजापका उपवसेयुः। एतदपि [19]चन्द्रातपबन्धनाद्युपवासान्तं कर्म सर्वमहादानसाधारणम्। [20][वरणवाक्ये तु] तुलापुरुषपदस्थाने तत्तन्महादानपदप्रक्षेपः कर्तव्यः।

[21]तृतीयदिनकृत्यम्।

[22][अपरेद्युश्च कृतनित्यं] पूर्वादिकुण्डेषु ऋग्यजुःसामाथर्व[23]क्रमेण एको होता [24]अपरो ब्रह्मेति ब्राह्मणद्वयं नियुक्तं [25]स्वस्वगृह्योक्तविधिना अग्न्युपसमाधानं कुर्यात्। जापकाश्च

---

1 I. O. प्रतिमापृष्ठनिहत
2 A यथोक्त
3 A omits the bracketed portion
4 I. O. omits it
5 I. O. पुष्पैववकिरेत्
6 A यथामभ्यर्च्य
7 B and I. O. दक्षिणजानुयं
8 A वृणयात्
9 A गोत्र for सगोत्रम्
10 A omits मुक
11 A and I. O. omit it
12 A गुरुर्वदेत्
13 A omits the bracketed portion
14 A omits नां
15 A नैऋत्विककर्म
16 I. O. कर्त्तुं
17 I.O. and A omit it
18 A omits it
19 A चन्द्रातवदना॰
20 I. O. वरणवाक्ये and A वरण
21 I. O. and A omit it
22 A अपरेभ्यः कृतनित्यकृत्यः
23 A adds महादान before this
24 A अपर
25 I. O. स्वगृह्योक्त॰

ऋग्वेदादि[1]क्रमेण पूर्वादिद्वारेषूपविश्य शान्तिकाध्यायं जपेयुः। शान्तिकाध्यायश्च 'शं न इन्द्राग्नी भवतामवोभि'रिति पञ्चदशर्चं [2]शान्तिसूक्तमृग्वेदे। 'ऋचं वाचमि'ति शान्तिकाध्यायो [3]यजुर्वेदे। 'कया नश्चित्र' इति तृयचं सामवेदे। 'शं नो देवी'—'शं न इन्द्राग्नी' इति द्वे द्वे कण्डिके, '[4]सम्मावात' इत्यृक्, 'शान्ता द्यौ'रिति [5]कण्डिकेति शान्तिगणोऽथर्ववेदे।

गुरुश्च कृतनित्यः पूर्वाभिमुखः [6]कृतार्घ्यपात्रः स्वल्पवेदिकायाम् उत्तरादिक्रमेण यवपुष्पसिततण्डुलानामन्य[7]तमेन विनायकादिनवग्रहपूजार्थं प्रथमां दशपुञ्जिकापङ्क्तिं, दशदिक् [8]पालपूजार्थञ्च वेदुयपान्तेषु [9]स्वस्वदिक्क्रमेण दशपुञ्जिकाः, ग्रहपूजा[10]-पङ्क्त्यधो वस्वष्टकपूजार्थं द्वितीयामष्ट[11]-पुञ्जिका-पङ्क्तिं, [12][तदधो द्वादशादित्यपूजार्थं [13]तृतीयां द्वादशपुञ्जिकापङ्क्तिं] तदधः सप्तमरुद्गणपूजार्थं चतर्थीं सप्तपुञ्जिकापङ्क्तिं, तदधो ब्रह्मविष्णुशिवानां प्रतिमा[14]त्रयारोपणम्, अर्कवनस्पत्योः पूजार्थं पुञ्जिकाद्वयञ्च कृत्वा, प्रथमपङ्क्तावुत्तरादिक्रमेण एत एत सविनायका नवग्रहा इत्यावाह्य—विनायकमारोपयामि, आदित्यमारोपयामि, सोममारोपयामि, अङ्गारकमारोपयामि, बुधमारोपयामि, बृहस्पतिमारोपयामि, शुक्रमारोपयामि, शनैश्चरमारोपयामि, राहुमारोपयामि, केतुमारोपयामि इत्यारोप्य, [15][एत एत लोकपाला] इत्यावाह्य—यथादिक्क्रमम् इन्द्रमारोपयामि, अग्निमारोपयामि, यममारोपयामि, निर्ऋतिमारोपयामि, वरुणमारोपयामि, वायुमारोपयामि, सोममारोपयामि, ईशानमारोपयामि, अनन्तमारोपयामि, ब्रह्माणमारोपयामि इत्यारोप्य, [16]एत एत वसव इत्यावाह्य, द्वितीयपङ्क्तौ—[17]आपमारोपयामि, ध्रुवमारोपयामि, सोममारोपयामि, [18]धरमारोपयामि, अनिलमारोपयामि, [19]अनलमारोपयामि, प्रत्यूषमारोपयामि, [20]प्रभासमारोपयामि इत्यारोप्य, एत एत आदित्या

1 A क्रमं
2 A शान्तिकसुक्तं ऋग्वेदे
3 I. O. यजुर्व्वेदो
4 A सम्माभिव, I. O. श्रीम्मावात
5 I. O. कण्डिकाः॥ इति, A शान्तिकुण्डिका। इति
6 I. O. and A कृतार्घपात्रः
7 I. O. ०मन्यमेन
8 A omits पाल
9 A स्व and I. O. पूर्व्वं for स्वस्व
10 A ०पंक्ताधा, I. O. ०पङ्क्त्यो
11 I. O. पुञ्जिपङ्क्ति, A पुञ्जिकापुष्पं
12 I. O. omits the bracketed portion
13 A तृतीयायां
14 I. O. नुरूपा for त्रया
15 A दिक्पाला for the bracketed portion
16 A omits it
17 A धपमारोपयामि
18 A आपमारोपयामि
19 I. O. omits it
20 A omits it

इत्यावाह्य, तृतीयपङ्क्तौ—इन्द्रमारोपयामि, धातारमारोपयामि, भगमारोपयामि, पूषणमारोपयामि, मित्रमारोपयामि, वरुणमारोपयामि, अर्यमणमारोपयामि, अंशुमारोपयामि, विवस्वन्तमारोपयामि, त्वष्टारमारोपयामि,[1][सवितारमारोपयामि, विष्णुमारोपयामि] इत्यारोप्य, एत एत मरुद्गणा इत्यावाह्य, चतुर्थपङ्क्तौ—आवहमारोपयामि, प्रवहमारोपयामि [2][उद्वहमारोपयामि, संवहमारोपयामि, [3]विवहमारोपयामि] [4]परावहमारोपयामि, [5]परिवहमारोपयामि [6]इत्यारोप्य, एत एत ब्रह्माच्युतेशार्कवनस्पतय[7] [8]इत्यावाह्य, [9]प्रतिमात्रये—ब्रह्माणमारोपयामि, अच्युतमारोपयामि, ईशमारोपयामि इत्यारोप्य, तत्पार्श्वस्थपुञ्जिकाद्वये [10]अर्कमारोपयामि, वनस्पतिमारोपयामि [11][इत्यारोपयेत्। ततो विनायकाय] आदित्याय सोमाय अङ्गारकाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे, इन्द्राय अग्नये [12]यमाय [13]निर्ऋतये वरुणाय वायवे सोमाय ईशानाय अनन्ताय ब्रह्मणे, [14][आपाय ध्रुवाय सोमाय धराय अनिलाय अनलाय प्रत्यूषाय प्रभासाय, इन्द्राय धात्रे भगाय पूष्णे मित्राय वरुणाय अर्यम्णे अंशवे विवस्वते त्वष्ट्रे [15]सवित्रे विष्णवे, आवहाय प्रवहाय [16]उद्वहाय संवहाय विवहाय परावहाय परिवहाय, ब्रह्मणे,] अच्युताय, ईशाय, अर्काय, वनस्पतये इति प्रत्येकमुच्चार्य—एतत् पाद्यं नम इति क्रमादेकैकशः पाद्यं सर्वेभ्यो दत्त्वा, तथा एषोऽर्घ्यो नम [17]इत्यर्घ्यं, [18][तथैव एतदाचमनीयं नम इत्याचमनीयं], तथैव [19]एतद्वस्त्रं नम इति वस्त्रं, तथैव एष गन्धो नम इति गन्धं, [20][तथैव एतत् पुष्पं नम इति पुष्पं], [21][तथैव एष धूपो

1 A omits the bracketed portion
2 A विवस्वन्तमारोपयामि त्वष्टारमारोपयामि for the bracketed portion
3 I. O. वह०
4 I. O. omits it
5 A omits it
6 A इत्यावाह्य
7 A रवनस्पतयारोपयामि
8 A इत्यारोप्य
9 A प्रमितिमात्रये
10 A अर्क०
11 A इत्यारोप्य एतादर्तविनायकाय for the bracketed portion
12 A omits it
13 A नैर्ऋतये, I. O. निर्ऋताय
14 A omits the bracketed portion
15 I. O. सावित्रे
16 I. O. तद्वहाय
17 A इत्यर्थं
18 A तथैवमाचमनीयं for the bracketed portion
19 A वस्त्रं
20 A एतत् पुष्पं नमः for the bracketed portion
21 A:एष धूपो नमः for the bracketed portion

नम इति धूपं], तथैव एष दीपो नम इति दीपं, तथैव एतन्नैवेद्यं नम इति नैवेद्यं [तथैव एतत्ताम्बूलं नम इति ताम्बूलं][1] दद्यात् । एवं पूजां समापयेत् ।

ततो होतारः प्रतिमन्त्रमे[2]कावृत्त्या [3]आभ्य एव देवताभ्यो घृताक्ततिलाहुतीर्दद्युः । तथाच मन्त्राः । विनायकस्य—ऋग्वेदयजुर्वेदयोः गणानां त्वेति, सामवेदे आ [4][तू न]इति, अथर्ववेदे[5][गणानां त्वा] [6]गणपतिमिति । सूर्यस्य—ऋग्वेदयजुर्वेदयोः आ कृष्णेनेति, सामवेदे [7][बएमहाँ असीति,] अथर्ववेदे[8] आदित्य नावमिति । [9]सोमस्य—ऋग्वेदे आ प्यायस्वेति, यजुर्वेदे इमं देवा इति, सामवेदे आ प्यायस्वेति, अथर्ववेदे [10]यद्राजानमिति । अङ्गारकस्य—ऋग्यजुःसामवेदेषु अग्निर्मूर्द्धेति, अथर्ववेदे[11][त्वया मन्य]इति । बुधस्य—ऋग्वेदे अग्ने विवस्वदुषस इति, यजुर्वेदे उद् बुध्यस्वेति, सामवेदे अग्ने विवस्वदुषस इति, अथर्ववेदे [12]दर्शोऽसीति । बृहस्पतेः—ऋग्वेदे बृहस्पते परि दीयेति, यजुर्वेदे बृहस्पते [13][अतियदर्य इति,] [14][सामवेदे बृहस्पते परि दीयेति,] अथर्ववेदे बृहस्पतिर्न इति । शुक्रस्य—ऋग्वेदे शुक्रन्ते अन्यदिति,[15] यजुर्वेदे [16][अन्नात् परिस्रुत इति,] सामवेदे शुक्रन्ते अन्यदिति, अथर्ववेदे [17]येनावपदिति । शनैश्चरस्य—[18]ऋग्यजुःसामवेदेषु शन्नो देवीरिति, अथर्ववेदे प्राणाय नम इति । राहोः—ऋग्वेदे कया नश्चित्र इति, यजुर्वेदे काण्डात् काण्डादिति, सामवेदे कया नश्चित्र इति, अथर्ववेदे [19]राहू राजानमिति । केतोः—केतुं कृण्वन्निति वेदचतुष्टयेऽपि । इन्द्रस्य—ऋग्वेदयजुर्वेदयोः [20]त्रातारमिन्द्रमिति, सामवेदे त्वामिद्धि[21] हवामह[22] इति, अथर्ववेदे [23][इन्द्रस्य बाहू इति] । अग्नेः—ऋग्वेदे अग्निं दूतं

---

1 A omits the bracketed portion
2 A ०मेकावृत्या ; I. O. ०मेकवृत्या
3 I. O. and A आद्य
4 I. O. न तू, A तुन
5 I. O. गणपते and A गणपतये
6 A गणपतिं
7 I. O. विभ्रड्डां भगीति and A विस्वड्डां भगीति
8 A adds इयं after it
9 A मस्य
10 A भग्रजानमिति
11 I. O. त्वया मान्या and A इयं मन्या
12 A वर्शाशोति
13 I. O. अति भदर्या and A विवदर्यति
14 A omits the bracketed portion
15 A अन्यदि
16 I. O. अन्नां परिस्रुतमिति
17 I. O. येनावदिति
18 A ऋकसामयजुस
19 A राहु, I. O. बाहू
20 A वातारमिति
21 I. O. and A त्वामिद्धि
22 A हवाम
23 I. O. इन्द्रस्य बाहू इति and A इन्द्रबाहुरिति

वृणीमह इति, यजुर्वेदे त्वं नो अग्ने [1][तव देवेति,] [2]सामवेदे अग्निं दूतं वृणीमह[3] इति, अथर्ववेदे अग्नेर्मन्व[4] इति। यमस्य—ऋग्वेदे असि यम इति, यजुर्वेदे[5][सुगं नु पन्थामिति,] सामवेदे नाके सुपर्णमिति, अथर्ववेदे यमो नो [6]गातुमिति। निर्ऋतेः—ऋग्वेदे [7]वेत्था हि निर्ऋतीनामिति, यजुर्वेदे [8]असुन्वन्तमयजमानमिति, सामवेदे [9]वेत्था हि निर्ऋतीनामिति, अथर्ववेदे [10]अपेत एत्विति। वरुणस्य—ऋग्वेदे [11][वरुणं वो रिशादसमिति,]यजुर्वेदे[12][तत्त्वा यामीति,] सामवेदे घृतवती भुवनानामिति, अथर्ववेदे उदुत्तमं वरुणेति। वायोः—ऋग्वेदे वात [13][आ वात्विति,] यजुर्वेदे आ [14][नो नियुद्भिरिति,] सामवेदे वात आ वात्विति, अथर्ववेदे वायोः सवितुरिति। सोमस्य—ऋग्वेदे [15]कुविदङ्ग नमसा ये इति, यजुर्वेदे वयं सोमेति, सामवेदे सोमं राजानं वरुणमिति, अथर्ववेदे [16][सोदक्रामत् सा वनस्पतीनिति]। [17][ईशानस्य—ऋग्वेदे ईशाना [18]वार्याणामिति, यजुर्वेदे तमीशानमिति, सामवेदे[19][आत्वा सोमस्येति] अथर्ववेदे तस्मै [20][सर्वेभ्य ईशानस्येति]। [21]अनन्तस्य—ऋग्वेदे काडिको[22]नाम सर्प इति, यजुर्वेदे नमोऽस्तु[23]सर्पेभ्य इति, सामवेदे यां [24]सन्ध्यां समधत्तेति, अथर्ववेदे[[25]अनन्तं विततमिति]। ब्रह्मणः-ऋग्वेदे ब्रह्मा देवानामिति, यजुर्वेदे आ ब्रह्मन्निति, सामाथर्वणोः ब्रह्म[26]जज्ञानमिति। वसूनाम्—ऋग्वेदे[27]ज्मया अत्र वसव इति, यजुर्वेदे वसन्तेन ऋतुनेति, सामवेदे [28][लोकद्वारमित्याद्यं

---

1 I. O. इति for the bracketed portion
2 A सामवेदेष
3 A वृणीम
4 I. O. अग्नेर्मन, A अग्नेर्मन्व
5 I. O. सुगन्नु पन्थामिति and A सुगन्नच्छामिति
6 I. O. and A गान्तमिति
7 I. O. and A वर्णा
8 I. O. असुन्वन्त०, A अयथन्त०
9 I. O. वर्णा, A व
10 I. O. आपत, A अपत
11 I. O. वरुण आविशादसमिति and A वरुण वारिशादमिति
12 A तमीषमिति
13 A आवातु इति and I. O. वत्विति
14 I. O. नोनियुतिरिति and A योविद्भिरिति
15 A कविदत्वं नमसाय इति
16 I. O. सोदद्रामम इति and A सोमक्रामसो वनस्पतिरिति
17 A reads the bracketed portion a little below after some repetition of matter
18 I. O. वापीणामिति
19 I. O. अभित्वाशूरनोन्नामा इति
20 I. O. सर्व्वं इति
21 I. O. अनन्तस्य ऋटस्य
22 I. O. and A कालिको
23 I. O. नमोस्तु ते
24 I. O. सत्वा, A the entire sentence as पाप त्वां समाधत्तेति
25 I. O. अथर्व्वमिततमिति
26 I. O. ०जज्ञनमिति, A ०जननमिति
27 I. O. ऽस्मुया, A अस्मया
28 I. O. लोकद्वारमिति for the bracketed portion

साम], अथर्ववेदे वसवस्त्वा [1]गायत्रेणेति। आदित्यानाम्—ऋग्वेदयजुर्वेदयोः इमा गिर आदित्येभ्य इति, सामवेदे [2][तत्त्वा यामीति], अथर्ववेदे [3]उदित्युदिहीति। मरुताम्—ऋग्वेदे आविद्युन्म[4]द्भिरिति, यजुर्वेदे [5]ईदृक्षास इति, सामवेदे गावश्चिद् [6][घा समन्यव] इति, अथर्ववेदे मरुतां [7]मन्व इति। ब्रह्मणः—ऋग्वेदे ब्रह्म जज्ञानमिति, यजुर्वेदे आ ब्रह्मन्निति, सामाथर्वणोः ब्रह्म जज्ञानमिति। अच्युतस्य—ऋग्वेदे अतो देवा इति, यजुर्वेदसामवेदयोः इदं विष्णुरिति, अथर्ववेदे उरु [8]विष्ण इति। ईशस्य—ऋग्वेदे इमा रुद्रायेति, यजुर्वेदे मा [9]नस्तोक इति, सामवेदे आ वो[10] राजानमिति, अथर्ववेदे भवो दिवो भव इति। अर्कस्य—चित्रं देवानामिति वेदचतुष्टयेऽपि। वनस्पतेः—ऋग्वेदे अव सृजा वनस्पत इति, यजुर्वेदे [11]अयं हित्वा[12]स्वधितिरिति, सामवेदे नित्यस्तोत्रो वनस्पतिरिति, अथर्ववेदे [13][सोदक्रामत् सा वनस्पतीनिति]।] एवं [14]होमं समाप्य, सामवेदव्यतिरिक्ता[15] ऋत्विजो यथासम्भवमासामेव देवतानां सूक्तानि जपेयुः।

तथा च सूक्तानि। ऋग्वेदे—आ [16]तु न इति विनायकसूक्तं नवर्चम्। आदित्यस्य आदित्याना[17][मवसेत्यादि षड्ऋचं] सूक्तम्। त्वं सोम प्र[18]चिकित इति सोमस्य त्रयोविंशतृयचं सूक्तम्। [19]समिधाग्निं [20]दुवस्यतेत्यङ्गारकस्य[21]त्रिंशतृयचं सूक्तम्। [22]उद् बुध्यध्वमिति बुधस्य द्वादशर्चं सूक्तम्। [23]यस्तस्तम्भेति बृहस्पतेरेकादशर्चं सूक्तम्। शुक्रन्ते अन्यदिति शुक्रस्य चतुष्कं सूक्तम्। आपो हि ष्ठेति शनैश्चरस्य नवर्चं सूक्तम्। कया नश्चित्र इति राहोः

---

1 I. O. and A गायत्रिणेति
2 I. O. तन्वयामीति and A तत्तुयामिति
3 I. O. and A उदित्युदिहीति
4 I. O. ०नभिरिति, A आविद्युन्महद्भिरिति
5 I. O. इदृक्षास, A इदृक्षारस
6 I. O. व्यासमन्यव
7 I. O. ध्वज, A मन्व
8 I. O. विष्णो इति, A विष्णोरिति
9 I. O. नस्तेक
10 I. O. धो
11 I. O. and A भयं
12 I. O. सुधितिरिति, A धधितिरिति
13 I. O. सोदक्रामसौ वसस्पतानिति A सोमक्रामसो वनस्पतेरिति
14 I. O. हैमं
15 A omits it
16 I. O. क्र०, A नूनमिति
17 A मिमोपरिसर्व्व for the bracketed portion
18 I. O. चिकित्, A चिविनि
19 I. O. समिधग्निं
20 I. O. दुरस्यते इति। अङ्गारकस्य, A वनस्पते इत्यङ्गारकस्य
21 A विंशत्यर्चं
22 I. O. उद्ध्यास्वति, A उद्बुध्वमिति
23 A यस्तम्भस्तेति, I. O. पयस्ततस्तम्भ ति

पञ्चदशर्चं सूक्तम्। युञ्जन्ति ब्रध्नमिति केतोर्दशर्चं सूक्तम्। इन्द्रमि[1]द्गाथिन इति इन्द्रस्य दशर्चं सूक्तम्। [2][अग्निः समिमिति] अग्नेः सप्तर्चं सूक्तम्। [3]परेयिवांसमिति यमस्य [4]षोडशर्चं सूक्तम्। [5]यस्यामितानीति निरृतेर्दशर्चं सूक्तम्। [6][मो षु] वरुणेति वरुणस्य पञ्चर्चं सूक्तम्। वात आ वात्विति वातस्य [7]त्र्यृचं सूक्तम्। कुविदङ्ग[8] नमसा य इति सोमस्य सप्तर्चं सूक्तम्। [9][आ नो भद्रा इति [10]महेशानस्य दशर्चं सूक्तम्।] [11]स्वप्नः स्वप्नाधिकरण [12][इत्यनन्तस्य पञ्चर्चं सूक्तम्। ऋजु[13]रिच्छंस इति ब्रह्मणश्चतुष्कं सूक्तम्। [14]जगृभ्मा त] इति वसूनामष्टर्चं सूक्तम्। इमा गिर आदित्येभ्य इत्यादित्यानां सप्तदशर्चं सूक्तम्। मरुतो [15][यस्य हि] क्षये इति [16]मरुतां दशर्चं सूक्तम्। ऋजुरि[17]च्छंस इति ब्रह्मणश्चतुष्कं सूक्तम्। सहस्रशीर्षा पुरुष इत्यच्युतस्य षोडशर्चं सूक्तम्। आ [18]ते पितरितीशस्य [19]पञ्चदशर्चं सूक्तम्। चित्रं देवानामित्यर्कस्य [20]षडृचं सूक्तम्। [21][अञ्जन्ति त्वामध्वर] इति वनस्पतेरेका[22]दशर्चं सूक्तम्।

यजुर्वेदे—आशुः शिशान इति [23]शाक्रं सूक्तम्। [24]अस्याजरास इत्याग्नेयं सूक्तम्। [25]अषाढमिति सौम्यं सूक्तम्। [26]रुद्राध्यायरूपं रौद्रं सूक्तम्। सहस्रशीर्षेति वैष्णवं सूक्तम्।

[सामवेदे तु सूक्तानि न सन्त्येव][27]।

---

1 Both I. O. and A ०मिद्गाथिन
2 A अग्निरिति
3 I. O. परेयिवांसमिति. A परेपितरमिति
4 I. O. षोडर्चं
5 A यस्यमवानिमि
6 I. O. गोषु, A गोस
7 A अष्टर्चं
8 I. O. कविदङ्गं, A कविदङ्ग
9 I. O. सप्तर्चं सूक्तं for the bracketed portion
10 A इशानस्य
11 A स्वप्नः सप्ताधिकरण and I. O. omits स्वप्नः
12 A omits the bracketed portion
13 I. O. ०विश्युस
14 I. O. जगृभ्मी न
15 A यस्याहि and I. O. यस्याहं
16 I. O. वायोर्दशर्चं
17 I. O. ०विश्युस, A ०रिषुंस
18 I. O. तो
19 A पञ्चदशस्य before this
20 A षडर्चं
21 A omits the bracketed portion
22 I. O. ०कविंशत्यृचं
23 A शाक्तं
24 I. O. अस्याजवाम, A अस्यजराम
25 I. O. आषाढमिति, A अषांश इति
26 A रुद्रध्यायजपं
27 A सामवेदे प्रकाश्यमान इति वभ्रवाणमिति द्वादशर्चं सूक्तं सौम्यम्। वैष्णवी संहिता विष्णुसूक्तम्। रुद्रसंहिता रौद्रं सूक्तम्।

अथर्ववेदे—[1]गणपते गणपतिमिति विनायकसूक्तम्। [2]यद्राजानमिति सोमसूक्तम्। त्वया [3]मन्य इति भौमसूक्तम्। [4]दर्शोऽसीति [5][बुधसूक्तमेकर्चम्[6]। [7]यामाहुतिमिति बृहस्पतिसूक्तम्। येना[8]वर्पदिति शुक्रसूक्तम्। सहस्रबाहुरिति शनैश्चरसूक्तम्। [9][राहू राजानमिति] राहोरेकर्चं सूक्तम्। [10][केतुं कृण्वन्निति]] [11][केतोरेकर्चं सूक्तम्।] [12]इन्द्रो [13]जयातीति इन्द्रसूक्तम्। अग्ने[14]मैन्व इति अग्निसूक्तम्। [15]यमस्य [16]लोकादिति यमसूक्तम्। अपेत एत्विति निर्ऋतिसूक्तम्। उदुत्तमं वरुणेति वरुणसूक्तमेकर्चम्। वायोः सवितुरिति वायुसूक्तम्। आ प्यायस्वेति सोमसूक्तम्। यो[17][अग्नौ रुद्र इती]शानसूक्तम्। नमोऽस्तु सर्पेभ्य इत्यनन्तसूक्तम्। [18]ब्रह्मज्येष्ठा इति ब्रह्मसूक्तम्। अस्मिन्वसु वसव इति वसूनां सूक्तम्। [19][आयं गौरित्यादित्यानां] सूक्तम्। मरुतां [20]मन्व इति मरुतां सूक्तम्। ब्रह्म [21]जज्ञानमिति चोद्रं ब्रह्मसूक्तम्। [22]उरु विष्णो इत्यच्युतस्य[23] सूक्तमेकर्चम्। [24][भवाशर्वौ मन्वे वामितीशसूक्तम्।] यस्येदमा [25]रज इत्यर्कसूक्तम्। [26]ध्रुवस्तिष्ठेति वनस्पतिसूक्तम्।

एवं सूक्तजपानन्तरं सर्वेर्त्विजो [27][यथायथं होमशेषं] समापयेयुः। ततो गुरुः कृत-

---

1 I. O. omits it
2 A यद्राजानमिति
3 I. O. मन्यो ; A मान्या
4 A यशोसीति
5 A omits the bracketed portion here and reads some portion of it a little below.
6 I. O. बुधसूक्तं
7 I. O. आहुतिमिति
8 I. O. ०चवद्दिति
9 I. O. राजानमि
10 I. O. omits the bracketed portion
11 I. O. omits the bracketed portion
12 A इन्द्र
13 Both I. O. and A यजातीति
14 I. O. मुंच,
15 A यम
16 I. O. लोका इति ; A लोक इति
17 I. O. रुद्रो अग्नाविति and A रुद्रा अग्नाविति
18 I. O. ब्रह्मल्य०, A ब्रह्मा०
19 I. O. आयज्ञोरित्यादित्यानां and A आयङ्गौरित्यादित्यानां
20 I. O. मथे ; A मथि
21 Both I. O. and A यज्ञानमिति
22 I. O. तवो ; A उरो
23 A इत्यच्युत
24 I. O. भवकेशर्वौ मनवेवाहमि ईश०सूक्तं and A भवाकशार्वौ मनवे वाहमिति इशसूक्तं for the bracketed portion
25 Both I. O. and A रज
26 I. O. ध्रुव०
27 A यथामशेषं

नित्ययजमानसहितः[1] पुष्पधूपौ माषभक्तबलिमादाय, तूर्येषु नदत्सु मण्डपाद् बहिर्निर्गत्य, स्वस्वदिक्क्रमेण इन्द्रादिलोकपालान् प्रत्येक[2]मेह्येहीत्याद्युक्तमन्त्रैरावाह्य, आवाहनानन्तरमेव [3]ॐ इन्द्राय नम इत्यादि-प्रणवादिनमोऽन्तस्वनाममन्त्रैः प्रत्येकं सम्पूज्य, तथैव प्रत्येकं बलिं दद्यात् ।

[4]ततः शुचिस्थाने मण्डलिकाः कृत्वा, त्रैलोक्ये यानि [5]भूतानीत्यादीनि पठित्वा, त्रैलोक्यस्थेभ्यः [6][स्थावरेभ्यो भूतेभ्यो] नमः, [7][त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः], ब्रह्मणे नमः, विष्णवे नमः, शिवाय नमः, देवेभ्यो नमः, दानवेभ्यो नमः, गन्धर्वेभ्यो नमः, यक्षेभ्यो नमः, राक्षसेभ्यो नमः, पन्नगेभ्यो नमः, ऋषिभ्यो नमः, मनुभ्यो नमः, देवमातृभ्यो नमः, इति प्रत्येकं सम्पूज्य, माषभक्तबलिं दद्यात् ।

[8]तत ऋत्विग्भ्यो हैमकुण्डलसूत्रकटकाङ्गुरीयकाणि [9]विचित्राणि वासांसि शय्याः, एकत्विग्देयाच्च[10] [11]द्विगुणद्रव्यघटितां कुण्डलादिसामग्रीं, द्विगुणं वस्त्रं, द्विगुणद्रव्यकृताञ्च[12] शय्यां गुरवे दद्यात् । तद् यथा—ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्मभ्यो युष्मभ्यं कृतैतदधिवासनकर्मप्रतिष्ठार्थं दक्षिणां यथायथमेतानि हैमकुण्डलयुग[13]-यज्ञोपवीत-कटकाङ्गुरीयकाणि, [14][एतानि विचित्र]-वस्त्राणि, एताश्च शय्या ददानि । ब्राह्मणाः स्वस्तीति ब्रूयुः । ततः प्रथमलिखितक्रमेण ब्राह्मणत्रयं पुण्याहादिवाचनं कारयेत् ।

एतदपि ऋत्विगुपवेशनादि—मध्यब्राह्मणवाचनान्तं कर्म सर्वमहादानसाधारणम् । तत ऋत्विजो मङ्गलगीतवाद्य[15]-घोषेषु सत्सु [16]स्वस्वकुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः ।

ततो यजमानः[17]शुक्लमाल्यवस्त्राम्बरः पुष्पाञ्जलिमादाय तुलां त्रिः प्रदक्षिणीकृत्य, नमस्त

---

1 I. O. कृतनित्ययजमानसहित A कृतनित्यो यजमानसहितं
2 I. O. ०मह्येहीत्याद्युक्त० and A ०मिन्द्राद्युक्त०
3 I. O omits ॐ
4 Both I. O. and A अतः
5 Both I. O. and A भूतानि इत्यादि
6 A स्थानेभ्यो
7 I. O. omits the bracketed portion, A त्रैलोक्यस्थेभ्यो भूतेभ्यो नमः
8 A अतः शुचिस्नाता
9 A चित्राणि
10 A omits च
11 A द्विद्वि for द्वि
12 A ०कृतां
13 A ०युत
14 I. O. च चित्र
15 I. O. adds गीत here
16 I. O. कुम्भ and A स्वस्वकुण्ड for स्वस्वकुण्ड
17 A adds शुद्धमनाः after यजमानः

इत्यादिभिरस्मात् [1][संसारसागरादित्यन्त-]मन्त्रैरामन्त्र्य, पुष्पाञ्जलिनार्चयेत् । ततः पुनरपि तुलां प्रदक्षिणीकृत्य, खड्गचर्म[2]-कवचधरो [3]धृतसर्वालङ्कारो [4]वामदक्षिणक्रमेण करद्वयधृत[5][हैमधर्मराजसूर्यप्रतिमः उत्तरभागे तुलामारुह्य], पूर्वस्थापितहरिप्रतिमामुखं पश्यन् तिष्ठेत् । तत ऋत्विजो दक्षिणतुलाभागे सुवर्णमुत्कृष्टं यजमानसाम्यादधिकं यथा भवति तथा दद्युः । पुष्टिकामस्तु तथाधिकं दापयेत्, [6]यथा सुवर्णाधारस्य भूमिस्पर्शो भवति ।

ततस्तत्रैव क्षणं स्थित्वा, नमस्त इत्यादि मन्त्रद्वयं [7][पठेत् । ततोऽवतीर्य, आत्मतुलितं सुवर्णं गुर्वृत्विक्प्रमुखनानाब्राह्मणेभ्य] उत्सृज्य दद्यात् । तद्यथा—ॐ अद्य यथासम्भवगोत्रनामभ्यो [8]गुर्वृत्विक्प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्त-[9]तुलापुरुषदानफलप्राप्तिकामोऽहम् एतदुपकल्पितोपकरणालङ्कारसहितस्वशरीरतुलितं पञ्चवर्णवितानसहितं साधिकमति-[10][निर्मलं[11] काञ्चनं ददानि । गुर्वृत्विजः स्वस्तीत्युक्त्वा, सावित्रीं पठित्वा, सुवर्णमिदमग्निदैवतमित्युक्त्वा,][12] यथाशास्त्रं कामस्तुतिं [13]पठेयुः ।

ततो गुर्वृत्विग्भ्यो ग्रामं रत्नानि च दक्षिणां दद्यात् । तद् यथा—ॐ [14]अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं कृतैतद्दानकर्मप्रतिष्ठार्थं [15]दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि च[16] रत्नानि ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा स्वं स्वं सुवर्णभागं प्रत्येकं स्पृशेयुः । वितानञ्च वाक्यमन्तरेण गुरवे प्रतिपादनीयं, गुर्वृत्विक्प्रमुखब्राह्मणेभ्यस्तद्दानासम्भवात् । एवं गुर्वृत्विक्प्रमुखब्राह्मणदेयमहादानेषु सर्वेषु बोद्धव्यम् । यद्वा आत्मतुलितसुवर्णस्यार्द्धं गुरवे अपरमर्द्धमृत्विग्भ्यश्च[17] दद्यात् । तत्र दानवाक्ये—ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुक-[18]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तभाग-[19]व्यवस्थया फलपुष्पोपशोभितपञ्चवर्णवितानकसहितमिति च [20]विशेषः ।

---

1 A संसारादिपर्यन्त
2 I. O. कृताङ्ग for कवच
3 A कृतसर्व्वाङ्गालङ्कारा
4 Both I. O. and A omit वाम
5 A हैमतुलासमारुह्य for the bracketed portion
6 A तथा
7 A पठित्वा only for the bracketed portion
8 A सर्व्वत्विक०
9 A omits तुला
10 I. O. साधिकमभि ; A साधिकमिति
11 I. O. निर्म्मितं
12 A omits the bracketed portion
13 A पठेत्
14 A अद्यामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो
15 A दक्षिणामिदं योग्या
16 A omits च
17 I. O. omits च
18 A ०वेदशाखाध्यायिभ्यो
19 I. O. omits भाग
20 A शेषः

ततो जापकेभ्यो दक्षिणां दद्यात्। [1]ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्मभ्यो युष्मभ्यं कृतैतच्छान्तिकाध्यायजपकर्मप्रतिष्ठार्थं दक्षिणामेतत् काञ्चनं ददानि। जापकाः स्वस्तीति वदेयुः[2]। ततो यथासम्भवं दानसमयोप[3]-स्थितान् दीनानाथांश्च [4]तण्डुलकपर्दकादिभिस्तर्पयेत्। ततः [5]पूर्ववद् ब्राह्मणत्रयं पुण्याहादिवाचनं कारयेत्। ततः शीघ्रं तत सुवर्णं यथायथं [6]विभज्य दद्यात्। [7][अत्र च दानवाक्ये] अमुकदेशे अमुककाले इत्युक्त-[8][तत्तन्निमित्तोल्लेखः कर्तव्यः। एवञ्चावर्ता[9]न्तरेष्वपि यत्र देशकालविशेषश्रुतिरस्ति, तत्रा-[10]मुकदेशे अमुककाले इति [11]तदुल्लेखः करणीयः।

इति तुलापुरुषमहादानं समाप्तम्। |

---

1 A omits ॐ

2 A वदेत्

3 A ०स्थित

4 I. O. तद्दाल for तण्डुल

5 A पूर्वं

6 Both I. O. and A omit it

7 I. O. अत्र दाने वाक्ये and A तत्र दानवाक्ये।

8 A मिति only for the bracketed portion

9 I. O. र्त्ते for र्ता

10 I. O. omits अमुकदेशे

11 I. O. उल्लेखः

तथा हिरण्यगर्भ[1]महादानम् । (मत्स्यपुराणम्—२७५ अ:)

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।

नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥१॥

पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।

ऋत्विङ्मण्डपसम्भार भूषणाच्छादनादिकम् ॥२॥

कुर्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः ।

पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम् ॥३॥

तद्वदुपोषितः—तुलापुरुषवद् गुर्वृत्विग् जापकैः सह कृतोपवासो यजमान इत्यर्थः ।

ब्राह्मणं [2]रचयेत् कुण्डं तपनीयमयं शुभम् ।

द्विसप्तत्य-[3]ङ्गुलोच्छ्रायं हेमपङ्कज-[4]गर्भवत् ॥४॥

हेमपङ्कजगर्भवदिति मध्यस्थापितसौवर्णपद्ममित्यर्थः ।

त्रिभागहीन-[5][विस्तारमाज्य]क्षीराभिपूरितम् ।

दशास्त्राणि सरत्नानि दावं [6][सूचीं तथैव] च ॥५॥

अभिपूरितम् एकदेशपूरितम्, 'अभिरभागे' (१।४।९१) इति पाणिनिसूत्र एवाभिशब्दस्यै-कदेश-[7]वाचित्वेन प्रसिद्धत्वात् । दशास्त्राणि [अस्त्राणीव अस्त्राणि प्रधानफलसाधनानीत्यर्थः][8]

हेमनालं [9]सपिटकं बहिरादित्यसंयुतम् ।

तथैवा[10]वरणं नाभेरुपवीतञ्च काञ्चनम् ॥६॥

[पिटकं जातकोपवेशनार्थं पट्टकम्][11] । नाभेरावरणं—नाभ्याच्छादनार्थं सुवर्णपत्रकृतं[12] वस्त्राकारम् ।

पार्श्वतः स्थापयेत्तद्वद्धेमदण्डकमण्डलुम् ।

पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम् ॥७॥

---

1 A omits महा

2 I. O. चारयेत्

3 A omits त्य

4 I. O. adds गर्भज before गर्भवत्

5 A विभाग

6 A चचिरथैव

7 A ०वाद्दिर्वेन

8 A अस्त्राणि अनीकास्त्राणि प्रधाना-नीत्यथ: ; I. O. अस्त्राणीव क्वास्त्राणि प्रधानानीत्यर्थ:

9 A सपिठकं

10 I. O. ०वरणान्नाभे०

11 A पिठकं स्वल्पपट्टी for the bracketed portion

12 I. O. ०कृत

मुक्तावलीसमोपेतं पद्मरागदलान्वितम् ।
तिलद्रोणोपरिगतं वेदिमध्ये ततोऽर्चयेत् ॥८॥

अनेन [1]पिधानेन अनुष्ठानकाले गर्भमुखाच्छादनं कर्तव्यम्, अन्यत्र तद्विनियोगाश्रवणात् । पद्मरागदलान्वितम् उत्कृष्ट-[2]माणिक्यखण्डान्वितम् ।

ततो मङ्गलशब्देन ब्रह्मघोष-[3]रवेण च ।
सर्वौषध्युदक[4]स्नानस्नापितो वेदपुङ्गवैः ॥९॥

सर्वौषध्युदकमिति [5]कुण्डसमीपस्थकुम्भजलव्यतिरिक्तं सर्वौषधिमिश्रितं जलं, कुण्डसमीपस्थ[6]कुम्भजलविनियोगस्याग्रे 'चतुर्भिः कलसै'रित्यादिना[7] वक्ष्यमाणत्वात् ।

शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः ।
[8][इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥१०॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः] ॥११॥
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः ।
ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे ॥१२॥
नमस्ते भुवनाधार नमस्ते भुवनाश्रय[9] ।
नमो हिरण्यगर्भाय [10]गर्भे यस्य [11][पितामहः ॥१३॥
यतस्त्वं [12]सर्वभूतात्मा भूते भूते] व्यवस्थितः ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥१४॥
[13]एवमामन्त्र्य तन्मध्यमाविश्यास्त उदङ्मुखः ।
मुष्टिभ्यां परिसंगृह्य धर्मराजचतुर्मुखौ ।
जानुमध्ये शिरः कृत्वा [14]तिष्ठेदुच्छ्वासपञ्चकम् ॥१५॥

---

1 I. O. च विधानेन ; A विधानेन
2 I. O. omits कृष्ट
3 I. O. ०वर्गेन
4 I. O. स्नानस्नापिते ; A स्नाने स्नापितो
5 A कुण्डल०
6 I. O. कुण्ड०
7 I. O. omits ना
8 A omits the bracketed portion.
9 Both I. O. and A भुवनाश्रयः
10 I. O. ब्रह्मालोक
11 A omits the bracketed portion
12 I. O. नरभूतात्मा
13 I. O. एवमासङ्ग
14 A तिष्ठेदुच्छ्वायपङ्कजं, I. O. तिष्ठेदुच्छ्वासपञ्चकं

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ।
कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः ॥१६॥

[तत्तत्[1]संस्कारानुष्ठानाभिध्यानं कृत्वा तत्तत्संस्कारप्रधानमन्त्रान् [2]पठेयुरित्यर्थः ।

गीतमङ्गलघोषेण गुरुस्तथापयेत्ततः ।][3]
जातकर्मादिकाः कुर्युः क्रियाः षोडश चापराः ॥१७॥

अत्रापि तत्तत्संस्काराभिध्यान[4]पूर्वकप्रधानमन्त्रपाठो बोद्धव्यः, संस्काराणां तदानीं[5] करणासम्भवात् ।

[6]सूच्यादिकञ्च गुरवे दत्त्वा मन्त्रमिमं पठेत्[7] ।
नमो हिरण्यगर्भाय [8][ब्रह्मगर्भाय वै नमः ।
चराचरस्य जगतो गृहभूताय] वै नमः ॥१८॥
मात्राहं जनितः[9] पूर्वं मर्त्यधर्मामरोत्तम[10] ।
त्वद्गर्भसम्भवा[11]द्देव दिव्यदेहो भवाम्यहम् ॥१९॥
चतुर्भिः कलसैर्भूयस्ततस्ते द्विजपुङ्गवाः ।
स्नानं कुर्युः प्रसन्नाङ्गाः[12] सर्वाभरणभूषिताः ॥२०॥

कलसैरिति होमकुण्डसमीपस्थैः । कुर्युः कारयेयुः ।

[13]देवस्य त्वेतिमन्त्रेण स्थितस्य कनकासने ।
अद्य जातस्य तेऽङ्गानि [14]अभिषेक्ष्यामहे वयम् ।
दिव्येनानेन वपुषा [चिरं जीव][15] सुखी भव ॥२१॥

कनकासने स्थितस्य [16]कनकमयासनोपविष्टस्य । [17]'देवस्य त्वे'ति मन्त्रेण, 'अद्य जातस्य तेऽङ्गानि' इत्यादि-[18]पुराणमन्त्रेण च स्नपनं कारयेयुः ।

---

1 I. O. संख्याचा for संस्कारा
2 I. O. पठेद्वित्यर्थः
3 A the bracketed portion as तत्तत्संस्कारान् कन्यामुत्थाय यत्नतः
4 A °ध्यान°
5 I. O. तदानी
6 A माल्यादिकञ्च
7 A जपेत्
8 A the bracketed portion as गर्भभूताय
9 A जनितं
10 A नरोत्तमः and I. O. नरोत्तमाः for °मरोत्तम
11 A °द्देव for °द्देव
12 B and I. O. प्रसन्नाङ्ग
13 A देवस
14 I. O. अभिषेक्षामहे
15 I. O. चिरञ्जीव for the bracketed portion
16 A कनकासनो°
17 A omits it
18 I. O. °पूरण°

ततो हिरण्यगर्भं [1]तं तेभ्यो दद्याद्विचक्षणः ।
ते पूज्याः सर्वभावेन [2]बहवो वा तदाज्ञया ॥२२॥
[3]तत्रोपकरणं सर्वं गुरवे विनिवेदयेत् ।
पादुकोपानहौ छत्रं चामरासनभाजनम् ।

उपकरणमित्युपकरणत्वेन गुरवे देयमित्यर्थः ।

ग्रामं वा विषयं वापि यदन्य[4]द्दयितं भवेत् ॥२३॥
अनेन विधिना यस्तु पुण्येऽहनि निवेदयेत् ।
हिरण्यगर्भदानं स ब्रह्मलोके महीयते ॥२४॥
[5]पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ।
कल्पकोटिशतं यावद् ब्रह्मलोके महीयते ॥२५॥
कलिकलुष[6]-विमुक्तः पूजितः सिद्धसङ्घै-
रमरचमरमालावीज्यमानोऽप्सरोभिः ।
पितृशतमथ बन्धून् पुत्र[7]-पौत्राननेका-
नपि नरक[8]-निमग्नांस्तारयेदेक एव ॥२६॥
इति पठति [9][य इत्थं] [10]यः शृणोतीह सम्यङ्
मधुरिपुपुर-[11]लोके पूज्यते सोऽपि सिद्धैः ।
मतिमपि च जनानां[12] यो ददाति प्रियार्थं
विबुधपतिजनानां नायकः स्यादमोघम् ॥२७॥

प्रयोगः

अत्र यजमानः[13] समुत्पन्नहिरण्यगर्भमहादानदानेच्छः[14] तुलापुरुषमहादानलिखितं[15] खड्गचर्म[16]-मयढालसन्नाह-तुलास्थापनीयहरिप्रतिमासहित-सालङ्कार-तुला-वामहस्तग्राह्यसूर्यप्रति

---

1 A omits it
2 Corrected from M. P. and I. O. A बहुभगो
3 A ततोपकरण
4 A भूषितं for दयितं
5 A दूरेषु
6 A °कलुक°
7 A °पौत्रान्धिकानपि
8 A °निमग्नास्तारकोद्क
9 Corrected from M. P. I. O. इत्थ and A यह for the bracketed portion
10 A omits it
11 A °पुरा°
12 A जनाना
13 I. O. यजमान
14 A °महादानेषु
15 A °लिखित
16 I. O. °मयाट्टन° and A °मयातम° for °मयढाल°

मा-बहिःसर्वसम्भारम्, अधिकत्वेनाभिमत[1]-शुद्धसुवर्णघटितं स्वाङ्गुलेन [2]द्वासप्तत्यङ्गुलोच्छ्रायमुपर्यधोऽष्टचत्वारिंशदङ्गुलविस्तारं सुदृढ[3]-तलकान्वितं [4]कुण्डं, तन्मुखाच्छादनार्थं पद्माकारं [5]कुण्डमुखत्वेष्टनेनाङ्गुलाधिकमुत्कृष्टमाणिक्यभूषितं [6]मुक्तास्रग्विभूषितं सौवर्णं[7] पिधानं, कुण्डगर्भस्थापनार्थमभिमतपरिमाणसुवर्णघटितं पद्मं, कुण्डपूरणार्थं घृतं क्षीरञ्च[8], कुण्डपार्श्वे-[9]स्थापनार्थमभिमतसुवर्णघटित-[10][दात्र-सूची]-[11][कुश नाल]-कण्डोलिकाः, सौवर्ण-[12]पत्रोत्खाटितादित्यप्रतिमां, [13]नाभ्याच्छादनार्थं [14][सौवर्णपत्र-[15]रचितवस्त्राकारं, सौवर्णं यज्ञोपवीतं, दण्डं, कमण्डलुं, दानाद्यलङ्करणार्थं रत्नानि च, कुण्डाधःस्थापनार्थं तिलद्रोणं यजमानप्रथमस्नानार्थं तीर्थजलं सर्वौषधिञ्च, वामकरधारणार्थं] हैमीं[16] चतुर्मुखब्रह्मप्रतिमां[17], गुरुदक्षिणार्थं काष्ठपादुकायुगोपानद्युग-[18]च्छत्रचामरासनभाजनानि चोत्पादयेत्। ततस्तुलापुरुषोक्त-[19]समयानामन्यतमस्य पूर्वतरदिने यजमानगुर्वृत्विग्जापकास्तुलापुरुष[20]-वद्धविष्यभोजनादिकं कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने [21]हिरण्य-गर्भपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्युः। अपरदिने च[22] यजमानस्तुलापुरुष-[23][वद्-गोविन्दा]-द्याराधनादिमधुपर्कदानान्तं कर्म[24] गोविन्दाद्यभ्यर्चन-ब्राह्मणानुज्ञापन-[25]-दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने हिरण्यगर्भपदं प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्-[26][यजमानजापका उपवसेयुः। अपरदिने] च कृतनित्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मण-[27]वाचनान्तं कर्म तुलापुरुष-

---

1 I. O. and A स्वदत् for शुद्ध
2 A द्वासप्ताङ्गुलो०
3 I. O. ०तलिकान्वितं, A ०तुलिकान्वितं
4 A omits it
5 A कण्ड
6 A omits it
7 A सौवर्णा
8 A क्षीरं जरसामग्रीञ्च, B क्षीराजनसामग्रीं, I. O. क्षीराजनसामग्रीञ्च
9 A कुण्डपार्श्व
10 A दातवर्णचि for the bracketed portion
11 I. O. कुशजाल and A कलम for the bracketed portion
12 Both I. O. and A ०खटिता०
13 I. O. नाभ्भाच्छादनार्थं
14 A omits the bracketed portion
15 I. O. पात for पत्र
16 A हैमां, I. O. हैम
17 I. O. ०प्रतिमा
18 I. O. ०पानयुग०, A ०पानद्व०
19 A ०समानानाता० for ०समयाना०
20 A ०पुरुषा०
21 A हिरण्यगर्भं
22 I. O. omits it
23 A वद्गोविन्दा for the bracketed portion
24 Both I. O. and A omit it
25 A ०ज्ञापकं
26 A यजमानापरे for the bracketed portion
27 A ०वचनान्तं

[1]प्राक्रमनुसन्धायानुष्ठातव्यम् । [2]तत ऋत्विजः [3]सपिधानं हेम -[4]कुण्डमानीय प्रधान-वेदिकायां लिखितचक्रोपरि [5]तिलद्रोणं विकीर्य [6][तत्रारोपयेयुः] । [7][कुण्डमध्ये हैमं पद्मं निधाय] [8][यजमानोपवेशनयोग्यं यथा भवति, तथा कुण्डं घृतक्षीराभ्यां पूरयेयुः । कुण्ड-पार्श्वतश्च[9] हैमानभिमतरत्नयुता[10][न् दात्र-]सूची-नाल-पिटक-बर्हि-रादित्यप्रतिमा-[11]नाभ्यावरण-यज्ञोपवीत-दण्डकमण्डलून् संस्थापयेयुः ।] ततो यजमानं स्वस्ववेदस्थाभि-षेक-[12] मन्त्रैः सर्वौषधिमिश्रजलेन[13]स्नपयेयुः । तदा च मङ्गल-[14][तूर्यवन्दि-]घोषान् कारयेयुः ।

[15][ततो यजमानः] शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय 'नमो हिरण्य-गर्भाये'त्यादि —'दुःखसंसारसागरा'दित्यन्त-[16]मन्त्रैर्हिरण्यगर्भमामन्त्र्य पुष्पाञ्जलिनार्चयेत् । ततो दक्षिणक्रमेण हस्तद्वय-[17]धृतहेमधर्मराज-[18]चतुर्मुखप्रतिमो [19]हिरण्यगर्भमध्यं प्रविश्योद-ङ्मुख उपविश्य जानुमध्यार्पितशिरा[20] [21]उच्छ्वासपञ्चकं यावत्तिष्ठेत् । तदा च[22] ब्राह्मणाः पिधानेन [23]कुण्डमाच्छाद्य हिरण्यगर्भस्य गर्भाधानपुंसवनसीमन्तोन्नयनसंस्कारानभिध्याय[24] स्वस्वगृह्योक्तांस्तत्तत्संस्कारप्रधानमन्त्रान् पठेयुः । ततो गुरुर्मङ्गलतूर्यगीतवन्दिघोषेषु सत्सु [25]हिरण्यगर्भस्थं यजमानं करे [26]विधृत्योत्थापयेत् । तत [27][ऋत्विजो हिरण्यगर्भा-न्निर्गतस्य] यजमानस्य संस्कारार्थं स्वस्वगृह्यविहितान् जातकर्मादिषोडशसंस्कारानभिध्याय तत्तत्संस्कारप्रधानमन्त्रान् पठेयुः ।

1 A ०गृन्थ०
2 A तत्र
3 A समिधादान
4 A कुण्डलमानीय
5 A तिलाद्रोणं
6 A तत्र for the bracketed portion
7 I. O. omits the bracketed portion. A गुह्वलिग् for it
8 I. O. omits the bracketed portion
9 A कुण्डपार्श्वतः
10 A द्गात्र for the bracketed portion
11 A मासायवरण
12 Both I. O. and A omit षक
13 I. O. ०जलकुम्भचतुष्टयेन
14 A पूर्ववद् for the bracketed portion
15 A ततश्च
16 A सागरेत्यादि०
17 I. O. ०द्वयं
18 I. O. ०हिरण्यगर्भप्रतिमो, A चतुर्मुखप्रतिमा
19 A हिरण्यमध्यं
20 I. O. ०शिर
21 I. O. उच्छ्वास०, A उच्छ्वास०
22 I. O. ब्राच after this
23 I. O. कुम्भ०
24 A omits ध्याय
25 A हिरण्यस्थ
26 A विधृत्योपयेत्
27 A reads the bracketed portion as ऋत्विकहिरण्यगर्भान्वितस्य

संस्काराश्च षोडश ऋग्वेदे—जातकर्म नामकरणं निष्क्रमणम् अन्नप्राशनं चूडाकरणम् पनयनं त्रीणि वेदव्रतानि स्नानं विवाहः देवपितृमनुष्यभूतब्रह्मणां पञ्चमहायज्ञाः। यजुर्वेदे ; नामकरणं नास्ति, [1]चत्वारि वेदव्रतानीति [2]विशेषः। सामवेदे नामकरणमस्ति, न्नप्राशनं [3]नास्तीति यजुर्वेदाद्विशेषः। अथर्ववेदे—जातकर्म निष्क्रमणम् अन्नप्राशनं ोदानम् उपनयनं सावित्रीव्रतं [4]वेदव्रतं सावित्रीव्रतविसर्जनं [5]वेदव्रतविसर्जनं समावर्तनं विवाहः पञ्चमहायज्ञाश्चेति।

ततो यजमानः पूर्वोक्तं दात्रादिकं गुरवे प्रतिपादयेत्। ततो 'नमो हिरण्यगर्भाय ब्रह्मगर्भाय वै नमः' इत्यादि मन्त्रद्वयं [7]जपेत्। तत ऋत्विजो[8]ऽष्टौ वरणादिलब्धा- लङ्कारैरलङ्कृताः कनकमयासनोपविष्टं यजमानं 'देवस्य त्वे'ति वेदचतुष्टयस्थमन्त्रेण 'अद्य ातस्य तेऽङ्गानो'त्यादिना च पुराणमन्त्रेण कुण्डसमीपस्थकुम्भचतुष्टयजलेन स्नपयेयुः।

ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारो गुर्वृत्विक्प्रमुखनानाब्राह्मणेभ्यो हिरण्य-[9]गर्भमुत्सृज्य दद्यात्। तद्यथा—[10]ॐ अद्य यथासम्भवगोत्रनामभ्यो गुर्वृत्विक्- प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्तहिरण्यगर्भ-[11]महादानदानफलप्राप्तिकामोऽहमेतं[12] हिरण्य- गर्भं[13] ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'हिरण्यगर्भोऽयं विष्णुर्दै- वतः' इत्युक्त्वा[14] यथाशाखं कामस्तुतिं पठेयुः।

ततो गुरवे पादुकोपानच्छत्रचामरासन-[15]भाजनग्रामान् दक्षिणां दद्यात्। तद्यथा— [16]ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतानि पादुकोपानच्छत्रचामरासनभाजनानि [17]इयदुत्पत्तियोग्यांश्च भूमिं ददानि। स्वस्तीति गुरुर्वदेत्।

[18]तत ऋत्विग्भ्यो दक्षिणादानम्। तद् यथा—[19]ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं

---

1 A चत्वरि, I. O. रत्नानि
2 I. O. शेषः
3 A नास्ति
4 I. O. देवव्रतं
5 I. O. इदं व्रतविसर्जनं, A omits it
6 I. O. विश्वगर्भाय, A गर्भभूताय
7 I. O. पठेत्
8 I. O. क्रमात् for ऽष्टौ
9 A omits गर्भ
10 A omits it
11 Both I. O. and A omit महादान
12 A ॰कामोमेतं
13 A हिरण्य
14 I. O. ॰देवतमित्युक्त्वा
15 I. O. omits भाजन
16 A omits it
17 A यदुत्पत्ति॰
18 A ततो
19 A omits it

युष्मभ्यमहं दक्षिणा[1]मियदुत्पत्तियोग्यां भूमिम् एतानि च[2] रत्नानि ददानि। स्वस्तीति प्रत्येकमृत्विजो ब्रयुः। ततो गुर्वृत्विजः स्वं स्वं सुवर्णभागं स्पृशेयुः। यद्वा गुरवे हिरण्य-गर्भस्यार्द्धम् [3]ऋत्विग्भ्यश्चार्द्धं दद्यात्। तत्र च—ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुक-[4]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुक-[5]देवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तभागव्यवस्थया तिलद्रोणारोपितं[6] फल-[पुष्पोपशोभितं पञ्चवर्ण]-[7]वितानकसहितमिति च पूर्वदानवाक्याद्वि-शेषः।

ततो यजमानस्तुलापुरुष-[8]वज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनं [9]त्वरया यथायथं हिरण्यगर्भप्रतिपादनञ्च कुर्यात्।

इति हिरण्यगर्भमहादानं समाप्तम्[10]।

---

1 A °मिदं यदुत्पत्तियोग्यां
2 A omits it
3 A omits it
4 A omits वेदामुकामुक
5 I. O. omits देव
6 I. O. °रोपितां
7 A पुष्प for the bracketed portion
8 A °जापकेभ्यो
9 A कृत्वा
10 I. O. omits it

तथा ब्रह्माण्डमहादानम्। (मत्स्यपुराणम्—२७६अः)

अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम्।

[1]यच्छ्रेष्ठं सर्वदानानां महापातकनाशनम् ॥१॥

पुण्यं दिनमथासाद्य तुलापुरुषदानवत्।

ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्।

लोकेशावाहनं तद्वदधिवासनकं तथा ॥२॥

[2]कुर्याद्विंशपलादूर्ध्वमासहस्रा[3]च्च शक्तितः।

शकल[4]-द्वयसंयुक्तं ब्रह्माण्डं[5] काञ्चनं बुधः ॥३॥

दिग्गजाष्टसमायुक्तं षड्वेदाङ्गसमन्वितम्।

[6]लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम्।

शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ॥४॥

शिवाच्युतार्कशिखरम् ऊर्द्ध्वभागोत्खाटितशिवाच्युतार्कमूर्तिम्[7]।

वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्।

वितस्तेरङ्गुलशतं यावदायामविस्तरम् ॥५॥

वस्वादित्यमरुद्गर्भं गर्भोत्खाटितवस्वष्टक-द्वादशादित्य-सप्तमरुद्गणमूर्तिम्[8]। महारत्नसमन्वितम् उत्कृष्टरत्नसमन्वितम्। वितस्तेरङ्गुलशतं यावदित्यनेन वितस्तेरारभ्याङ्गुलशतं यावत् स्वेच्छया दैर्घ्यविस्ताराभ्यां ब्रह्माण्डं [9]कर्तव्यमित्यर्थः।

कौषेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत्।

तथाष्टादशधान्यानि समन्तात् [10]परिवारयेत् ॥६॥

अष्टादश[11][धान्यानि प]रिभाषोक्तानि।

पूर्वेणानन्तशयनं[12] प्रद्युम्नं पूर्वदक्षिणे।

प्रकृतिं दक्षिणे पार्श्वे सङ्कर्षणमतः परम् ॥७॥

---

1 I. O. यच्छ्रेष्ठं
2 I. O. कुर्याद्विंशत्पला०
3 A ०स्रा:
4 A कलस०, I. O. कलश०
5 A ब्रह्माण्ड
6 A लोकपालो०
7 I. O. ०मूर्त्ति:, A ०मूर्त्ति
8 I. O. ०मूर्त्ति:
9 Both I. O. and A omit कर्तव्यम्
10 I. O. परिकल्पयेत्
11 A omits the bracketed portion
12 A ०शायिनं

[1][अनन्तशयनं जलशायिनम् ।]

पश्चिमे चतुरो वेदाननिरुद्धमतः परम् ।

[2][अग्निमुत्तरतो हैमं वासुदेवमतः]परम् ॥८॥

समन्तात् [3]गुडपीठस्थानर्चयेत् काञ्चनान् बुधः ।

स्थापयेद्वस्त्रसंवीतान् पूर्णकुम्भान् दशैव तु ॥९॥

काञ्चनान् काञ्चनपलोत्खाटितान् ।

दशैव धेनवो देयाः [4]सहैमाम्बरदोहनाः ।

पादुकोपानहच्छत्रचामरासनदर्पणैः ।

भक्ष्य-[5]भोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ॥१०॥

भक्ष्यं पिष्टकं मूलञ्च, फलस्य [6]स्वशब्दोपात्तत्वात् । [7]एतैश्च पादुकादिभिः सहितः दश धेनवो देयाः पार्श्वतः स्थाप्या इत्यर्थः ।

[8]होमाधिवासनान्ते च स्नापितो वेदपुङ्गवैः ।

इममुच्चारयेन्मन्त्रं त्रिधा कृत्वा प्रदक्षिणम् ॥११॥

[9]होमाधिवासनान्ते इति [10]पूर्वमेव देवतारोपणरूपस्याधिवासनस्योक्तत्वाद्धिरण्यगर्भादिषु तथा दर्शनाच्च होमं लोकपालाद्यावाहनपूजा-[11][पर्यन्तं समाप्याधिवासनं] देयद्रव्यस्य वेद्युप-[12]रिस्थापनम् । ततः स्नापितो मन्त्रं पठेदिति सम्बन्धो बोद्धव्यः ।

नमोऽस्तु विश्वेश्वर विश्वधाम

जगत्सवित्रे भगवन्नमस्ते ।

[13]सप्तर्षिलोकामरभूतलेश

[14]गर्भेण सार्द्धं वितराभि-[15]रक्षाम् ॥१२॥

---

1 A अनन्तं शायिनं for the bracketed portion

2 I. O. अतः for the bracketed portion

3 I. O. पीठस्थानमर्चयेत्, A पीठस्थानार्चयेत्

4 I. O. सहैमाम्बरदोहनाः, A रत्निभाः सुरदोहनाः

5 Corrected from M. P. A. B and I. O. भोजन for भोज्यान्न

6 A मूलशब्दोपात इति

7 A तैश्च

8 A होमादि०

9 A होमादि०

10 A पूर्व only

11 Both I. O. and A पर्यन्तमयाधिवासनं for the bracketed portion

12 A omits रि

13 Both I. O. and A सप्तर्षि-लोकासनभूतलेश

14 I. O. adds गर्भश्च before this

15 A चि for भि

ये दुःखितास्ते सुखिनो भवन्तु
[1]प्रयान्तु पापानि चराचराणाम् ।
[2]त्वद्दानशस्त्राहतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु ॥१३॥

एवं [3]प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य ।
[4]भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण ॥१४॥

स्वल्पेषु होमं गुरुरेक एव
कुर्यादथैकाग्निविधानयुक्तया[5] ।
स एव [6]सम्पूज्यतमोऽल्पवित्तै-
र्यथोक्तवस्त्राभरणादिकेन ॥१५॥

स्वल्पेयु प्रचुरदानासमर्थेषु दातृषु सतसु गुरुरेक एव पूजनीयः ।

इत्थं य एतदखिलं पुरुषोऽत्र कुर्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
[7]निर्धूतकल्मष-विशुद्ध[तनुर्मुरारे][8]-
रानन्दकृत् पदमुपैति सहाप्सरोभिः[9] ॥१६॥

सन्तारयेत् पितृपितामहपुत्रपौत्र-
[10]बन्धुप्रियातिथिकलत्र-[11]शताष्टकं सः ।
ब्रह्माण्डदान-[12]शकलीकृतपातकौघ-
मानन्दयेच्च जननीकुलमप्यशेषम् ॥१७॥

इति पठति शृणोति वा य एवं
सुरभवनेषु गृहेषु धार्मिकाणाम् ।

---

1 I. O. omits it
2 A दुर्गानशास्त्राहत०
3 A प्रणम्यमेवविगर्भं
4 A भागत्रयं
5 A ०युग्मा
6 A पूज्यश्च तमाल्पवित्तै०
7 A निर्धूत०
8 A चमरारे for the bracketed portion
9 A सहाप्सरोभिः
10 A मातृ०
11 A ०शताष्टकं
12 Both I. O. and A ०सकली०

मतिमपि च ददाति [1]मोदतेऽसा-

[2]वमरपतेर्भवने सहाप्सरोभिः ॥१८॥

प्रयोगः

अत्र यजमानः समुपजातब्रह्माण्डमहादानदानेच्छस्तुलापुरुषमहादानलिखितं खड्गचर्ममय-ढाल[3]सन्नाह—तुलास्थापनीयहरिप्रतिमा—[4][सालङ्कारतुला]—हस्तग्राह्यप्रतिमा—वहिःसर्व-सम्भारम्, अधिकत्वेन विंशतिसंख्यपलेभ्यः ऊर्द्ध्वं सहस्रपलावधि अभिमतकाञ्च[नघटितं][5], दैर्घ्यप्रस्ताराभ्यां[6] वितस्तिमारभ्याङ्गुलशतपर्यन्तम्, सम्पुटमेलनीयखण्डद्वयरूपम्,[7] अन्तरुत्-खाटितचतुर्मुखब्रह्म-[8]वस्वष्टक-द्वादशादित्य-[9]सप्तमरुद्गणप्रतिमं, वहिः स्वस्वदिक्क्रमोत्-खाटितैरावतादि-[10] दिग्गजाष्टकेन्द्रादिलोकपालप्रतिमम्, अभिमत-[11] स्थानपङ्क्त्युत्खाटित-शिक्षाकल्पनिरुक्तच्छन्दोज्योतिषव्याकरणरूप-वेदाङ्गषट्कप्रतिमम्, उपरिखण्डोर्द्ध्व-[12]भागोत्-खाटित-शिवाच्युतार्कमालक्ष्मीप्रतिमम्, अभीष्टोत्कृष्टरत्नखचितं ब्रह्माण्डं ; ब्रह्माण्ड-[13][पूर्वादि-दिगन्त]स्थापनार्थं काञ्चनान्तरविरचितपत्त्रोत्खाटित-जलशायि-प्रद्युम्न-प्रकृति-सङ्कर्षण-वेदचतु-ष्टयानिरुद्धाग्निवासुदेवप्रतिमाः. जलशाय्यादिप्रतिमास्थापनार्थमष्टौ गुडपिण्डान्, ब्रह्माण्डा-च्छादनार्थं कोषकारतन्तु[14]-निर्मितं वस्त्रं, ब्रह्माण्डस्थापनार्थं तिलद्रोणं, ब्रह्माण्ड-[15]पार्श्व-स्थापनार्थमष्टादश[16][धान्यानि, दश]कुम्भान्, तद्वेष्टनार्थं [17]दश वस्त्राणि, ब्रह्माण्डपार्श्व-[18]-स्थापनार्थं दश धेनूः, तदलङ्करणार्थं दश हैमशृङ्गयुगवस्त्राणि, उपदोहनार्थं दशकांस्यपात्राणि, ब्रह्माण्ड-[19]पार्श्वस्थापनार्थञ्च काष्ठमयपादुकायुगोपानद्युगच्छत्रचामरासनदर्पणपिष्टकसामग्र्यन्न-सामग्री-[20] क्षुफलमूलमाल्यानुलेपनसामग्रीरुत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य

---

1 I. O. omits मोदते

2 Both I. O. and A ०रमर०

3 I. O. मयत्नेन सह तुला and मयातुल for मयढाल

4 A साला

5 I. O. omits the bracketed portion

6 A दैर्घ्यप्रस्ताभ्यां

7 A ०द्वयम्

8 I. O. सुष्टक and A ष्ट

9 I. O. omits सप्त

10 A omits दि

11 A स्थापनं०

12 I. O. भागानुत्खाटित, A भागादुत्खाटित

13 A reads the bracketed portion as पूर्व दिशि

14 A न्तु for तन्तु

15 Both I. O. and A omit पार्श्व

16 A omits the bracketed portion

17 A अष्टादश

18 I. O. omits पार्श्व

19 I. O. omits पार्श्व

20 I. O. adds दीपसामग्री after this

पूर्वतरदिने यजमान-[1]गुर्वृत्विग्जापकास्तुलापुरुषवद्धविष्यभोजनादिकं[2] कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने ब्रह्माण्डपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्युः। ततोऽपरदिने यजमानस्तुला-[3]पुरुषवद् गोविन्दायाराधनादि-मधुपर्कदानान्तं[4] कर्म[5] गोविन्दाय[6]र्चनब्राह्मणानुज्ञापन[7]-दानसङ्कल्प-पुण्याहादिवाचन-[8]वरणवाक्येषु तुलापुरुषपदस्थाने ब्रह्माण्डपदं प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उपवसेयुः। अपरदिने च कृतनित्या[9]-स्तुलापुरुषवदग्निस्थापनादि-मध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत ऋत्विजः पूर्वघटितं यथोक्तरूपं सम्पुटमिलित-[10]शकलद्वयनिर्मितं ब्रह्माण्डमानीय, प्रधानवेद्यां लिखितचक्रोपरि तिलद्रोणं विकीर्य, [11]तदुपरि स्थापयित्वा, कौषेयवस्त्रेणाच्छाद्य, ब्रह्माण्डस्य [12]सर्वपार्श्वेष्वष्टादशधान्यानि आरोपयेयुः। ततो ब्रह्माण्डस्य पूर्वादिक्रमेण गुड-[13]पिण्डानामुपरि पूर्वोक्त-[14]जलशाय्यादिप्रतिमाः स्थापयेयुः। गुरुश्च ताः[15] क्रमेणैव प्रणवादिचतुर्थ्यन्तेन नमोऽन्तेन स्वनाममन्त्रेण प्रत्येकं पूजयेत्। तत ऋत्विजो ब्रह्माण्डपार्श्वे[16] वस्त्रवेष्टितग्रीवान् दश पूर्णकुम्भान्, [17]हेमशृङ्गीर्वस्त्राच्छादिताः सकांस्यदोहना दश धेनूः, पादुकाद्युपकरणञ्चा[18]रोपयेयुः। ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः।

ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय ब्रह्माण्डं त्रिः प्रदक्षिणीकृत्य 'नमोऽस्तु विश्वेश्वरे'त्यादि मन्त्रद्वयं पठित्वा पुष्पाञ्जलिनाभ्यर्च्य प्रणम्य [19]गुर्वृत्विग्भ्यो दद्यात्। [20][तद् यथा—ॐ] अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्त-ब्रह्माण्डमहादान-[21]दानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थया [22]एतन्महारत्नभूषितं कौषे[23]-यवस्त्रसंवीतं तिल-

---

1 I. O. यजमान:
2 Both I. O. and A ०भोजनादि
3 I. O. पुरुवद् and A पुरुषपद्वद्
4 A ०दानाचरणान्तं
5 Both I. O. and A omit it
6 A ०भ्यार्चन
7 A ०ज्ञापन
8 A वरण twice
9 A कृतनित्यकृत्य०
10 Both I. O. and A ०सकल०
11 Both I. O. and A तत्रोपरि
12 I. O. सर्वपार्श्वे अष्टादश धान्यानि
13 I. O. ०पिष्टा०
14 A ०जलशयनादि०, I. O. ०क्रमेशय्यादि०
15 I. O. भाव
16 A ०पार्श्वे
17 A हेमवस्त्राच्छादितान्
18 A omits च
19 A ऋत्विग्भ्यो
20 A omits the bracketed portion
21 A omits दान
22 A एतं महा०
23 I. O. adds महा before वस्त्र

द्रोणस्थापितमष्टादशधान्यसहितं गुडपीठस्थकाञ्चनानन्तशयन[1]-प्रद्युम्न-प्रकृति-सङ्कर्षण-वेद-चतुष्टयानिरुद्धाग्नि-वासुदेव-प्रतिमासहितं वस्त्रसंवीतपूर्णकुम्भदशक[2]-हेमशृङ्गवस्त्राच्छादित-सकांस्य[3]-दोहनधेनुदशक[4]-सहितं पादुकोपानच्छत्रचामरासनदर्पणभक्ष्यभोजनदीपेक्षुमाल्यफला-नुलेपन-पुष्पफलोपशोभित-[5]पञ्चवर्ण-वितानकसहितं ब्रह्माण्डं ददानि।

प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा, ब्रह्माण्डमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः[6]। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्ति-योग्यां भूमिमेतानि च रत्नानि ददानि, प्रतिग्रहीतारः स्वस्तीत्युक्त्वा ब्रह्माण्डं स्पृशेयुः। ततस्तुला-पुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं पुण्याहादिवाचनञ्च [7][कृत्वा, ब्रह्माण्डं] दशधा विभज्य, भागद्वयं गुरवे, ऋत्विग्भ्यश्चाष्टौ भागान् त्वरया प्रतिपादयेत्। यथोक्तस्वल्प-ब्रह्माण्डदाने तु [8]गुरुरेकाग्निवत् [9]सर्वम् ऋत्विगादिकर्तव्यं स्वगृह्योक्तविधिना शान्तिकाध्याय-जपवह्निः[10] कुर्यात्। [11]जापकास्तु [12]पूर्ववदेव कार्याः। कुशमयश्च ब्रह्मा कार्यः। तदा च यजमानो गुरवे [13]तत् [14][सर्वं महादानं] सम्प्रदानैकवचनोहेन दद्यात्।

इति ब्रह्माण्डमहादानं[15] समाप्तम्[16]।

---

1 A शायिन

2 A दश

3 A omits दोहन

4 A दश

5 I. O. ०ञ्च०

6 A पठेत्

7 A omits the bracketed portion

8 I. O. गुरवेवैकाग्निवत्, A गुरवे-काग्निवत्

9 A सर्व्वं

10 I. O. शान्तिकाध्याजपं च, A शान्ति-कध्याय जपं वह्निः

11 A जापकास्तु, I. O. याजकास्तु

12 A सर्व्ववादरा:

13 A omits it

14 A reads the b. p. as सर्व्वमहा-दान

15 A ब्रह्माण्डदानमाहात्म्यं

16 I. O. omits it

तथा कल्पपादपमहादानम्। (मत्स्यपुराणम्—२७७ अः)

कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्वपातकनाशनम् ॥१॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कृत्वा लोकेशावाहनं तथा ॥२॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
काञ्चनं कारयेद्वृक्षं नानाफलसमन्वितम् ॥३॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्ध्वमा[1]-सहस्रात् प्रकल्पयेत् ॥४॥
अर्द्ध-[2]क्लृप्तं सुवर्णस्य कारयेत् कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च [3]सितवस्त्रयुगावृतम् ।
अर्द्ध-[4]क्लृप्तं यावदुपात्तसुवर्णस्यार्द्धेन निर्मितम् ।
ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ॥५॥
कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ।
सन्तानं [5]पूर्वतस्तद्वत् [6]तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि ॥६॥

सन्तानं [7]पूर्वतस्तद्वदिति [8]गुडप्रस्थस्थं सितवस्त्रयुगावृतमित्यर्थः। कामदेवमधस्ताच्चेति सन्तानवृक्षस्याधस्तात् सकलत्रं कामदेवं प्रकल्पयेदिति योजना[9], मन्दारादिषु एकैकदेवतासम्बन्धश्रुतेः।

पश्चिमे पारिभद्रन्तु[10] सावित्र्या सह जीरके ।
सुरभीसंयुतं तद्वत्[11] तिलेषु हरिचन्दनम् ।
तृतीयांशेन कुर्वीत सौम्येन फलसंयुतम् ॥७॥

---

1 I. O. ०सा०
2 A ०क्लृप्या
3 A वसित०
4 A ०क्लृप्तं
5 A पूड्र्ववत for पूर्वत
6 I. O. बहुवीआंशेन
7 A पूड्र्ववत् सद्वत् इति
8 A गुडप्रस्थं
9 A योजनं
10 I. O. पारिभद्रस्तु, M. P. पारिजातन्तु
11 A तस्तु

कौषेयवस्त्रसंयुक्तानिन्तुमाल्यफलान्वितान् ।

तुर्तीयांशेन सन्तानघटनावस्थितसुवर्णतृतीयभागेन । सौम्येन उत्तर[1]-दिग्भागेन ।

तथाष्ट[2] पूर्णकलसान् पादुकासनभाजनान्[3] ॥८॥

दीपि[4]कोपानहच्छत्रचामरासनसंयुतम् ।

पादुकासनभाजनान् पादुकासनभाजनसहितानित्यर्थः । आसनपदं चात्र कलसावस्थानोचितासनपरं, चामरासनसंयुतमिति[5] पुनरासनपदश्रवणात् ।

फलपङ्क्तियुतं तद्वदुपरिष्टा[6][द् वितानकम् ।]

तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥९॥

होमाभिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।

त्रिः प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥१०॥

नमस्ते कल्पवृक्षाय चिन्तितार्थप्रदायिने[7] ।

विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये[8] ॥११॥

यस्मात्त्व[9]मेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।

[10]मूर्तामूर्तं परं बीजमतः पाहि सनातन ॥१२॥

त्वमेवामृतसर्वस्वमनन्तपुरुषोऽव्ययः ।

सन्तानाद्यैरुपेतः सन्[11] पाहि संसारसागरात् ॥१३॥

एवमामन्त्र्य तं [12]दद्यात् गुरवे कल्पपादपम् ।

चतुर्भ्यश्चापि ऋत्विग्भ्यः सन्तानादीनि कल्पयेत् ॥१४॥

एतेन चत्वार [13]एवर्त्विजः कर्तव्याः, कुशमयाश्चत्वारो ब्रह्माण इत्युक्तं [14]भवति ।

स्वल्पेष्वेकाग्निवत् कुर्याद् [15]गुरुरेवाभिपूजितः ।

न वित्तशाठ्यं कुर्वीत न च विस्मयवान् भवेत्[16] ॥१५॥

---

1 I. O. ०द्दिग्विभागेन
2 A तथा
3 A ०भाजान
4 A दीप०
5 A omits इति
6 A तिलानां and I. O. तिलानां for the bracketed portion
7 Corrected from M. P. A चिन्तितामम्प्रदायकः, B चिन्तिभाशु प्रदाय ते, I. O. चिन्तितार्थप्रदाय च
8 A ०मूर्त्तिने
9 A ०त्तुमेव, I. O. ०त्त्वामेव
10 Both I. O. and A मूर्त्तामूर्त्त परं.
11 I. O. स
12 A विद्याद्
13 I. O. एव चर्त्विजः, A एवद्विजः
14 A सम्भवति
15 A गुरवेवाभिपूजितः, I. O. गुरवे वातिपूजितः, M. P. गुरवे चाभिपूजनम्
16 A मरः

[1] [न च विस्मयवान्] इयन्मया दत्तमिति नाहङ्कारवान् भवेदित्यर्थः ।

अनेन विधिना यस्तु [प्रदद्यात् कल्पपादपम्][2] ।
सर्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥१६॥
[3][अप्सरोभिः परिवृतः] सिद्धचारणकिन्नरैः ।
भूतान् भव्यांश्च मनुजांस्तारयेदात्मसम्मितान् ॥१७॥
स्तूयमानो दिवः पृष्ठे पुत्रपौत्रप्रपौत्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ॥१८॥
दिवि कल्पशतं तिष्ठेद्राजराज्यो भवेत्ततः ।
[4]नारायण-बलोपेतो नारायणपरायणः ।
नारायणकथासक्तो[5] नारायणपुरं व्रजेत् ॥१९॥
यो वा पठेत् [6]कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद् वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्मन्वन्तरं वसति पापविमुक्तदेहः ॥२०॥

प्रयोगः

अत्र यजमानः समुपजातकल्पपादप-[7]महादानदानेच्छस्तुलापुरुषलिखितं खड्गचर्म-[8]मयढाल-सन्नाहतुलास्थाप्यहरिप्रति[9] [मा-सालङ्कारतुला-हस्तग्राह्य-प्रतिम-]ऋत्विक्चतुष्टय-[10]वरणदक्षिणा-सामग्रीवहिः सर्वसम्भारम्, अधिकत्वेन पलत्रयादूर्द्ध्व सहस्रपलावधि यथेष्टं काञ्चन-मुपादाय तस्यार्द्धेन [11]कल्पपादपमपरार्द्धेन समभागेन सन्तानं [12][मन्दारं पारिभद्रं] हरि-चन्दनम् एवं पञ्च तरून् पञ्चशाखान् सौवर्णनानाफलपङ्क्ति-हैमपत्रनिर्मितानेकवस्त्राकारसहितान्

---

1 Both I. O. and A omit the bracketed portion
2 Supplied from M. P. A, B and I. O. महादानं निवेदयेत्
3 A reads the bracketed portion as असरोपिभिः परिष्टतः
4 I. O. नारायणोवलोपेतो, A नारायणोवलोपेता
5 Both I. O. and A ०शक्तो
6 A कल्पतरुप्रदानां, M. P. सकल-कल्प०
7 A ०दानस्थानेषु
8 I. O. मयार्ज्जन and A मयाच्छन्न for मयढाल
9 A omits the bracketed portion
10 A ०वरणादि०
11 I. O. कल्पपादमपरर्द्धेन, A कल्प-पादपरार्द्धेन
12 I. O. reads the bracketed portion as मन्दारपरिभद्रं

केयूरकुण्डलाद्यभिमतालङ्कारभूषितान्, एषामाच्छादनार्थं श्वेतवस्त्रयुगपञ्चकं. तरूणा[1]मधः-स्थापनार्थम् गुडप्रस्थद्वयं, प्रत्येकं [2][प्रस्थपरिमितान् पात्रस्थ]-घृतजीरक-[3]तिलांश्च[4], -कल्पवृक्षाधः-स्थापनार्थम् अभीष्टसुवर्णान्तर[5]-पलोत्-[6]खाटिता ब्रह्मविष्णु-[7]शिवभास्करप्रतिमाः, यथोक्तक्रम-तरुचतुष्टयाधःस्थापनार्थम् अभिमतसुवर्णान्तरपलोत्खाटिताः सरति-कामदेव-लक्ष्मी-सावित्री-सुरभिप्रतिमाश्च[8], कल्पतरु-[9]पार्श्वस्थापनार्थम् [10][अष्टौ कुम्भान् तदधःस्थापनार्थं] कुशादि-निर्मितासनाष्टकं, कुम्भाच्छादनार्थं कौषेयवस्त्राष्टकं, कुम्भपार्श्वस्थापनार्थम् [11]इक्षुदण्डाष्टकं पुष्पमाल्या-[12]ष्टकसामग्रीं यथेष्टफलाष्टकं पादुकायुगाष्टकं कांस्यभाजनाष्टकञ्च, कल्पतरुपार्श्वा-र्पणार्थं दीपिकोपानद्युगच्छत्रचामरा-[13]सनाष्टादशधान्यानि चोत्पादयेत् ।

ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने यजमानगुर्वृत्विग्जापकाः तुलापुरुषव-द्धविष्यभोजनादिकं कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने [14]कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्युः ।

ततोऽपरदिने यजमानस्तुलापुरुषवद् गोविन्दा-[15]द्याराधनादि-मधुपर्कदानान्तं कर्म[16] गोविन्दा-द्यभ्यर्चन-ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने [17]कल्प-पादपपदं प्रक्षिप्य कुर्यात् । ततो गुर्वृत्विग् यजमानजापका उपवसेयुः ।

अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापना[18][दि-मध्यब्राह्मणवाचना]न्तं कर्म यथा-यथं कुर्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धाय अनुष्ठातव्यम् । तत ऋत्विजः कल्पतरुमानीय प्रधानवेद्यां लिखितचक्रमध्ये गुडप्रस्थं दत्त्वा [19]तदुपरि स्थापयेयुः । ततस्तस्याधो गुडप्रस्थोपरि पङ्क्तिक्रमेण सुवर्ण-[20]पलोत्खाटिता ब्रह्मविष्णुशिव-[21]भास्करप्रतिमाः

---

1 I. O. ०मत्र०, A ०मर०
2 Both I. O. and A प्रस्थपरिमिताश्चात्र for the bracketed portion
3 I. O. ०चौरक०
4 A तिला:
5 I. O. ०न्तरं
6 A पात्रोत्०, I. O. यन्त्रोत्०
7 A ०शिवाच्युतार्कप्रतिमा:
8 I. O. ०प्रतिमा
9 I. O. ०पार्श्व
10 Both I. O. and A omit the bracketed portion
11 A इक्षुकाष्टकं
12 Both I. O. and A ०मात्रा०
13 Both I. O. and A omit सना
14 A कल्पपादपदं
15 I. O. omits न्दा
16 I. O. and A omit it
17 A कल्पपादपदं
18 A omits the bracketed portion
19 A परि
20 I. O. ०यन्त्रोत्०
21 A ०शिवा०

स्थापयेयुः । [1]तत्पूर्वतोऽधस्तादारोपित-सरतिकामदेवप्रतिमं [2][गुडप्रस्थोपरि सन्तानं, कल्पतरुदक्षिणतोऽधःसमारोपितलक्ष्मीप्रतिमं घृतप्रस्थोपरि मन्दारं, [3][कल्पतरुपश्चिमतः अधः-] समारोपितसावित्रीप्रतिमं जीरकप्रस्थोपरि पारिभद्रं, [4][कल्पतरूत्तरतः अधः-]समारोपित-सुरभिप्रतिमं] तिलप्रस्थोपरि [5]हरिचन्दनञ्चारोपयेयुः । सर्वांश्च वृक्षान् प्रत्येकं[6] सितवस्त्रयुगेना-च्छादयेयुः । [7][अष्टासु च दिक्षु] प्रत्येकं कौषेयवस्त्राच्छादितान् इक्षुदण्डफलान्वितान् माल्यालङ्कृतान् अष्टौ [8]पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजनासनेष्वारोप्य, कल्पतरुपार्श्वे[9] पूर्वोक्तदीपिका-[10]द्युपकरणमारोपयेयुः ।

[11]ततो मङ्गलतूर्यगीत-[12]वन्दिघोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं [13]त्रिः [14]प्रदक्षिणीकृत्य, 'नमस्ते कल्पवृक्षाये'त्यादि 'पाहि संसारसागरा'दित्यन्त-मन्त्रान् पठित्वा, पुष्पाञ्जलिनाभ्यर्च्य गुर्वृत्विग्भ्यो यथायथं दद्यात् ।

ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पपादपमहादान[15]-दानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यव-स्थया एतं गुडप्रस्थारोपितं सौवर्णब्रह्मविष्णुशिवभास्कर-[16][प्रतिमासितवस्त्रयुगान्वितं गुडप्रस्था-रोपितसौवर्णसरतिकामदेवप्रतिमासितवस्त्रयुगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपितसौवर्ण-लक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णमन्दारसहितं जीरकप्रस्थारोपितसौवर्णसावित्री-]प्रतिमा-सितवस्त्रयुगान्वितसौवर्ण-[17]पारिभद्रसहितं तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवस्त्रयुगा-न्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्र-[18]युगवेष्टितग्रीवेक्षुमाल्यफलान्वित-कुशासनस्थ[19]-

---

1 I. O. omits तत्
2 A omits the bracketed portion
3 I. O. कल्पतरो: for the bracketed portion
4 I. O. कल्पतरोरध:
5 A omits हरि
6 A प्रत्येक
7 I. O. अष्टासु दिक्षु, A अष्टादिक्षु
8 A omits पूर्ण
9 A पार्श्वं
10 I. O. has a lacuna here, A स्रु
11 A omits it
12 I. O. वाद्य for वन्दि
13 A omits it
14 A प्रदक्षणीकृत्य
15 A omits दानफल
16 A omits the bracketed portion
17 A सन्तान before this
18 I. O. omits युग
19 A omits स्थ

-पादुकायुगकांस्यभाजनयुत-पूर्णकुम्भाष्टक[1]-[दीपिकोपानद्][2]-युगच्छत्रचामरासन--[3]फलमाल्ययुत-पञ्चवर्णवितानकाष्टादशधान्ययुतं [4]कल्पपादपं ददानि ।

[5]प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथम् 'अमुकपादपोऽयं [6]विष्णुदैवतः' इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो दक्षिणादानम् । ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिम् एतानि च[7] रत्नानि ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं [8][तरून् मूलेषु] स्पृशेयुः । ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनञ्च कुर्यात् । ततः कल्पपादपं[9] गुरवे, [10][सन्तानकादींश्च चतुरो] वृक्षान् [11]ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत् । [12][स्वल्पकल्पपादपदाने तु] [13]गुरुरेकाग्निवत् स्वगृह्योक्तविधिना सर्वं ब्रह्माण्डदानवत् कुर्यात् ।

इति कल्पपादपमहादानं समाप्तम् ।

1 A omits क
2 A पादुकापानद्द for the bracketed portion
3 A omits फल
4 A कल्पपादामहादानमहं
5 A गृहीतारः
6 Both I. O. and A विष्णुदैवतमित्युक्त्वा
7 A omits it
8 A तरुमूलेषु for the bracketed portion
9 Both I. O. and A कल्पपादपञ्च
10 Both I. O. and A read the bracketed portion as सन्तानकादींश्चतुरो
11 A ऋग्वेदादि॰
12 I. O. स्वल्पकल्पपादपदानेषु and A स्वल्पपादपदाने तु
13 I. O. गुरुरेवैकाग्निवत्

तथा गोसहस्रमहादानम्। (मत्स्यपुराणम्—२७८ अः)

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्।
गोसहस्रप्रदानाख्यं सर्वपापहरं परम् ॥१॥
पुण्यां तिथिमथासाद्य युग[1]-मन्वन्तरादिकाम्।
[2]पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा ॥२॥

दानदिनात् पूर्वत्रिरात्रं दुग्धमात्रमाहारं कुर्यात, अशक्तावेकरात्रमित्युन्नेयम्।

लोकेशावाहनं कुर्यात्तुलापुरुषदानवत्।
पुण्याहवाचनं तद्वद्धोमकार्यन्तथैव च ॥३॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्।
वृषं लक्षणसंयुक्तं वेदिमध्येऽधिवासयेत् ॥४॥

वृषलक्षणञ्च विष्णुधर्मोत्तर उक्तम्, तद् यथा—

[3][तस्याः सुतं] परीक्षेत [4]वृषभं लक्षणान्वितम्।
उन्नतस्कन्धककुद[5]-मृजुलाङ्गुलकम्बलम् ॥५॥
महाकटितटस्कन्धं वैदूर्यमणिलोचनम्।
प्रवालशफशृङ्गाग्रं सुदीर्घबलवालधिम् ॥६॥
नवाष्टादशसंख्यैर्वा तीक्ष्णाग्रै[6]-र्दशनैः शुभैः।
मल्लिकाक्षश्च [7]मोक्तव्यो गृहेऽपि धनधान्यदः ॥७॥

तथा(वि. ध. १।१४६।४७-५५)—

[8]मोक्तव्यानाञ्च [9]धूर्याणां भूयो वक्ष्यामि लक्षणम्।
[10]स्वस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः ॥८॥

---

1 A ०मन्तरारादिक

2 I. O., A and M. P. पयोव्रत त्रिरात्र

3 A तस्माद् वृषं for the bracketed portion

4 A वृषभ

5 A omits मृ

6 A ०द्दशनैः

7 I. O. योक्तव्यः, A योक्तव्य

8 I. O. and A योक्तव्यानाञ्च

9 I. O. कार्याणां, A and V. D. धार्याणां

10 A स्वस्तिकाच्छारशृङ्गाग्रा

महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
[1]महोरस्का महोत्साहा[2] महाबलपराक्रमाः ॥९॥
शिरः कर्णौ ललाटञ्च वालधिश्चरणानि च[3] ।
[4]नेत्रपार्श्वे च कृष्णानि शस्यन्ते चन्द्रमस्त्विषः[5] ।
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः ॥१०॥
भूमौ कर्षति लाङ्गूलं प्रलम्बस्थूल[6]-वालधिः ।
पुरस्ता[7]-दुन्नतो नीचः[8] पृष्ठतश्च प्रशस्यते ॥११॥
शक्तिध्वजपताकाभा येषां [9]राजिर्विराजते ।
अनड्वाहस्तु[10] ते धन्या वित्तजीवजयावहाः ॥१२॥
प्रदक्षिणं[11] निवर्तन्ते स्वयं [12][ये विनिवर्तिताः] ।
समुन्नत[13]-शिरोग्रीवा धन्यास्ते यूथवर्धनाः ॥१३॥
रक्तशृङ्गाग्रनयनः[14] श्वेनवर्णो भवेद् यदि ।
शफैः [15]प्रवालसदृशैर्नास्ति [16]धन्यतरस्ततः ॥१४॥
एते धूर्याः[17] प्रयत्नेन [18]मोक्तव्या यदि वा वृषाः ।
धारिताश्च तथा [19]मुक्ता धनधान्यविवर्धनाः ॥१५॥ इति ।
[गोसहस्राद्विनिष्क्रृष्य गवां दशकमेव वा ।][20]
गोसहस्रं वहिः कुर्याद् वस्त्रमाल्यविभूषितम् ॥१६॥

गोसहस्राद् विनिष्कृष्येति [21][गोसहस्रात पृथक्कृत्य], एतेन दशाधिकं गोसहस्रमुत्पाद्यं 'गोसहस्रं बहिः कुर्या'दिति श्रुतेः ।

---

1 I. O. महोवचा, A महारोचा
2 A महोत्साहो V. D. महोक्षसा
3 A वा
4 I. O. नेत्रं पार्श्वं
5 Both I. O. and A चन्द्रमान्विषः
6 A ०स्तुल०
7 I. O. ०दुद्यतो, A ०त्वन्यतो, V. D. ०न्न तथा
8 Both I. O. and A नीलः
9 A रजिं and I. O. वाचि for राजि
10 A अनड्वाहस्त्व, I. O. अनड्वाहाश्च
11 A प्रदक्षिण
12 A परिनिवर्त्तिताः for the bracketed portion
13 I. O. समुन्नतं
14 A यन for नयनः
15 I. O. प्रधान०
16 A धान्यवतस्ततः
17 I. O. धार्याः, A भार्या, V. D. धन्याः
18 Both I. O. and A योक्तव्या
19 I. O. युक्ता
20 M. P. omits the bracketed portion
21 A reads the bracketed portion as गोसहात्पृथक्कृत्स

सुवर्णशृङ्गाभरणं रौप्यपादसमन्वितम् ।
अन्तः [1]प्रवेश्य दशकं वस्त्रमाल्यैस्तु पूजयेत् ॥१७॥

सुवर्णशृङ्गाभरणं सुवर्णशृङ्गं सुवर्णाभरणञ्च । एतदाभरणं [2]गोसहस्रस्यैव, गोदशके 'अन्तः[3] प्रवेश्ये'[4][त्यादिना अ]लङ्कारान्तरश्रुतेः । [5]अन्तः प्रवेश्य मण्डपाभ्यन्तरं [6]प्रवेश्येत्यर्थः ।

सुवर्णघण्टिका[7]-युक्तं ताम्रदोहनकान्वितम् ।
सुवर्णतिलकोपेतं हेमपट्टैरलङ्कृतम् ॥१८॥
कौषेयवस्त्रसंवीतं माल्यगन्धसमन्वितम् ।
[8][नानारत्नमयैः शृङ्गैश्चामरैश्चोपशोभितम् ।
पादुकोपानहच्छत्रभाजनासनसंयुतम् ॥१९॥][9]
गवां दशकमध्ये स्यात् [10]काञ्चनो नन्दिकेश्वरः ।
कौषेयवस्त्रसंवीतो नानारत्नसमन्वितः ॥२०॥
[11]लवणद्रोणशिखरे माल्येक्षुफलसंयुतः ।
कुर्यात् पलशतादूर्द्ध्वं सर्वमेतदशेषतः ॥२१॥
शक्तितः पलसाहस्र[12]-त्रितयं यावदेव तु ।

सर्वमेतदिति नन्दिकेश्वरदशोत्तरगोसहस्रसौवर्णालङ्कारादिकम् ।

गोशतेऽपि दशांशेन सर्वमेतत् समाचरेत् ॥२२॥
पुण्यकालं समासाद्य गीतमङ्गलनिःस्वनैः ।

[13]गोशतेऽपि दशांशेनेति गोसहस्रे यदुक्तं तस्य सर्वस्य [14]दशमांशेन ।

सर्वौषध्युदक[15]-स्नानस्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥२३॥

---

1 A पुरस्य
2 I. O. गोसहस्यैव
3 I. O. तु
4 A ति नाना for the bracketed portion
5 I. O. चत:
6 A मण्डपाद्यन्तरं
7 A °घटिका°
8 I. O. हैमभरत्नयुतै:, M. P. हैमरत्नमयै:
9 A omits the bracketed portion
10 I. O. कोञ्चनो
11 A नवण°
12 I. O. °साहस्रं
13 A omits it
14 Both I. O. and A दशांशेन
15 A स for दक

नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च ।
लोकाधि-[1]वासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥२४॥
[2][गवामङ्गेषु तिष्ठन्ति] भुवनान्येकविंशतिः ।
ब्रह्मादयस्तथा देवा रोहिण्यः [3]पान्तु मातरः ॥२५॥
गावो ममाग्रतः सन्तु गावः पृष्ठत एव च ।
गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम् ॥२६॥
यस्मात्त्वं वृषरूपेण धर्म एव सनातनः ।
[4][अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥२७॥]
इत्यामन्त्र्य ततो दद्याद् गुरवे नन्दिकेश्वरम् ।
[5][सर्वोपकरणोपेतं गोयुगञ्च विचक्षणः ॥२८॥

सर्वोपकरणोपेतमिति [6]छत्राद्युपकरणसहितं नन्दिकेश्वरं,] गोयुगञ्च पादुकाद्युपकरण-सहितमित्यर्थः ।

ऋत्विग्भ्यो [7][धेनुमेकैकां दशकाद्] विनिवेदयेत् ।
गवां शतमथैकैकं [8]तदर्धं वाथ विंशतिम् ॥२९॥
दश पञ्चाथ वा दद्यादन्येभ्यस्तदनुज्ञया ।
[9]नैका बहुभ्यो दातव्या यतो दोषकरी भवेत् ॥३०॥

अत्र [10]सर्वत्र ऋत्विग्देयगवीभ्यो[11] द्विगुणा गावो गुरवे देयाः, [12]ऋत्विग्देयैकधेनुतो 'गोयुगञ्च[13] विचक्षणः' इत्यनेन गुरवे द्विगुणगवीदानश्रुतेः । शतार्धादिदाने त्वन्येभ्योऽपि गुर्वृत्विगनुज्ञया देयाः ।

बह्वयस्त्वेकस्य दातव्याः [14]धीमतारोग्यवृद्धये ।
पयोव्रतः पुनस्तिष्ठेदेकाहं [15]गोसहस्रदः ॥३१॥

---

1 A ०वासनीभ्यश्च, I. O. ०वासवीभ्यश्च
2 A गवां मार्गप्रतिष्ठन्ति for the bracketed portion
3 A सर्व्व
4 A omits the bracketed portion
5 A omits the bracketed portion
6 I. O. छत्रादाद्य०
7 A reads the bracketed portion as धेनुमेकैकं दश वा
8 A तद्रूर्द्धं
9 A नैको
10 A सर्व्व
11 I. O. ०गवीभ्योऽपि
12 I. O. ऋत्विग्देयैक०, A ऋत्विग्देयक०
13 A गोयुतञ्च
14 Corrected from M. P. A. B and I. O. श्रीमदारोग्य०
15 A ०देकाहन्तु सहस्रदः

गोसहस्रं दत्त्वा तद्दिने दुग्धमात्राहारो भवेदित्यर्थः ।

श्रावयेच्छृणुयाद्वापि महादानानुकीर्तनम् ।
तद्दिनं ब्रह्मचारी स्याद् य इच्छेद् विपुलां श्रियम् ॥३२॥

तद्दिने च [1]महादानग्रन्थं शृणुयात्, [2][अन्यान्यपि श्रावयेत् ।] [3]यदा विपुलश्रीकामो भवति, तदा तद्दिनं ब्रह्मचर्यमाचरेदित्यर्थः ।

अनेन विधिना यस्तु गोसहस्रप्रदो भवेत् ।
सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः ॥३३॥
विमानेनार्कवर्णेन किङ्किनीजालमालिना ।
सर्वेषां लोकपालानां [4][लोके सम्पूज्यते] सुरैः ॥३४॥
प्रतिमन्वन्तरं तिष्ठेत् पुत्रपौत्रसमन्वितः ।
सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत् ॥३५॥
शतमेकोत्तरं तद्वत् पितॄणां [5]तारयेद् बुधः ।
मातामहानां तद्वच्च पुत्रपौत्रसमन्वितम्[6] ॥३६॥
यावत् [7]कल्पशतं तिष्ठेद्राजराजो भवेत् पुनः ।
अश्वमेधशतं कुर्याच्छिवध्यानपरायणः ।
वैष्णवं योगमास्थाय ततो मुच्येत बन्धनात् ॥३७॥
[8]पितरश्चाभिनन्दन्ति [9][गोसहस्रप्रदं सुतम्[10] ।
[11]अपि स्यात् [12]स्वकुलेऽ]स्माकं पुत्रो दौहित्र एव वा ॥३८॥
गोसहस्रप्रदो भूत्वा [13][नरकादुद्धरिष्यति ॥
तस्य कर्मकरो वा स्यादपि द्रष्टा तथैव च ।
संसारसागरादस्माद् योऽस्मान् सन्तारयिष्यति ॥३९॥

---

1 A महादानविधिग्रन्थं
2 I. O. omits the bracketed portion
3 A तदा
4 A लोकेशः पूज्यते for the bracketed portion
5 A तरयेद् बुधः
6 A and M. P. ०समन्वितः
7 A कल्पनातं
8 A पितरश्चापि नन्दन्ति
9 A गोदाने only for the bracketed portion
10 I. O. शुभं
11 Corrected from M. P. A. B and I. O. अस्य
12 I. O. सुकुले
13 A नरस्य तु only for the bracketed portion

इति पठति य एतद् गोसहस्रप्रदानं
सुर-]भवनमुपेतः संस्मरेद् वाथ पश्येत् ।
अनुभवति मुदं [1][वा मुच्यमानो] निकामं
प्रहतकलुषभावः सोऽपि यातीन्द्रलोकम् ॥४०॥

प्रयोगः

अत्र यजमानः समुत्पन्नगोसहस्रमहादानदानेच्छ-[2]स्तुलापुरुषलिखितं खड्गचर्म-[3]मयढाल-सन्नाह-तुला[4]-स्थापनीयहरिप्रतिमा-[5]सालङ्कारतुला-हस्तग्राह्य-[6]प्रतिमाबहिः [7]सर्वं सम्भारम्, अधिकत्वेन दशाधिकाः सहस्रं गास्तथोक्तलक्षणयुतं वृषमेकं, [8]गोदशकवृष-[9][पूजार्थं प्रत्येकं वस्त्रं] पूजोपकरणञ्च, पलशतोपरिपलसहस्रत्रयपर्यन्ताभिमतसुवर्णघटितानि [10]यथेच्छनाना-[11]रत्नालङ्कृतनन्दिकेश्वरं, [गोदशकालङ्करणार्थं घण्टिका[12]-तिलक-ललाटपट्टाभिमत[13]-रत्न-खचितशृङ्ग[14]-युगानाञ्च दश स्थानानि][15] गोसहस्रालङ्करणार्थञ्च शृङ्ग[16]-युगाभीष्टतिलकाद्य-लङ्काराणां सहस्रं स्थानानि, तथा गोदशकालङ्कारार्थं ताम्रदोहन-कौषकारतन्तुकर्पटचामराणां दश स्थानानि. नन्दिकेश्वर-दशोत्तरगो-[17][सहस्रवृषाणां] पूजार्थम् [18]अलङ्करणार्थञ्च बहुतर-गन्धमाल्यसामग्रीं, [19]गोदशकपार्श्वस्थापनार्थञ्च काष्ठमय-[20]-पादुकायुगोपानद्युगच्छत्रकांस्य-भाजनासनानां [21]दश स्थानानि, गोसहस्रालङ्करणार्थं वस्त्रयुगसहस्रम् अभीष्टपरिमाणरौप्यखुर-चतुष्कसहस्रञ्च, नन्दिकेश्वरालङ्करणार्थं कौषेयवस्त्रं, नन्दिकेश्वरारोपणार्थं लवण-[22][द्रोणं तत]-

1 Corrected from M. P. I. O. वा वाच्यमानो and A वाध्यमानो for the bracketed portion
2 A omits दानेच्छ
3 I. O. मयाज्ज॑न, A मयाचन for मयढाल
4 Both I. O. and A add पुरुष after तुला
5 A omits सालङ्कार
6 A तुलाबहिः
7 A omits सर्वं
8 I. O. गोदक०
9 A omits the bracketed portion
10 I. O. यथेष्ट०
11 A omits रत्ना
12 I. O. गोदशकालङ्करणार्थघण्टिक
13 I. O. omits त
14 I. O. ०शृङ्गं
15 A गोदशकालङ्करणार्थदशसंख्यघण्टिका... शृङ्गयुगानि for the bracketed portion
16 I. O. शृङ्गं
17 A सहस्राणां for the bracketed portion
18 A अलङ्कारार्थञ्च
19 A गोदश०
20 A omits पादुका
21 A omits दश
22 A द्रोणवत् for the bracketed portion

पार्श्वस्थापनार्थमिन्धुं यथेष्टं फलानि, यजमानस्नानार्थं [1]सर्वौषधिञ्चोत्पाद्य, तुलापुरुषोक्त[2]-समयानामन्यतमस्य [3]पूर्वचतुर्थदिने प्रातः कृतनित्यो यजमानः शुचिर्गृहीतोदक[4]-पूर्णताम्रपात्र उदङ्मुखः सङ्कल्पयेत् ।

ॐ मत्स्यपुराणोक्तगोसहस्रमहादानकर्म [5][कर्तुम् अद्यादिदिनचतुष्टयं] गोसहस्रमहादान-प्राच्योदीच्याङ्ग[6]-भूतं दुग्धमात्राहारमहं[7] करिष्ये । अशक्तौ तु [8][दानपूर्वदिन एव[9] पयोव्रती भवेत् । तदा] पूर्वदिन एव प्रातः सङ्कल्पः[10] । वाक्ये [11]च [12]दिनचतुष्टयपदस्थाने दिनद्वय-मिति निवेशो विशेषः । गुर्वृत्विग्जापकास्तु दानदिनपूर्वतरदिने तुलापुरुषवद् हविष्यभोजनादि कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने गोसहस्र[13]-पदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च [14]कुर्युः । अपरदिने यजमानः तुलापुरुषवद् गोविन्दाद्याराधनादि-मधुपर्कदानान्तं गोविन्दा-[15]द्यर्चन ब्राह्मणानुज्ञापन- [16]दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु[17] तुलापुरुषपद-स्थाने गोसहस्रपदं प्रक्षिप्य कुर्यात् । ततो गुर्वृत्विग्जापका [18][उपवसेयुः, यजमानस्तु क्षीर]-[19]मात्राहारो भवेत् । अपरदिने [20][कृतनित्या यजमानादय]-स्तुलापुरुष-[21][वदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं]कर्म यथायथं कुर्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुष-[22]-ग्रन्थमनुसन्धाय [23]सर्वत्रानुष्ठातव्यम् ।

---

1 A सर्व्वौषधिकाद्गमिष्यति तस्य करो वा स्यादपि द्रष्टा तथैव च । संसारसागरा-दस्मान् संभविष्यति । इति पठति य एतद्-गोसहस्रप्रदानं । अधिकं
2 A omits क्त
3 A omits पूर्व
4 I. O. omits क
5 A स च चतुष्टय for the bracketed portion
6 A ०तूर्ध्व
7 A omits अहं
8 A पूर्व्वदिने पयोव्रतस्तदा for the bracketed portion
9 I. O. omits एव
10 Both I. O. and A सङ्कल्प
11 I. O. omits it, A तु
12 A स चतुष्टयस्थाने
13 A omits स्र
14 I. O. कुर्यात्
15 A ०द्यभ्यर्चन
16 I. O. omits दान
17 A omits षु
18 A स्तुलादुग्ध for the bracketed portion
19 I. O. माहारो
20 A कृतनित्यो यजमान for the bracketed portion
21 A वदादि मध्यब्राह्मणवाचनं for the bracketed partion
22 A ०ग्रहणमनुसन्धाय, I. O. ०ग्रन्थमत
23 A omits सर्वत्र

तत ऋत्विजः पूर्वघटितं नन्दिकेश्वर-[1][मानीय, दशाधिकं गोसहस्रं सवृषञ्चानीय, वृषं प्रधान]-वेद्यां लिखितचक्रोपरि स्थापयित्वा तत्पार्श्वे लवणद्रोण-[2]राशिमारोप्य, तदुपरि[3][नन्दिकेश्वरमारोप्य, कौषेयवस्त्रेणाच्छाद्य, तत्पार्श्वे माल्येक्षुफलानि यथेच्छमारोपयेयुः]। ततः [4][पूर्वानीतदशाधिक]-गोसहस्राद् गोदशकमुत्कृष्टं पृथक् कृत्वा, [5]गोसहस्रं [6][मण्डपबहिः वस्त्रमाल्यसौवर्ण]-शृङ्गतिलकाद्यभिमताभरणै रौप्यखुरैश्चालङ्कारयेयुः[7]। गोदशकन्तु मण्डपं प्रवेश्य नन्दिकेश्वरवेष्टनेन स्थापयेयुः [8]उक्तालङ्कारैश्चालङ्कारयेयुः। तत्पार्श्वे चोक्तपादुकाद्युपकरणानि स्थापयेयुः। ततो यजमानस्तद्गोदशकम् अभीष्टवस्त्रमाल्यादिभिः पूजयेत्। तत ऋत्विजो [9][मङ्गलगीततूर्यवन्दिघोषेषु सत्सु], कुण्डसमीपस्थ-[10][कुम्भचतुष्टयजलं सर्वौषधिमिश्रं कृत्वा, तेन] यजमानं स्नापयेयुः।

ततो यजमानः शुक्लमाल्याम्बरधरो [11]धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय 'नमो वो विश्वमूर्तिभ्य' इत्यादि—'पाहि सनातन' इत्यन्त-मन्त्रान् पठित्वा, दश गाः प्रदक्षिणीकृत्य पुष्पाञ्जलिनार्चयित्वा, गोसहस्रं वृषं नन्दिकेश्वरञ्च गन्धमाल्यादिभिरभ्यर्च्य गुर्वृत्विक्प्रमुखब्राह्मणेभ्यो दद्यात्। [12][तद् यथा—ॐ] अद्य यथासम्भवगोत्रनामभ्यो गुर्वृत्विक्प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्तगोसहस्रमहादान[13]-दानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थया [14]एता वृषकाञ्चन- [15]रत्नालङ्कृत-लवणद्रोणशिखरारोपित-कौषेयवस्त्राच्छादित-[16] [फलमाल्येक्षुसहित-नन्दिकेश्वरसहित-सौवर्णघण्टिका-तिलक-ललाटपट्ट रत्नखचितशृङ्गयुगालङ्कृत-कौषेयवस्त्राच्छादित-माल्यगन्धसमन्वित-चामरोपशोभित-पार्श्वन्यस्त]- पादुकायुगोपानद्युग-च्छत्र- भाजनासन-[17]गोदशकसहिता [18]वस्त्रमाल्यभूषिताः सुवर्णशृङ्गाः सुवर्णाभरणा रौप्यपादाः सहस्रं गा ददानि।

---

1 A दानाग्र दशाधिकं मह्य for the bracketed portion
2 A omits राशि
3 A नन्दिकेश्वरं यथेष्टमारोपयेयुः for the bracketed portion
4 A पूर्व्वोक्त for the bracketed portion
5 I. O. गोसहस्र
6 A सुवर्ण only for the bracketed portion
7 A ०ङ्कारयुः, I. O. ०ङ्करेयुः
8 A अलङ्कारै०
9 A मङ्गलतूर्य्यघोषेषु for the bracketed portion
10 A कुम्भचतुष्टयस्थसर्व्वौषधिमिश्रजलेन for the bracketed portion
11 A परिहितालङ्कारः
12 A omits the bracketed portion
13 A omits दान
14 A एतद्
15 A omits रत्न
16 A omits the bracketed portion
17 A गोदश०
18 A वस्त्राणि माल्यभूषिताः

प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'गाव एता रुद्रदेवताः' इत्युक्त्वा, यथाशाखं कामस्तुतिं पठेयुः। ततो गुरवे ऋत्विग्भ्यश्च दक्षिणां दद्यात्। तद् यथा—ॐ अद्य कृतैतद्दानकर्मप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि रत्नानि च[1] ददानि। ब्राह्मणाः स्वस्तीत्युक्त्वा यथायथं गाः पुच्छेषु गृह्णीयुः। यद्वा गुर्वृत्विग्भ्य एव दद्यात्। तत्र दानवाक्ये ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं फलपुष्पोपशोभितपञ्चवर्णवितानकसहिता इति च[2] निवेशो विशेषः। तत्र च सोपकरणनन्दिकेश्वरसहितं गोयुगं[3] गोशतद्वयञ्च गुरवे देयम्। [4][शेषे ऋत्विजां समो विभागः।] ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं, दीनानाथादितर्पणं, पुण्याहादिवाचनम्, उक्तक्रमेण ब्राह्मणेभ्यो विभज्य गोसहस्रप्रतिपादनञ्च कुर्यात्। ततस्तद्दिनं बन्धुसहितो महादानविधिग्रन्थं श्रुत्वा दुग्धमात्राहारस्तिष्ठेत्। विपुलश्रीकाम-[5][स्तु तद्दिनं] ब्रह्मचर्यमाचरेत्।

नन्दिकेश्वरसहितगो-[6]शतदाने तु गोदशकस्थाने गौरेका, पूर्वघटितनन्दिकेश्वरालङ्कारादिसुवर्णदशमभागसुवर्णेन नन्दिकेश्वरालङ्कारादिघटनम्। तदा [7]च [8]मण्डपाभ्यन्तरप्रवेशिताया गोरेकत्वेन विभागासम्भवात् [9]'स्वल्पेष्वि'ति पूर्वोत्तरदानयोः श्रुतेः, अस्य [10]सन्दंशपाठाच्च गुरुरेव ब्रह्माण्डदानवत् [11]सर्वं कुर्यात्।

इति गोसहस्रमहादानं [12]समाप्तम्।

---

1 I. O. च before रत्नानि
2 A omits it
3 I. O. गौयुतं
4 A omits the bracketed portion
5 A स्तुतिस्तद्दिनं
6 A ०सहस्रदाने
7 A omits it
8 A मण्डपाभ्यान्तरप्रवेशं
9 I. O. स्वकल्पेष्विति
10 A सहस्रपाठाच्च
11 A omits it
12 I. O. omits it

अथ कामधेनुमहादानम् । (मत्स्यपुराणम्—२७६ अः)

अथातः संप्रवक्ष्यामि [1][कामधेनुविधिं परम्]
सर्वकामफलं नृणां महापातकनाशनम् ॥१॥
लोकेशावाहनं तद्वद्धोमकर्माधिवासनम् ।
तुलापुरुषवत् कार्यं [2]कुण्डमण्डपवेदिकम् ॥२॥
स्वल्पेष्वेकाग्निवत् [3]कुर्याद् गुरुरेव समाहितः ।
काञ्चनस्यातिशुद्धस्य [4][धेनुं वत्सञ्च] कारयेत् ॥३॥

[5][धेनुं वत्सञ्चेत्यनेन] धेन्वर्थोपात्तसुवर्णेनैव [6]स्वेच्छया [7]वत्सकल्पनमुक्तम् ।

उत्तमा पलसाहस्रा[8] तदर्धेन तु मध्यमा ।
कनीयसी तदर्धेन कामधेनुः प्रकीर्तिता ॥४॥
शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत् ।
वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम् ॥५॥
[9][न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ।]
[10]कुम्भाष्टकसमोपेतां [11]नानाफलसमन्विताम् ॥६॥

महारत्नैरुत्कृष्टरत्नैः ।

तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ।
इक्षु-[12]दण्डाष्टकं [13]तद्वन्नानाफलसमन्वितम् ।
भाजनं चासनं तद्वत्ताम्रदोहनकं तथा ॥७॥

---

1 A कामधेनुपरापरं for the bracketed portion
2 A कुण्डं मण्डपवेदिका
3 A कार्य्यं
4 A धेनोर्वत्सञ्च
5 A धेनोर्वत्सञ्चेत्यनेन
6 A स्वेच्छयाया
7 A वत्सकल्पनं कुर्य्यात् युक्तं, I. O. वत्सकल्पयुक्तं
8 A साहस्री
9 A omits the bracketed portion
10 I. O. कुम्भाष्टके०
11 A नारायणसमन्वितं
12 A ०दण्डाष्टकं
13 A तद्वत् नारायणसमन्वितं

कौषेयवस्त्रद्वय-[संप्रयुक्तां[1]
दीपातपत्राभरणाभिरामाम्[2] ।
सचामरां[3] कुण्डलिनीं[4] सघण्टां[5]
[6]गायत्रिका-पादुक-रौप्यपादाम्[7] ॥८॥][8]

[9]गायत्रिका अक्षमाला ।

रसैश्च सर्वैः परितोऽभिजुष्टां[10]
हरिद्रया पुष्पफलैरनेकैः ।
अजाजि-[11]कुस्तुम्बुरुशर्कराभि-
र्वितानकञ्चोपरि पञ्चवर्णम् ॥६॥

रसैः सर्वैरिति लवणादिभिः षड्भिः । अजाजी [जीरकः[12] । कुस्तुम्बुरु धान्याकम्[13] ।

स्नातस्ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य सपुष्पहस्तः ।][14]
आवाहयेत्तां गुडधेनुमन्त्रै[15]-
र्द्विजाय दद्यादथ दर्भपाणिः ॥१०॥

बहुतरमत्स्यपुराणपुस्तकेषु गुडधेनुमन्त्रैरिति पाठदर्शनात् गुडधेनूक्त-'या लक्ष्मी'रित्यादि-[16][मन्त्रपाठोऽत्र]मन्त्रपाठश्चात्र कर्तव्यः । द्विजाय दद्यादिति श्रुतेः [17]कृत्स्नैव कामधेनुर्गुरवे देया, ऋत्विग्भ्यस्तु दक्षिणामात्रम्[18] ।

---

1 I. O. ०संप्रयुक्ता
2 I. O. ०भरणातिवासा
3 I. O. सचामरा
4 I. O. कुण्डलिनी
5 I. O. सघण्टा
6 I. O. गात्रत्रिका
7 I. O. रौप्यपादा
8 A reads the bracketed portion as संयुक्तानिलीसंघण्टां मालतिकां पादुका रौप्यापादाद
9 I. O. गात्रतिका, A मात्त्रतिका
10 Both I. O. and A ०जुष्टा
11 A कस्तुङ्कर०
12 I. O. जीरकं
13 I. O. धन्याकं
14 A रकक only for the bracketed portion
15 A ०मन्त्रै०, M. P. गुरुणोक्तमन्त्रै०
16 Both I. O. and A omit the bracketed portion
17 Both I. O and A कृत्स्नैव
18 I. O. ०मात्रार्ह, A ०मात्रत्वे

[1]त्वं सर्वदेवगण-[2][मन्दिरमङ्गभूता
विश्वेश्वरि त्रिपथ]-गोदधिपर्वतानाम् ।
[3]त्वद्दान-[4]शस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्वृतिमतीव परान्नमामि ॥११॥
लोके यथेप्सित-[5]फलानुविधायिनीं त्वा-
मासाद्य को हि [भवदुःखमुपैति मर्त्यः][6] ।
संसारदुःखशमनाय [यतस्व कामं][7]
त्वां कामधेनुमिति देवगणा वदन्ति ॥१२॥
आमन्त्र्य शीलकुल[8]-रूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेव[9]-जुष्टं
कन्यागणैः परिवृतं[10] पदमिन्दुमौलेः[11] ॥१३॥

प्रयोगः

अत्र यजमानः समुपजात[12]-कामधेनुमहा[13]-दानदानेच्छस्तुलापुरुषलिखितं खड्गचर्म[14]-मय-ढालसन्नाह-तुलास्थापनीयहरिप्रतिमा-सालङ्कारतुला[15]-हस्तग्राह्यप्रतिमाबहिः[16] सर्व-[17]सम्भारम्, अधिकत्वेन सुवर्णपलसहस्रनिर्मिता[18]-मुत्तमां—सुवर्णपलशतपञ्चकनिर्मितां मध्यमां—सुवर्णसार्द्ध-पलशतद्वयनिर्मितां कनीयसीम्—[19]अशक्तौ पलत्रयादूर्द्ध्वं यथाशक्त्युपात्तसुवर्ण-[20][घटिताम्

---

1 Both I. O. and A omit it
2 A omits the bracketed portion
3 A तद्दान, I. O. त्व न
4 A omits शस्त्र
5 A फलाविधियिनी
6 A ततत्रदुमुपैतिमर्थः
7 I. O. यतः सकामं, A ततुप्रकाशे
8 A ०कुल०
9 A धाम for देव
10 I. O. and M. P. परिवृतः
11 A ०मिन्द्रामौलि
12 I. O. ०जाता०
13 A दाने for दानदानेच्छ
14 I. O. मयार्जन and A मयाढन्न for मयढाल
15 I. O. ०तुल
16 I. O. ०ग्राह्यप्रतिमावहिः, A ०प्राप्त प्रतिमाद्धिः
17 A ०सम्भावमावधिकत्वेन
18 A ०निर्मितं
19 अशक्तौ:
20 A घटितस्वतक्षया for the bracketed portion

उत्कृष्ट]-रत्नालङ्कृतां [1][सवत्सां धेनुं], धेन्ववस्थापनार्थं कृष्णाजिनं गुडप्रस्थञ्च, [2]धेन्वलङ्करणार्थं [3]यथेष्टसुवर्णघटितचन्द्रतिलक-ललाटपट्टिका-कुण्डलयुग-[4]घण्टा-रौप्यखुर-[5][चतुष्टय-स्फाटिकाक्ष]-माला-चामराणि, धेन्वाच्छादनार्थं कौषेयवस्त्रयुगं, धेनुपार्श्वस्थापनार्थं [6]कुम्भाष्टकातिप्रचुरनाना-[7]फलाष्टादशधान्येक्षुदण्डाष्टक—कांस्यभाजनासन—ताम्रदोहन---दीप-सामग्री-च्छत्रपादुकायुगानि, धेन्वग्रतः स्थापनार्थं मधुरादिरसषट्क हरिद्रानानाविध-[8]पुण्याहण-सामग्री-जीरक-धान्याक-शर्कराश्चोत्पादयेत् ।

ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकाः तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च [9]कुर्युः । अपरदिने [10]च यजमानस्तुलापुरुषवद्गोविन्दाया-राधनादि-[11]मधुपर्कदानान्तं गोविन्दा-[12]र्चन-ब्राह्मणानुज्ञापन-दानसङ्कल्पपुण्याहादिवाचन-वरण-वाक्येषु तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य कुर्यात् । ततो गुर्वृत्विग्यजमान-जापका उपवसेयुः ।

अपरदिने च कृतनित्या[13]-स्तुलापुरुष-[14]वदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुष-[15]ग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः सवत्सां धेनुं प्रधान-[16]वेदीमध्यलिखितचक्रोपरि कृष्णाजिनमास्तीर्य तदुपरि गुडप्रस्थं निधाय तत्रारोप्य, पूर्वोक्तालङ्कारैरलङ्कृत्य, कौषेयवस्त्रयुगेनाच्छाद्य, धेनुपार्श्वे [17]पूर्णकुम्भाष्टकं [18][नानाविधफलानि अष्टादशधान्यानि] [19]बहुनानाविधफलमिक्षुदण्डाष्टकं कांस्यभाजन-

---

1 A omits the bracketed portion
2 A धेनुरलङ्करणार्थं
3 A यथेष्ट०
4 I. O. घण्टा
5 I. O. चतुष्पाटिकाक्ष, A चतु-स्फाटिकाक्ष
6 I. O. adds कृष्णाजिनं before this
7 A omits फला
8 I. O. ०पुण्यार्जन०
9 A कुर्यात्
10 I. O. omits it
11 A ०वरणान्तं
12 A ०द्राभ्यर्चन
13 A कृतनित्य०
14 A omits व
15 A ०बहु०
16 A omits वेदी
17 I. O. omits पूर्ण, A च before पूर्ण
18 I. O. नानाविधधान्यानि for the bracketed portion
19 I. O. बहु०, A रस०

[1]पीठिका-ताम्रदोहन-दीप-च्छत्र-पादुका[2]-युगान्यारोपयेयुः । धेन्वग्रतश्च[3] मधुरादिरसषट्कं हरिद्रां[4] नानाविधपुष्पाणि[5] नानाविधफलानि[6][जीरकं धान्याकं शर्कराञ्च स्थापयेयुः ।

ततो] [7]मङ्गलगीतवाद्यवन्दिघोषेषु [8]सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन स्वस्ववेदोक्ताभि-[9]षेचनिकमन्त्रैर्यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः कुशहस्तः पुष्पाञ्जलिमादाय[10][कामधेनुं प्रदक्षिणीकृत्य] 'या लक्ष्मी'रित्यादि[11][मन्त्रैः 'त्वं सर्वदेवगणो'त्यादि-] 'देवगणा वदन्ती'[12][त्यन्त-मन्त्राभ्याञ्चामन्त्र्य] [13]पुष्पाञ्जलिनाभ्यर्च्य गुरवे दद्यात् । तद् यथा—ॐ अद्यामुकसगोत्राय अमुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्तहिरण्यकामधेनुमहादानदान[14]-फलप्राप्तिकामोऽहम् एतां कृष्णाजिन-न्यस्तगुडप्रस्थारोपितामुत्कृष्टरत्नसौवर्णचन्द्रतिलकललाटपट्ट-कुण्डलयुग-घण्टा-रौप्यखुर-स्फाटिक-चमाला चामरालङ्कृतां [15]कौषेयवस्त्रयुगाच्छादितां [16][पूर्णकुम्भाष्टक-नानाफलाष्टादशधान्य-फलसहितेक्षुदण्डाष्टक-कांस्यभाजनासन-ताम्रदोहन-दीपच्छत्र-पादुकायुग-सर्वरस--हरिद्रा--नाना-विध-पुष्प-फल-जीरक-धान्याक-शर्करायुतां] पञ्चवर्ण-वितानकसहितां [17]सवत्सां हिरण्य[18]-कामधेनुं ददानि । गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'हिरण्यकामधेनुरियं विष्णुदैवते'त्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । ततो गुरुर्त्विग्भ्यो दक्षिणां दद्यात् । ॐ अद्य कृतैतद्दान-[19][कर्मप्रतिष्ठार्थं युष्मभ्यमहं] दक्षिणाम् [20]इयदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददानि । स्वस्तीति ब्राह्मणा ब्रूयुः । गुरुस्तु [21]स्वस्त्यनन्तरं [22][धेनुं पुच्छे] गृह्णीयात् । ततो यजमान-

---

1 A पट्टिका
2 I. O. पादुक
3 A धेनुग्रतः
4 Both I. O. and A हरिद्रा
5 A नानाविधपुष्पाद्दिण सामग्री
6 A omits it
7 A जीरकधान्याकशर्कराश्चारोप्य for the bracketed portion
8 A omits it
9 I. O. ०षेचनमन्त्रै०
10 I. O. omits the bracketed portion
11 A omits the bracketed portion
12 I. O. त्यत्रमन्त्राभ्याञ्चामन्त्र्य and A त्यन्तं पठित्वा for the bracketed portion
13 I. O. प्रदक्षिणीकृत्य before this and A reads this as कामधेनुं पुष्पाञ्जलिना संपूज्य
14 A omits one दान
15 A omits it
16 I. O. omits the bracketed portion
17 A सवासमां
18 A omits हिरण्य
19 A omits the bracketed portion
20 A इमामुत्पत्ति०
21 I. O. स्वस्त्यनन्तरं
22 A धेनुपुच्छं for the bracketed portion

स्तुलापुरुषवज्जापकेभ्यो दक्षिणां दत्त्वा दीनानाथादींस्तर्पयित्वा ब्राह्मण-[1]स्वस्तिवाचनञ्च कृत्वा, त्वरया[2] [गुरवे कामधेनुं प्रतिपादयेत्]। पलत्रयादूर्द्ध्वं यथाशक्ति स्वल्पमहा-[3]दानदाने तु [4]गुरुरेव स्वगृह्योक्तविधिना [5]सर्वं ब्रह्माण्डवत् कुर्यात्।

इति हिरण्यकामधेनुमहादानं [6]समाप्तम्।

1 Both I. O. and A omit स्वस्ति
2 I. O. कामधेनुं दापयेत् for the bracketed portion
3 A omits दान
4 Both I. O. and A गुरवे
5 A omits it
6 I. O. omits it

[तथा हिरण्याश्वमहादानम् ।][1] (मत्स्यपुराणम्—२८०अः)

अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ।
यस्य प्रसादाद् [2]भुवने अनन्तं[3] फलमश्नुते ॥१॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्यात् तुलापुरुषदानवत् ॥२॥
ऋत्विङ्मण्डप[4]-सम्भारभूषणाच्छादनादिकम् ।
स्वल्पेऽप्ये-[5][काग्निवत् कुर्याद्धेम]-वाजिमखं बुधः ॥३॥
स्थापयेद्वेदिमध्ये तु कृष्णाजिनं[6] तिलोपरि ।
कौषेयवस्त्रसंवीतं कारयेद्धेमवाजिनम् ॥४॥
शक्तितस्त्रिपलादूर्द्ध्वमासहस्रपलाद् बुधः ।
पादुकोपानहच्छत्रचामरासन[7]-भाजनैः ॥५॥

उपेतमिति सम्बन्धः ।

पूर्णकुम्भाष्ट[8][कोपेतं माल्येक्षु]-फलसंयुतम् ।
शय्यां सोपस्करां तद्वद्धेममार्तण्डसंयुताम् ॥६॥

सोपस्करां [9]मशकवारणी-[[10]गेण्डूक-दीपिका-पीठ-पादुकाव्यजनादिकलोक-प्रसिद्धोपकरणान्विताम् ।][11]

ततः सर्वौषधिस्नानस्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं[12] गृहीतकुसुमाञ्जलिः ॥७॥
नमस्ते सर्वदेवेश वेदाहरणलम्पट ।
वाजिरूपेण मामस्मात् पाहि संसारसागरात् ॥८॥

---

1 A omits the bracketed portion
2 I. O. भवने, A गुणवान्
3 A अनन्त, M. P. चानन्तं
4 A ०मण्डल०
5 A व च कुर्यात्तमेवं for the bracketed portion
6 I. O. and M. P. कृष्णाजिन
7 I. O. ०चामरासन०
8 A कौषेयमाल्य for the bracketed portion
9 A omits it
10 A गण्डूक
11 I. O. and B गण्डूकादियुतां for the bracketed portion
12 A ०मन्त्र

त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्करम्[1] ।
यस्माद् भ्रामयसे[2] लोकानतः पाहि सनातन[3] ॥९॥
एवमुच्चार्य गुरवे तमश्वं प्रतिपादयेत् ।
दत्त्वा पापक्षयाद्भानोर्लोकमाप्नोति शाश्वतम् ॥१०॥
गोभिर्विभवतः सर्वा-[4]नृत्विजश्चापि पूजयेत् ।
सर्वेश्वा[5]-स्योपकरणं गुरवे विनिवेदयेत् ॥११॥

[6]अश्योपकरणम् अश्वोपकरणम्, निरुक्ते अश्ववाचित्वेना-[7] श्यशब्दस्योक्तेः ।

सर्वं शय्यादिकं [8]दत्त्वा भुञ्जीतातैलमेव हि ।
पुराणश्रवणं तद्वत् कारयेद्भोजनादिकम् ॥१२॥

पुराणश्रवणं मत्स्यपुराणादिश्रवणम् । भोजनादिकं [9][ब्राह्मणभोजनं वस्त्रदानादिकञ्च ।]

इमं हिरण्याश्वविधिं करोति यः
पुण्यं समासाद्य दिनं नरेन्द्र[10] ।
विमुक्तपापः स पुरं मुरारेः[11]
प्राप्नोति सिद्धै[12]-रभिपूजितः सन् ॥१३॥
इति पठति य इत्थं हेमवाजिप्रदानं
सकलकलुषमुक्तः [13][सोऽश्वयुक्तेन भूयः ।
कनकमयवि] मानेनार्कलोकं [14][प्रयात-
स्त्रिदश]-पतिवधूभिः पूज्यते योऽथ पश्येत् ॥१४॥
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा
हेमाश्वदानमभिनन्दयतीह लोके ।

---

1 A भास्करः; M. P. भास्कर
2 I. O. भ्रामययत्, A भ्रामयसे, M. P. भासयसे
3 A सनातनः
4 A °मृत्विजश्चापि
5 A श्वो and I. O. श्रो for श्वो
6 Both I. O. and A श्वाद्योपकरणम्
7 I. O. °त्वशब्दस्यार्क्तः, A °दाशब्द-स्योक्तत्वात्
8 I. O. omits it
9 Both I. O. and A ब्राह्मण-भोजनादिकं वस्त्रादिकञ्च for the bracketed portion
10 I. O. नरेन्द्रः, A नरेन्द्र
11 Both I. O. and A पुरारे
12 A सिद्धै°
13 A omits the bracketed portion
14 A and M. P. प्रयाति त्रिदश for the bracketed portion

सोऽपि प्रयाति [1]हतकल्मषशुद्धदेहः
स्थानं पुरन्दर-[2]महेश्वरलोकजुष्टम् ॥

प्रयोगः

अत्र यजमानः समुपजातहिरण्याश्वमहा-[3]दानदानेच्छुः[4] तुलापुरुषलिखितं खड्ग-चर्म[5]-मय-ढालसन्नाह-[6]तुलास्थापनीयहरिप्रतिमा--सालङ्कारतुला-हस्तग्राह्यदेवताप्रतिमा--ऋत्विग्दक्षिणाबहिः [7]सर्वसम्भारम्, अधिकत्वेन [8]पलत्रयादूर्द्ध्वं पलसहस्रावध्यभीष्टसुवर्णेन घटितमश्वं, तदधः[9]-स्थापनार्थं कृष्णाजिनं तिलांश्च, [10]अश्वाच्छादनार्थं [11]कौषेयवस्त्रम्, [12]अश्वपार्श्वस्थापनार्थं [13]पादुकायुगोपानद्युग-च्छत्र-चामरासन-[14]कांस्यभाजन-[15][कुम्भाष्टकेक्षुफलानि, यथोपकल्पितोपस्करयुतां] शय्यां, तत ऊर्द्ध्वं स्थापनार्थं यथेष्ट[16]-हेम-[17]पत्रोत्खाटितसूर्यप्रतिमां प्रचुर-[18]माल्यार्जनसामग्रीम्, ऋत्विग्भ्यो दक्षिणार्थमभिमतसंख्या गाः, यजमान-स्नपनार्थं सर्वौषधि-[19]श्चोत्पादयेत्।

ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादि[20] कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्याश्वपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च कुर्युः। अपरदिने च यजमानः पूर्ववद् गोविन्दाद्याराधनादि मधुपर्क-[21][दानान्तं कर्म] गोविन्दाद्यभ्यर्चन[22]-ब्राह्मणानुज्ञापन[23]-दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने हिरण्याश्वपदं [24]प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उपवसेयुः। अपरदिने च तुलापुरुष-[25]वदग्निस्थापनादि मध्यब्राह्मण-[26]वाचनान्तं कर्म यथायथं [27]कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धाय अनुष्ठातव्यम्।

---

1 I. O. कृत॰
2 A स for महेश्वर
3 Both I. O. and A omit दान
4 A ॰दानेषु
5 I. O. ॰मयाट्टन, A ॰मयाच्छन्न
6 I. O. सु, A सुलापुरुष for तुला
7 Both I. O. and A सर्व॰
8 A पलयादूर्द्ध
9 A तदध॰
10 Both I.O. and A आच्छादनार्थं
11 I. O. कौशेयवस्त्रं
12 A omits अश्व
13 A पादुकोपानद्युग
14 A omits कांस्य
15 A सोपस्करणयुतां for the bracketed portion
16 A यथेच्छ॰
17 I. O. यन्त्रोत्खाटित, A परोखोचित
18 A माल्यसामग्रीं
19 I. O. ॰च्चोपपादयेत्
20 A ॰दिकं
21 A दानादिवरणान्तं for the bracketed portion
22 I. O. ॰भ्यर्थन
23 A ॰ज्ञापना
24 I. O. पक्षिप्य
25 A omits व
26 A वचनान्तं
27 I. O. omits it

तत ऋत्विजो[1] हिरण्याश्वं प्रधानवेद्यां लिखितचक्रोपरि कृष्णाजिनमास्तीर्य तदुपरि [2]तिलान् दत्त्वा तत्रारोप्य कौषेयवस्त्रेणाच्छादयेयुः । [3]अश्वपार्श्वे च काष्ठमयपादुकायुगोपानद्युगच्छत्र-[4]चामरासन-कांस्यभाजन-पूर्णकुम्भाष्टकेक्षुयष्टि-यथेच्छफलमाल्यानि, अभीष्टदारुमयखट्वास्तीर्ण-कम्बल-[5][पटीतूलिकादिरूपां] [6][गण्डोपधान-मशकवारणो]-[7][दीपिका-पीठ-पादुका-व्यजन]-सहिताम् उपरिदत्तसौवर्णमार्तण्डप्रतिमाञ्च[8] शय्यां स्थापयेयुः । ततः कुण्डसमीपस्थ-कुम्भचतुष्टयजलं सर्वौषधिमिश्रं कृत्वा, तेन तूर्यगीतवन्दिघोषेषु [9]सत्सु यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय अश्वं प्रदक्षिणीकृत्य 'नमस्ते सर्व-[10]देवेशे'त्यादि—'पाहि [11]सनातने'त्यन्तमन्त्राभ्यामामन्त्र्य पुष्पाञ्जलिनाभ्यर्च्य गुरवे दद्यात् । तद् यथा—[12]ॐ अद्यामुकसगोत्राय अमुक-[13]वेदामुकशाखाध्यायिने अमुक-देवशर्मणे तुभ्यं मत्स्यपुराणोक्तहिरण्याश्वमहादान-[14]दानफलप्राप्तिकामोऽहम् एतं कृष्णाजिन-न्यस्ततिलोपरिस्थापितं कौषेयवस्त्राच्छादितं पादुको-[15]पानच्छत्रचामरासनभाजन-[16]पूर्णकुम्भाष्ट-केक्षुफलमाल्य-यथोप-[17]कल्पितोपस्करसहितोर्द्ध्वन्यस्तसौवर्णमार्तण्ड-[18]प्रतिमाशय्या-पञ्चवर्णविता-नकसहितं हिरण्याश्वं ददानि ।

गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'हिरण्याश्वोऽयं विष्णुदैवत' इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । ततो गुरवे दक्षिणां दद्यात् । ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं [19]तुभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि च[20] रत्नानि ददानि । गुरुः स्वस्तीत्युक्त्वा अश्वं[21] [22]कर्णे गृह्णीयात् । तत ऋत्विग्भ्यो दक्षिणां दद्यात् । तद् यथा—ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं [23]हिरण्याश्वमहादानकर्मणि

1 A ऋत्विजा
2 A तातिलान
3 A अश्वपार्श्वे
4 A चामर
5 A पट्टतुलिकादिकारूपं for the bracketed portion
6 I. O. गण्डुक and A गेण्डुक for the bracketed portion
7 B omits the bracketed portion
8 A ०प्रतिमां
9 A omits it
10 Both I. O. and A ०देवेश्वरा
11 I. O. संसारसागरादित्यन्तमन्त्रे-स्त्वमामन्त्र, A संसारमन्त्रैस्त्वामामन्त्र
12 A omits it
13 A वेद for वेदामुक
14 A omits दान
15 A परि for पान
16 I. O. omits पूर्ण
17 I. O. कल्पितपस्कर०
18 A omits प्रतिमा
19 A omits it
20 I. O. omits it
21 I. O. अश्व
22 A omits it
23 I. O. हिरण्याश्वदानकर्म्मणि, A महादानकर्मणि

कृतकर्मप्रतिष्ठार्थं दक्षिणा-[1]मेता गा ददानि। ऋत्विजः स्वस्तीति प्रत्येकं ब्रूयुः। ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं[2] दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया हिरण्याश्वप्रतिपादनञ्च[3] कुर्यात्। ततः [पुराणश्रवणं कृत्वा][4] अभिमतसंख्यान् ब्राह्मणान् भोजयित्वा [वस्त्रादिनाभ्यर्च्य स्वयम् अतैलं भुञ्जीत][5]। स्वल्पमहादाने तु [6]गुरुरेव सर्वं [7]ब्रह्माण्डदानवत् कुर्यात्।

इति हिरण्याश्वमहादानं [8]समाप्तम्।

1 A ॰मेतानि गां, I. O. ॰मेतां गां
2 I. O. दक्षिणां दद्यात्
3 I. O. ॰प्रतिपादनं
4 A पुराणश्रवणञ्च कुर्यात् for the bracketed portion
5 A वस्त्रादि दद्यात् for the bracketed portion
6 A गुरवे, I. O. गुरवे च
7 A ब्रह्माण्डवत्
8 I. O. omits it

[1]तथा हिरण्याश्वरथमहादानम्। (मत्स्यपुराणम् — २८१ अः)

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्।
पुण्यमश्वरथं नाम महापातकनाशनम् ॥१॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्।
लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ॥२॥
[2]ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्।
कृष्णाजिने[3] तिलान् कृत्वा काञ्चनं[4] स्थापयेद्रथम ॥३॥
सप्ताश्वं चतुरश्वं वा चतुश्चक्रं सुकूवरम्।
[5]इन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम् ॥४॥

कूवरो युगबन्धनदण्डः। इन्द्रनीलेन इन्द्रनीलसहितेन ध्वजरूपेण ध्वजाकारेण[6] कुम्भेन, यद्वा इन्द्रनीलनिर्मितेनैव[7] कुम्भेनेत्यर्थः।

लोकपालाष्टकोपेतं पद्मरागदलान्वितम्।
चत्वारः[8] पूर्णकलसा धान्यान्यष्टादशैव तु ॥५॥

पद्मरागदलान्वितं पद्मरागखण्डयुक्तम्। चत्वारः पूर्णकलसाः स्थाप्याः। अष्टादश धान्यानि च पार्श्वतः [9]स्थापनीयानि।

कौषेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकम्।
माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम् ॥६॥

[10][पुरुषेण सौवर्ण]-पुरुषेण सहितं रथमित्यर्थः।

यो यद्भक्तः पुमान् कुर्यात् स तन्नाम्नाधिवासनम्।
[11]छत्रचामरकौषेयवस्त्रोपानहपादुकाः ॥७॥

यो यद्भक्तः स पुरुष-[12]स्तत्तत्प्रतिमारूपं [13]रथ आरोपयेदित्यर्थः।

---

1 A omits it
2 A ऋत्विम्म उप for ऋत्विङ्मण्डप
3 A कृष्णाजिन
4 I. O. काञ्चने
5 M. P., I. O. and A ऐन्द्रनीलेन
6 Both I. O. and A omit it
7 A ०निर्मितेन
8 A चत्वार
9 A स्थापनीयानि
10 I. O. omits the bracketed portion
11 A पुष्प०
12 A ०स्तद्तत्प्रतिरूपं
13 A रथमारोपयेदित्यर्थः

गोभिर्विभवतः सार्द्धं दद्याच्च शयना-[1]सनम् ।
[2][आ भारा]-त्त्रिपलादूर्द्ध्वं शक्तितः कारयेच्छुभम् ॥८॥

[3][आ भारात्]पलसहस्रद्वयं यावत् ।

[4]अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः ।
द्वाभ्यामथ युतं [5]कुर्या[6]द्धेमसिंहध्वजान्वितम् ॥९॥

अनेन उक्तसंख्यानामन्यत[7]मसंख्यया [8]प्रत्यत्ताश्वयुक्तं रथं[9] परिकल्पितापरहेमसिंह-ध्वजान्वितञ्च कुर्यादित्यर्थः ।

चक्ररक्षावुभौ तस्य तुरगस्थावथाश्विनौ ।
पुण्यकालं ततः प्राप्य पूर्ववत् स्नापितो द्विजैः[10] ॥१०॥
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ।
शुक्लमाल्याम्बरो[11] [12]दद्यादिमं मन्त्रमुदीरयन् ॥११॥

नमो नमः पापविनाशनाय
विश्वात्मने वेदतुरङ्गमाय ।
धाम्नामधीशाय भवाभवाय
पापौघदावानल देहि शान्तिम् ॥१२॥
[13]वस्वष्टकादित्यमरुद्गणानां
त्वमेव धाता परमं निधानम् ।
[14]यतस्ततो मे हृदयं [15]प्रयातु
[16]धर्मैकतानत्वमघौघनाशात् ॥१३॥

---

1 Both I. O. and ०शनं
2 Both I. O. and A अभावा for the b acketed portion
3 Both I. O. and A अभावात्
4 A अथाष्टकेन
5 Both I. O. and A दद्या०
6 A द्वेय०
7 I. O. ०तमया संख्यया, A ०तम-पलसंख्यया
8 I. O. युक्त again before this
9 A रथौ
10 A द्विजः
11 A ०म्बरधरो
12 A दद्यान
13 I. O. वसुष्टका०, A वस्वकाष्टका०
14 Both I. O. and A अतस्ततो
15 A प्रयान्तु
16 A धमैकतानत्व०, I. O. धर्म्मैक-तामत्व०

इति तुरगरथप्रदानमेतद्
भवभयसूदनमत्र यः करोति ।
स कलुषपटलैर्विमुक्तदेहः
परमुपैति पदं पिनाकपाणेः ॥१४॥

देदीप्यमान[1]-वपुषा विजितप्रभाव-
माक्रम्य मण्डलम-[2]खण्डितचण्डभानोः ।
[3]सिद्धाङ्गनानयन-[4]षट्पदपीयमान-
[5]वक्राम्बुजोऽम्बुजभवेन चिरं सहास्ते ॥१५॥

इति पठति[6] शृणोति वा य एतत्
[7]कनकतुरङ्गरथप्रदानमस्मिन् ।
न स नरकपुरं व्रजेत् कदाचि
न्नरकरिपोर्भवनं प्रयाति भूयः ॥१६॥

प्रयोगः

अत्र यजमानः समुपजातहिरण्याश्वरथमहादान[8]-दानेच्छस्तुलापुरुषलिखितं[9] खड्गचर्म-[10]मयढाल--सन्नाह--[11]तुलास्थापनीयहरिप्रतिमा--सालङ्कारतुला -हस्तग्राह्यदेवताप्रतिमा--यथोक्त-वितानबर्हिः सर्वं सम्भारम्, अधिकत्वेन पलत्रयादूर्द्ध्वं पलसहस्रद्वयपर्यन्तम् अभिमतपरिमाण-सुवर्णघटितं सप्ताश्वं चतुरश्वं वा [12]चतुश्चक्रं शोभन-[13]कूवरम् एकपार्श्वे[14]-न्यस्तेन्द्रनील-खचित[15]-हैम[16]कुम्भयुक्ताग्रध्वजम् अपरपार्श्वेन्यस्तहैमसिंहयुक्ताग्रध्वजं पद्मरागाख्यमाणिक्या-लङ्कृतं[17]- स्वस्वदिक्क्रमोत्खाटितेन्द्रादिलोकपालप्रतिमाष्टकं[18] [19]रथं,तदग्रचक्रद्वयपार्श्वा-[20]रोपणार्थं

---

1 I. O. omits मान
2 Corrected from M. P. I. O. ०खण्डसचण्डभानोः, A ०खण्डमचण्ड-भानोः
3 A सिद्धाङ्गना०
4 A ०चटपद०
5 A वक्राम्बुजा०
6 A पठति
7 A कनतुरगवयप्रदानमस्मि
8 A दा for दान
9 Both I. O. and A ०लिखित
10 I. O. मयार्जन and A मयातुन्न for मयढाल
11 I. O. सुला०
12 A चतुश्चक्र
13 I. O. ०कूवर
14 A ०पार्श्वे
15 A omits खचित
16 A ०कुम्भाग्रध्वजम्
17 A ०ङ्कृत
18 A चकं
19 A पुरथं
20 I. O. ०पार्श्वे०

सुवर्ण-[1]पल्लोत्खादि-[2][ताश्वारूढाश्विनी]-कुमारप्रतिमाद्वयं-[3]रथमध्यारोपणार्थम् अभिमतसुवर्ण-[4]घटितेष्टदेवताप्रतिमां, रथारोपणार्थं कृष्णाजिनं तिलांश्च, रथपार्श्वस्थापनार्थं कलसचतुष्टयम् अष्टादशधान्यानि बहुविधमाल्यसामग्रीम् [5]इत्तुं फलानि छत्र-चामर-कौषेयवस्त्रोपानत्पादुका-युगानि [6]यथेच्छनिर्मितं शयनीयम् आसनञ्च, [7][यथाशक्ति गाः] यथाशक्ति [8][अष्टौ [9][चतुरो द्वौ] वा स्वरूपाश्वान्,] रथोर्द्धमण्डपबन्धनार्थं कौषेयवस्त्रसंयुक्तं यथोक्तं वितानकञ्चोत्पादयेत्। ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने यजमान-गुर्वृत्विग्-जापकास्तुलापुरुषवद्धविष्य-भोजनादि[10] कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्याश्वरथपदं प्रक्षिप्य यथा-यथं निवेदनं सङ्कल्पञ्च कुर्युः। अपरदिने च यजमानस्तुलापुरुषवद् गोविन्दाद्याराधनादि-मधुपर्कदानान्तं कर्म, गोविन्दाभ्यर्चन-ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने हिरण्याश्व-[11]रथपदं प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उपवसेयुः। अपरदिने च कृतनित्या[12]-स्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धाय अनुष्ठातव्यम्।

तत ऋत्विजः प्रधानवेद्यां लिखितचक्रोपरि कृष्णाजिनमास्तीर्य तत्र तिलान् दत्त्वा तदुपरि [13]रथमारोप्य तन्मध्ये [14]घटितेष्टदेवताप्रतिमामारोप्य, अग्रचक्र-[15]द्वयसन्निधावश्विनी[16]कुमारा-[17]वारोप्य, उपरि छत्रं विधृत्य, अधः पादुकोपानद्युगे दत्त्वा, रथपार्श्वे [18][चामरमारोप्य, कौषेयवासोमाल्यै रथमलङ्कृत्य, रथपार्श्वे पूर्णकुम्भचतुष्टयमष्टादशधान्यानि फलानीक्षुदण्डं शय्यामासनं गा उक्तसंख्यानामन्यतमसंख्यमश्वञ्च] स्थापयेयुः। ततो मङ्गलगीतवाद्यवन्दि-घोषेषु सत्सु यजमानं कुण्डसमीपस्थकुम्भचतुष्टयजलेन स्नापयेयुः। ततो यजमानः[19]शुक्ल-

---

1 I. O. ०यन्त्रोत्०
2 A तश्वारूढ् for the bracketed portion
3 A omits it
4 A ०घटितामीष्टदैवतप्रतिमां, I. O. ०घटितेष्टदैवताप्रमां
5 A इत्तु
6 I. O. यथेष्ट०
7 I. O. omits the bracketed portion
8 A अलङ्कारवाणि for the bracketed portion
9 I. O. omits the bracketed protion
10 A ०भोजनादिकं
11 A omits रथ
12 A कृतनित्य०
13 A रथं समारोप्य
14 A घटित for घटितेष्ट
15 I. O. omits द्वय
16 A omits नी
17 A omits वा
18 A omits the bracketed portion
19 A omits शुक्ल

माल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय रथं त्रिः[1] प्रदक्षिणीकृत्य 'नमो नमः पाप-[2]विनाशनाये'त्यादि मन्त्रद्वयं पठित्वा, पुष्पाञ्जलिनाभ्यर्च्य गुर्वृत्विक्-प्रमुखनानाब्राह्मणेभ्य उत्सृज्य दद्यात्। [3][तद् यथा—] ॐ अद्य यथासम्भवगोत्रनामभ्यो[4] गुर्वृत्विक्-प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्त-हिरण्याश्वरथ[5]-महादान-[6]दानफल-प्राप्तिकामोऽहम् एतं कृष्णाजिनन्यस्ततिलारोपितं [7][हैमाश्वारूढाश्विनी]-कुमारद्वयसहितं [8][सौवर्ण-[9]मुक्तप्रतिमान्वितं छत्रचामरकौषेयवस्त्रपादुकायुगोपानद्युगमाल्यपूर्णकुम्भचतुष्टयाष्टादशधान्यकौषेयवस्त्रसंयुक्त-वितानकेक्षु[10]-फलेयद्व[11]वीशयना[12]सनेयदश्वसहितं] हिरण्याश्वरथं ददानि ।

ततो गुर्वृत्विजः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'हिरण्याश्वरथोऽयं विष्णुदैवत' इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो यजमानो [13]गुर्वृत्विग्भ्यो दक्षिणां दद्यात् । तद् यथा —ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि [14]ददानि । गुर्वृत्विजः स्वस्तीत्युक्त्वा [15]प्रत्येकं स्वं स्वं सुवर्णभागं स्पृशेयुः । यद्वा गुर्वृत्विग्भ्य एव दद्यात् । तद्दानवाक्ये ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यो-ऽमुकामुकदेवशर्मभ्यो युष्मभ्यमिति, मत्स्यपुराणीय तुलापुरुषोक्तभागव्यवस्थयेति च विशेषः । ततस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादि-[16]प्रीणनं ब्राह्मणवाचनं त्वरया यथायथं हिरण्याश्वरथप्रतिपादनञ्च कुर्यात् ।

इति हिरण्याश्वरथमहादानं [17]समाप्तम् ।

---

1 A omits it
2 I. O. ॰विनाशायेत्यादि
3 A omits the bracketed portion
4 I. O omits भ्यो
5 A omits रथ
6 A omits दान
7 A हैमाश्वरूढात्म्य for the bracketed portion
8 A omits the bracketed portion
9 I. O. ॰मुक्त॰
10 I. O. ॰षु
11 I. O. च for द्व
12 I. O. ॰सनहिरण्याश्वसहितं
13 A ऋत्विग्भ्यो
14 A च
15 A omits it
16 A ॰तर्पणं
17 I. O. omits it

[1]तथा हेमहस्तिरथमहादानम्। (मत्स्यपुराणम्—२८२ अः)

अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम् ।
यस्य प्रदानाद्भुवनं वैष्णवं याति वै नरः ॥१॥
[2]पुण्यां तिथिमथासाद्य [तुलापुरुषदानवत् ।
विप्रवाचनकं][3] कुर्याल्लोकेशावाहनं बुधः ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥२॥
[4]अत्राप्युपोषितस्तद्वद्ब्राह्मणैः सह [5]शोभनम् ।
कुर्यात् पुष्परथाकारं काञ्चनं मणिभूषणम् ॥३॥
वलभीभिर्विचित्राभिश्चतुश्चक्रसमन्वितम् ।

[6][पुष्परथाकारं क्रीडारथाकारम् । वलभीभिः चतुष्पार्श्वस्थितोर्द्ध्वद्विशीर्षकमशीर्षकाकाराभिः । विचित्राभिः विविधरूपाभिः ।]

लोकपालाष्टकोपेतं [7][ब्रह्मार्कशिवसंयुतम् ॥४॥
मध्ये नारायणोपेतं] लक्ष्मीपुष्टिसमन्वितम् ।
कृष्णाजिने[8] तिलद्रोणं कृत्वा [9]संस्थापयेद्रथम् ॥५॥
तथाष्टादशधान्यानि भाजनासन-[10]चन्दनैः ।

सहितानीति शेषः ।

दीपिकोपानहच्छत्रं दर्पणं पादुकान्वितम् ॥६॥
ध्वजे तु गरुडं कुर्यात् [11]कूवराग्रे विनायकम् ।
[12][नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ॥७॥

---

1 A अथ
2 I. O. पुण्यां तिथिं समासाद्य, A पुण्या तिथिं अथासाद्य
3 A कृत्वा ब्राह्मणवाचनं। तुलापुरुषवत् for the bracketed portion
4 I. O. तत्रा०
5 A भोजनं
6 A omits the bracketed porrion
7 A omits the bracketed portion
8 A कृष्णाजिनं
9 I. O. संस्थापयेत् पुरं
10 A ०चन्दनैः
11 A कुवेराग्रे
12 A omits the bracketen portion

कौषेयं[1] पञ्चवर्णञ्च [2]अम्लानकुसुमान्वितम् ।]
चतुर्भिः कलसैः सार्द्धं गोभिरष्टाभिरन्वितम् ॥८॥
चतुर्भिर्हेममातङ्गैर्मुक्तादामविभूषितम्[3] ।
स्वरूपतः करिभ्याञ्च युक्तं कृत्वा निवेदयेत् ॥९॥
कुर्यात् पञ्चपलादूर्द्ध्-[4][मा भाराच्चापि] शक्तितः ।

अटवीश्वरान् सुलभतरकरिणो बहुसुवर्णार्जनासमर्थान् प्रतीदं [5]पाञ्चपलिकं महादानमुन्नेयम् ।

[6][ततो मङ्गलशब्देन] स्नापितो वेदपुङ्गवैः ॥१०॥
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ।
इममुच्चा[7]रयन्मन्त्रं ब्राह्मणेभ्यो [8]निवेदयेत् ॥११॥

नमो नमः [9]शङ्करपद्मजार्क-
लोकेशविद्याधरवासुदेवैः ।
त्वं सेव्यसे वेदपुराणयज्ञ-
तेजोमय स्यन्दन पाहि तस्मात् ॥१२॥
[10]यत्तत् पदं परमगुह्यतमं मुरारे-
रानन्दहेतु गुणरूपविमुक्तमन्तः ।
योगैकमानसदृशो मुनयः समाधौ
पश्यन्ति तत् त्वमसि नाथ [11]रथेऽधिरूढः ॥१३॥
यस्मात्त्वमेव भवसागर-[12]संप्लुताना-
मानन्दभाण्ड-[13]भूतमध्वरपानपात्रम् ।
तस्मादघौघशमनेन कुरु प्रसादं
चामीकरेभरथ माधव सम्प्रदानात् ॥१४॥

---

1 I. O. कौशेय
2 I. O. सुम्लान०
3 A ०विभूषितैः
4 A मभावादपि and M. P. मा भारादपि for the bracketed portion
5 I. O. पञ्चपलिकं, A पञ्चपलैक
6 A ततश्च मानाशब्देन for the bracketed portion
7 I. O. A and M. P. ०रयेन्मन्त्रं
8 A निवेदनं
9 A omits शङ्कर
10 I. O. तत्तत्
11 I. O. रथाधिरूढः, M. P. रथाधिरूढ
12 I. O. संश्रुताना०
13 A ०श्रुत०

इत्थं प्रणम्य कनकेभरथप्रदानं
यः कारयेत् सकलपापविमुक्तदेहः ।
विद्याधरामरमुनीन्द्रगणाभिजुष्ट[1]
प्राप्नोत्यसौ पदमतीन्द्रियमिन्दुमौलेः ॥१५॥
कृतदुरितवितानातुल्लसद्वह्निजाल-
व्यतिकरकृतदाहोद्वेगभाजोऽपि बन्धून् ।
नयति च पितृपुत्रान्[3] रौरवादप्यशेषात्
कृतगजरथदानः शाश्वतं [4]सद्म विष्णोः ॥

प्रयोगः

अत्र यजमानः समुत्पन्नहेमहस्तिरथ[5][महादानदानेच्छुः]-स्थुलापुरुषलिखितं[6] खड्ग-चर्ममय-ढाल[7]--सन्नाह-तुलास्थापनीयहरिप्रतिमा-सालङ्कारतुला-हस्तग्राह्य-देवताप्रतिमा-यथोक्तवितानबहिः सर्वं सम्भारम्, अधिकत्वेन पलपञ्चकादूर्द्धं [8]पलसहस्रद्वयपर्यन्तम् अभिमतपरिमाणसुवर्णघटितं संग्रामोचितसंस्थाना[9]श्वादिसामग्रीशून्यं चतुश्चकम् अभिमतरत्नखचितं ध्वजा-[10]ग्रारोपित-सौवर्णगरुडं कूवराग्रारोपितसौवर्णविनायकं प्रान्तेषु विविधसौवर्णपत्रावलीविचित्राभि-[11]रूर्द्ध-द्विपत्त्रकमशीर्षिकाकृतिभिर्वलभीभि-[12]र्वेष्टितम् अग्रारोपितहैमहस्तिचतुष्टयं स्वस्वदिक्क्रमोत्खाटिते-न्द्रादिलोकपाल-[13]प्रतिमाष्टकम् अभिमत-[14]पङ्क्तुयत्खाटितब्रह्मार्कशिवप्रतिमं रथं, रथालङ्करणार्थं मुक्ताहारं, रथमध्यारोपणार्थं सुवर्णान्तर-[15]पत्रोत्खाटितां लक्ष्मी-[16][पुष्टिसहितां नारायण-प्रतिमां, रथारोपणार्थं कृष्णाजिनं तिलद्रोणञ्च,[17]अग्रस्थापनार्थं हैमहस्तिचतुष्टयं[18], सम्मुखस्थाप-

---

1 A ०जुष्ट
2 I. O. ०मुल्लसद्व्हिजाल० A ०नन्व-सत्वाङ्गजाल०
3 I. O. ०पुत्राद्, A ०पूराद्
4 A सम्व
5 A माद्दादान for the bracketed portion
6 A ०लिखित
7 I, O. मयाढ्न and A मयाच्छन for मयढाल
8 A पलपञ्च for पञ्च
9 I. O. ०श्वादि, A ०श्वादिता for ०स्नादि
10 I. O. या for ग्रा
11 A ०कर्द्ध, विपत्त्र०
12 I. O. ठवलभीतिभि०, A omits it
13 I. O. प्रतिमाष्टकाभिमत०
14 I. O. पङ्क्तोत्०
15 I. O. यत्नोत्खाटितां, A पातोत्-खाटित
16 A प्रपञ्चयुतं only for the bracketed portion
17 I. O. अग्रस्थापित
18 I. O. ०चतुष्टय

नार्थं [1]स्वरूपहस्तिद्वयं, रथपार्श्वस्थापनार्थम् अष्टादशधान्य-कांस्यभाजनासन-चन्दन-दीपसामग्री-छत्र-दर्पण-पादुकायुगोपानद्युग-कुम्भचतुष्टयगवाष्टकानि, रथोर्द्ध्व मण्डपबन्धनार्थं कौषेयवस्त्रमयं वर्णपञ्चक-[2]युक्तं] वितानकं, तदलङ्करणार्थम् अम्लानपुष्पमाल्यसामग्रीं विविधफलानि चोत्पादयेत् ।

ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने यजमानगुर्वृत्विग्जापकास्तुलापुरुषवद्धविष्यभोजनादि[3] कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हेमहस्तिरथ-[4]पदं [5]निवेश्य [6][यथायथं निवेदनं सङ्कल्पञ्च] कुर्युः । अपरदिने च यजमानस्तुलापुरुषवद् गोविन्दाद्याराधनादि मधुपर्कदानान्तं गोविन्दाद्यभ्यर्चन[7]-ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहादि-[8][वाचन-वरण]वाक्येषु तुलापुरुषपदस्थाने हेमहस्तिरथपदं निवेश्य कुर्यात् । ततो गुर्वृत्विग्-यजमानजापका उपवसेयुः । अपरदिने च[9] कृतनित्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मण-वाचनान्तं कर्म यथायथं कुर्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धाय अनुष्ठातव्यम् ।

तत ऋत्विजः प्रधानवेद्यां लिखितचक्रोपरि कृष्णाजिनमास्तीर्य तदुपरि तिलद्रोणं विकीर्य, तत्र रथमारोप्य मुक्ताहारे-[10]णालङ्कृत्य, रथमध्ये लक्ष्मीपुष्टिसहितां नारायणप्रतिमामारोपयेयुः[11] । [12]रथाग्रतश्च [13]हैमहस्तिचतुष्टयं पङ्क्त्यारोप्य [14]तत्पुरतः [15]स्वरूपहस्तिद्वयमारोपयेयुः । रथपार्श्वे [16]चाष्टादशधान्य कांस्यभाजनासन-चन्दन--दीपोपानद्युग-काष्ठमयपादुकायुगच्छत्रदर्पणकुम्भचतुष्टयगवाष्टकानि [17]यथाशोभं स्थापयेयुः । ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु [18]कुण्डसमीपस्थ-कुम्भचतुष्टयजलेन [19]यजमानं स्नपयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय रथं त्रिः प्रदक्षिणीकृत्य 'नमो नम' इत्यादि—'माधव सम्प्रदाना'दित्यन्त-

---

1 I. O. सुरूप०
2 I. O. ०मुक्तं
3 A ०भोजनादिकं
4 A महादान between रथ and पदं
5 A प्रक्षिप्य
6 A सङ्कल्पं only for the bracketed portion
7 I. O. ०भ्यर्थन
8 A omits the bracketed portion
9 A omits it
10 A ०णालालङ्कृत्य
11 A ०मारोपयेत्
12 A omits it
13 A हैम०
14 I. O. एतत् पुरतः
15 I. O. सुरूपहस्तिद्वय०, A स्वरूपहस्तद्वय०
16 A अष्टादशधान्यानि
17 A यथाशक्ति
18 A कुण्डचतुष्टय for कुण्ड
19 A omits it

[1]मन्त्रैरामन्त्र्य, पुष्पाञ्जलिनाभ्यर्च्य प्रणम्य गुर्व्वृत्विक्प्रमुख-ब्राह्मणेभ्य उत्सृज्य दद्यात्। [2][तद् यथा] [3]ॐ अद्य यथासम्भवगोत्रनाम-गुर्व्वृत्विक्-प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्तहेमहस्ति-[4]रथमहादानदानफलप्राप्तिकामोऽहम् एतं कृष्णाजिनन्यस्ततिलद्रोणा[5]-रोपितं [6]स्वरूपहस्तिद्वय-युक्तं मुक्तादामोपशोभितं [7]लक्ष्मीपुष्टिसहितनारायणान्वितम् अष्टादशधान्य-कांस्य-[8]भाजनासन-चन्दन-दीपोपानद्युगच्छत्रदर्पणपादुकायुग--विविधफलसमायुक्ताम्लानकुसुमान्वित--[9]वितानक-कुम्भ-चतुष्टयगवाष्टकसहितं [10]हेमहस्तिरथं ददानि। गुर्व्वृत्विजः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा 'हेमहस्तिरथोऽयं विष्णुदैवत' इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः। ततो यजमानो गुर्व्वृत्विग्भ्यो दक्षिणां दद्यात्। तद् यथा—ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्ति-योग्यां भूमिमेतानि च[11] रत्नानि ददानि। गुर्व्वृत्विजः प्रत्येकं स्वस्तीत्युक्त्वा स्वं स्वं सुवर्णभागं स्पृशेयुः। यद्वा गुर्व्वृत्विग्भ्य एव दद्यात्। [12]तत्र ॐ अद्यामुकामुक-सगोत्रेभ्योऽमुकामुक-[13]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यमिति मत्स्यपुराणीय-तुलापुरुषभाग-व्यवस्थयेति च पूर्वदानवाक्ये विशेषः। ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया यथायथं हेमहस्तिरथ-[14]प्रतिपादनञ्च कुर्यात्।

इति हेमहस्तिरथमहादानं [15]समाप्तम्।

---

1 A मन्त्रै चामन्त्र्य
2 I. O. omits it
3 A omits it
4 I. O. omits रथ
5 A °द्रोण°
6 I. O. सुरूप°
7 A लक्ष्मीपुष्टिसहितं only
8 A °भाजनचामर°
9 A कनक
10 A हैम°
11 A च after रत्नानि
12 A तत्र
13 A वेद for वेदामुकामुक
14 A प्रकृति for प्रति
15 I. O. omits it

[1]तथा पञ्चलाङ्गलकमहादानम्। (मत्स्यपुराणम्—२८३ अः)

अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।

पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥१॥

पुण्यां तिथिमथासाद्य युगादिग्रहणादिकाम्।

भूमिदानं नरो दद्यात् पञ्चलाङ्गलकान्वितम् ॥२॥

[2][खेटं वा खर्वटं] वापि ग्रामं[3] वा शस्यशालिनम्।

निवर्तनशतं वापि [4][तदर्द्धं वापि] शक्तितः ॥३॥

[5]खर्वटो ग्रामशतद्वयप्रधानभूतो ग्रामः। क्रोशैकविस्तारो ग्रामः [6][खेट इति प्रसिद्धः]। निवर्तनपरिमाण[7]-श्चात्रैव वक्ष्यते।

सारदारुमयान् कृत्वा हलान् पञ्च [8]विलक्षणान्।

सर्वोपकरणैर्युक्तानन्यान् [9][पञ्च च काञ्चनान्] ॥४॥

सारदारुमयान् तुलापुरुषोक्तशालादिदारुप्रभवान्। सर्वोपकरणैर्युक्तान् [10]ईशायुगयोक्त्रा[11]-दिभिर्दारु-[12][मयैः काञ्चन]मयैश्च [13][यथाक्रमं युक्तानित्यर्थः।]

वृषान् लक्षणसंयुक्तान्[14] दशैव तु धुरन्धरान्।

सुवर्णशृङ्गाभरणान्[15] [16]मुक्तालाङ्गूलभूषितान् ॥५॥

लक्षणसंयुक्तान् गोसहस्र-[17]महादानोक्तलक्षणोपेतान्। सुवर्णशृङ्गाभरणान् सुवर्णशृङ्गान्, सौवर्णग्रैवेयकललाटपट्ट-[चन्द्ररूपालङ्कारयुक्तान्।

---

1 I. O. अथ

2 I. O. खेटकर्वटकं, A कर्वटं खटकं and M. P. खर्वटं खेटकं for the bracketed portion

3 I. O. ग्राम्यं

4 A तदर्द्धमपि for the bracketed portion

5 Both I. O. and A कर्वटो

6 A खेट and I. O. प्रसिद्ध: for the bracketed portion

7 A omits परिमाण

8 A and M. P. विचक्षण:

9 A पञ्चकाञ्चनान for the bracketed portion

10 A omits ईशा

11 A योक्त्रा०

12 A omits the bracketed portion

13 A reads the bracketed portion as यथाक्रमयुक्तामित्यर्थ:

14 A लक्षणसंयुक्ता

15 I. O. ०भरणा

16 A युक्तालाङ्गलभूषितान्

17 A omits महा

रौप्यपादाग्रतिलकान् रक्तकौषेय][1]-भूषणान् ।

स्रग्दामचन्दनयुतान् शालायामधिवासयेत् ॥६॥

रौप्यपादाग्रतिलकान् रौप्यपादाग्रान् रौप्यतिलकानित्यर्थः । शालायां दानमण्डपे, [2]चतुष्पत्त्रादीनामप्य-[3][थर्ववेदे शालात्वश्रुतेः] । तथा च [4][‘या द्विपत्त्रा चतुष्पत्त्रा षट्-पत्त्रा या निमीयते’ (अथर्व ६।३।२१)] इत्यादिः[5] [6]शालाभिधायको मन्त्रः ।

पर्जन्यादित्यरुद्रेभ्यः पायसं निर्वपेच्चरुम् ।

एकस्मिन्नेव कुण्डे तु [7][गुरुर्यस्मै निवेदयेत्] ॥७॥

गुरुर्यस्मै निवेदयेदिति यमृत्विजं[8] [9]गुरुरादिशति स कुर्यादित्यर्थः ।

[10]पालाशाः समिधस्तद्वदाज्यं कृष्णतिलांस्तथा ।

तुलापुरुषवत् कुर्याल्लोकेशावाहनं बुधः ॥८॥

तद्वदिति पालाश[11]-समिदाज्यकृष्णतिलान् पर्जन्यादित्यरुद्रेभ्यो जुहुयादित्यर्थः ।

ततो मङ्गलशब्देन शुक्लमाल्या-[म्बरो बुधः ।][12]

मङ्गलशब्देन स्नातः शुक्लमाल्याम्बरधर[13] इत्यर्थः ।

[14]आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुरीयकैः ।

कौषेयवस्त्रकटकैर्मणिभि[15]-श्चाभिपूजयेत् ॥९॥

द्विजदाम्पत्यं पत्नीसहितं गुरुमेवेत्यर्थः ।

शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम् ।

तथाष्टादशधान्यानि समन्तादधिवासयेत् ॥१०॥

सोपस्करां गेण्डूकादिसहिताम् ।

1 A ताम्रादि शेष for the bracketed portion

2 I. O. चतुःपत्त्रा० A चतुष्का०

3 A reads the bracketed portion as थदिशावत्वश्रुतिः

4 Corrected from A. V. I. O. पार्थिपत्त्रा चतुःपत्त्रा यो निमीयत and द्विपत्त्रा चतुःपत्त्राम्वा परिमीयतः for the bracketed portion

5 Both I. O. and A इत्यादि

6 A शलाभिधान

7 A omits the bracketed portion

8 A यमृत्विज

9 A गुरुरादिशति

10 A पालासाः, I. O. पलाशाः

11 A पाला०

12 A म्बरधर इति for the bracketed portion

13 Both I. O. and A omit धर

14 A आयह्य

15 A ०मौलाभि०

ततः [प्रदक्षिणां कृत्वा][1] गृहीतकुसुमाञ्जलिः ।
इममुच्चारयेन्मन्त्रमथ सर्वं निवेदयेत् ॥११॥

[2][सर्वं निवेदयेत्] गुरवे सर्वं निवेदयेदित्यर्थः, तस्यैव प्रक्रान्तत्वात् ।

यस्मा-[3]द्देवगणाः सर्वे[4] [स्थावराणि चराणि][5] च ।
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः [6]शिवेऽस्तु मे ॥१२॥
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोडशीम् ।
[7]दानान्यन्यानि मे भक्तिधर्मे एव दृढा[8] भवेत् ॥१३॥
दण्डेन सप्तहस्तेन त्रिंशद्दण्डा [9]निवर्तनम् ।
त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ॥१४॥
[10]मानेनानेन यो दद्या-[11]न्निवर्तनशतं बुधः ।
विधिनानेन तस्याशु क्षीयते पापसंहतिः[12] ॥१५॥
तदर्द्धमथवा दद्यादपि गोचर्ममात्रकम् ।
[13][भवनस्थानमात्रं वा] सोऽपि पापैः प्रमुच्यते ॥१६॥
यावन्ति [14]लाङ्गलकमार्गमुखाणि भूमे-
र्भासाम्पतेर्दुहितुरङ्ग-[15]जरोमकाणि ।
[तावन्ति शङ्करपुरे][16] स समा हि तिष्ठेद्
भूमिप्रदानमिह यः कुरुते मनुष्यः ॥१७॥
गन्धर्वकिन्नरसुरासुरसिद्ध[17]-संघै-
राधूतचामरमुपेत्य महद्विमानम् ।

---

1 A कृत्य, M. P. प्रदक्षिणीकृत्य
2 A omits the bracketed portion
3 A दे for द्दे
4 A सर्व्वे
5 A चराणि स्थावराणि for the bracketed portion
6 A शिवास्तु मे
7 A दानान्यदि
8 A दृढौ
9 A त्रिवर्त्तनं
10 I. O. मानेन
11 A त्रि for न्नि
12 A ०संहृति
13 Corrected from M. P. A तन्नूनं स्थानमात्रञ्च and I. O. भवनस्थानमंवा for the b. p.
14 Corrected from M. P. I. O. लाङ्गलककर्म्ममुखानि, A लाङ्गलमुखे मुखानि
15 A ०यानलोकानि
16 A reads the bracketed portion as भवन्ति शङ्करपुरारे शङ्करपुरे
17 A त्तिसिन्ध for सिद्ध

सम्पूज्यते पितृपितामह-[1]बन्धुयुक्तः
शम्भोः पुरं व्रजति चामरनायकः सन् ॥१८॥
[2][नेन्द्रत्वमप्यधिगतं क्षयमभ्युपैति]
गोभूमिलाङ्गलधुरन्धरसम्प्रदानात् ।
तस्मादघौघपटलक्षयकारि भूमे-
र्दानं विधेय-[3]मतिभूमिभवाभवाय ॥१९॥

प्रयोगः

[4]अत्र यजमानः समुत्पन्न-पञ्चलाङ्गलक-[5]महादानदानेच्छु[6]-स्तुलापुरुषलिखितं खड्ग-चर्म-[7]मयढाल-सन्नाह--[8]तुलास्थापनीयहरिप्रतिमा--सालङ्कारतुला[9]-हस्तग्राह्य-[10]देवताप्रतिमाबहिः सर्वं सम्भारम्, अधिकत्वेन [11][यथोक्त-खेट-खर्वट]-ग्राम-निवर्तनादीनामन्यतमां[12] भूमिं, तथा सारदारुमयानि ईशा-दण्डयोक्त्रा[13]-द्युपकरणान्वितानि पञ्च लाङ्गलानि, सौवर्णानि च[14] सोप-करणानि पञ्च [15]हलानि, यथोक्तलक्षणान् दश वृषान्, तदलङ्करणार्थं सुवर्णश्रृङ्गयुग[16]-दशकं, सौवर्णचन्द्रग्रैवेयकललाटपट्टदशकं, मुक्ताहारांश्च[17] दश, रौप्यं[18] खुरचतुष्कदशकं, [19][तिलक-दशकञ्च, दश] पुष्पमाल्यसामग्रीं[20] चन्दनञ्च, वृषाच्छादनार्थं रक्तकौषेयवस्त्रदशकञ्च, पञ्चलाङ्गल-पार्श्वस्थापनार्थं यथेच्छखट्वास्तीर्णकम्बल-[21][पटीतूलिकारूपां गण्डोपधान[22]-मशकवारणी]-सहितां शय्यां, बहुक्षीरां धेनुमष्टादशधान्यानि च, [23]सपत्नीकगुरुपूजार्थं [24]हेमयज्ञोपवीताङ्गुरीयक[25]-

---

1 A संघ for बन्धु

2 A reads the bracketed portion as मत्त्वद्वयमप्यधिकगतक्षय-स्वपैति

3 B ०मभिभूमि०, I. O. ०मभिभूति०, M. P. ०मिति भूतिभवोऽवाय

4 I. O. तत्र

5 I. O. ०लाङ्गल०

6 A श् for च्छ

7 I. O. मयाट्टन and A मयाकन्न for मयढाल

8 A ०सुला०

9 A ०सुला I. O. omits it

10 Both I. O. and A omit देवता

11 A यथोक्ता खट कर्कट for the bracketed portion

12 A ०तमरूपां

13 A ०योक्ता०

14 A omits it

15 A लाङ्गलानि

16 A omits युग

17 I. O. मुक्ताहाराश्च

18 A रौप्य

19 A omits the bracketed portion

20 Both I. O. and A ०सामग्री

21 A ०पट्टतूलिकापरिगीतूपधानदीपिका-पीठपादुकाव्यजन for the bracketed portion

22 I. O. गण्डोपधानां

23 A सापत्नेक०

24 A adds यथेच्छ here

25 I. O. ०लीयक

वलय-मुक्ताहार-कौषेयवस्त्राणि, [1]होमार्थपायसचरुसाधनार्थं [2]धान्यमुदूखलं [3]मुषलं [4]सूर्पं चरुस्थालीं दुग्धसामग्रीं [5]लौहयन्त्रिकां [6]पालाशसमिधः कृष्णतिलान् [7]घृतञ्चोत्पादयेत्।

ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा, निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने पञ्चलाङ्गलकपदं निवेश्य [निवेदनं[8] सङ्कल्पञ्च][9] कुर्युः। अपरदिने च[10] यजमानः पूर्ववद् [11]गोविन्दाद्याराधनादि मधुपर्कदानान्तं कर्म गोविन्दाद्य-[12][भ्यर्चन-ब्राह्मणानु]-ज्ञापन-दानसङ्कल्प-पुण्याहादिवाचनवरणवाक्ये-[13][षु तुला]-पुरुषपदस्थाने पञ्चलाङ्गलकपदं निवेश्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उपवसेयुः। अपरदिने च कृतनित्या ऋत्विजस्तुलापुरुषवदग्नि-[14][स्थापनं स्वस्व]कुण्डे[15] कुर्युः। ततो [16][गुरुर्यमृत्विजमादिशति स] स्वगृह्योक्तविधिना [17]स्वकुण्डे पायसचरुं [18]साधयेत्। ततो गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्[19] वनस्पतिहोमान्तं कर्म यथायथं कुर्युः। ततश्चरुसाधयिता ऋत्विक् पर्जन्यादित्यरुद्रेभ्यः स्वगृह्यविधिना—ॐ[20] पर्जन्याय स्वाहा, ॐ[21] आदित्याय स्वाहा, ॐ[22] रुद्राय स्वाहेति पायसचरुहोमं कृत्वा, तथैव [23]पालाशसमिद्धोमसमाज्यहोमं[24] [25]कृष्णतिलहोमं च कुर्यात। ततो गुर्वृत्विग्यजमानजापकास्तुलापुरुषवन्मध्यब्राह्मण-[26]वाचनान्तं कर्म यथायथं कुर्युः। तत ऋत्विजो दारुमयानि

1 A होमार्थं
2 A वावब for धान्य
3 A omits it
4 A सूपं
5 A लौहपत्रिकां
6 A पालासममिधः, I. O. पलाशसमिधः
7 A घृताञ्चोपपादयेत्
8 I. O. निवेदन
9 A omits the bracketed portion
10 A omits it
11 A गोम for गो
12 I. O reads the bracketed portion as भ्यर्चयन् ब्राह्मणार्थं
13 A omits the bracketed portion
14 A स्थापनादिनेषु for the bracketed portion
15 Both I. O. and A कुण्डेषु
16 I. O. the reads bracketed portion as गुर्वृत्विग्यजमानसहित स्व
17 A कुण्डे
18 A स्थापयेत्
19 A omits वद्
20 Both I. O. and A omit it
21 Both I. O. and A omit it
22 Both I. O. and A omit it
23 A पालास०, I.O. पलाश०
24 I. O.०होम
25 A कृत्वा for कथा
26 I. O. ०वाचनार्थं

पञ्च, [1]हैमानि च पञ्च लाङ्गलानि प्रधानवेद्यां लिखितचक्रोपरि स्थापयित्वा[2], तत्-[3][पार्श्वे च] वृषान् यथोक्तालङ्कारैरलङ्कृत्य स्थापयित्वा, यथोक्तशय्यां[4] धेनुमष्टादश धान्यानि च स्थापयेयुः ।

ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन [5][स्नापयेयुर्यजमानम् । ततो] यजमानो धृतशुक्लमाल्याम्बरो[6] धृतसर्वालङ्कारः सपत्नीकं गुरुमाहूय यथायथम-[7][वोक्ता]-लङ्कारैरलङ्कृत्य गृहीतपुष्पाञ्जलिर्लाङ्गलानि प्रदक्षिणीकृत्य, [8]'यस्माद्देवगणा' इत्यादिमन्त्राभ्यामामन्त्र्य पुष्पाञ्जलिनाभ्यर्च्य यथोक्तोपकरणसहितां[9] भूमिं तस्मै दद्यात् । तद् यथा—ॐ अद्यामुकसगोत्राय अमुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे[10] तुभ्यं मत्स्यपुराणोक्तपञ्चलाङ्गलक[11]-महादान-[12]दानफलप्राप्तिकामोऽहं हैम-[13][शृङ्ग-हैमभूषण]-[14]मुक्ताभूषित--[15][लाङ्गूल--रूप्यपाद--रूप्यतिलक[16]--स्रग्दामालङ्कृत--रक्तकौषेयाच्छादितवृषदशक-सहितसोपस्करशय्या-धेन्वष्टादशधान्य-सोपकरण--[17]सारदारुमय]-लाङ्गलपञ्चक-सोपकरणकाञ्चन-मयलाङ्गल-[18][पञ्चक-फल]-पुष्पोपशोभित[19]-पञ्चवर्णवितानकसहिताम् अमुकरूपां प्रियदत्तां भूमिं ददानि । गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा, 'भूमिर्विष्णुदैवते'त्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततो गुर्वृत्विग्भ्यो दक्षिणां दद्यात् । ॐ अद्य कृतैतत्-[20]कर्मप्रतिष्ठार्थं [21]युष्मभ्यमहं दक्षिणा-[22]मेतामियदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददानि । स्वस्तीति [23]ब्राह्मणा

1 I. O. ह्येमानि, A हैममयानि
2 I. O. स्थापयिता
3 A पार्श्वे only for the bracketed portion
4 Both I. O. and A ०शय्या
5 I. O. omits the bracketed portion
6 A ०म्बरः, I. O. ०म्बरधरो
7 I. O. व्रोक्ता, A omits the bracketed portion
8 A तस्मा०
9 I. O. ०सहिता
10 I. O. omits शर्मणे
11 A ०लाङ्गल०
12 A omits दान
13 I. O. वृषभ for the bracketed portion
14 A युक्तभूमि for मुक्ताभूषित
15 A omits the bracketed portion
16 I. O. ०तिल
17 I O. सत्व for सार
18 A पञ्चपससन्वित for the bracketed portion
19 I. O. ०शोभितं
20 A दान for कर्म
21 A युष्मभ्यमहं
22 I. O. omits एताम्, A इमाम् for एतामियद्
23 A omits it

ब्रूयुः। ततो यजमानस्तुलापुरुष-[1]वज्ञापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मण-वाचनञ्च कुर्यात्। ततस्त्वरया तद्भूमि[2]-प्रतिपादनं कुर्यात्। गुरुस्तु[3][स्वभूमिं प्रदक्षिणी-कुर्यात्]।

[4][इति पञ्चलाङ्गलकमहादानं समाप्तम्]।

1 A omits व
2 I. O. तभूमि०
3 A भूमिप्रदक्षिणं कुर्यात् for the bracketed portion

I. O. इति पञ्चलाङ्गलकमहादानं and A पञ्चलाङ्गलमहादानं समाप्त for the bracketed portion

तथा धरामहादानम्। (मत्स्यपुराणम्—२८४ अः)

अथातः सम्प्रवक्ष्यामि धरादानमनुत्तमम्।
पापक्षयकरं नृणाममङ्गल्य[1]-विनाशनम्॥१॥
कारयेत् पृथिवीं हैमीं[2] जम्बुद्वीपानुकारिणीम्।
[3][मर्यादापर्वतवतीं मध्ये मेरुसमन्विताम्[4]]॥२॥

मर्यादापर्वतवतीमित्यादिना जम्बुद्वीपानुकरणमेव कथितम्। मर्यादा-[5]पर्वताश्च हिमवद्धेमकूट-[6]निषधमाल्यव-[7]द्गन्धमादननीलश्वेतशृङ्गवाख्या विष्णुपुराणोक्ताः[8]।

लोकपालाष्टकोपेतां नववर्षसमन्विताम्[9]।
नदीनद-[10]शतोपेतां सप्तसागरवेष्टिताम्॥३॥

नववर्षाणि [11][वा मेरुं][12]वेष्टयित्वा स्थित इलावृतः, [13][मेरोः पूर्वतो] भद्राश्वः, [14][मेरोः पश्चिमतः] केतुमालः, [15]मेरुदक्षिणतो हरिवर्षं, हरिवर्षदक्षिणतः किम्पुरुषं, किम्पुरुषदक्षिणतो भारतं, मेरोरुत्तरे रम्यकं, रम्यकोत्तरतो हिरण्मयं, हिरण्मयोत्त-[16][रत उत्तरकुरवः]। एतानि[17] नव वर्षाणि पृथिव्यामुत्खाटयेदित्यर्थः। सप्तसागराश्च लवणेक्षुसुरासर्पिर्दधिदुग्धाम्बुमयाः।

महारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम्।
हेम्नः पलसहस्रेण तदर्धेनाथ शक्तितः॥४॥
शतत्रयेण वा कुर्याद्द्विशतेन शतेन वा।
कुर्यात् पञ्चपलादूर्द्ध्वमशक्तोऽपि [18]विचक्षणः॥५॥

---

1 I. O. ०मङ्गल०
2 A हैमां
3 I. O. omits the bracketed portion
4 A ०समन्वितं
5 A ०पर्व्वदाश्च, I. O. ०पर्व्वदाः
6 A निषेध०
7 A द्दु for द्ग
8 A ०क्ताः
9 I. O. ०समन्विताः
10 M. P. ०समोपेता
11 A omits the bracketed portion and reads a long irrelevant matter here
12 I. O. वीष्ट्वा
13 A पूर्व्वतः only for the b p.
14 A मेरो पार्श्वगतः for the b. p.
15 A मेरुः दक्षिणतो
16 A रैतो कुरु for the b. p.
17 A adds च after this
18 I. O. विचक्षणाः

पलपञ्च-[1]कादूर्द्ध [2]पलसहस्रान्तमित्यर्थः ।

तुलापुरुषवत् कुर्याल्लोकेशावाहनं बुधः ।
ऋत्विङ्मण्डप-[3]सम्भारभूषणाच्छादनादिकम् ॥६॥
वेद्यां कृष्णाजिनं कृत्वा [तिलानुपरि [4]विन्यसेत् ।][5]
तथाष्टादशधान्यानि [6][रसांश्च लवणादिकान्] ॥७॥
तथाष्टौ [7]पूर्णकलसान् समन्तात् [8]परिवारयेत् ।
[9][वितानकञ्च कौषेयं] फलानि विविधानि च ॥८॥

समन्तादिति [10]यथाविधिनियोगस्थानम् ।

[11]तथांशुकानि रम्याणि श्रीखण्डशकलानि[12] च ।
[13]इत्येवं [14]रचयित्वा [15]तामधिवासनपूर्वकम् ॥९॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषणः[16] ।

शुक्लाभरणं मुक्तारजत-[17]कर्पूरमयम् ।

प्रदक्षिणं ततः कृत्वा गृहीतकुसुमाञ्जलिः ॥१०॥
पुण्यकालमथासाद्य मन्त्रानेतानुदीरयेत् ।
नमस्ते [18]सर्वदेवानां त्वमेव भवनं यतः ॥११॥
धात्री च[19] सर्वभूतानामतः पाहि वसुन्धरे[20] ।
[वसु[21] धारयसे यस्माद्वसु चातीव निर्मलम्][22] ॥१२॥

---

1 A omits का
2 I. O. पलशतपर्यन्तमित्यर्थः
3 I. O. ०संहार०
4 A' वेशयेत्
5 M. P. reads the b. p. as तिलानामुपरि न्यसेत्
6 Corrected from M. P. I. O. and A' रसाश्च लवणादयः
7 I. O. पूर्ब्बकलसान्
8 M. P. परिकल्पयेत्
9 I. O. वितानञ्च सकौशेयं for the b. p.
10 A' यथायोगं कुर्यात्
11 I. O. तथा शुष्काणि
12 A' ०सकलानि
13 I. O. इत्येव
14 M. P. कारयित्वा
15 A तु for ता
16 M. P. ०भूषितः
17 I. O. ०कपूर०
18 A ०देवनां
19 I. O. धात्रीव
20 A वसुन्धरा
21 I. O. वसुं
22 A omits the bracketed portion

वसुन्धरा ततो जाता तस्मात् पाहि [1]भयादलम् ।
चतुर्मुखोऽपि [2]नो गच्छेद् यस्मादन्तं [3]तवाचले ॥१३॥
अनन्तायै [4]नमस्तस्मात् पाहि संसार-[5]सागरात् ।
त्वमेव लक्ष्मीर्गोविन्दे[6] शिवे गौरीति [7]संस्थिता ॥१४॥
गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ।
बुद्धिर्बृहस्पतौ ख्याता मेधा [8]मुनिषु संस्थिता ॥१५॥
विश्वं व्याप्य स्थिता यस्मात्ततो विश्वम्भरा मता ।
[9]धृतिः स्थितिः क्षमा क्षोणी[10] पृथ्वी वसुमती रसा ॥१६॥
एताभिर्मूर्त्तिभिः पाहि [11]देवि संसारसागरात् ।
[12]एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ॥१७॥

ब्राह्मणेभ्यो गुर्वृत्विग्भ्यः ।

[13][धरार्धं वा] चतुर्भागं गुरवे प्रतिपादयेत् ।
[14]शेषञ्चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्जयेत् ॥१८॥

[15][प्रतिपत्य विसर्जयेदिति] ब्राह्मणान् प्रणिपत्य विसर्जयेदित्यर्थः ।

अनेन विधिना यस्तु दद्याद्धेम-[16][धरां बुधः] ।
पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवम् ॥१९॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमथा-[17]वसेत् ।
पितृपुत्र-[18]प्रपौत्रांश्च[19] तारयेदेकविंशतिम् ॥२०॥
इति पठति य इत्थं यः शृणोति प्रसङ्गा-
दपि कलुषवितानैर्मुक्त[20]-देहः समन्तात् ।

---

1 A तथादमं
2 A नागच्छेद
3 I. O. बलाबले
4 I. O. बमन्तस्मात
5 I. O. ०काधयात्, M. P. ०कद्दंमात
6 A ०न्द्रो
7 M. P. चास्थिता
8 Corrected for M. P. I. O. स्वामिस्व, A गुयु
9 I. O. वृत्ति
10 I. O. चौणी
11 A देवी
12 I. O. एवमुत्तार्थं
13 A धरार्धं for the b. p.
14 A सायचैवाथ
15 A omits the b. p.
16 A धराम्बुरः and M. P. धरां शुभाम् for the b. p.
17 A ०वसत्
18 A omits प्र
19 M. P. reads the whole word as पितॄन् पुत्रांश्च पौत्रांश्च
20 I. O. ०र्मुक्त०

दिव-[1]ममरवधूभिर्याति [2]संप्रार्थ्यमानः
पदममरसहस्रैः सेवितं [3]चन्द्रमौलेः ॥२१॥

प्रयोगः

अत्र यजमानः समुपजातधरामहादानदानेच्छस्तुलापुरुषलिखित[4]-खड्गचर्म[5]मयढालसन्नाह-तुला--[6]स्थापनीयहरिप्रतिमा--सालङ्कारतुला--हस्तग्राह्यप्रतिमा--यजमानार्थ--[7]हैमालङ्कार--यथोक्त-वितानबर्हिः सम्भार-[8]मधिकत्वेन पलपञ्चकादूर्द्ध्व [9]पलशतैक-पलशतद्वय-पलशतत्रय-पलशत-पञ्चक-पलसहस्राणां यथा-[10]शक्त्यन्यतमपरिमाणेन सुवर्णेन घटितां मण्डलाकृतिं बहिरुत्-[11]खाटित-सान्तराल-सप्तसागराकार-वलयसप्तक-वेष्टितां मध्ये पूर्वपश्चिमायतरेखाषट्केन समभागसप्तकविभक्तां कृत्वा मध्यभागञ्च पूर्वपश्चिमायत-[12]रेखाद्वयसंलग्नदक्षिणोत्तरायतरेखा-द्वयेन [13]समं भागत्रयं कृत्वा मध्यभागमध्ये [14]पृथ्व्यग्रं [15]स्वस्वदिगुत्खाटितेन्द्रादिलोक-[16]पालाष्टकवेष्टितशिरसं [17][यथेच्छस्थान-प्रत्युत्खाटित]-वस्वष्टकैकादशरुद्रद्वादशादित्यं पद्मव-राटाकृति-[18]मुन्नतं मेरुं निर्माय मेरु-[19]पूर्वपश्चिमरेखयोर्यथाक्रमरेखायतं[20] मेरोः किञ्चिद-[21]वनतं [22]माल्यवन्तं गन्धमादनञ्च पर्वताकृतिं निर्माय मेरोर्दक्षिणोत्तररेखा-[23][द्वये रेखायतं] मेरु[24]-समानोच्छ्रायं यथाक्रमं नीलं निषधञ्च पर्वताकारं [25]घटयित्वा नीलदक्षिणरेखा-द्वये यथाक्रमं रेखायतं [26][नीलात् किञ्चिदवनतं] [27]हेमकूटं हिमवन्तञ्च घटयेत्।

---

1 I. O. ०ममवरभूतिर्याति
2 M. P. सम्मार्थमानो, I. O समाज्य-मानः
3 Corrected from M. P. I. O. चन्द्रमौलि, A चन्द्रमौलिः
4 Both I. O. and A लिखितं
5 Both I. O. and A मयाच्छन्न
6 I. O. पापनीय for स्थापनीय
7 A हैमा०
8 I. O. ०मानमानकत्वेन
9 I. O. पलशतत्रयं शतपञ्चकपल-सहस्राणां and A पलशतद्वयपलशत-त्रयपलशतैकपलशतपञ्चपलसहस्राणां
10 A ०शक्ति अभिमत०
11 I. O. ०पाटित
12 I. O. ०खेरा०
13 A omits it
14 I. O. पृथ्वं, A पृथ्वं
15 I. O. स्वर्गंतुखात्काटितेन्द्रादि०, A सुसुदि...दि०
16 I. O. ०पालान्तक०, A ०पालाश्च-ष्टका०
17 I. O. reads the bracketed portion as सुखेच्छसा ०पक्षखाटित
18 I. O. ०सुपूतं
19 I. O. omits पूर्वं
20 A ०यथाक्रमं लिखायातां
21 A ०न्नत
22 I. O. माल्यवतां
23 A reads द्वय for the bracketed portion
24 I. O. ०समानोक्त
25 A घटित्वा
26 A reads नीलाकिञ्चिदनन्तरं for the bracketed portion
27 A हिमकूटं again after this, I. O. हैमकूट

[1][निषधोत्तररेखाद्वये यथाक्रमं रेखायतं निषधात् किञ्चिदवनतं[2] श्वेतं शृङ्गिणञ्च पर्वताकारं घटयेत्।] एवञ्च [3][नवान्तरालैर्नववर्ष[4]-विभागवतीं] [5]जम्बुद्वीपानुकारिणीं तत्तत्स्थानरेखोत्खाटित-[6]बहुतरसरिन्नदाकारां यथेच्छोत्कृष्टरत्नखचितां पृथ्वीं[7] तदारोपणार्थं कृष्णाजिनं तिलांश्च पृथ्वीमण्डलोद्बन्धनार्थं[8] कौषेयवस्त्रसहितं पञ्चवर्णवितानकं पृथ्वीपार्श्वस्थापनार्थमष्टादशधान्य[9]-लवणादिरसषट्क-[10]पूर्णकुम्भाष्टक-नानाफल[11]-[12]नानाविधोत्कृष्टवस्त्राणि यथेष्टं चन्दनखण्डांश्च, यजमानार्थं यथेष्टं मुक्तारजतकर्पूरनिर्मिताल[13]-ङ्कारांश्चोत्पादयेत्। ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने[14] धरापदं[15] निवेश्य यथायथं निवेदनं[16] सङ्कल्पञ्च कुर्युः। अपरदिने च यजमानस्तुलापुरुषवद् गोविन्दाद्याराधनादि-मधुपर्कदानान्तं कर्म [17]गोविन्दाभ्यर्चन-ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने धरापदं निवेश्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका[18] उपवसेयुः। अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च हविष्यादिमध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थ-[19]मनुसन्धायानुष्ठातव्यम्। तत ऋत्विजः पृथ्वीं लिखितचक्रोपरि कृष्णाजिनमास्तीर्य तत्र तिलान् दत्त्वा तदुपरि समारोपयेयुः। पृथ्वीपार्श्वे चाष्टादशधान्यरसषट्कपूर्णकुम्भाष्टक-नानाफल-नानाविधोत्कृष्टवस्त्रत्रय-चन्दनखण्डत्रयाणि चारोपयेयुः। ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन [20]यजमानं स्नपयेयुः। यज-

---

1 I. O. omits the bracketed portion
2 A किञ्चिदवत
3 A reads the bracketed portion as नवधा नववर्षाणि भावतीं and inserts a long matter of the next chapter between नवधा and नववर्षाणि
4 I. O. ०वर्षा०
5 I. O. जम्बुद्वीपार्थकारिणीं
6 I. O. ०बहुतर
7 I. O. पृथ्वी, A पृथिवीं
8 Both I. O. and A बन्धनार्थं
9 A धान्यै, I. O. प्राप्य
10 Both I. O. and A omit पूर्ण
11 I. O. नानाफलद्वां
12 A नानौषधोत्कृष्ट०
13 A ०ङ्कारश्चोत्पादयेत्, I. O. ०ङ्काराणुत्पादयेत्
14 I. O. ०स्थानेन
15 I. O. धरासुतं
16 I. O. निवेदन
17 A गोविन्दाद्यभ्यर्चन, I. O. गोविन्दाभ्यर्चन ·
18 I. O. ०कामुका
19 I. O. ०समुन्नायानुष्ठात:
20 I. O. omits it

मानस्तु शुक्लमाल्याम्बरधरो [1]धृतशुक्लसर्वाङ्गालङ्कारः पुष्पाञ्जलिमादाय पृथ्वीं प्रदक्षिणीकृत्य 'नमस्ते सर्वदेवाना'मित्यादि 'देवि संसारसागरा'दित्यन्तमन्त्रैरामन्त्र्य पुष्पाञ्जलिनाभ्यर्च्य गुर्वृत्विग्भ्यो दद्यात्। तद् यथा—ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुक-[2]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तधरामहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थयैतां[3] कृष्णाजिनन्यस्ततिलोपरि[4] [5]स्थापितामष्टादशधान्यरसषट्कपूर्णकुम्भाष्टककौषेयवस्त्रान्वितपञ्चवर्णवितानकबहुविधफलोत्कृष्टवस्त्रत्रयचन्दनखण्डान्वितां जम्बुद्वीपानुकारिणीं धरां ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा धरेयं विष्णुदैवतेत्युक्त्वा यथाशाखं[6] कामस्तुतिं पठेयुः। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि च[7] रत्नानि ददानि। स्वस्तीति ब्राह्मणाः प्रत्येकमुक्त्वा पृथ्वीं प्रदक्षिणीकुर्युः। ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं पुण्याहवाचनं कृत्वा त्वरया पृथ्वीं विभज्य यथायथं प्रतिपादयेत्।

इति धरामहादानं [8]समाप्तम्।

---

1 A हृतसर्वाङ्गालङ्कारः

2 Both I. O. and A omit वेदामुकामुक

3 A reads एतां just before this word

4 I. O. ०स्थितोपरि

5 I. O. स्थापयितामष्टा०, A स्थापिताष्टा०

6 I. O. यथायथं

7 I. O. वर, A reads च after रत्नानि

8 I. O. omits it

तथा विश्वचक्रमहादानम् । (मत्स्यपुराणम्—२८५अः)

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।

विश्वचक्रमिति ख्यातं महापातकनाशनम् ॥१॥

तपनीयस्य शुद्धस्य [1]विश्वचक्रन्तु कारयेत ।

श्रेष्ठं पलसहस्रेण तदर्धेन तु मध्यमम् ॥२॥

तस्यार्धेन कनिष्ठं[2] स्याद्विश्वचक्रमुदाहृतम् ।

अन्यद्विंशपलादूर्ध्वमशक्तोऽपि निवेदयेत् ॥३॥

षोडशारं ततश्चक्रं [3]भ्रमन्नेम्यष्टकावृतम् ।

[4][भ्रमन्नेम्यष्टकावृतमिति समभागसान्तरालाष्टवेष्टनचक्रनिर्गतशल्याग्राकृतिनेम्यष्टकावेष्टितम् ।]

नाभिपद्मे स्थितं विष्णुं योगारूढं[5] चतुर्भुजम् ॥४॥

[6]शंखचक्रेऽस्य पार्श्वे तु देव्यष्टकसमावृतम् ।

नाभिपद्मे[7] चक्रमध्य[8]-स्थिताष्टदलपद्मे । देव्यष्टकञ्च विमलोत्कर्षिणी[9]ज्ञाना-[10] क्रिया योगा [11]प्रह्वी सत्या [12]ईशानीति ।

द्वितीयावरणे तद्वत् पूर्व-[13][तो जलशायिनम्] ॥५॥

अत्रिर्भृगुर्वशिष्ठश्च [14]ब्रह्मा [15]कश्यप एव च ।

मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ॥६॥

---

1 M. P. विषुवादिषु

2 I. O. करिष्य

3 Corrected from M. P. A भ्रमिनेम्यष्टकावृतं, I. O. भ्रमिनेम्य- ष्टकावृतं

4 I. O. reads the bracketed portion as समभागसान्तराष्टवेष्टनचक्रनिर्गतं शस्त्राग्राकृतिनेम्यष्टकावेष्टितं, while A as वृतमिति समभाग- सराष्टवेष्टनक्रवहिर्निर्गत्य शल्याग्राकृति- नेम्यष्टवेष्टितं

5 I. O. योगारूढ

6 A ०च क्रस्य

7 A ०पद्म

8 I. O. ०मध्य०

9 I. O. ०कर्षणा०

10 I. O. जाना

11 I. O. प्रह्वी

12 I. O. प्रधानीति, A ईशानेति

13 I. O. भोजनशायिनं for the bracketed portion

14 Corrected from M. P. Both I. O. and A ब्रह्म

15 A काश्यप

रामो रामश्च कृष्णश्च बुद्धः कल्कीति च क्रमात् ।
तृतीयावरणे गौरी मातृभिर्वसुभि-[1]र्युता ॥७॥
चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ।

मातरश्च ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी [2][रुद्राणीति सप्त] । वसव आदित्याश्च तुलापुरुषोक्ताः । वेदाः प्रसिद्धाः ।

पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ॥८॥
लोकपालाष्टकं [3]षष्ठे दिङ्मातङ्गास्तथैव च[4] ।

पञ्चभूतानि प्रसिद्धानि । रुद्राश्च अजैकपात्[5] अहिर्बुध्नः[6] विरूपाक्षः रैवतः[7] बहुरूपः [8]त्र्यम्बकः सुरेश्वरः [9]सावित्रः [10]जयन्तः पिनाकी अपराजितः । लोकपालाष्टकं दिङ्मातङ्गाष्टकञ्च प्रसिद्धम् ।

सप्तमेऽस्त्राणि सर्वाणि मङ्गलानि च कारयेत् ॥९॥
अन्तरान्तरतो[11] देवान् विन्यसेदष्टमे पुनः ।

अस्त्राणि [12]बहूनि [13]शक्तिर्दण्डः खड्गः पाशः ध्वजः गदा शूलमिति । मङ्गलाष्टकञ्च सिंहः [14]वृषः गजः कलसः व्यजनं वैजयन्ती भेरी दीपश्चेति । अन्तरान्तरतो[15] देवानित्यादिना [16]अन्यानपि देवान् स्वेच्छया अष्टमावरणान्तरालेषु विन्यसेदित्यर्थः । तत्र च विनायकनवग्रह-स्कन्दाश्विनीकुमार-[17]सागर-लक्ष्मी-गङ्गायमुना[18]-निवेशः [19][प्रायश उक्तः] ।

तुलापुरुषव-[20]च्छेषं समन्तात् परिकल्पयेत् ॥१०॥
ऋत्विङ्मण्डपसम्भार-भूषणाच्छादनादिकम् ।
विश्वचक्रं ततः कुर्य्यात् कृष्णाजिनतिलोपरि ॥११॥
तथाष्टादश धान्यानि [21][रसांश्च लवणादिकान्] ।
पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च ॥१२॥

---

1 I. O. ०ह्वृता
2 A रुद्राणी सप्त and I. O. रुद्राणीति क्रमः: for the bracketed portion
3 A तद्वत्
4 A तु
5 A अजैकपाद
6 I. O. अहिर्बुध्नः
7 I. O. adds हरः after this
8 I. O. त्र्यम्बकः
9 A सावित्र, I. O. सावित्रः
10 I. O. जयन्तः
11 I. O. अन्तरान्तराऽष्टौ
12 A वज्र
13 Both I. O. and A शक्तिर्दण्डः
14 I. O. धूपः
15 I. O. omits तो
16 I. O. तानपि
17 A च०
18 A गङ्गयमुनायां
19 I. O. प्रायशोक्तः, A प्रायशो युक्त
20 I. O. ०च्चयं
21 Corrected from M. P. Both I. O. and A रसाश्च लवणादयः, for the bracketed portion

माल्येक्षुफलरम्भाणि वितानञ्चापि [1]कल्पयेत् ।
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो गृही ।
होमाधिवासनान्ते [2]तु गृहीतकुसुमाञ्जलिः ॥१३॥
इममुच्चारयेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम् ।
नमो [3]विश्वमयायेति विश्वचक्रात्मने नमः ॥१४॥
परमानन्दरूपी[4] त्वं पाहि नः पापकर्दमात् ।
[5]तेजोमयमिदं यस्मात्[6][सदा पश्यन्ति योगिनः ॥१५॥
[7][हृदिस्थं त्रिगुणातीतं] विश्वचक्रं नमाम्यहम् ।
वासुदेवे स्थितं चक्रं चक्रमध्ये तु माधवः[8] ॥१६॥
अन्योन्याधाररूपेण प्रणमामि [9]स्थिताविह ।
विश्वचक्रमिदं यस्मात्] सर्वपापहरं[10] हरेः[11] ॥१७॥
[12][आयुधञ्चापि वासश्च भवादुद्धर मामतः] ।
[13][इत्यामन्त्र्य तु[14] यो] दद्याद्विश्वचक्रं विमत्सरः ॥१८॥
विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ।
वैकुण्ठलोकमासाद्य चतुर्बाहुः सनातनः ॥१९॥
सेव्यतेऽप्सरसां [15]सङ्घैस्तिष्ठेत् कल्पशतत्रयम्[16] ।
प्रणमेद्वाथ यः कृत्वा विश्वचक्रं दिने दिने ।
तस्यायुर्वर्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥२०॥

---

1 M. P. कारयेत्
2 M. P. वै
3 A विश्वरूपायेति
4 I. O. ०रूपं
5 I. O. तेभ्यो गयामिदं
6 A omits the bracketed portion
7 M. P. reads हृदि तत्त्वं गुणातीतं for the bracketed portion
8 I. O. माधवं
9 I. O. स्थिताविह
10 A सर्वपापोपहं
11 M. P. परम्
12 I. O. reads the bracketed portion as त्वाम्बरञ्चापि मामस्य भवादुत्तरमामतः
13 I. O. reads b. p. as एवमित्वा ततो
14 M. P. च
15 I. O. सर्वे तिष्ठेत्
16 A ०त्रयं

इति सकलजगत्सुराधि[1]-वासं वितरति [2]यस्तपनीयषोडशारम् ।
हरि-[3]भवनमुपागतः स [4]सिद्धैश्चिर-[मुपगम्य[5] नमस्यते][6] [7][शिरोभिः ॥२१॥
[8]अशुभदर्शनतां प्रयाति] शत्रोर्मदनसुदर्शनताञ्च [9]कामिनीभ्यः ।
[10][स सु]-दर्शनकेशवानुरूपः [11]कनकसुदर्शनदानदग्धपापः ॥२२॥
कृतगुरुदुरितानि [12]षोडशारप्रवितरण[13]-प्रवराकृतिर्मुरारेः ।
अभिभवति भवोद्भवन्ति भीत्या भवमभितो [14]भुवने भयानि भूयः ॥२३॥

प्रयोगः

अत्र यजमानः समुपजातविश्वचक्रमहादानदानेच्छस्तुलापुरुषलिखित[15]-खड्गचर्ममय-ढाल[16]-सन्नाह-तुलास्थापनीयहरिप्रतिमा-सालङ्कारतुलाहस्तग्राह्यप्रतिमाबहिः सर्वसम्भारमधिकृत्वेन यथेच्छमुत्तमं[17] सुवर्णपलसहस्रेण मध्यमं पलशतपञ्चकेन[18] कनिष्ठं सार्द्धपलशतद्वयेन विंशति-संख्यपलादूर्द्ध्वं [यथाशक्त्युपात्त-सुवर्ण][19]--घटिताष्टदल-[20]पूर्वादिक्रमोत्खाटित विमलाद्यष्टशक्ति सहित-मध्योत्खाटित-[21]यथोक्तविष्णुप्रतिमं पद्मं कृत्वा [22]पद्मस्य समन्तादूर्द्ध्वं षोडशदण्डिका-[23]युतं[24]समभागसान्तरालाष्टकुण्डलवेष्टितं बहिर्निर्गत-[25]शल्याग्राकृतिनेम्यष्टकयुतं द्वितीयावरण-मुपरि[26][कुण्डलावच्छिन्नासु षोडशसु कोष्ठिकासु][27]पूर्वादिक्रमोत्खाटित-जलशाय्यादिषोडशदेवता-प्रतिमं तृतीयावरणे तथैव[28] पूर्वादि[29]-क्रमकोष्ठि[30]-कोत्खाटितगौर्यादिषोडशदेवताप्रतिमं चतुर्था-

---

1 I. O. रि for धि
2 Corrected from M. P. I. O. यतुपनीय०, A यः पनीयसीडशारैः
3 I. O. ०भवनादुपागत:
4 A सिद्ध०
5 M. P. ०मभिगम्य
6 A reads the bracketed portion as मभिगमस्यते
7 I. O. reads the bracketed portion as प्रिशिति सायुक्तदर्शनतां
8 M. P. शुभदर्शनतां
9 I. O. कालिनीभ्य:
10 I. O. सद्य for the b. p.
11 I. O. कनकसुदर्शनस्य पापः
12 I. O. षोडशार्थि०
13 M. P. ०तरवी
14 Corrected from M. P. Both I. O. and A भवने
15 Both I. O. and A ०लिखितं
16 Both I. O. and A मयाच्छन्न for मयढाल
17 I. O. ०मुत्तम:
18 I. O. ०लेन
19 A यथाशक्त्युपपत्ते: स्ववन for the b. p.
20 I. O. पूर्व्वादिभिः
21 I. O. omits यथोक्त
22 A omits it
23 I. O. ०सुप
24 A समभा for समभाग
25 I. O. शल्याग्राकृतिनेम्यष्टयुः
26 I. O. ०वरणोहर
27 I. O. reads the bracketed portion as कुण्डलावच्छिन्नार्थे षोडशसु कोष्ठिकार्थे
28 I. O. तद्वैन
29 I. O. पूर्व्वाभि०
30 A omits कोष्टि

वरणे [1]पूर्वादिक्रमकोष्ठिकोत्खाटित-द्वादशादित्य-[2]वेदचतुष्टयप्रतिमं पञ्चमावरणे पूर्वादिक्रम-कोष्ठिकोत्खाटित-पञ्चमहाभूतादि[3]-षोडशप्रतिमं षष्ठावरणे पूर्वादिक्रमकोष्ठिकोत्खाटितलोक-पालादिषोडशप्रतिमं सप्तमावरणे पूर्वादिक्रमकोष्ठिकोत्खाटिता-[[4]स्त्राष्टक-मङ्गलाष्टकाकारम् अष्ट-मावरणे पूर्वादिक्रम-कोष्ठिकोत्खाटित][5]-विनायकादिदेवताप्रतिमाषोडशकं चक्रं चक्रारोपणार्थं कृष्णाजिनं तिलांश्च [6]चक्रालङ्करणार्थं माल्यसामग्रीं यथेष्टं रत्नानि नानाविधवस्त्रत्रयञ्च चक्रपार्श्व-स्थापनार्थमष्टादशधान्य-लवणादिरसषट्क-कुम्भाष्टकेक्षुफलानि ऊर्द्ध्वं बन्धनार्थं यथेच्छं वितान-ञ्चोत्पादयेत्। ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुला-पुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषवदस्थाने विश्वचक्रपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च कुर्युः। अपरदिने च[7] यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादि-मधुपर्क-[8][दानान्तं कर्म] [9]गोविन्दाद्यभ्यर्चन-[10]ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहादिवाचन-वरण-वाक्येषु तुलापुरुषपदस्थाने विश्वचक्रपदं प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उप-वसेयुः। अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादि-मध्यब्राह्मणवाचनान्तं [11]कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं [12]कर्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत ऋत्विज-श्चक्रं वेदीमध्ये लिखितचक्रोपरि कृष्णाजिनमास्तीर्य्य तत्र तिलान् दत्त्वा तत्रारोप्य वस्त्रमाल्यैरल-ङ्कृत्य चक्रपार्श्वेऽष्टादशधान्यानि लवणादिरसषट्क-[13]पूर्णकुम्भाष्टकमिक्षुदण्डान् फलानि चारोप्य मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नपयेयुः। ततो यजमानः शुक्लमाल्याम्बरधरो[14] धृतसर्वा-[15]ङ्गालङ्कारः पुष्पाञ्जलिमादाय चक्रं त्रिः प्रदक्षिणीकृत्य 'नमो [16]विश्वमयाये'त्यादि[17]['भवादुद्धर मामत' इत्यन्त]-मन्त्रैरामन्त्र्य गुर्वृत्विक्प्रमुखब्राह्मणेभ्य उत्सृज्य दद्यात्। तद् यथा—ॐ अद्य यथासम्भवगोत्रनाम-गुर्वृत्विक्प्रमुखब्राह्मणेभ्यो मत्स्य-पुराणोक्त विश्वचक्र-[18]महादान-दानफलप्राप्तिकामोऽहमेतत् कृष्णाजिनन्यस्ततिलारोपितमाल्य-

---

1 I. O. पूर्व्वाक्रम०
2 I. O. दैव०
3 A ०भूतानि
4 I. O. स्त्राष्टक०
5 A पञ्चमहा for the bracketed portion
6 I. O. चक्रालङ्काराथें
7 A omits it
8 A दानान्त for the b. p.
9 I. O. गोविन्दाद्यभ्यर्च्चन, A गोविन्दा-भ्यर्च्चन
10 I. O. ब्राह्मणार्थेज्ञापन
11 A omits it
12 A omits it
13 I. O. पूर्व्व for पूर्ण
14 A शुक्लमाल्याम्बरः
15 A omits ङ्गा
16 A विश्वमयेत्यादि
17 A reads भवादुद्धर मामतः इति for and I. O. omits, the bracketed portion
18 A omits महादान

[1]रत्ननानाविधवस्त्राष्टा[2]--दशधान्य-रसषट्कपूर्णकुम्भाष्टकेक्षुदण्ड[3]--फलवितानसहितं विश्वचक्रं ददानि । गुर्वृत्विजः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा विश्वचक्रमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो यजमानो गुर्वृत्विग्भ्यो दक्षिणां दद्यात् । तद् यथा—ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामि-[4]यदुत्पत्तियोग्यां भूमिमेतानि च[5] रत्नानि ददानि । गुर्वृत्विजः प्रत्येकं स्वस्तीत्युक्त्वा स्वं स्वं भागं स्पृशेयुः । यद्वा गुर्वृत्विग्भ्य एव दद्यात् । [6]तत्र ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यो-[7][ऽमुकामुकदेवशर्मभ्यो युष्मभ्यमिति मत्स्यपुराणीयतुलापुरुषोक्तभागव्यवस्थयेति च पूर्वदानवाक्याद्विशेषः । ततस्तुलापुरुषवज्जापकेभ्यो] दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनं यथायथं त्वरया विश्वचक्रप्रतिपादनञ्च कुर्य्यात् ।

इति विश्वचक्रमहादानं [8]समाप्तम् ।

---

1 A वस्त्र०
2 A omits ष्टा
3 A omits दण्ड
4 A ०नामु० for ०यदु०
5 A omits it
6 I. O. omits it
7 A omits the bracketed portion
8 I. O. omits it

तथा महाकल्पलतामहादानम्। (मत्स्यपुराणम्—२८६ अः)

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलता[1]नाम [2]पातकावलिनाशनम् ॥१॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥२॥
तुलापुरुषवत् कुर्य्याल्लोकेशावाहनं बुधः ।
चामीकरमयीः कुर्य्याद्दश कल्पलताः शुभाः ॥३॥
नानापुष्पफलोपेता [3]नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः ॥४॥

[4]सुपर्णानां किन्नराणाम् ।

[5]हारानादित्सुभिः सिद्धैः फलानि च [6]विहङ्गमैः ।
लोकपालानु-[7]सारिण्यः कर्तव्या-[8]स्तासु देवताः ॥५॥

लोकपालानुसारिण्य इति लोकपालसमानाः [9]कर्तव्याः ।

ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्ता[10]-ल्लतयोर्मध्ये [11][महाखड्गधरे शुभे ॥६॥

[12]पद्मशङ्खकरे] इति क्वचित् पाठः ।

---

1 Corrected from M. P. I. O. ०लत', A' ०लता

2 I. O. पातकाकलिनाशनम्, M. P. महापातकनाशनम्

3 A' नानाशुक०

4 I. O. सपर्णानां

5 A' हारादिभिः स्रग्भि, M. P. पुष्पाप्याद्दि०

6 I. O. विहङ्गमाः

7 A' ०शारिण्यः, M. P. ०कारिण्यः

8 Corrected from M. P. I. O. ०ष्टासु, A' ०स्तास्व

9 I. O. ल्लतवः, A' ल्लतः

10 Corrected from M. P. I. O. ०स्ततयो०, A' ०स्च वयो०

11 I. O. पद्मखड्ग तथा शङ्खं करेषु for the bracketed portion

12 M. P. reads this for महाखड्गधरे, just above, which is hinted at here.

[1][इभासनस्था तु गुडे] पूर्वतः कुलिशायुधा ।

रजनीसंस्थिताग्नेयी[2] स्रुवपाणिरथा-[3]नले ॥७॥

रजनी [4]हरिद्रा ।

[5][याम्ये च] महिषारूढा गदिनी तण्डुलोपरि ।

[6][घृते तु नैर्ऋती स्थाप्या] सखड्गा [7]दक्षिणापरे ॥८॥

[8][दक्षिणापरे नैर्ऋत्याम् ।]

वारुणे [9]वारुणी क्षीरे [10]सर्पस्था नागपाशिनी ।

पताकिनी च वायव्ये [11]मृगस्था शर्करोपरि ॥९॥

सौम्या तिलेषु संस्थाप्या [12][शङ्खिनी निधि]-संस्थिता ।

माहेश्वरी [13]वृषगता नवनीते [14]तु शूलिनी ॥१०॥

मौलिन्यो[15] वरदास्तद्वत् कर्तव्या बालकान्विताः[16] ।

[17]शक्त्या पञ्चपलादूर्ध्वमासहस्रात् प्रकल्पयेत् ॥११॥

मौलिन्यो[18] [19][मुकुटान्विताः, वरदाः प्रसन्नमूर्तयः,] बालकान्विता[20] क्रोडनिहित[21]-पुत्रकाः । [22][एतेन क्रोडनिविष्टवाम]-कर-[23]विधृतपुत्रका दक्षिणहस्तविधृत[24]-यथोक्तशस्त्राः प्रसन्न-

---

1 Corrected from M. P. I. O. इत्यासनस्तातगृहे and A स्वर्णासनस्था माहेन्द्र for the bracketed portion

2 M. P. ०ग्नायी

3 Corrected from M. P. I. O. ०ज्ञने, A ०चला

4 I. O. हरिता

5 Corrected from M. P. I. O. याम्येन and A याम्यान्तु for the bracketed portion

6 Corrected from M. P. I. O. घृतेन नैर्ऋताख्याभ्यां and A नैर्ऋत्यां चारित्स्थाप्या for the bracketed portion

7 A च घृतोपरि

8 A omits the bracketed portion

9 I. O. वारुण

10 M. P. भषस्था

11 I. O. तृणस्था

12 Corrected from M. P. I. O. शङ्खेन निधि and A कौबेरी दिशि for the b. p.

13 M. P. वृषारूढा

14 M. P. त्रिशूलिनी

15 I. O. मौलिन्या

16 I. O. बालकार्थिता

17 I. O. उक्ता

18 I. O. मौलिन्या

19 A मुकुटावद्यः for the b. p.

20 I. O. बालकार्थिताः

21 I. O. ०निहत०

22 I. O. एतेनोत्कविशिष्टकाम for the b. p.

23 A घृतपुत्रिका

24 I. O. घृत for विधृत

मूर्तयो [1]बद्धमुकुटा सवाहना घटनीयाः। अनुक्तवाहनानान्तु [2]ब्राह्म्याग्नेयीनैर्ऋतीनान्तु [3]तत्तल्लोकपालवाहनान्येव [4]वाहनानि लोकपालानुसारिण्य इति श्रुतेः। तेन[5] हंसारूढा ब्राह्मी छागारूढा आग्नेयी[6] [नरारूढा नैर्ऋती घटनीया]। अनन्तस्य [7][तु क्वचिद्वाहनादर्शनात्] अनन्तशक्तिर्वाहनशून्यैव कर्तव्या।

सर्वासामुपरि[8]स्थाप्यं पञ्चवर्णं वितानकम्।
धेनवो दशकुम्भाश्च वस्त्र-[9]युग्मानि चैव हि ॥१२॥
मध्यगे द्वे तु [10]गुरवे ऋत्विग्भ्योऽ[11]न्यास्तथैव च।
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः।
त्रिः प्रदक्षिणमावृत्य मन्त्रमेत-[12]मुदीरयेत् ॥१३॥

नमो नमः पापविनाशिनीभ्यो ब्रह्माण्ड-[13][लोकेश्वरपालिनीभ्यः।
आशंसिताधिक्यफलप्रदाभ्यो] दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥१४॥
इति सकल-[14]दिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति।
अभिमतफलदे स [15]नाकलोके वसति [16][पितामहवत्सराणि [17]त्रिंशत् ॥१५॥
पितृ-]शतमथ तारयेद्भवाब्धेर्गुरु[18]-दुरितौघविघातशुद्धदेहः[19]।
सुरपति-[20]वनितासहस्रसंघैः[21] परिवृतमम्बु-[22]रुहोद्भवाभि-[23]वन्द्यः ॥१६॥

---

1 A बहुमुकुटाः
2 I. O. द्राचान्वेयीनैऋ तानां
3 A तल्लोकपालास्व
4 I. O. वाहनादि
5 I. O. तेव
6 I. O. नरयानारूढा निऋती for the bracketed portion
7 I. O. सुकुटिल वाहनादर्शनात् for the b. p.
8 A ०ष्टाः, I. O. ०ष्टाश्च
9 Corrected from M. P. I. O. ०युग्मादि, A ०पुष्पाणि
10 A omits it
11 A ०न्यसवैकुमहानि
12 A ०तुउ for सु
13 A reads the bracketed portion as पुण्यं फलोपदेभ्यो
14 A दिलता for दिगङ्गना
15 M. P. नागलोके
16 A omits the bracketed portion
17 I. O. विंशत्
18 M. P. भव for गुरु
19 I. O. ०देहं
20 A वसिष्ठ for वनिता
21 M. P. ०संख्यैः
22 M. P. ०जसंभवाभि०
23 Corrected from M. P. I. O. ०नन्द्यं, A ०वएवद्धं

[1][इति विधानमिदं [2]दिगङ्गनानां कनक]-कल्पलताविनिवेदने ।
पठति यः स्मरतीह [3]तथेक्षते [4]स पदमेति पुरन्दरसेवितम् ॥१७॥

प्रयोगः

अत्र यजमानः समुपजातमहाकल्पलतामहादानदानेच्छस्तुलापुरुषलिखितखड्गचर्ममय-ढाल[5]-सन्नाह-तुलास्थापनीयहरिप्रतिमा-[6]सालङ्कारतुला-हस्तग्राह्यप्रतिमा--वहिः सर्वसम्भारमभिक-त्वेन [7][पलपञ्चकादूर्द्ध्वं पलसहस्रावधि] यथेच्छहेमनिर्मिताः स्थानस्थानघटितविद्याधर किन्नर-मिथुन[8]-सिद्धगणाः [9]पल्लवाग्रनिर्मितयथेच्छाकृति-[10][पुष्पफल-[11]ग्रहणार्थिपक्षिणः] सिद्धहस्ता-सक्तयथेच्छसंख्यमुक्ताहारसहिता नानाविध-[12]चित्रालङ्कादिवस्त्रोपशोभिता दशलताः तासामधः-स्थापनार्थं [13]यथेच्छहैम-[14]पद्मोत्खाटिता यथोक्तरूपा [15]ब्राह्म्यादिदशप्रतिमाः तदारोपणार्थं लवणगुडहरिद्रातण्डुलघृतक्षीर[16]-शर्करातिल[17]-नवनीतानि [18]लतापार्श्वस्थापनार्थं धेनुदशकं [19][कुम्भदशकं [20]वस्त्रयुगदशकञ्चोत्पादयेत्] । [21]ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्प-वाक्ययोस्तुलापुरुषपदस्थाने महाकल्पलतापदं निवेश्य [22]निवेदनं सङ्कल्पञ्च कुर्युः । अपरदिने च यजमानः पूर्ववद्गोविन्दाद्याराधनादि मधुपर्कदानान्तं[23] कर्म गोविन्दा-[24]द्यभ्यर्चन-[25][ब्राह्मणा-नुज्ञापन-[26]दानसङ्कल्प]-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने महाकल्पलतापदं

---

1 A omits the bracketed portion
2 Corrected from M. P. I. O. सदिङ्गना
3 I. O. तथैव हि:
4 A omits it
5 Both I. O. and A ०मधान्छन्न०
6 A omits सा
7 A omits the bracketed portion
8 A मिथुन
9 A पल्लगायनिर्मिताय०, I. O. पल्लवाग्रनिर्मित०
10 A omits the bracketed portion
11 I. O. ग्रहणोथ for ग्रहणार्थि
12 I. O. चित्रनैवादि for चित्रालङ्कादि
13 A omits the whole word
14 I. O. पत्रो for पद्मो
15 A ब्राह्म्यादिश, I. O. द्राह्म्यादि
16 I. O. चोराजैनसामग्रौ for चोर
17 I. O. नल for तिल
18 I. O. लतत् for लता
19 A omits the bracketed portion
20 I. O. वर्ष०
21 A adds यजमान: between ततः and तुलापुरुषोक्त०
22 I. O. निवेदन
23 I. O. ०दानान्त
24 I. O. ०द्यभ्यर्थन, A ०भ्यर्चं न
25 A ब्राह्मण for the bracketed portion
26 I. O. omits it

प्रक्षिप्य कुर्य्यात्। ततो गुरुऋत्विग्यजमानजापका उपवसेयुः। अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं[1] कर्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। [2][तत ऋत्विजः] प्रधानवेद्यां लिखितचक्रोपरि लतानां मध्यात् पूर्वादि-[3]दिक्क्रमेणाष्टौ लताः समारोप्य लतामण्डलमध्ये लताद्वयञ्चारोप्य [4][तदधो लवणं दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्चारोप्य] पूर्वादिदिक्क्रमारोपिता-[5]ष्टलताधः क्रमेण गुडादिद्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमाः [6][समारोपयेयुः। लतापार्श्वे दशधेनूः पूर्ण]-कुम्भदशकं दशवस्त्रयुगानि च स्थापयेयुः। ततो मङ्गलगीत-[7]वाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन [8]यजमानं स्नापयेयुः। ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय लतास्त्रिः प्रदक्षिणीकृत्य 'नमो नमः पाप-[9]विनाशिनीभ्य' इत्यादि [10][मन्त्रं पठित्वा] पुष्पाञ्जलिनाभ्यर्च्य [11]गुरुऋत्विग्भ्यो दद्यात्। तद् यथा—ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं [12]मत्स्यपुराणोक्त-कल्पलतामहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्त-[13]भागव्यवस्थयैता लवणगुडहरिद्रातण्डुलघृतक्षीर[14]-शर्करातिल[15]-नवनीतार्पित सौवर्णब्रह्मानन्त-[16][कुलिशायुधाग्नियमनिर्ऋति]-वरुणवायुसोममहेश्वरशक्तिप्रतिमासहिताः पञ्च-[17]वर्ण-वितानक-धेनुदशक-कुम्भदशक[18]-वस्त्रयुगदशकान्विता[19] दशकल्पलता ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठेयुः। ततो गुरुः कल्पलतेयं[20] विष्णुदैवतेति[21] ब्रूयात्[22]। [23]ऋत्विजस्तु प्रत्येकं [24]कल्पलतैषा

---

1 A °वाचनं
2 A omits the bracketed portion
3 I. O. omits दिक्
4 A omits the bracketed portion
5 I. O. °स्तुलताधःक्रमेण
6 A यथायोग्यं धेनुपूर्ण for the bracketed portion
7 A omits वाद्य
8 A omits it
9 A °विनाशनाय
10 A मन्त्रेण for the bracketed portion
11 A ऋत्विग्भ्यो
12 A omits मत्स्य...क्त
13 I. O. adds कृत before भाग
14 I. O. °क्षीरं, A omits it
15 I. O. °ति, A omits it
16 A omits the bracketed portion and reads irrelevant matter of ten lines here
17 A रत्न
18 I. O. omits कुम्भदशक
19 I. O. °न्विता
20 I. O. कल्पलते
21 I. O. °दैवते इति
22 A ब्रुयुः
23 A प्रति before this
24 A कल्पलतेयं

विष्णुदैवतेति ब्रूयुः। ततो यथाशाखं कामस्तुतिं पठेयुः। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणा-[1]मियदुत्पत्तियोग्यां [2]भूमिमेतानि च रत्नानि ददानि। ब्राह्मणाः [3]स्वस्तीत्युक्त्वा [4][प्रत्येकं कल्पलताः] स्पृशेयुः। ततस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं[5] दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया कल्पलतानां[6] [7]यथायथं [8]प्रतिपादनञ्च [9]कुर्य्यात्।

इति [10]महाकल्पलतामहादानं [11]समाप्तम्।

---

1 A ०मिमां उत्पत्ति०

2 A omits भूमिम्

3 I. O. स्वस्तोति

4 I. O. प्रत्येकमुद्धनिता: and A' कल्पलता: for the bracketed portion

5 A omits दानं

6 A कल्पलतां

7 A omits it

8 A प्रतिपदनञ्च, I. O. पादनञ्च

9 A कुर्य्यु:

10 A कल्पलतामहादनं

11 I. O. omits it

तथा सप्तसागरमहादानम्। (मत्स्यपुराणम्—२८७ अः)

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम [1]सर्वपापविनाशनम् ॥१॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
तुलापुरुषवत् कुर्य्याल्लोकेशावाहनं बुधः ॥२॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
कारयेत् सप्त कुण्डानि काञ्चनानि विचक्षणः ॥३॥
प्रादेशमात्राणि तथारत्नि[2]-मात्राणि वा[3] पुनः ।
कुर्य्यात् सप्तपलादूर्द्ध्वमा सहस्राच्च शक्तितः ॥४॥
संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि ।
प्रथमं [4]पूरयेत् कुण्डं लवणेन विचक्षणः ॥५॥
द्वितीयं [5]पयसा तद्वत्तृतीयं सर्पिषा [6]बुधः ।
चतुर्थं तु[7] गुडेनैव [8][दध्ना पञ्चममेव तु] ॥६॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा ।
स्थापयेल्लवण-[9][स्यान्तर्ब्रह्माणं] काञ्चनं शुभम् ॥७॥
केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ।
भास्करं गुडमध्ये तु [10][दधिमध्ये [11]निशाधिपम्] ॥८॥
[12]शर्करायां न्यसेल्लक्ष्मीं जलमध्ये तु पार्वतीम् ।
सर्वेषु सर्वरत्नानि धान्यानि च समन्ततः ॥९॥

---

1 I. O. महापापविनाशन', M. P. सर्व-पापप्रणाशनम्
2 A वह्नि for रत्नि
3 M. P. वै
4 I. O. पूजयेत्
5 A पायसापूर्णं for पयसा तद्वत्
6 M. P. पुनः
7 A च
8 M. P. दध्ना पञ्चममिव च and A दन्त्वा दत्वा च पञ्चमं for the bracketed portion
9 A स्यान्ते ब्रह्मणं and M. P. स्यं तु ब्रह्माणं for the bracketed portion
10 A omits the b. p.
11 Corrected from M. P. I. O. नराधिपं
12 A सर्पिषि तु

तुलापुरुषवच्छेष-[1]मत्रापि परिकल्पयेत् ।
ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ॥१०॥
त्रिः प्रदक्षिणमावृत्य मन्त्रानेतानुदीरयेत् ।

ततो वारुणहोमान्त इति पददर्शनाद्विनायकादिदेवताहोमानन्तरं[2] चतुर्ष्वपि कुण्डेषु वारुणमन्त्रेण [3]वरुणायैकाहुतिर्देया ।

नमो वः सर्व-[4]सिन्धूनामाधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमः नमः ॥११॥
क्षीरोदकाज्य[5]-दधिमाधुर[6]-लावणेक्षुसारामृतेन भुवनत्रयजीवसंघान् ।
[7]आनन्दयन्ति वसुभिश्च यतो भवन्तस्तस्मान्ममाप्यघविघातमलं [8]विदध्वम् ॥१२॥
यस्मात् [9]समस्तभुवनेषु भवन्त एव तीर्थामरासुर-[10]सुबद्धमणिप्रदानम् ।
[11]पापक्षयामृतविलेपनभूषणाय[12] [13]लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः ॥१३॥
इति ददाति [14]रसामृतसंयुताञ्छुचिरविस्मयवानिह सागरान् ।
अमलकाञ्चनरत्न[15]-मयानसौ पदमुपैति [16]हरेरमरार्चितः ॥१४॥
सकलपाप[17]-विघातविराजितं[18] पितृपितामहपुत्र-[19]शतत्रयम् ।
नरकलोकसमाकुलमप्यलं[20] झटिति [21]नयत्यसौ शिवमन्दिरम् ॥१५॥

---

1 I. O. ०मन्त्रादि
2 A ०होमान्तरं
3 A वरुणयाहुतिर्देया
4 M. P. ०भूतानां०
5 Corrected from M. P. I. O. भुग and A ब्ब for ज्य
6 Corrected from M. P. I. O. and A माधव
7 A आदीपयन्ति
8 I. O. विधत्स्वं, M. P. दिशन्तु
9 A सप्तभुवनेषु
10 Corrected from M. P. I. O. सुगन्धमणिप्रभावं, A गणार्थमणिप्रभान
11 Corrected from M. P. I. O. पापक्षयाम्बर०, A ०क्षयाम्ब०
12 I. O. ०भूषणेभि
13 A कस्य
14 Corrected from M. P. I. O. रसामरसंशुचि०, A रसामरसमयुतान् शुचि०
15 M. P. वर्ण for रत्न
16 Corrected from M. P. I. O. हरेरमलावृतः, A हरेरमावृतः
17 A omits पाप
18 M. P. ०विधौतविराजितः
19 M. P. ०कलत्रकम्
20 M. P. ०मप्ययं
21 I. O. रमुमसौ, A नीतुरसौ, M. P. सोऽपि नयेत्

अत्र यजमानः समुपजातसप्तसागरमहादान-[1]दानेच्छस्तुलापुरुषलिखित-खड्गचर्म-[2]मय-ढालसन्नाह-तुला[3]-स्थापनीयहरिप्रतिमा-सालङ्कारतुला--हस्तप्राद्यदेवताबहिः सर्वसम्भारमधिकत्वेन सप्तपलादूर्द्ध्वं पलसहस्रावधि यथेच्छसुवर्णघटितान् सप्तोभयतः प्रादेशमात्रान्[4] रत्निमात्रान्[5] वा कुण्डाकारान् [6]सागरान् तदवस्थापनार्थं कृष्णाजिनानि तिलांश्च कुण्डसप्तकपूरणार्थं लवणं क्षीरं[7] दधि घृतं गुडं [8]शर्करां तीर्थोदकञ्च कुण्डमध्यस्थापनार्थं यथेच्छसुवर्ण-[9]पलोत्खाटिता [ब्रह्मकेशवमहेश्वरादित्येन्द्रलक्ष्मीपार्वतीप्रतिमाः सर्वरत्न-[10]घटितलोकसप्तकञ्च कुण्डपार्श्वे-स्थापनार्थमष्टादशधान्यानि चोत्पादयेत्। ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृत्विग् यजमानजापकास्तुलापुरुषवद्ध[11]-विष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुला-पुरुषपदस्थाने सप्तसागरपदं निवेश्य निवेदनं[12] सङ्कल्पञ्च कुर्युः। अपरदिने च यजमानस्तुला-पुरुष-[13]वद्गोविन्दा-[14]द्याराधनादि मधुपर्कदानान्तं कर्म गोविन्दाद्यभ्यर्चन[15]-ब्राह्मणानुज्ञापन-दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने सप्तसागरपदं निवेश्य कुर्य्यात्। ततो गुर्वृत्विग् यजमानजापका उपवसेयुः। अपरदिने च[16] कृतनित्यक्रियास्तुलापुरुष-[17][वदग्नि-स्थापनादि]मध्यब्राह्मणवाचनान्तं कर्म [18]यथायथं कुर्युः। तत्र च वनस्पतिहोमान्ते तुला-पुरुषोक्तमन्त्रेण एकाहुत्या वरुणाय होमोऽधिकः। एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुला-पुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत्र ऋत्विजः सप्तकुण्डानि प्रधानवेदीमध्यलिखित-[19]चक्रो-परि कृष्णाजिनान्यास्तीर्य्य तत्र तिलान् दत्त्वा तत्रारोप्य लवणादिभिः क्रमेण पूरयित्वा सर्व-रत्नपूर्वोक्तब्रह्मकेशवादिप्रतिमा-[20]सप्तकगर्भाणि कृत्वा कुण्डपार्श्वेष्वष्टादशधान्यानि[21] स्थापयेयुः। ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नपयेयुः। ततो यजमानः शुक्लमाल्याम्बरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय सागरान् त्रिः प्रदक्षिणीकृत्य

---

1 A omits दानेच्छः
2 Both I. O. and A मयाच्छन्न
3 A स्तुलापुरुष for तुला
4 I. O. प्रादेशमात्रा
5 I. O. रत्निमात्राणां, A रत्निमात्रांश्च
6 A omits it
7 I. O. क्षीराज्यसामग्रीं
8 Both I. O. and A शर्करा
9 I. O. ०पालोत्खाटिता, A ०पलोत् -खाटित
10 I. O. पोट्टलिका for घटितलोक
11 A ह for वद्ध
12 I. O. निवेदन
13 A omits व
14 I. O. omits द्या
15 I. O. ०भ्यर्थन
16 A omits च
17 A दग्निस्थापनार्थं for the b. p.
18 A यथा
19 I. O. ०चक्राकारं
20 A ०सप्तक०
21 A ०रत्नानि

'नमो वः सर्वसिन्धुना'मित्यादि-[1]['तदस्तु ममापि लक्ष्मी'रित्यन्त]-मन्त्रैरभिमन्त्र्य पुष्पाञ्जलि-नाभ्यर्च्य][2]गुर्त्विक्प्रमुखब्राह्मणेभ्य उत्सृज्य दद्यात् । तद् यथा—ॐ अद्य यथासम्भव-गोत्रनाम-[3]गुर्त्विक्प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्त-सप्तसागरमहादानदानफलप्राप्तिकामोऽह-मेतान् कृष्णाजिनन्यस्ततिला[4]-रोपितान् लवणक्षीरसर्पिर्गुडदधिशर्करातीर्थोदकपूरितान् सर्वरत्न-गर्भान् मध्यस्थितसौवर्णब्रह्मकेशवमहेश्वरादित्येन्द्रलक्ष्मीपार्वतीप्रतिमानष्टादशधान्यपञ्चवर्ण-[5]विता-नकसहितान् सप्तसागरान् ददानि । गुर्त्विजः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा सप्तसागरा एते विष्णुदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो गुर्त्विग्भ्यो दक्षिणादानम् । तद् यथा—ॐ अद्य कृतैतद्दानकर्मप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि च[6] रत्नानि ददानि । गुर्त्विजः स्वस्तीत्युक्त्वा स्वं स्वं भागं स्पृशेयुः । गुर्त्विग्भ्य एव वा दद्यात् । तत्र दानवाक्येऽमुकामुकसगोत्रेभ्योऽमुकामुक-[7]वेदामुकामुकशाखाध्यायिभ्योऽमुका-मुकदेवशर्मभ्यो युष्मभ्यमिति मत्स्यपुराणोक्तभागव्यवस्थयेति [8][च विशेषः] । ततस्तुला-पुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया यथायथं सप्तसागर-प्रतिपादनञ्च कुर्यात् ।

इति सप्तसागर-[9]महादानं [10]समाप्तम् ।

---

1 A तत्रोक्त for the bracketed portion, I. O. ततोस्तु etc.

2 A reads the bracketed portion within the chap. viz. महाकल्पलतामहादानम्

3 A ऋत्विकप्रमुखा०

4 A ०तिलाञ्च

5 I. O. वितान०

6 I. O. omits it

7 A omits वेदामुकामुक

8 A विशेष: for the bracketed portion

9 A दान for महादानं

10 I. O. omits it

[1]तथा रत्नधेनुमहादानम्। (मत्स्यपुराणम्—२८८ अः)

अथातः सम्प्रवक्ष्यामि [2]महादानमनुत्तमम् ।
[3][रत्नधेनुरिति ख्यातं] गोलोकफलदं नृणाम् ॥१॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥२॥
भूमौ कृष्णाजिनं [4]कृत्वा लवणद्रोणसंयुतम् ।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य[5] विधिपूर्वकम् ॥३॥

[6]सङ्कल्प्य विधिपूर्वकमिति [7]यथोक्तं [8]तत्तदवयवरचनां लवणोपरि [9]लेखया कृत्वेत्यर्थः ।

स्थापयेत् पद्मरागाणामेकाशीतिं[10]मुखे बुधः ।
पुष्परागशतं तद्वद् घोणायां परिकल्पयेत् ॥४॥
ललाटे हेमतिलकं मुक्ताफलशतं दृशोः ।
भ्रू युगे विद्रुमशतं शुक्ती कर्णद्वये [11]स्मृते ॥५॥
काञ्चनानि च शृङ्गाणि शिरो [12]वज्रशतात्मकम् ।
ग्रीवायां नेत्र-[13]पटकं [14]गोमेदकशतान्वितम् ॥६॥

शृङ्गाणीति बहुवचनं वत्सशृङ्गापेक्षम्[15] ।

इन्द्रनीलशतं पृष्ठे वैदूर्य्यशत-[16]पार्श्वके ।
स्फाटिकैरुदरं [17]कार्य्यं सौगन्धिक-[18]शतं कटिम् ॥७॥

---

1 A अथ
2 A महादानमनुद्दानमनुत्तमं
3 M. P. रत्नधेन्विति विख्यातं for the bracketed portion
4 I. O. दत्वा
5 A सङ्कल्प
6 A सङ्कल्प
7 I. O. यथोक्त
8 A तत्तदेवायवरचनं
9 A रेखाया
10 Corrected from M. P. Both I. O. and A ०शीति
11 A स्पृशेत्
12 A रज for वज्र
13 A ०मटकं, M. P. ०पटल
14 A गोमेदशतकान्वितं
15 A ०पेक्षया
16 Corrected from M. P. Both I. O. and A ०पार्श्वको
17 M. P. तद्वत्
18 M. P. ०शतैः

स्फाटिकैरिति शतसंख्यैः संख्याविशेषाकाङ्क्षायां शतसंख्यसन्दंशपाठात् ।

[1][खुरा हेममयाः] कार्य्याः पुच्छं मुक्तावलीमयम् ।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणे कर्पूरचन्दने ॥८॥

अत्रेन्दु-[2]कान्तस्य सर्वथा प्राप्त्यभावात् [3]अप्राप्तप्रतिनिधानेन शुद्धस्फाटिकग्रहणम् ।

कुङ्कुमानि च रोमाणि [4][रौप्यं नाभिञ्च] कारयेत् ।
[5][गारुत्मतशतं तद्वदपाने परिकल्पयेत्] ॥९॥
[6]तथान्यानि च रत्नानि स्थापयेत् सर्वसन्धिषु ।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुडात्मकम् ॥१०॥
गोमूत्रमाज्येन तथा दधि दुग्धं[7] स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥११॥
कुण्डलानि च हैमानि भूषणानि च शक्तितः ।
कारयेदेवमेवन्तु चतुर्थांशेन वत्सकम् ॥१२॥

भूषणानि ग्रैवेयकललाटपट्टघण्टिकाः ।

तथा [8]धान्यानि सर्वाणि पादाश्चेक्षुमयाः [9]शुभाः ।
नानाफलानि सर्वाणि [10]पञ्चवर्णं वितानकम् ॥१३॥
एवं [11]विरचितां कृत्वा तद्वद्धोमाधिवासनम् ।
ऋत्विग्भ्यो दक्षिणां [12]दद्याद्धेनुमा-[13]मन्त्र्य यत्नतः ।

एवं विरचितां होमाधिवासनं कृत्वा विरचितामामन्त्र्य गुडधेनूक्त-[14]मन्त्रैरामन्त्र्य इदञ्चोदाहरेदिति [15]वक्ष्यमाणेन सम्बन्धः ।

गुडधेनुवदावाह्य इदञ्चोदाहरेत्ततः ॥१४॥

---

1 I. O. खुरो हैममयः for the bracketed portion
2 I. O. न्द्र for न्दु
3 A अप्राप्त्या०, I. O. omits अप्राप्त and reads प्रतिनिधानेन only
4 A रौप्यान्नाभिञ्च and M. P. रौप्यनाभिं च for the b. p.
5 Supplied from M, P. A omits it, I. O. गरुत्मतशतस्तद्वद्-पाने etc.
6 A तथापाने
7 M. P. दधिदुग्धे
8 I. O. omits धा
9 M. P. स्मृताः
10 A पञ्चवर्णा
11 A विचित्रितां, M. P. विरचनं
12 I. O. दत्त्वा for दद्यात्
13 M. P. ०मन्त्रयेत्ततः
14 I. O. ०मन्त्रै only
15 I. O. वक्ष्यमाणे

त्वं सर्वदेवगणधाम यतः पठन्ति रुद्रेन्द्रचन्द्र[1]-कमलासन[2]-वासुदेवाः ।
तस्मात् समस्तभुवनत्रयदेहयुक्ता मां पाहि देवि भवसागरपीड्यमानम् ॥१५॥
आमन्त्र्य [3]चैवमभितः [4]परिवृत्य भक्त्या दद्याद्द्विजाय गुरवे जलपूर्विकां ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति पदं मुरारेः ॥१६॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं वितरति स विमानं प्राप्य [5]देदीप्यमानम् ।
सकलकलुषमुक्तो बन्धुभिः पुत्रपौत्रैः [6]स हि [7]मदनसरूपः [8]स्थानमभ्येति शम्भोः ॥१७॥

अत्र यजमानः समुपजातरत्नधेनुमहा-[9]दानदानेच्छस्तुलापुरुषलिखितखड्गचर्म-[10]मयढाल-सन्नाहतुलास्थापनीयहरिप्रतिमा-सालङ्कारतुला-हस्तग्राह्यप्रतिमा-बहिः सर्वसम्भारमधिकत्वेन धेनु-मुखनिर्माणार्थमेकाशीतिं वत्समुखार्थञ्चैकविंशतिं पद्मरागरत्नानि धेनु-[11]घोणार्थं पुष्परागशतं वत्स-[12]घोणार्थञ्च पञ्चविंशतिं पुष्परागाणि धेनुललाटार्थं यथेच्छहेम-[13]घटितं तिलकं वत्स-ललाटार्थञ्च तच्चतुर्थभागहेममयतिलकं धेनुनेत्रद्वयार्थं मुक्ताफलशतं वत्सनेत्रद्वयार्थञ्च [14]पञ्चविंशतिं मौक्तिकानि धेनुभ्रूयुगार्थं विद्रुमशतं वत्सभ्रूयुगार्थञ्च पञ्च-विंशतिं विद्रुमाणि धेनुकर्णद्वयार्थं बृहच्छुक्तिद्वयं वत्सकर्णद्वयार्थञ्च स्वल्पशुक्तिद्वयं धेनु-शृङ्गार्थं यथेच्छहेमघटितं बृहच्छृङ्गयुगं वत्सशृङ्गार्थञ्च तच्चतुर्थांशहेममयशृङ्गयुगं धेनु-शिरोऽर्थं हीरकशतं वत्सशिरोऽर्थञ्च[15] [16]पञ्चविंशतिं हीरकाणि धेनुग्रीवार्थं[17] [18]बृह-न्नेत्रपटं गोमेदशतञ्च वत्सग्रीवार्थञ्च स्वल्पनेत्रपटं [19]पञ्चविंशतिं गोमेदरत्नानि धेनु-पृष्ठार्थमिन्द्रनीलशतं वत्सपृष्ठार्थञ्च[20] [21]पञ्चविंशतिमिन्द्रनीलानि धेनुपार्श्वद्वयार्थं वैदूर्य-शतं वत्सपार्श्वद्वयार्थञ्च [22]पञ्चविंशतिवैदूर्यरत्नानि धेनूदरार्थं शतं स्फाटिकखण्डान् [23][वत्सोदरार्थञ्च तच्चतुर्थभागस्फाटिकखण्डान्] धेनुकट्यर्थं सौगन्धिकशतं वत्सकट्यर्थञ्च[24]

1 M. P. सूर्य for चन्द्र
2 I. O. ॰थिप for ॰सन
3 A चेवमतित:, I. O. विधिमभित:, M. P. चेत्यमभित:
4 Corrected from M. P. Both I. O. and A परिवर्त्य
5 A नेदीप्यमानं
6 Corrected from M. P. Both I. O. and A सह for स हि
7 A दमनसरूपं
8 A स्थापन for स्थान
9 A omits दान
10 Both I. O. and A मयाच्छन्न
11 I. O. ॰घोषणार्थं
12 I. O. ॰घोषणार्थञ्च
13 A omits घटितं
14 A पञ्चविंशति, I. O. विंशतिं
15 I. O. ॰र्थं
16 A विंशति
17 ॰र्थञ्च
18 A adds यथेच्छहेमघटित before this
19 I. O. पञ्चविंशति, A पञ्चविंशतिञ्च
20 A ॰पृष्टार्थं
21 A omits पञ्च
22 A omits पञ्च
23 A omits the bracketed portion
24 A ॰कन्यर्थं

पञ्चविंशतिसौगन्धिकानि धेनुखुरार्थं यथेच्छहेमघटितखुरचतुष्कं [1][वत्सखुरार्थञ्च तच्चतुर्थभागहेममयं खुरचतुष्कं] धेनुपुच्छार्थं यथेच्छमुक्तानिर्मितां मुक्तावलीं वत्सपुच्छार्थञ्च[2] तच्चतुर्थांश-[3]निर्मितां मुक्तावलीं धेनुदक्षिणनासापुटार्थं यथेच्छकर्पूरसहितं सूर्यकान्तं धेनुवामनासापुटार्थं यथेच्छचन्दनसहितं [4]विशुद्धस्फाटिकखण्डं वत्सदक्षिणनासापुटार्थञ्च[5] [6]धेन्वर्धचतुर्थभागकर्पूरसहितं [7]स्वल्पसूर्यकान्तं तद्वामनासापुटार्थञ्च[8] धेनुचतुर्थांशचन्दनसहितं स्वल्प-[9]विशुद्धस्फाटिकखण्डं धेनुरोमार्थं यथेच्छकुङ्कुमं वत्सरोमार्थञ्च तच्चतुर्थभागकुङ्कुमं धेनुनाभ्यर्थं यथेच्छराजतचक्रिकां वत्सनाभ्यर्थञ्च तच्चतुर्थांश[10]-राजत[11]-चक्रिकां [12]धेन्वपानार्थं मरकतशतं [13]वत्सापानार्थञ्च पञ्चविंशतिमरकतानि [14][धेनुगात्रसन्ध्यर्थं यथेच्छोक्तव्यतिरिक्तरत्नानि वत्साङ्गसन्ध्यर्थञ्च तच्चतुर्थांशरत्नानि] [15][धेनुजिह्वार्थं यथेच्छशर्करां वत्सजिह्वार्थञ्च तच्चतुर्थांशशर्करां] धेनुगोमयार्थं यथेच्छं[16] गुडं वत्सगोमयार्थं तच्चतुर्थांशगुडं धेनुमूत्रार्थं[17] यथेच्छं घृतं [18]वत्समूत्रार्थञ्च तच्चतुर्थांशं घृतं धेन्वर्थं वत्सार्थञ्च बृहत्स्वल्प-[19]दधिस्थानद्वयं दुग्धार्जनसामग्रीञ्च धेनुपुच्छाग्रार्थं यथेच्छं चामरं वत्सपुच्छाग्रार्थञ्च स्वल्पचामरं धेन्वर्थं यथेच्छताम्रदोहनं [20][वत्सार्थञ्च स्वल्पताम्रदोहनं] धेन्वलङ्कारार्थं[21] यथेच्छहेमघटितं[22] कुण्डलयुगं ग्रैवेयकं ललाटपट्टिकां[23] घण्टिकाञ्च[24] वत्सालङ्कारार्थञ्च[25] तच्चतुर्थांशहेमनिर्मितं[26] कुण्डलयुगं ग्रैवेयकाद्यलङ्करणञ्च धेनुपादार्थं

---

1 A omits the bracketed portion
2 A ०पुच्छार्थं
3 A omits निर्मितां
4 A शुद्ध०
5 A ०पुटार्थं
6 I. O. धेनु for धेन्वर्थं
7 A स्वल्प०
8 A ०पुटार्थं
9 A omits वि
10 A omits श
11 I. O. ०रजत०
12 I. O. धेनु अपानार्थं, A धेनु पानार्थं
13 A वत्सपानार्थञ्च
14 A omits the bracketed portion
15 A reads the bracketed portion as उभयो जिह्वार्थं तथा शर्करा
16 Both I. O. and A omit it
17 I. O. धेनुगोमूत्रार्थं
18 I. O. वत्सगोमूत्रार्थं
19 A omits दधिस्थानद्वयं
20 A omits the bracketed portion
21 A ०ङ्करणार्थं
22 A सुवर्णघटितं
23 A ०पट्टकं
24 I. O. घण्टिकाञ्च
25 A ०ङ्करणार्थं
26 A चतुर्थांशहेमनिर्मित

[1]बृहदिक्षुदण्डचतुष्टयं वत्सपादार्थञ्च स्वल्पेक्षुदण्डचतुष्टयं [2]सवत्सधेन्ववस्थानार्थं बृहत्-स्वल्पकृष्णाजिनद्वयं लवणद्रोणं लवणाढकञ्च धेनुपार्श्वस्थापनार्थञ्चा[3]-ष्टादशधान्यानि बहूनि च[4] नानाफलान्युत्पादयेत्। ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्वतरदिने गुर्वृ-त्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा [5]निवेदनसङ्कल्पवाक्ययोस्तुलापुरुष-पदस्थाने रत्नधेनुपदं निवेश्य यथायथं निवेदनं[6] सङ्कल्पञ्च कुर्युः। अपरदिने च[7] यज-मानस्तुलापुरुषवद्-[8][गोविन्दाद्याराधनादि मधुपर्कदानान्तं कर्म गोविन्दाद्यभ्यर्चन-ब्राह्मणानु-ज्ञापन-दानसङ्कल्प-पुण्याहादि]-वाचन-वरणवाक्येषु तुलापुरुषपदस्थाने रत्नधेनुपदं प्रक्षिप्य कुर्यात्। ततो गुर्वृत्विग्यजमानजापका उपवासं कुर्युः। अपरदिने च कृतनित्यक्रिया-स्तुलापुरुषवदग्निस्थापनादिमध्य-[9]ब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्य-[10]ब्राह्मण-वाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। [11][तत ऋत्विजः] प्रधानवेदीमध्ये लिखितचक्रोपरि बृहत्कृष्णाजिनमास्तीर्य तदुपरि लवणद्रोणं दत्त्वा तत्र रेखया धेन्वा-कारं प्राङ्मुखम् [12]उदक्पादमालिख्य मुखस्थाने[13] एकाशीतिं पद्मरागरत्नानि घोणायां पुष्प-रागशतं ललाटे हैमतिलकं नेत्रयोर्मुक्ताफलशतं [14][भ्रूयुगे विद्रुमशतं कर्णद्वये शुक्तिद्वयं हैमकुण्डलद्वयञ्च शृङ्गयोः काञ्चनयुगं शिरसि हीरकशतं ग्रीवायां नेत्रपटं गोमेदशतञ्च पृष्ठे इन्द्रनीलशतं पार्श्वयोः वैदूर्यशतम्] [15]उदरे स्फाटिकखण्डान् कट्यां [16]नीलसौगन्धिक-शतं जङ्घास्थाने इक्षुदण्डचतुष्टयं खुरस्थाने हैमखुरचतुष्कं[17] पुच्छे मुक्तावली पुच्छाग्रे चामरं दक्षिणनासापुटे सूर्यकान्तं कर्पूरञ्च वामनासापुटे [18]सुविशुद्धस्फाटिकखण्डं चन्दनञ्च रोमस्थाने कुङ्कुमं नाभिस्थाने [19]रजतचक्रिकां अपानस्थाने मरकतशतं सर्वाङ्गसन्धिषु

---

1 A इक्षुदण्डचतुष्कं
2 A वत्सधेनुस्थापनार्थं च
3 A धेनुस्थापनार्थं। वमार्थञ्च
4 A omits च
5 A ब्राह्मणवाचन for निवेदन
6 Both I. O. and A निवेदन
7 A omits it
8 A reads the bracketed portion as गोविन्दाद्यभ्यर्च्य नारायणादि वरणान्तं कर्म समाप्य ब्राह्मणवाचन
9 I. O. ब्रह्म for ब्राह्मण
10 I. O. ब्रह्म०
11 A omits the bracketed portion
12 I. O. उदक०, A omits it
13 A मुखस्थानं
14 A omits the bracketed portion
15 I. O. omits it
16 A omits नील
17 A ०चतुष्टयं
18 A omits सु
19 A रजतञ्च चक्रिकां

[1]यथेच्छरत्नानि जिह्वास्थाने शर्करां गोमयस्थाने गुडं मूत्रस्थाने घृतम् [2]आपीनसन्निधौ ताम्र-दोहनं स्वरूपतो दधि दुग्धञ्चारोपयेयुः। ततो [3]धेनुं हैमग्रैवेयकललाटपट्ट-[4]घण्टिकाभिरलं-कुर्युः। धेनुपार्श्वे चाष्टादशधान्यानि [5]नानाफलानि चारोप्य धेनु-[6]पार्श्वास्तीर्णकृष्णाजिन-न्यस्त-लवणाढकोपरि धेनुनिर्माणक्रमेणैव सकलद्रव्य[7]-चतुर्थांशेन प्राङ्मुखमुदक्पादञ्च वत्सं कल्पयेयुः। ततो मङ्गलगीत-[8][वाद्यवन्दि]-घोषेषु सत्सु कुण्डसमीपस्थ[9]-कुम्भचतुष्टयजलेन यजमानं स्नपयेयुः। ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय रत्नधेनुं गुडधेनूक्तैर्यालक्ष्मीरित्यादिमन्त्रैरत्नोक्तेन[10] च [11][त्वं सर्वदेवगण धामेत्यादि]-मन्त्रेणाभिमन्त्र्य प्रदक्षिणीकृत्य पुष्पाञ्जलिनाभ्यर्च्य गुरवे दद्यात्। तद्यथा-ॐ अद्यामुकसगोत्रायामुक-[12]वेदा-मुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्तरत्नधेनुमहादान-[13]दानफलप्राप्तिकामोऽह-मेतां कृष्णाजिनन्यस्त-द्रोणचतुर्थांशलवणन्यस्त-धेनुचतुर्थांश-पद्मरागमुख-पुष्परागघोण-हैमतिलक-ललाट--मुक्ताफलनेत्रयुग--विद्रुमभ्रूयुग-शुक्तिकर्णद्वय--हैमकुण्डलालङ्कृत-काञ्चनशृङ्ग--वज्रशिरो-नेत्र-[14]पटगोमेदग्रीवेन्द्रनीलपृष्ठ-वैदूर्यपार्श्वद्वय-स्फाटिकोदर-[15]नीलसौगन्धिककटि-हैमखुरेक्षुपाद-मुक्तावलीपुच्छ-[16]चामरपुच्छाग्र-सकर्पूरसूर्यकान्तदक्षिणनासापुट--सचन्दन-[17]विशुद्धस्फाटिकवाम-नासापुट-कुङ्कुमरोमक-राजतनाभि-[18]मरकतापान-नानारत्नाङ्गसन्धि-शर्कराजिह्व-गुडगोमयाज्यमूत्र-ताम्रदोहनान्वित-दधिदुग्धसहित-हैमग्रैवेयक-[19]ललाटपट्ट-[20]घण्टिकालङ्कृतवत्ससहितां[21]कृष्णा-जिनन्यस्तलवणद्रोणोपरिस्थितामेकाशीतिपद्मरागमुखीं पुष्परागशतघोणां हैमतिलकललाटां मुक्ताफलशतनेत्रयुगां विद्रुमशत-[22]भ्रूयुगां शुक्तिकर्णयुगां[23] हैमकुण्डलालङ्कृतां काञ्चनशृङ्गीं

---

1 I. O. यथेच्छतररत्नानि A यथेच्छ-वनानि
2 A अपान०
3 A धेनु, I. O. omits it
4 I. O. ०खण्डिका०
5 A omits it
6 I. O. ०पार्श्व०
7 I. O. व for द्रव्य
8 A वाद्यै for the b. p.
9 A omits कुण्डसमीपस्थ
10 ०त्रोक्तेन
11 I. O. तुर्यां प्रसर्व्वदेवगणांभत्र इत्यादि and A त्वां सर्व्वदेवमामीत्यादि for the b. p.
12 A omits वेदामुक
13 Both I. O. and A omit दान
14 A मुक्ताफल for पट
15 I. O. omits नील
16 A omits it
17 I. O. परिशुद्ध०
18 A मरकतपीन
19 A reads ललाटपट्ट and places it before ग्रैवेयक
20 I. O. ०घण्टिका०
21 A ०वत्सहितां
22 A omits भ्रू
23 A omits युगां

हीरकशतशिरसं नेत्रपटगोमेदशतग्रीवामिन्द्रनीलशतपृष्ठां वैदूर्य्यशतपार्श्वद्वयां स्फाटिकशतोदरां नीलसौगन्धिकशतकटिं [1]हैमखुरामिक्षुपादां मुक्तावलीपुच्छां [2]चामरपुच्छाग्रां सकर्पूरसूर्य्यकान्त-दक्षिणनासापुटां [3]सचन्दन-[4]विशुद्धस्फाटिकवामनासापुटां कुङ्कुमरोमिकां राजतनाभिं मरकतशता-पानां नानारत्नसर्वाङ्गसन्धिं[5] शर्कराजिह्वां गुडगोमयामाज्यमूत्रां [6]ताम्रदोहनान्वितां दधिदुग्ध-सहितां हैमग्रैवेयकललाट-[7]पट्टघण्टिकालङ्कृतामष्टादशधान्य-[8]बहुविधफल-पञ्च-[9]वर्णवितानक-सहितां रत्नधेनुं ददानि। गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा रत्नधेनुरियं विष्णुदैवतेत्युक्त्वा यथा-शाखं कामस्तुतिं पठेत्। ततो गुर्वृत्विग्भ्यो दक्षिणां दद्यात्। तद् यथा—ॐ अद्य कृतैतद्दान[10]-कर्मप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामियदुत्पत्तियोग्यां भूमिमेतानि [11]च रत्नानि ददानि। गुर्वृत्विजः स्वस्तीति ब्रूयुः। गुरुस्तु स्वस्त्यनन्तरं धेनुं पुच्छे गृह्णीयात्। ततस्तुलापुरुष-वज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं पुण्याहवाचनं [12][त्वरया रत्नधेनुप्रतिपादनञ्च] कुर्यात्।

इति रत्नधेनुमहादानं [13]समाप्तम्।

---

1 I. O. चैम०
2 A चामरपुच्छाग्रां, I. O. चामर-प्रस्थपुच्छाग्रां
3 A omits the whole word
4 I. O. ०शुद्ध०
5 Both I. O. and A ०सन्धि
6 A omits ता
7 I. O. ०पट्टां घण्टिका०
8 A विविध०
9 A omits वर्ण
10 Both I. O. and A omit the word दान
11 A reads च after रत्नानि
12 A reads the b. p. as दद्यात्‌रत्नधेनुप्रतिदानञ्च
13 I. O. omits it

तथा महाभूतघटमहादानम्। (मत्स्यपुराणम्—२८६ अः)

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
महाभूतघटं नाम महापातकनाशनम् ॥१॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भार-[1]भूषणाच्छादनादिकम् ॥२॥
तुलापुरुषवत् कुर्याल्लोकेशावाहनादिकम् ।
कारयेत् काञ्चनं कुम्भं [2]महारत्नचितं बुधः ॥३॥
प्रादेशादङ्गुलशतं यावत् कुर्यात् प्रमाणतः ।
क्षीराज्यपूरितं तद्वत् कल्पवृक्षसमन्वितम् ॥४॥

तद्वदिति [3]काञ्चनम् ।

पद्मासनगतांस्तत्र [4]ब्रह्मविष्णुमहेश्वरान् ।
वराहेणोद्धृतां तद्वत् कुर्यात् पृथ्वीं सपङ्कजाम् ॥५॥

[5][वराहेणोद्धृतां तद्वदिति वराहवामकूर्परस्थितां सपङ्कजां]पद्महस्ताम् ।

[[6]वरुणञ्चासनगतं काञ्चनं मकरोपरि][7] ।
[8]हुताशनं मेषगतं वायुं [9]कृष्णमृगासनम् ॥६॥
[10]तथाकाशाधिपं कुर्यान्मूषकस्थं विनायकम् ।
[11]विन्यसेद्घटमध्ये तान् वेदपञ्चकसंयुतान् ॥७॥

तथेति काञ्चनमित्यर्थः। आकाशाधिपं विनायकमिति सम्बन्धः। एतेन पञ्च-[12]महाभूतान्युक्तानि ।

---

1 A भुवना०
2 A ०रत्नविभं, M. P. ०रत्नाचितं
3 A महारत्नखचित-काञ्चनमय-कल्प-वृक्षान्वितमित्यर्थः:
4 A ब्राह्म०
5 A omits the bracketed portion
6 I. O. पवन०
7 A reads the bracketed portion as वरुणञ्चासनं कमलोपरि
8 A कुशासनं
9 Corrected from M. P. Both I. O. and A कृतमृगासनं
10 M. P. तथा कोशाधिपं
11 M. P. विन्यस्य०
12 A omits महा

ऋग्वेदस्याक्षसूत्रं स्याद्यजुर्वेदस्य पङ्कजम् ।

सामवेदस्य वीणा स्याद्[1][वेणुं दक्षिणतो न्यसेत्] ॥८॥

अथर्ववेदस्य पुनः स्रुवस्रुवौ [2]कमलं करे ।

पुराणवेदो वरदः साक्षसूत्रकमण्डलुः॥९॥

अथर्ववेदस्य दक्षिणे स्रुक्स्रुवौ वामे पद्मम् । वरदः प्रसन्नमूर्तिः । एतेन सर्वे एव द्विभुजाः कार्याः ।

परितः सर्वधान्यानि चामरासनदर्पणम् ।

पादुकोपानहच्छत्रदीपिका-[3]भूषणानि च ॥१०॥

भूषणानि प्रसिद्धानि ग्रैवेयकादीनि ।

शय्याञ्च जलकुम्भांश्च[4] पञ्चवर्णवितानकम् ।

स्नात्वाधिवासनान्ते तु मन्त्रमेतमुदीरयेत् ॥११॥

नमो वः सर्वदेवानामाधारेभ्यश्चराचरे ।

महाभूताधि[5]-देवेभ्यः शान्तिरस्तु शिवं मम ॥१२॥

यस्मान्न किञ्चिदप्यस्ति महाभूतैर्विनाकृतम् ।

ब्रह्माण्डे सर्वभूतेषु तस्माच्छ्रीरक्षयाऽस्तु मे ॥१३॥

इत्युच्चार्य्य महाभूतघटं यो विनिवेदयेत् ।

सर्वपापविनिर्मुक्तः [6]स याति परमां गतिम् ॥१४॥

विमानेनार्कवर्णेन पितृबन्धुसमन्वितः ।

स्तूयमानो वरस्त्रीभिः पदमभ्येति [7]वैष्णवम् ॥१५॥

षोडशैतानि यः कुर्य्यान्महादानानि मानवः ।

न तस्य पुनरावृत्तिरिह लोकेऽभिजायते ॥१६॥

इति पठति य इत्थं वासुदेवस्य पार्श्वे

ससुतपितृकलत्रः संश्रृणोतीह सम्यक् ।

---

1 Corrected from M. P. I. O. धनुर्दक्षिणतो भवेत् and A यजुर्दक्षिणतो भवेत् for the bracketed portion

2 A दक्षिणे

3 A ०भूषणेन

4 I. O. जलकुम्भाञ्च

5 Corrected from M. P. I. O. भि and A दि for धि

6 Corrected from M. P. I. O. and A प्रयाति

7 A शाश्वतं

[1]मुररिपुभवने वा मन्दिरे [2]वार्कलक्ष्म्यो-
रमरपुरवधूभिर्मोदते सोऽपि कल्पम् ॥१७॥

प्रयोगः

अत्र यजमानः समुपजातमहाभूतघटमहादानदानेच्छस्तुलापुरुषलिखित-खड्गचर्ममयढाल[3]-सन्नाह-तुलास्थापनीयहरिप्रतिमा-सालङ्कारतुला-हस्तग्राह्यप्रतिमा-बहिः[4]सर्वसम्भारमधिकत्वेन प्रादेशादूर्द्ध्वमङ्गुल-शतमध्यमभिमतपरिमाण[5]-सुवर्णघटितमुत्कृष्टाभिमतरत्नखचितं [6][कुम्भं तन्मध्यस्थापनार्थं कल्पपादपमहादानोक्ताकृतिमभिमतपरिमाणहेमघटित]-कल्पतरुं यथेच्छसुवर्ण-[7]पल्लोत्खाटिताः पूर्वोक्ताकारा ब्रह्मविष्णुमहेश्वरपृथ्वीवरुण-[8]हुताशनवायुविनायक-ऋग्यजुः-सामाथर्व-[9]पुराणप्रतिमाः कुम्भपूरणार्थं [10]क्षीरार्जनसामग्री-[11]माज्यञ्च घटपार्श्वस्थापनार्थमष्टादशधान्यचामरासनदर्पणपादुकायुगोपानद्युग[12]-च्छत्रदीपिकाशय्या--[13]पूर्णकुम्भाष्टकानि[14][महाभूतघटालङ्करणार्थं यथेच्छं हैमग्रैवेयकाद्यलङ्कारां]-श्चोत्पादयेत्। ततस्तुलापुरुषोक्तसमया-[15]नामन्यतमस्य पूर्वतरदिने गुर्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने महाभूतघटपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्युः। अपरदिने च यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं कर्म गोविन्दाद्यभ्यर्चन[16]-ब्राह्मणानुज्ञापन-दानसङ्कल्पपुण्याहादिवाचन-वरणवाक्येषु तुलापुरुषपदस्थाने महाभूतघटपदं [17]निवेश्य कुर्यात्। ततो [18]गुर्वृत्विग्यजमानजापका उपवसेयुः। अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म यथायथं कुर्युः। एवञ्च मध्यब्राह्मणवाचनान्तं कर्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत ऋत्विजः प्रधानवेदीमध्ये लिखितचक्रोपरि महाभूतघटमारोप्य घृतक्षीराभ्यां पूरयित्वा तन्मध्ये कल्पतरुं यथोक्तदेवताप्रतिमाश्च स्थापयित्वा कुम्भपार्श्वे चाष्टादशधान्यचामरासनदर्पणपादुकायुगोपानद्युगच्छत्रदीपिकालङ्कार-

---

1 Corrected from M. P. I. O. पुर and A सुर for मुर

2 A वार्कलक्ष्म्याः अमर०, M. P. वार्कलक्ष्म्या त्वमर०

3 Both I. O. and A मयाच्छन्न for मयढाल

4 A omits सर्व

5 A omits परिमाण, I. O. मभिमत again after परिमाण

6 A omits the bracketed portion

7 I. O. पल्लोत्०

8 I. O. हुताश, A कृताशन

9 A ं ह for पुराण

10 A क्षीरार्जन०

11 A ०माज्यञ्च, I. O. ०वाज्य

12 A omits युग

13 A omits पूर्ण

14 A omits the b. p.

15 A omits ना

16 I. O. ०भ्यर्थन

17 A प्रक्षिप्य

18 A ऋत्विग्०

यथेच्छनिर्मितशय्या-पूर्णकुम्भाष्टकान्युपकल्पयेयुः । ततो मङ्गलगीतवाद्यवन्दिघोषेषु [1][सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नपयेयुः । ततो यजमानः शुक्लमाल्याम्बरो धृतसर्वालङ्कारः पुष्पाञ्जलिमादाय कुम्भं प्रदक्षिणीकृत्य 'नमो वः सर्वदेवाना'मित्यादि 'श्रीरक्षयास्तु म' इत्यन्तमन्त्राभ्यामामन्त्र्य पुष्पाञ्जलिनाभ्यर्च्य गुर्वृत्विक्प्रमुखब्राह्मणेभ्य] उत्सृज्य दद्यात् । तद् यथा—ॐ अद्य यथासम्भवगोत्र[2]-नामगुर्वृत्विक्प्रमुखब्राह्मणेभ्यो मत्स्यपुराणोक्त-महाभूतघट-महादानदानफलप्राप्तिकामोऽहमेतं क्षीराज्यपूरितं [3]हैमकल्पवृक्षसमन्वितं सौवर्णब्रह्मविष्णुमहेश्वर-पृथ्वीवरुणहुताशनवायुविनायकवेदपञ्चकप्रतिमाष्टादशधान्यचामरासनदर्पणपादुकायुगोपानद्युग-च्छत्रदीपिकाभूषणशय्यापूर्णकुम्भाष्टक-[4]पञ्चवर्णवितानकयुतं महाभूतघटं ददानि । ततो गुर्वृत्विजः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा महाभूतघटोऽयं विष्णुदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । [5][ततो गुरवे ऋत्विग्भ्यश्च दक्षिणां दद्यात् । तद् यथा—ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमियदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददानि । गुर्वृत्विजः प्रत्येकं स्वस्तीत्युक्त्वा स्वं स्वं सुवर्णभागं स्पृशेयुः ।] अथवा गुर्वृत्विग्भ्य एव महाभूतघटं दद्यात् । तत्र दानवाक्ये ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यमिति मत्स्यपुराणोक्त-भागव्यवस्थयेति च विशेषः । ततस्तुलापुरुषवज्जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया यथायथं महाभूतघट-प्रतिपादनञ्च कुर्य्यात् ।

[6][इति महाभूतघटमहादानं समाप्तम् ।]

इति महाराजाधिराज-[7][निःशङ्क-शङ्कर]-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महा[8]-दानावर्तः ॥

---

1 A प्रदक्षिणीकृत्य only for the bracketed portion
2 A वेद between गोत्र and नाम
3 A सरत्नहैम for हैम
4 I. O. पञ्चवितानवर्णयुतं
5 A omits the bracketed portion
6 Both I. O. and A omit it
7 A निःशङ्करभुवनज्योति for the bracketed portion
8 I. O. adds another दान here

अथ विष्णुदैवताचलदानावर्तः । (२)

अथाचलदानप्रशंसा ।

मत्स्यपुराणे (८३ अः) [नारद उवाच ।][1]

भगवन् श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ।
यदक्षयं परे लोके देवर्षिगणपूजिते[2] ॥१॥

उमापतिरुवाच ।

[3][मेरोः प्रदानं वक्ष्यामि दशधा मुनिसत्तम[4] ।
यत्प्रदानान्नरो लोकानाप्नोति सुरपूजितान् ॥२॥
पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च ।]
[5][न तत्फलमधीतेषु] कृतेष्विह यदश्नुते ॥३॥
तस्माद्विधानं[6] वक्ष्यामि पर्वतानामनुक्रमात् ।
प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ॥४॥
गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ।
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः ॥५॥
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ।
राजतो नवम-[7]स्तद्वद्दशमः शर्कराचलः ॥६॥

एतेनाचलप्रशंसा-स्वरूपसंकीर्तने[8] ।

वक्ष्ये विधानमेतेषां यथा-[9]वदनुपूर्वशः ।
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥७॥
[10]शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ।
विवाहोत्सवयज्ञेषु द्वादश्यामथ वा पुनः ॥८॥

---

1 Supplied from M. P. Both I. O. and A omit the b. p.

2 M. P. ०पूजितं

3 A omits the bracketed portion

4 M. P. ०पुङ्गव

5 I. O. तत्फलं समधीतेषु for the b. p.

6 A ०विदान

7 A omits स्त

8 A ०संकीर्त्तनेन च

9 A च for व

10 A शुक्लाक्षय

शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा[1] विधानतः ।

धान्यशैलादयो देया यथाशास्त्रं विधानतः ॥९॥

शुक्लायां द्वादश्यामिति सम्बन्धः । शशिक्षय इत्यमावास्यायां भेदेनोपादानात् पञ्चदश्या-[2]मित्यनेन पौर्णमासी-[3]प्राप्तिः ।

[4][तीर्थे वायतने] वापि गोष्ठे वा भवनाङ्गने ।

एतेन कालदेशावुक्तौ ।

मण्डपं कारयेद् भक्त्या चतरस्रमुदङ्मुखम् ।

[5]प्रागुदक्प्रवणं तद्वत् प्राङ्मुखं [6]वा [7]विधानतः ॥१०॥

[8]विधानतः शिल्पशास्त्रविधानतः ।

गोमये-[9]नोपलिप्तायां भूमावास्तीर्य्य वै कुशान् ।

तन्मध्ये पर्वतं कुर्य्याद् विष्कम्भपर्वतान्वितम् ॥११॥

अथ धान्याचलदानम् ।

धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः ।

मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः [10]शतैः ॥१२॥

[11]द्रोणपरिमाणञ्च परिभाषायामुक्तमनुसन्धेयम् ।

मेरुर्महा[12]-व्रीहिमयश्च[13] मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात् ।

पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः ॥१३॥

मध्ये [14]मूर्द्धभागमध्ये शर्कराचले मेरोरुपरीति वक्ष्यमाणत्वात् । वृक्षत्रयञ्च मन्दारपारि-जातकल्पपादपाख्यम् । हरिचन्दनसन्तानौ च मेरुपूर्वपश्चिमभागयोरारोपणीयौ शर्कराचले तथा वक्ष्यमाणत्वात् ।

पश्चाच्च गारुत्मतनीलरत्नैः [15]सौम्येन वैदूर्य्यसरोजरागैः ।

श्रीखण्डखण्डैरभितः [16]प्रवाललतान्वितः शुक्तिशिलातलः स्यात् ॥१४॥

---

1 A च

2 A ०मिति

3 A reads it with तीर्थे in the next line as प्राप्तिस्तीर्थे

4 M. P. reads the b. p. as तीर्थेष्वायतने

5 I. O. प्रगुदक्प्रवणं

6 M. P. च

7 A धानतः

8 A adds इति to this

9 A and M. P. नात्तु for नोप

10 Corrected from M. P. I. O. शनैः, A शतः

11 A शतः द्रोणं

12 I. O. ०महान्

13 M. P. ०व्रीहिमयस्तु, A ०हैममयश्च

14 A मूर्द्ध०

15 Corrected from M. P. A सौम्येन, I. O. याम्येन

16 M. P. प्रवालैर्वंतान्वितः

प्रवालमुक्तान्वित इति क्वचित् पाठः ।

ब्रह्माथ[1] विष्णुर्भगवान् [2]पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ।
मूर्द्धन्यधः[3]-स्थानममत्सरेण कार्य्यन्त्वनेकैश्च[4] पुनर्द्विजौघैः ॥१५॥

[5]द्विजौघा ऋषिसंघाः पक्षिसंघाश्च । ब्रह्मादिदेवगणोऽत्र [6]मेरोर्मूर्द्धनि हिरण्मयः स्यात् । [7]तस्मान्मूर्द्धन्यधःस्थानममत्सरेण यजमानेनानेकैर्द्विजौघैः सहितं कार्य्यम् । 'मूर्द्धन्यवस्थागतमत्सरेण कार्य्यास्त्वनेकेऽथ पुनर्द्विजौघा'[8] इति [9]क्वचित् पाठः । अस्यार्थः—ब्रह्मादयो मूर्द्धन्यवस्थितयः कार्य्याः । [10]मूर्द्धन्यवस्थेभ्यस्तेभ्योऽथानन्तरं[11] द्विजौघाः कार्य्या इति । तदनयोः पाठयोरर्थस्थानेन[12] कश्चिद्विशेषः ।

चत्वारि शृङ्गाणि च राजतानि [13]नितम्बभागेष्वपि राजतः स्यात् ।
[14]तथेक्षु-[15]वंशावृतकन्दरस्तु घृतोदकप्रस्रवणश्च[16] दिक्षु ॥१६॥

इक्षुरेव वंशः [17]इक्षुवंशः, घृतमेवोदकं घृतोदकम् ।

शुक्लाम्बराण्य[18]-म्बुधरावली स्यात् पूर्वेण पीतानि च[19] दक्षिणेन ।
वासांसि पश्चादथ कर्बुराणि [20]रक्तानि चैवोत्तरतो [21]घनानि ॥१७॥
रौप्यान्महेन्द्र-[22]प्रमुखांस्तथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण ।
नाना-[23][फलानि च] समन्ततः स्यान्मनोरमं [24]माल्यविलेपनञ्च ॥१८॥

क्रमेण स्वदिक्क्रमेण ।

---

1 I. O. ०च
2 Corrected from M. P. I. O. मुरारि, A श्वरारि
3 M. P. and I. O. व for धः
4 I. O. ०कञ्च
5 A omits it
6 I. O. मेरौ मूर्द्धनि
7 A मूर्द्धन्यधस्थान०, I. O. तस्मान्मूर्द्धोधःस्थान०
8 I. O. ०स्त्वनेकपुनर्द्विजौघा
9 A omits it
10 A मूर्द्धन्यवस्थितेभ्य०
11 A हिरण्मया
12 A ०रत्नस्थानेन
13 Corrected from M. P. A तम्ब०, I. O. मितम्ब०
14 I. O. तद्दिक्षु०
15 A वंशवृतकन्दरस्तु
16 A ०प्रश्रवणश्च, M. P. ०प्रस्रवणैश्च
17 A omits it
18 I. O. ण्य for ण्य
19 I. O. व
20 I. O. वस्त्राणि
21 M. P. घनानी, A फलानि
22 Corrected from M. P. A ०प्रमुखानथाष्टौ, I. O. ०विमुखानष्टौ
23 I. O. फलानीव and M. P. फलानी च for the b. p.
24 I. O. माल्य०

[1][वितानकं चोपरि पञ्चवर्ण]-मम्लानपुष्पाभरणं सितं वा[2] ।।१६।।

इत्थं निवेश्यामरशैल-[3][मग्रंथ मेरोस्तु विष्कम्भ]-गिरीन् क्रमेण ।

तुरीयभागेण [4]चतुर्दिशश्च संस्थापयेत् पुष्पविलेपनाढ्यान्[5] ।।२०।।

प्रत्येकं तुरीयभागेण विष्कम्भगिरीन् स्थापयेत् लवणाचले तथा दर्शनात् ।

पूर्वेण मन्दरमनेक-[6]फलावलीभिर्युक्तं यवैः कनकभद्रकदम्बचिह्नम्[7] ।

कामेन काञ्चनमयेन विराजमानमाकारयेत् कुसुमवस्त्रविलेपनाढ्यम्[8] ।।२१।।

यवैर्मन्दरमाकारयेदिति [9]सम्बन्धः । कनक[10]-भद्रकदम्बचिह्नं कनकमयस्वरूपकदम्बतरु-चिह्नम् ।

क्षीरारुणोदसरसाऽथ[11] वनेन चैवं रौप्येण शक्तिघटितेन विराजमानम् ।

क्षीरपूर्णरौप्यकुण्डरूपेणारुणोदसरसा रौप्येण च वनेन विराजमानं मन्दरमिति सम्बन्धः ।

याम्येन गन्धमादनोऽत्र[12] निवेशनीयो गोधूमसञ्चयमयः कलधौतजम्बा[13] ।।२२।।

हैमेन [14]यज्ञपतिना घृतमानसेन वस्त्रैश्च राजतवनेन च संयुतः स्यात् ।।२३।।

कलधौतजम्बा सौवर्णजम्बुतरुणा सहित इत्यर्थः । अत्र च मानससरोऽपि घृतपूर्णरौप्य-[15][कुण्डरूपमन्यस्यैव सरसस्तथा दर्शनात्] ।

[16]पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् ।

आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे[17] ।।२४।।

तद्वदिति सितोदसरोऽपि दधिपूर्णराजतकुण्डरूपमित्यर्थः ।

---

1 Corrected from M. P. A वितानपरितानपरिपञ्चवर्णं and I. O. वितानमत्रोपरिपञ्चवर्णं for the b. p.

2 M. P. च

3 Corrected from M. P. I. O. मटयसतसुवैश्चम्भ and A वर्थमतस्तविम्भ for the b. p.

4 I. O. चतुर्द्दशश्च

5 Corrected from M. P. A ०ढ्या, I. O. ०ढ्यान्

6 Corrected from M. P. A फलावतीभिर्युक्तं, I. O. ०फला-वलीभिर्युक्ता

7 M. P. ०चिह्नः

8 I. O. ०ढ्यं

9 I. O. समर्थः

10 Both I. O. and A omit it

11 Corrected from M. P. I. O. ०सरआथ, A ०सरसा च

12 I. O. ०मदनोव, M. P. ०मदनश्च

13 I. O. ०जम्बाः, A ०चम्बा, M. P. ०युक्तः

14 Corrected from M. P. I. O. यज्ञपतिना, A धज्ञपतिना

15 A reads the b. p. as कुण्डरूपमिति तथा पश्चिमायां

16 I. O. तथा । तिलाचल०

17 I. O. ये for ग्रे

संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं [1]सुपार्श्वमपि माषमयं सुवस्त्रम् ।
पुष्पैश्च हैमवटपादप-[2][शेखरं त]-माकारयेत् कनकधेनुविराजमानम् ॥२५॥
[3][माक्षीकभद्र]-सरसा च वनेन तद्वद्रौप्येण भास्वरवता च [4]युतं [5]विधाय ।

भास्वरवता दीप्तिमद्वृक्षसहितेन । एतावतोत्कृष्टरजत-[6]युतत्वं वनस्योक्तम् । अत्र च विष्कम्भपर्वतस्थदेवतानां मेरुसम्मुखतयाऽवस्थापनम्, शर्कराचले तथाभूतक्रमस्य वक्ष्यमाणत्वात् ।

होमश्चतु-[7]भिरथ वेदपुराणविद्भिर्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः ॥२६॥
पूर्वेण हस्त-[8]मितमत्र विधाय कुण्डं कार्य्यस्तिलैर्यवघृतेन समित्कुशैश्च ।
रात्रौ-[9][च जागर]-मनु-[10]द्रुत-[11]गीततूर्य्यैरावाहनं च कथयामि शिलोच्चयानाम् ॥२७॥
त्वं सर्वदेव-[12]गणधाम[13]-निधे विरुद्धमस्मद्गृहेष्वमरपर्वत नाशयाशु ।
क्षेमं विधत्स्व[14][कुरु शान्ति]-मनुत्त-[15][मां नः] सम्पूजितः परमभक्तिमता मयाद्रे[16] ॥२८॥

त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्तामूर्तं परं [17]बीजमतः पाहि [18]सनातन ॥२९॥
यस्मात्त्वं लोकपालानां विश्वमूर्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥३०॥
यस्मादशून्यममरैर्नारीभिश्च [19]शिरस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥३१॥

---

1 I. O सुपासुमपि
2 I. O. शेषवसु for the b. p.
3 Corrected from M. P. I. O. साक्षीवभद्र and A माक्षीक only for the b. p.
4 I. O. सुतं
5 M. P. मिधाय
6 I. O. ०घटितत्वं
7 I. O. ०र्द्विरथ
8 Corrected from M. P. Both I. O. and A मुख for मित
9 Corrected from M. P. A प्रजागर and I. O. च जागत for the b. p.
10 Corrected from M. P. A द्रुत, I. O. ०द्दत
11 Corrected from M. P. A गीतवाद्यै०, I. O. गीततूर्य्यै०
12 A ०गुण०
13 I. O. ०धाम०
14 A गमच्छान्ति for the b. p.
15 Corrected from M. P. Both I. O. and A मार्थः for the b. p.
16 I. O. सयाद्रे, M. P. मया ह्रि
17 A जीवमतः
18 I. O. सनातनः
19 A शिवस्ततः and M. P. शिवेन च

एवमभ्यर्च्य तं मेरुं मन्दर-[ञ्चापि पूजयेत्][1] ।
यस्माच्चैत्ररथेन त्वं [2][भद्राश्वेन च वर्षतः] ।
शोभसे मन्दर क्षिप्रमतस्तुष्टिकरो भव ॥३२॥
[3]यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन[4] ।
गन्धर्ववनशोभावानतः कीर्त्तिर्दृढाऽस्तु मे ॥३३॥
यस्मात्त्वं केतु-[5]मालेन वैभ्राजेन वनेन च ।
हिरण्मयाश्वत्थशिखस्तस्मा-[6]त्तुष्टिर्ध्रुवाऽस्तु[7] मे ॥३४॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व राजसे नित्यमतः श्रीरक्षयाऽस्तु मे ॥३५॥
एवमामन्त्र्य तान् सर्वान् [8][प्रभाते विमले पुनः] ।
स्नात्वाऽथ गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ॥३६॥
विष्कम्भपर्वतान् दद्यादृत्विग्भ्यः क्रमशो [9]मुने ।
[10]गाश्च दद्याच्चतुर्विंशत्यथवा[11] दश नारद[12] ॥३७॥
[13][शक्तितः सप्त चाष्टौ वा पञ्च दद्यादशक्तिमान्] ।
एकां वा गुरवे दद्यात् कपिलाञ्च पयस्विनीम् ॥३८॥
अत्र चैक-[14]कपिलादान-[15][पक्षे ऋत्विग्भ्यः] शक्तितः काञ्चनं दक्षिणां दद्यात् ।
पर्वतानामशेषाणामेष एव विधिः[16] स्मृतः ।
त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः ॥३९॥

---

1 M. P. ञ्चाभिपूजयेत्
2 Corrected from M. P. I. O. भद्राश्ववर्षेण च and A भद्राश्वेन च शोभसे for the b. p.
3 Corrected from M. P. I. O. यस्माच्चभामणि०, A ०द्वीपं
4 A ०मादनं
5 I. O. ०मालिन
6 A and M. P. पुष्टि for तुष्टि
7 A ०रयास्तु
8 I. O. प्रभातैर्विमलैश्च for the b. p.
9 I. O. द्विजे
10 A गास्तु
11 Corrected from M. P. I. O. ०चतुर्विंशदथवा, A ०चतुर्विंशदथवा
12 Corrected from M. P. I. O. नारद, A omits it
13 A reads the b. p. as शक्तितः सप्त चाष्टौ तथा पञ्च प्रदद्यादप्यशक्तिमान् and M. P. reads it as नव सप्त तथाष्टौ वा पञ्च दद्यादशक्तिमान
14 I. O. ०कापिल०
15 A पर्व for the b. p.
16 A विधः

ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्वदा ।
स्वमन्त्रेणैव [1]सर्वत्र होमः शैलेषु पठ्यते ॥४०॥
उपवासी भवेन्नित्यमशक्तौ[2] नक्तमिष्यते ।
विधानं [3]सर्वशैलानां क्रमशः शृणु नारद ।
दानकाले च ये मन्त्राः पर्वतेषु [4]च यत् फलम् ॥४१॥
अन्नं [5]ब्रह्म यतः प्रोक्त-[6][मन्नं प्राणाः प्रकीर्तिताः] ।
[अन्नाद्भवन्ति भूतानि जगदन्नेन वर्तते ॥४२॥
अन्नमेव [7]यतो लक्ष्मीरन्नमेव जनार्दनः ।
धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ॥४३॥
अनेन विधिना यस्तु दद्या-[8]द्धान्यमयं गिरिम् ।
मन्वन्तरशतं साग्रं देवलोके महीयते][9] ॥४४॥
अप्सरोगणगन्धर्वैराकीर्णेन विराजता ।
विमानेन दिवः पृष्ठमायाति [10]मुनिसत्तम ।
[11]कर्मक्षये राजराज्यमाप्नोतीह न संशयः ॥४५॥

प्रयोगः

अत्र दानदिने यथाशक्तितो ब्राह्मणेभ्यो भोजनदानं स्वयमक्षार[12]-लवणभोजनं [13]पर्वतानां ब्राह्मण-[14]गृहप्रस्थापनञ्च शर्कराचले सर्वशैल[15]-साधारण्येन वक्ष्यमाणत्वादूहनीयम् । अत्र [16]चानुक्रमपि पुण्याहादिवाचनं 'लोके च [17]भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथा पुण्याहँ [18]-स्वस्त्यृद्धिमित्याप'स्तम्ब-(आप. ध. सू. १।४।१३।६)-वचनात् प्रथमतः [19]कर्तव्यम् । अत्र यजमानः समुपजातधान्याचल-दानेच्छः प्रथमं वृद्धिश्राद्धसामग्रीं ब्राह्मणत्रयं[20] स्वस्तिवाचनार्थ-

---

1 M. P. सर्वेषु
2 M. P. ०शक्ते
3 A तव वक्ष्यामि
4 I. O. omits it
5 I. O. ब्रह्मा
6 M. P. reads the b. p. as मन्नं प्राणाः प्रतिष्ठिताः
7 M. P. ततो
8 I. O. ०द्धान्यमयं
9 A omits the b. p.
10 M. P. स्म निषेवितः
11 M. P. धर्मक्षये
12 I. O. सुपक्कार for स्वयमक्षार
13 A पर्व्वतां, I. O. सुपर्व्वतानां
14 A ०गृहस्थापनार्थं
15 I. O. ०शैला०
16 I. O. चायुक्तमपि
17 A दृतौकर्मार्थं तदानीमेव
18 Corrected from Apastamba. I. O. स्वस्त्यृ०, A omits it
19 I. O. कर्त्तव्यः
20 I. O. ०त्रय

मभीष्टवस्त्रस्थानत्रयं [1]काञ्चनत्रयञ्च, तीर्थादिषु परिशोधितायां[2] भूमौ कर्त्तव्यधान्याचलावस्थानोचितपरिमाणं चतुरस्रैकद्वारमण्डपघटनार्थं स्तम्भवंश-[3]चालादिक-[4]मेककुण्डघटनार्थमिष्टका-चूर्णञ्च, होमार्थमष्टौ ताम्रपात्राणि चत्वार्यासनानि स्रुक्चतुष्टयं स्रुवचतुष्टयं [5]विष्टरचतुष्टयं [6]प्रचुर-कुशानिध्म[7]-तिल-[8]यवघृतसमिदग्नि-ज्वालनार्थे-[9]न्धनानि [10]च, गुर्व्वृत्विग्वरणार्थञ्चाभीष्टवस्त्रादि-स्थानपञ्चकं, गुर्व्वृत्विजां मधुपर्कसामग्रीपञ्चकञ्च, मेरुघटनार्थं परिभाषोक्तपरिमाणेन धान्यद्रोण-सहस्रं द्रोणशतपञ्चकं द्रोणशतत्रयं वा, मेरुशिखरारोपणार्थं[11] पञ्चशाखं बहुविधविहगवस्त्र-भूषणान्वितमभीष्टकाञ्चनघटितं वृक्षपञ्चकं, मेरोरूर्द्ध्वं चतुर्दिगन्तरा[12]-रोपणार्थमभीष्टसंख्य-[13]मुक्ता-हीरक-गोमेद-पुष्पराग-मरकत-[14]नीलवैदूर्यपद्मरागरत्नानि, मेरोरष्ट-[15]दिगवस्थापनार्थमष्टौ चन्दन-खण्डान् [16]प्रवालमुक्तामालाः शुक्तिखण्डांश्च[17],मेरुशिखरमध्यारोपणार्थमभीष्टसुवर्ण-[18]पत्नोत्-खाटिता ब्रह्मविष्णुमहेश्वरादित्यप्रतिमाः, तदधःस्थापनार्थमभीष्टकाञ्चनघटितानृषीन् पक्षि-संघांश्च[19], मेरोरूर्द्ध्वं स्थापनार्थमभीष्टरजतघटितांश्चतुरो गिरिश्टङ्गाकारान्, मेरुनितम्बवेष्टनार्थ-मभीष्टरजतघटिताः [20]यन्त्रिकाः, [21]मेरुनिम्नभागोपान्तवेष्टनार्थं [22]प्रचुरेक्षुतरून्, मेरुपार्श्वेषु प्र-[23]स्रवणार्थमभीष्टसंख्यघृतकुम्भान्, मेरुचतुर्दिशि मेघमालानिर्माणार्थमभीष्टसंख्यानि शुक्लपीत-[24][रक्तनानावर्ण]-वस्त्राणि, मेरोरूर्द्ध्वमष्टदिगारोपणार्थमभीष्टरजतघटितानष्टौ लोक-पालान्, मेरुपार्श्वारोपणार्थं फलानि प्रचुरतमो[25]-त्कृष्टमाल्यविलेपनसामग्रीः, मेरोरुपरि बन्धनार्थं पञ्चवर्णं सितं [26]वा वितानं तदलङ्करणार्थमम्लानमालार्जनसामग्रीं, मन्दरगन्ध-

---

1 A omits it
2 I. O. परिशोधितानां
3 I. O. ०वाला०
4 A घटनाद्दिचक्र for एककुण्ड
5 A omits it
6 A प्रचुरतर for प्रचुर
7 A omits ध्म
8 A जव for यव
9 I. O. व for न्ध
10 A omits it
11 A ०शिखररोपणार्थं, I. O. ०शिखर-मध्यारोपणार्थं
12 I. O. न्ता for न्तरा
13 A ०युक्त०
14 I. O. नील०
15 A ०दिकस्थापनार्थ०
16 I. O. प्रवालमुक्तावाला:
17 I. O. श for श्च
18 I. O. पात्रो०
19 I. O. ०घांश्च
20 A पत्रिका
21 A मेरोरुपरिभागे वेष्टनार्थं
22 A पुष्पेक्षुवनानि:
23 Both I. O. and A श्र for स्र
24 I. O. नानावर्णरत्नानि for the b. p.
25 A ०तरो०
26 A वारितानं

मादन-विपुल-[1]सुपार्श्वाख्य-पर्वतचतुष्टयघटनार्थं प्रत्येकं मेरु-[2]चतुर्थभागपरिमाणान् यवान् गोधूमान् तिलान् माषान्, विष्कम्भगिरिचतुष्टयोर्द्ध्वस्थापनार्थं यथेच्छसुवर्ण-[3]पत्नोत्खाटितान् स्वरूपकदम्बजम्बुवटपिप्पलतरून् कामदेव-[4]सुरेश्वरहंसधेन्वाकारांश्च, सरश्चतुष्टयार्थमभीष्ट-रजतनिर्मितांश्चतुरः कुण्डाकारान्, तत्पूरणार्थं क्षीरार्जनसामग्रीं घृतदधिमधूनि, वनचतुष्टयघटनार्थमभीष्टसंख्यरजतनिर्मि[5]तोज्ज्वलवर्णप्रचुरतरून्, गिरिचतुष्टयालङ्करणार्थमभीष्टसंख्यप्रचुर-वस्त्राणि, देवतासहिताचलपूजनार्थं[6] गन्धपुष्पादिसामग्रीं, [7]दक्षिणार्थमुक्तान्यतमसंख्या धेनूः, एककपिलादानपक्षे [8]ऋत्विग्दक्षिणार्थमभीष्टकाञ्चनं, ब्राह्मणतर्पणार्थं यथेष्टसंख्यतण्डुल कपर्दकानुत्पाद्योक्तसमयाना-[9]मन्यतमस्य पूर्वतरदिने [10]कृतनित्यकृत्यो [11]घटिकाधिकप्रहरत्रये हविष्यं भुक्त्वाऽऽचम्य शुचौ देश[12] उपविश्य पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः ॐ सूर्यः सोमो यमः कालो महाभूतानि [13]पञ्च मत्स्यपुराणोक्तधान्याचलदानकर्म [14][कर्तुमुपवासो मया कर्तव्य इति निवेदनं कृत्वा गृहीतोदपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्यात्। तद्यथा—ॐ अद्य मत्स्यपुराणोक्तधान्याचलदानकर्म] कर्तुं श्वोऽहमुपवासं करिष्ये। एवं सर्वेष्वेव वक्ष्यमाणाचलेषु धान्याचलपदस्थाने [15]च तत्तदचलनाम-[16]निवेशेन-निवेदन-सङ्कल्पौ करणीयौ। [17][एतावतैव तेषां] [18]वक्ष्यमाणाचलानां वाक्यानि [19]निष्पद्यन्ते। [20][अतस्तानि न पश्चाल्लिखितव्यानि]। ततो परदिने कृतनित्यो गृहीतोदपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्यात्। तद् यथा[21] [ॐ अद्य] मत्स्यपुराणोक्तधान्याचलदानकर्माहं[22]

---

1 A omits सु
2 A चतुष्टय for चतुर्थ
3 I. O. ०पूर्णोद्घाटितान्
4 A कुबेर for सुरेश्वर
5 A ०ताज्ज्वलवर्णप्रचूरतन्; I. O. ०तार्थजलवस्तुप्रचुरतरून्
6 A ०पूरणार्थं
7 I. O. दक्षिणार्थयुक्तान्यतमसंख्या; A दक्षिणार्थं मुक्तानामेवतम
8 I. O. विधिर्दक्षिणार्थं०
9 I. O. ०मन्यतमपूर्वदिने
10 A कृतनित्यो
11 A घाटिताधिक०
12 I. O. दिशि
13 I. O. reads it before महा-भूतानि
14 A omits the bracketed portion
15 A omits it
16 A omits it
17 I. O. reads the b. p. as एतावदेतेषां
18 I. O. वक्ष्यमाणाचलानां; A वक्ष्य-मानां
19 A सम्पद्यन्ते
20 A पूर्वलिखितानि and I. O. अतस्त्वेवलम्बितानि for the b. p.
21 I. O. omits अद्य and A omits the entire b. p.
22 I. O. omits हं

करिष्ये। ततो [1]यजमानः यथाविधि सगणाधिपमातृपूजां वृद्धिश्राद्धञ्च कृत्वा ब्राह्मणत्रयं[2] वस्त्रकाञ्चनादिभिरभ्यर्च्य धान्याचलदानकर्मणि पुण्याहं भवन्तो ब्रुवन्त्विति वदेत्। पुण्याहमिति प्रत्येकं तैस्त्रिरुक्ते स्वस्ति भवन्तो ब्रुवन्त्विति वदेत्। स्वस्तीति प्रत्येकं तैस्त्रिरुक्ते ऋद्धिं भवन्तो ब्रुवन्त्विति वदेत्। ते च ऋद्ध्यतामिति प्रत्येकं त्रिब्रूयुः। ततः [3]कृतनित्यान् गुर्वृत्विजोऽभीष्टवस्त्रादिदानपूर्वकं [4]वरयेत। [5]तत्र गुरुवरणवाक्यम्। ॐ अद्यामुकसगोत्रममुकवेदामुकशाखाध्यायिनममुकदेवशर्मा-[6][णमस्मिन् धान्याचलदानकर्मणि] गुरुकर्म कर्तुं त्वामहं वृणे। वृतोऽस्मीति गुरुर्वदेत्। यजमानस्तु यथोक्तं कर्म कुर्विति वदेत्। [7][करवाणीति गुरुर्वदेत्।] तत-[8][स्तथैव ऋत्विजो व]-रयेत्। [9][तद्यथा]—ॐ अद्यामुकामुकसगोत्रानमुकामुकवेदामुकामुकशाखाध्यायिनोऽमुकामुकदेवशर्माणोऽस्मिन् धान्याचलदानकर्मणि ऋत्विक्कर्म कर्तुं भवतोऽहं वृणे। वृतोऽस्मीति प्रत्येकं ब्राह्मणा वदेयुः। यथाविहितं कर्म कुरुतेति यजमानो वदेत्। करवाणीति प्रत्येकं ब्राह्मणा वदेयुः। अत्र सङ्कल्पपुण्याहादि[10]-वाचन-वरणवाक्यानि धान्याचलपदस्थाने तत्तदचलनाम[11]-प्रक्षेपेण सर्वाचलान्वयानि[12] भवन्ति। ततो यथाशाखं वृतेभ्यो[13] मधुपर्कं दद्यात्। ततः पूर्वशोधितायां भूमौ यथोक्तमुदङ्मुखं [14]प्राङ्मुखं वा मण्डपं कारयित्वा तत्पूर्वभागे यथोक्तविस्तारोच्छ्रायं चतुरङ्गुलं पूर्वोत्तरकोणावनत-[15]सर्वसमं क्रमेखलायुत-वितस्तिदीर्घ-सप्ताङ्गुलप्रस्तार[16]-कूर्मपृष्ठोन्नत-मध्याङ्गुलोच्छ्रित-प्रान्तगजौष्ठसदृशदीर्घप्रमाणोर्द्ध्वस्थयोनियुतं[17] कुण्डं कारयित्वा पूर्वार्जितहोमोपकरणानि कुण्डपार्श्वे स्थापयेत्। ततो मण्डपमध्ये गोमयोपलिप्तायां भूमौ कुशानास्तीर्य तन्मध्ये उक्तपरिमाणानामन्यतमपरिमाणं धान्यराशिं कृत्वा तदूर्द्ध्वमध्यभागे सौवर्णं वृक्षत्रयमारोप्य [18]तत्पूर्वपश्चा-[19]द्भागयोर्वृक्षद्वयमारोपयेत्। मेरोः पूर्वभागेऽभीष्टसंख्ये[20]मुक्ताहारके[21]

---

1 Both I. O. and A omit it
2 I. O omits त्रयं
3 A कृतनित्या
4 I. O. कारयेत्
5 A अत्र
6 I. O. omits the bracketed portion
7 I. O. करवाणीति गुरुः and A omits the entire portion
8 I. O. स्मैकराद्विजो का for the b. p.
9 A omits the b. p.
10 I. O. नि for दि
11 A ०दान० ; I. O. ०मास०
12 I. O. ०वणाखीनि
13 I. O. वृतेभ्यो ; A omits it
14 A omits it
15 A omits सर्व
16 A ०प्रस्तारान्
17 I. O. ०स्तमोन्निन्नतं
18 I. O. कृत for तत्
19 I. O भा for द्भा
20 I. O. ०संख्य
21 I. O. ०हीरक

तथा दक्षिणतो[1] गोमेदपुष्परागौ तथा पश्चिमतो मरकतनीले[2] तथोत्तरतो वैदूर्यपद्मरागा-वारोप्य[3] सर्वतश्चन्दनखण्डान् [4][प्रवालमुक्तामालाः शुक्तिखण्डांश्चारोपयेत्। मेरोरूर्द्ध-भागे ब्रह्मविष्णुशिवादित्यप्रतिमाः स्थापयित्वा तदधःस्थाने ऋषीन्] पक्षिसंघांश्चारोपयेत्। [5]मेरोरूर्द्धचतुर्दिशि राजतशृङ्गचतुष्टयमारोप्य राजतयन्त्रिकाश्च[6] मेरोरधोभागात् किञ्चिदूर्द्ध मध्य[7]-भागवेष्टनेनारोप्य मेरुपार्श्वेष्विक्षु[8]-वृक्षसमूहावृतान्नितम्ब[9]-भागान् कृत्वा [10]तदुपान्तेषु लम्बमानां घृतधारां दत्त्वा [11]पूर्वदिक्क्रमेणोक्तवस्त्रै[12]-र्मेघावलीं[13] [14]रचयेत्। मेरोरूर्द्धञ्च स्वस्व-दिक्क्रमेण लोकपालानष्टावारोप्य[15] सर्वतो नानाविधानि सुगन्धिपुष्पविलेपनानि चारोपयेत्। ततो मेरोरूर्द्धमण्डपभागे वितानक[16]-मम्लानमाल्यालङ्कृतं बध्नीयात्। एवं मेरुमारोप्य तत्पूर्वतो मेरुद्रव्य-[17]चतुर्थभागेन [18][यवराशिं कृत्वा तत्र नानाविधानि फलानि दत्त्वा यवराशेरूर्द्धमध्य-भागे कदम्बवृक्षं पश्चिमाभिमुखीं कामप्रतिमाञ्चारोप्य प्रचुरपुष्पविलेपनानि दत्त्वा क्षीरपूर्णं राजतं [19]कुण्डं वनञ्चारोपयेत्। मेरुदक्षिणतो मेरुद्रव्यचतुर्थभागेन] गोधूमराशिं कृत्वा तदुपरि जम्बुवृक्ष-[20]मुत्तराभिमुखीं [21]यक्षप्रतिमां घृतपूर्णराजतकुण्डं[22] वस्त्राणि राजतवनं प्रचुरं पुष्पं विलेपनञ्चारोपयेत्। मेरोः पश्चिमतो मेरुद्रव्य-[23]चतुर्थभागेन तिलराशिं कृत्वा तदुपरि प्रचुरं सुगन्धि पुष्पं पिप्पलतरुं पूर्वाभिमुखीं हंसप्रतिमां राजतं वनं वस्त्राणि दधिपूर्णं राजतकुम्भं विलेपनञ्च प्रचुरं स्थापयेत्। मेरोरुत्तरतो मेरुद्रव्यचतुर्थांशेन माषराशिमुत्कृष्टवस्त्रान्वितं [24][प्रचुरपुष्पान्वितं च] कृत्वा [25]माषराश्यूर्द्धभागे वटवृक्षं दक्षिणाभिमुखीं धेनुप्रतिमां मधुपूर्णं

---

1 A ०भागे
2 A ०नील
3 I. O. ०रागामारोप्य ; A ०वागोरा-वोप्य
4 I. O. omits the bracketed portion
5 A मेरुर्द्ध०
6 A ०पत्रिकाश्च
7 A omits भग
8 I. O. ष for ष्विक्षु
9 A ०म्निम्न० and I. O. ०नां स्व० for ०न्नितम्ब०
10 A तदुपरिपार्श्वेषु
11 A पूर्वादि for पूर्वदिक्
12 A ०मन्त्रै०
13 Both I. O. and A मेघावली
14 A चारोपयेत्
15 A मारोप्य for ०म...प्य
16 I. O. omits क
17 I. O. चतुष्टय for चतुर्थ
18 I. O. omits the bracketed portion
19 I. O. कुम्भं
20 I. O. ०युत्तराविमुखं
21 A प्रतिमां
22 I. O. ०कुम्भं
23 I. O. ०चतुष्टय०
24 I. O. प्रचुरपुष्पान्वितं and A omits the entire b. p.
25 I. O. माषराश्योर्द्धभागे ; A सम-प्रचुरपुष्पराश्युर्द्धभागे

राजतं कुम्भं[1] वनं विलेपनञ्च प्रचुरमारोपयेत्। ततो [2][यजमानस्तु 'त्वं सर्वदेवगणधामे'त्यादि 'दुःखसंसारसागरा'दित्यन्तमन्त्रैर्मेरुमावाह्य गन्धपुष्पादिना संपूज्य 'यस्मा'दित्यादि 'श्रीरत्नया-ऽस्तु म' इत्यन्तमन्त्रैश्चतुर्भिश्चतुरो गिरीन् यथाक्रमं प्रत्येकमावाह्य सम्पूज्य एत एत मन्दार-पारिजातकल्पवृक्षहरिचन्दनसन्तान-कदम्बजम्बुपिप्पलवटा इत्यावाह्य ॐ मन्दारमारोपयामि [3][ॐ पारिजातमारोपयामि ॐ कल्पवृक्षमारोपयामि ॐ हरिचन्दनमारोपयामि ॐ सन्तान-मारोपयामि ॐ कदम्बमारोपयामि ॐ जम्बुमारोपयामि ॐ पिप्पलमारोपयामि ॐ वट-मारोपयामि] इत्यावाह्यारोपयेत्। ततो गुरुर्मण्डपैक]-देश [4]उत्तरदिक्क्रमेण यवपुष्पसित[5]-तण्डुलानामन्यतमेन [6]पंक्तिक्रमेण [7][एत एत आदित्यादि-]नवग्रहा[8] इत्यावाह्य [9][ॐ आदित्य-]मारोपयामि ॐ सोममारोपयामि [10][ॐ अङ्गारकमारोपयामि] ॐ बुधमारोपयामि ॐ बृहस्पतिमारोपयामि ॐ शुक्रमारोपयामि ॐ शनैश्चरमारोपयामि ॐ राहुमारोपयामि ॐ केतुमारोपयामि इत्यारोपयेत्। तत ॐ उक्तस्थानस्थिताः[11] [12][प्रतिमानुप्रतिमा एत] एत [13]इन्द्रादयोऽष्टौ लोकपाला इत्यावाह्य यथाक्रमम् ॐ इन्द्रमारोपयामि ॐ अग्निमारोपयामि ॐ यममारोपयामि ॐ [14]निर्ऋतिमारोपयामि ॐ वरुणमारोपयामि ॐ वायुमारोपयामि ॐ कुबेरमारोपयामि ॐ ईशानमारोपयामीत्यारोप्य[15], एत [16]एत ब्रह्मविष्णुत्रिपुरारि[17]-दिवा-करकामयक्षपतिहंसधेनव[18] इत्यावाह्य, यथाक्रमं ॐ ब्रह्माणमारोपयामि ॐ विष्णुमारो-पयामि ॐ [19]त्रिपुरारिमारोपयामि ॐ दिवाकरमारोपयामि ॐ काममारोपयामि ॐ यक्ष-पतिमारोपयामि ॐ हंसमारोपयामि ॐ [20]धेनुमारोपयामि इत्यारोपयेत्। ततश्च [21][मन्दा-राय पारिजाताय कल्पवृक्षाय हरिचन्दनाय सन्तानाय कदम्बाय [22]जम्बवे पिप्पलाय वटाय],

---

1 A कुम्भ

2 I. O. यजमानो मण्डपैक for the b. p.

3 A omits the b. p.

4 A उत्तरादिक्रमेण

5 I. O. ०मित०

6 I. O. च पुञ्जिकापटपंक्तिं कृत्वा तत

7 I. O. एत एत आदि and A तत तत यदित्यादि for the b. p.

8 A ०ग्रह

9 A omits the b. p.

10 A omits the b. p.

11 I. O. ०स्थित

12 A तत and I. O. प्रतिमानुप्रतिमेत for the b. p.

13 A इन्द्राद्यष्टौ

14 A नैऋति०

15 A omits इत्यारोप्य

16 A एतद्ब्रह्म०

17 I. O. ०मुरारि०

18 A कारभय

19 I. O. मुरारि०

20 A सुरभि०

21 I. O. omits the b. p.

22 A omits it

आदित्याय सोमाय [1]अङ्गारकाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे, इन्द्राय अग्नये यमाय निर्ऋतये वरुणाय वायवे [2]कुबेराय ईशानाय, ब्रह्मणे विष्णवे [3]त्रिपुरारये दिवाकराय [4]कामाय यज्ञपतये हंसाय [5]धेनवे इति प्रत्येकमुच्चार्य एतत् पाद्यं नम इति क्रमादेकैकशः पाद्यं सर्वेभ्यो दत्त्वा [6]तथैषोऽर्घ्यो नम इत्यर्घ्यं तथैवैतदाचमनीयं [7][नम इत्याचमनीयं] तथैवैतद्वस्त्रं नम इति वस्त्रं तथैवैष गन्धो नम इति गन्धं तथैवैतत् पुष्पं नम इति [8][पुष्पं तथै]-वैष धूपो नम इति धूपं तथैवैष दीपो नम इति दीपं तथैवैतन्नैवेद्यं [नम इति नैवेद्यं][9]दद्यात्[10] । [11]एवं [12]पूजां समापयेत् । तत ऋत्विजः कुण्डे ऋग्वेदिना [13][स्वगृह्योक्तविधिनाग्न्युपसमाधाने कृते] तत्र पूजित-[14]देवताभ्यः स्वस्व-[15]मन्त्रेण [16][प्रत्येकं तिल]-यवघृतसमित्कुशैरेकैकामाहुतिं दद्युः । मन्त्राश्च आदित्यस्य ऋग्वेदयजुर्वेदयोः आ कृष्णेनेति, सामवेदे [17]बण्महाँ असीति, अथर्ववेदे [18][आदित्य नावमिति] । सोमस्य ऋग्वेदे आप्याय-[19]स्वेति, [20][यजुर्वेदे इमं देवा इति, सामवेदे आ प्यायस्वेति,] अथर्ववेदे यद्राजानमिति । अङ्गारकस्य ऋग्यजुःसामवेदेषु अग्निर्मूर्द्धेति, अथर्ववेदे त्वया [21]मन्य इति । बुधस्य ऋग्वेदे अग्ने विवस्वदुषस इति, [22][यजुर्वेदे उद्बुध्यस्वेति, सामवेदे अग्ने विवस्वदुषस इति, अथर्ववेदे दर्शोऽसीति] । बृहस्पतेः [23]ऋग्वेदे बृहस्पते परि दीयेति,[24] यजुर्वेदे बृहस्पते[25][अतियदर्य्य] इति, सामवेदे बृहस्पते परि[26]दीयेति, अथर्ववेदे [27]बृहस्पतिर्न इति । शुक्रस्य ऋग्वेदे शुक्रन्ते अन्यदिति, यजुर्वेदे अन्नात् परिश्रुत इति, सामवेदे [28][शुक्रन्ते अन्यदिति] अथर्ववेदे येनाव-

---

1 I. O. मङ्गलाय
2 Both I. O. and A सोमाय
3 A त्रिपुराय ; I. O. क्रुरारये
4 I. O. सोमाय
5 A सुरभये
6 I. O. एषो०
7 I. O. omits the b. p.
8 A omits the b. p.
9 A omits the b. p.
10 I. O. omits it
11 I. O. इति
12 A पूजा
13 A reads the b. p. as भ्युपं गाविधि नावाज्ञ तत्र
14 A ०देवेभ्यः
15 A ०मन्त्रैः
16 I. O. omits the b. p.
17 A च महां
18 A चादित्या नाव इति for the b. p.
19 A ०स्त्रे०
20 I. O. omits the b. p.
21 A मान्य ; I. O. मन्त्री
22 A reads the b. p. as सामवेदे दानासीति
23 A omits it
24 I. O. दीपे इति
25 A च for the b. p.
26 I. O. दीपेति
27 A बृहस्पते य
28 A omits the b. p.

पदिति। शनैश्चरस्य ऋग्यजुःसामवेदेषु शन्नो देवीरिति, अथर्ववेदे [1]प्राणाय नम इति। [2][राहोः ऋग्वेदे [3]कया नश्चित्र इति, यजुर्वेदे काण्डात् काण्डादिति, सामवेदे कया नश्चित्र इति, अथर्ववेदे [4]राहू राजानमिति।] केतोः [5]वेदचतुष्टयेऽपि केतुं कृण्वन्निति। इन्द्रस्य ऋग्वेदयजुर्वेदयोः त्रात.रमिन्द्रमिति, सामवेदे इन्द्रायेन्दो [6]मरुत्वत इति, अथर्ववेदे [7][इन्द्रस्य बाहू] इति। अग्नेः ऋग्वेदे [8][अग्निं दूतं] वृणीमहे इति, यजुर्वेदे त्वन्नो अग्ने इति, सामवेदे अग्निं [9]दूतं [10]वृणीमहे इति, [11][अथर्ववेदे अग्नेर्मन्व] इति। यमस्य ऋग्वेदे असि यम इति, यजुर्वेदे सुगंनु[12]पन्थामिति, सामवेदे नाके सुपर्णमिति, अथर्ववेदे [13][यमो नो गातु]-मिति। [14][निर्ऋतेः ऋग्वेदे वेत्था हि निर्ऋतीनामिति, यजुर्वेदे असुन्वन्तमयजमान-मिति, सामवेदे वेत्था हि निर्ऋतीनामिति, अथर्ववेदे अपेत एत्विति।] वरुणस्य ऋग्वेदे वरुणं वो [15]रिशादसमिति, [16][यजुर्वेदे तत्त्वा यामीति,] सामवेदे घृतवती भुवनानामिति, अथर्ववेदे उदुत्तमं वरुणेति। वायोः ऋग्वेदे वात [17][आ वात्विति], यजुर्वेदे आ नो [18]नियुद्भिरिति, सामवेदे वात आ वात्विति, अथर्ववेदे वायोः सवितुरिति। सोमस्य ऋग्वेदे [19]कुविदङ्ग नमसा ये इति, यजुर्वेदे [20][वयं सोमेति], सामवेदे [21][सोमं राजानं] वरुणमिति, अथर्ववेदे [22]सोदक्रामत् सेति। ईशानस्य ऋग्वेदे ईशाना [23]वार्य्याणामिति, यजुर्वेदे तमीशान-मिति, सामवेदे आत्वा [24]सोमस्येति, अथर्ववेदे तस्मै [25][सर्वेभ्य ईशानस्येति]। ब्रह्मणो वेद-

1 I. O. ब्राह्मणाय
2 A omits the b. p.
3 I. O. कयाश्चित्र
4 I. O. राज्ञा
5 A reads this word after the next two words
6 A त्वा मरुत्व
7 A इन्द्राबाहुम for the b. p.
8 A अग्निदूतं and I. O. अग्निंभूतं for the b. p.
9 I. O. भूतं
10 A इणीम
11 A reads the b. p. as यजुर्वेदे अग्निर्मन
12 A ०न
13 A reads the b. p. as आमा आगन्त
14 A omits the b. p.
15 A निशादमिति
16 A omits the b. p.
17 I. O. वत्विति
18 A निपुभिरिति ; I. O. नियुतिरिति
19 A कुचिदङ्गनमसात् ये इति ; I. O. कुविदङ्गनमसायेति
20 A reads the b. p. as सामवेद इति
21 A reads the b. p. as सोम राजान
22 A सोदक्रमित्स्यति ; I. O. सोदद्र.सस इति
23 I. O. वार्योणामिति
24 A मुराषाह्म इति
25 I. O. reads the b. p. as सर्वेभ्यब्रह्मानस्येति

चतुष्टयेऽपि ब्रह्म[1]जज्ञानमिति। विष्णोः ऋग्वेदे अतो देवा इति, यजुर्वेदसामवेदयोः[2] इदं विष्णुरिति, अथर्ववेदे [3]उरु विष्ण इति। शिवस्य ऋग्वेदे [4][इमा रुद्रायेति], यजुर्वेदे मा नस्तोक इति, सामवेदे आ वो राजानमिति, अथर्ववेदे भवो [5]दिवो भव इति। दिवाकरस्य वेदचतुष्टयेऽपि चित्रं देवानामिति। कामस्य ऋग्वेदे कामस्तदग्रे[6] समवर्ततेति, यजुर्वेदे कोदादिति, सामवेदे काम [7]वेद ते नाम इति, अथर्ववेदे कामस्तदग्र इति। यक्षपतेः ऋग्वेदे कुविदङ्ग नमसा ये इति, यजुर्वेदे वयं सोमेति, सामवेदे [8]सोमं राजानं [9]वरुणमिति, अथर्ववेदे [10]सोदक्रामत् से इति। हंसस्य ऋग्वेदे हंसाः [11]सुपर्णा इति, यजुर्वेदे हंसः [12]शुचिषदिति, सामवेदे [13]प्र हंसास इति, अथर्ववेदे [14][परि धर्मेव सूर्यम्] इति। धेनोः ऋग्वेदे [15][आगारो अस्मिन्निति], यजुर्वेदे [16][मावत परितावतामिति], सामवेदे [17][गवां व्रतं सामेति], अथर्ववेदे प्रजापतिश्च परमेष्ठी [18]च शृङ्गे इति। ततो[19] रात्रौ[20] सुखश्रव[21]-गीतवाद्यैर्जागरणं[22] कुर्यात्। एतच्च [23]मण्डपकरणादिरात्रिजागरणान्तं कर्म [24]सर्वशैलसाधारणम्। अपरशैलेषु [25]तु तत्तद्द्रव्येण शैलनिर्माणदेवतादिनिर्माणद्रव्यैः [26]क्वचित् क्वचिद्विशेषः। तस्य तत्रैव [27]वक्ष्यामः। ततः प्रभाते कृतनित्यः [28]कृतनित्येभ्यो गुरुत्विग्भ्यः [29]'अन्नं ब्रह्म 'त्यादि-[30]['पाहि तस्मा]-न्नगोत्तमे'-त्यन्तमन्त्रा-[31][भ्यां मेरुमभि]-मन्त्र्य दद्यात्। तद् यथा—ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदा-

---

1 A यज्ञानमिति
2 A यजुर्वेदे सामवेदे च
3 I. O. तद्विष्णोरिति
4 A reads the b. p. as इमं रुद्रायेति
5 A द्दि वो
6 I. O. ये for ग्रे
7 A वेदे च
8 I. O. सोम ; A सोमो
9 A omits वरुणं
10 I. O. सोदक्रामयेति
11 A सोपरामिति
12 A शुचिसदिति
13 I. O. प्रहंसा
14 A परियामिति च सूर्य for the b. p.
15 I. O. आगाधो अस्मन्निति for the b. p.
16 A गार उयायार इति चित्रमिति for the b. p.
17 A गवाव्रतं साम: for the b. p.
18 I. O. omits it
19 I. O. adds much irrelevant matter, extending over a line here
20 I. O. adds च here
21 I. O. ०श्रव०
22 A ०जागरं
23 I. O. मधुपर्कामिरात्रि' जागरान्त'
24 A omits सर्व
25 A omits it
26 I. O. क्वचि कश्चिद्विशेष:
27 A वक्ष्यमाण:
28 I. O. कृतद्विजेभ्यो
29 A त्व
30 I. O. and A पायतोमा for the b. p.
31 I. O. वमिति

मुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तधान्याचलदानफलप्राप्ति-कामोऽहं मत्स्यपुराणोक्तभागव्यवस्थयै[1]-तं मन्दारपारिजातकल्पपादपहरिचन्दनसन्तानाख्यहैम-वृक्षपञ्चक-मुक्ताहीरकगोमेदपुष्परागमरकतनीलवैदूर्यपद्मरागश्रीखण्डप्रवालमुक्तामालान्वितं शुक्ति-शिलातलं [2]सौवर्णब्रह्मविष्णु-[3]त्रिपुरारिदिवाकरद्विजौघ-राजतशृङ्गचतुष्टयान्वितं [4][राजतयन्त्रिका] वेष्टित-[5]नितम्बमिक्षुवंशावृतकन्दरं घृतोदकप्रस्रवणं विविधवस्त्ररचिताम्बुधरावली-राजतलोक-पालाष्टक[6]-नानाफलमाल्यविलेपनयुतमम्लानकुसुमान्वितवितानसहितं हैमकदम्बवृक्ष- कामदेव-कुसुम-[7]वस्त्रविलेपन-क्षीर-[8]पूर्णराजतकुण्डारुणोदसरो[9]-राजतचित्र[10]-रथवन-[11]युतपवमयमन्दर-सहितं हैमजम्बुवृक्ष-यक्षपति-घृतपूर्णराजतकुण्डमानससरो-वस्त्र-[12]राजतगन्धर्ववनपुष्पविलेपना-न्वितगोधूममयगन्धमादनसहितं हैमपिप्पलतरु-हंसराजतवैभ्राजवनवस्त्रदधिपूर्णराजतकुण्डसितो-दसरःपुष्पविलेपनान्वितं तिलमयविपुला [13]चलान्वितं शोभनवस्त्रपुष्पहैमवटवृक्षधेनु-[14]मधुपूर्ण-राजतकुण्ड-[15]भद्रसरो-[16]राजत-सावित्रवनविलेपनयुक्त-माषमयसुपार्श्वसहितं धान्याचलं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा धान्याचलोऽयं विष्णुदैवत इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेयुः। तत ॐ [17]अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामेतां गां ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा स्वं स्वं भागं स्पृशेयुः। गुरवे [18]त्वेककपिलादाने वाक्यम्-[19]ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतां [20]कपिलां गां ददानि। तदा[21] ऋत्विग्भ्यो दक्षिणां[22] सुवर्णं दद्यात्। तद् यथा—ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं [23]दक्षिणामिदं सुवर्णं ददानि। स्वस्त्यादि-[24]स्वीकारान्तं पूर्ववत्। ततो गुर्वृत्विग्भ्यो

---

1 Both I. O. and A यै
2 A म सौवर्ण
3 I. O. omits त्रि
4 I. O. राजतयन्त्रिका and A राजत-पत्रिका for the b. p.
5 A omits नित
6 I. O. ०ष्टक
7 I. O. वस्त्रानुलेपन
8 A adds कर्पूर here
9 A ०सरोज०
10 A ०चैत्र०
11 A दूतयव for युतपव
12 A adds विलेपन here
13 I. O. omits चला
14 A मधु
15 A सरोज for भद्रसरो
16 A राज
17 A omits it
18 A एक०
19 I. O. omits it
20 I. O. omits it
21 I. O. तदाह
22 I. O. दक्षिणा
23 A omits it
24 I. O. omits it

[1]भोज्यानि दत्त्वा तदनुज्ञया [2]स्वयमक्षारलवणं भुञ्जीत। अचलस्य[3] यथाभागं गुर्व्वृत्विजां गृहाणि[4] [5]प्रस्थापयेत्। उपवासा[6]-समर्थस्तु पूर्वदिने[7] नक्तं कृत्वा दद्यात्। तदा च पूर्वदिन[8]-प्रातर्नक्त[9]-सङ्कल्पं कुर्य्यात्। तद् यथा—मत्स्यपुराणोक्तधान्याचलदानकर्म कर्तुं यथाविधि [10]नक्तं भोजनमहं करिष्ये। एतदपि वाक्यं धान्याचलपदस्थाने तत्तदचलनामप्रक्षेपेण सर्वाचलसाधारणम्।

इति धान्याचलदानम्।

---

1 I. O. भोजनादि
2 I. O. स्वममक्षारलवणं
3 I. O. अचलं
4 I. O. गृह्यान्; A गृहाण
5 A स्थापयेयुः
6 A स for सा
7 I. O. पूर्वनिने
8 A adds एव after this
9 I. O. ०र्नक्त
10 Both I. O. and A नक्त

तथा लवणाचल-[1]दानम् । (मत्स्यपुराणम्—८४ अः)

अथातः सम्प्रवक्ष्यामि लवणाचलमुत्तमम् ।

यत्प्रदानान्नरो लोकमाप्नोति [2]किन्नरैर्युतम् ॥१॥

उत्तमः [3]षोडशद्रोणैः कर्तव्यो लवणाचलः ।

मध्यमः स्यात्तदर्धेन चतुर्भिरधमः[4] स्मृतः ॥२॥

वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत् ।

चतुर्थांशेन [5]विष्कम्भपर्वतान् कारयेत् पृथक् ॥३॥

विधानं पूर्ववत् कुर्य्याद्ब्रह्मादीनाञ्च सर्वदा ।

तद्वद्धेमतनून्[6] सर्वान् लोकपालान्निवेशयेत ॥४॥

सरांसि कामदेवादींस्तद्व-[7][चात्र निवेशयेत[8]] ।

तद्वदिति यथा धान्याचले सरांसि कामदेवादयश्च कृतास्तथा-[9]त्रापि कर्तव्याः ।

कुर्य्याज्जागरमत्रापि[10] दानमन्त्रान्निबोधत ॥५॥

सौभाग्यरससंभूतो [11]यतोऽयं लवणो रसः ।

[तदात्मकत्वेन च मां [12]रक्ष पापान्नगोत्तम][13] ॥६॥

यस्मादन्नरसाः सर्वे [नोत्कटा लवणं][14] विना ।

प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिं प्रयच्छ मे ॥७॥

---

1 A महादानम

2 A शिवसंयुतं, M. P. लोकानाप्नोति शिवसंयुतान्

3 Corrected from M. P. Both I. O. and A षोडशद्रोण:

4 Corrected from M. P. I. O. ०धर:, A ०चल:

5 A विठकुम्भ०

6 I. O. ०द्धेमतमून, M. P. ०द्धेमयान्

7 M. P. reads the b. p. as द्वापि कारयेत्

8 A निवेद्येत्

9 A omits त्रा

10 M. P. ०जागरणं चापि

11 A घटे यतोऽयं

12 A पाहि

13 M. P. reads the b. p. as तद्दात्मकर्तृकत्वेन त्वं मां पाहि नगोत्तम

14 Corrected from M. P. A लोकेश्च लवणं and I. O. लोके चाचलमं for the b. p.

विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्धनम् ।
तस्मात् पर्वतरूपेण पाहि संसारसागरात् ॥८॥
अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥९॥

प्रयोगः

[1]अत्र षोडशभिरष्टाभिश्चतुर्भिर्वा लवणद्रोणैः-[2]रशक्तौ त्वेक-[3]द्रोणादूर्द्ध्वं द्रोणचतुष्टयाभ्यन्तरं [4]शक्त्यनुरूपलवणेन [5]मेरुं तच्चतुर्थ-[6]चतुर्थभागेन चतुरो [7]विष्कम्भगिरीन् निर्माय, तेषु धान्याचलवत् सर्वमुपकरणं [8][मेरौ तु राजतलोकपालस्थाने] सौवर्णलोकपालानारोपयेत् । तत्र च दानदिनपूर्वतरदिने [9]निवेदनोपवाससङ्कल्प-[10]वाक्ययोरपरदिने [11][च दान] सङ्कल्प-पुण्याहादि-वाचन-वरणवाक्येषु धान्याचलपदस्थाने लवणाचलपदनिवेशाद्वाक्यानि कृत्वा रात्रिजागरणान्तं[12] धान्याचलोक्तं कर्म विधेयम् । [13]ततः प्रातः कृतनित्येभ्यो गुर्वृत्विग्भ्यः सौभाग्यरससम्भूत इत्यादिमन्त्रैरामन्त्र्य लवणाचलं दद्यात् । तत्र च धान्याचल-[14]दानवाक्ये राजतलोकपालाष्टकपदस्थाने सौवर्णलोकपालाष्टक-[15]पदं यवमय-गोधूममय-तिलमय-[16]माषमयपदस्थानेषु लवणमयपदं धान्याचलपदस्थाने लवणाचलपदञ्च दत्त्वा दानवाक्यं कुर्यात् । [17]ततः स्वस्त्यादि[18]-ब्राह्मणगृह-[19]प्रस्थापनान्तं कर्म धान्याचलग्रन्थेनैव कार्यम् ।

इति लवणाचल-[20]दानम्[21] ।

---

1 I. O. अत्र
2 A ०स्तत्राप्यशक्तौ
3 A omits द्रोणादूर्द्ध्वं
4 I. O. शक्त्यानुरूप ; A शक्त्यानुरूपे०
5 I. O. मेरुं
6 I. O. ०चतुर्भागेन
7 I. O. omits विष्कम्भ
8 A reads the b. p. as समारोपयेत् । ततः सम्यङ्निर्माय
9 A सोपवास for नि.. स
10 I. O. omits वाक्य
11 A omits the b. p.
12 I. O. ०जागरणं
13 A omits it
14 A omits दान
15 I. O. omits it
16 A omits माषमय
17 A omits it
18 A स्वस्त्यादि स्वीकारान्तं and I. O. षष्ठ्यादि for स्वस्त्यादि
19 I. O. ०प्रस्थानदानान्तं ; A स्थापनार्थं
20 A ०महादानं
21 A adds सम्पूर्णम् here

[1]तथा गुडाचलदानम्। (मत्स्यपुराणम्—८५ अः)

[2][अतः परं प्रवक्ष्यामि] गुडपर्वतमुत्तमम्।
यत्-[3]प्रदानान्नरः [4]स्वर्गमाप्नोति सुरपूजितः[5] ॥१॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः।
[6][त्रिभिर्भारैः कनिष्ठः स्यात्तदर्धेनाल्पवित्तवान्] ।२॥
[7]तद्वदामन्त्रणं पूजां हैमवृक्ष-[8]सुरार्चनम्।
विष्कम्भपर्वतांस्तद्वत् सरांसि वन-[9]देवताः ॥३॥
[10]होमं जागरणं [11]तद्वल्लोकपालाधिवासनम्।
धान्यपर्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत् ॥४॥
यथा देवेषु [12]विश्वात्मा प्रवरोऽयं जनार्दनः।
सामवेदस्तु वेदानां [13][महादेवस्तु योगिनाम्] ॥५॥
[14]प्रणवः [15]सर्वमन्त्राणां नारीणां पार्वती यथा।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥६॥
[16]मम तस्मात् परां लक्ष्मीं [ददस्व [17]गुडपर्वत][18]।
यस्मात् सौभाग्यदायिन्या[19] भ्राता त्वं गुडपर्वत।
निवास-[20]श्चापि पार्वत्यास्तस्मान्मां[21] पाहि सर्वदा ॥७॥

1 A ततो
2 A अथात: संप्रवक्ष्यामि for the b. p.
3 I. O. प्रदानं नर:
4 A स्वर्गं प्राप्नोति
5 M. P. ०पूजितम
6 A reads the b. p. as त्रिभिरर्वाग—सक्तौ तु सार्द्धभारेण मेरुक
7 A तद्दानमन्त्रेण
8 Corrected from M. P. I. O. ०सुरान्वितान्, A ०तरान्वितान्
9 A ०मेव च
10 M. P. होम, A रात्रि
11 A कृत्वा for तद्वत्
12 I. O. विश्वास:
13 A विश्वकर्मा च शिल्पिनां for the b. p.
14 I. O. प्रवर:, M. P. प्रवण:
15 M. P. सर्वमन्त्रणां
16 I. O. तम
17 Both I. O. and A गुडपर्व्वत:
18 M. P. reads the b. p. as गुडपर्वत देहि मे
19 I. O. ०न्यो
20 Corrected from M. P. Both I. O. and A ०श्चात
21 M. P. ०च्छान्तिं प्रयच्छ मे

अनेन विधिना यस्तु दद्याद् गुडमयं गिरिम् ।
पूज्यमानः स गन्धर्वैर्गौरीलोके महीयते ॥८॥
[1]पुनः कल्पशतान्ते[2] तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः ॥९॥

प्रयोगः

अत्र दशभिः पञ्चभि-[3]स्त्रिभिर्वा गुडभारैरशक्तौ तु सार्द्धगुडभारेण मेरुं तच्चतुर्थ-[4]चतुर्थ-भागेन चतुरो विष्कम्भगिरीन्नि-[5][र्माय तेषु] धान्याचलवत् सर्वमुपकरणमारोपयेत् । [6][तत्र च] दानदिनपूर्वतरदिने [7]निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने [8][च दान]-सङ्कल्पपुण्याहादि-वाचनवरणवाक्येषु धान्याचल-[9]पदस्थाने गुडाचलपदनिवेशाद्वाक्यानि [10]कृत्वा रात्रि-[11]जाग-रणान्तं धान्याचलोक्तं कर्म विधेयम् । ततः प्रातः [12]कृतनित्यः कृतनित्येभ्यो गुर्वृत्विग्भ्यो [13]यथादेवेष्वित्यादि-[14]मन्त्रैरामन्त्र्य गुडाचलं दद्यात् । तत्र च धान्याचल-[15]दानवाक्ये यवमय-गोधूममय-तिलमय-[16]माषमयपदस्थानेषु गुडमयपदं धान्याचलपदस्थाने गुडाचलपदञ्च दत्त्वा दानवाक्यं कुर्य्यात् । ततः स्वस्त्यादिब्राह्मणगृह-[17]प्रस्थापनान्तं कर्म धान्याचलप्रन्थेनैव कार्य्यम् ।

इति गुडाचलदानम् ।

---

1 I. O. पुन: twice. M. P. ततः
2 I. O.omits न्ते तु
3 A omits स्त्रिभि
4 I. O. omits चतुर्थ
5 A र्मयने for the b. p.
6 A तद्द् for the b. p.
7 A सोपवास०
8 A omits the b. p.
9 I. O. omits पद
10 A omits it
11 I. O. ०जागरान्तं
12 A omits it
13 A यदा
14 A ०मन्त्रेणामन्त्र्य
15 A ०वद्वाक्यं । किन्तु
16 A omits माषमय
17 A omits प्र

[1]तथा सुवर्णाचलदानम्। (मत्स्यपुराणम्—८६ अः)

अथ पापहरं वक्ष्ये सुवर्णाच-[2]लमुत्तमम्।
यस्य [3]प्रदानाद्भुवनं [4]वैरिञ्चं याति मानवः ॥१॥
उत्तमः [5]पलसाहस्रो मध्यमः [6]पञ्चभिः शतैः।
तदर्धेनाधम[7]-स्तद्वदल्पवित्तोऽपि शक्तितः।
दद्यादेक[8]-पलादूर्ध्व[9] यथाशक्त्या विमत्सरः ॥२॥
धान्यपर्वतवत् सर्वं विदध्यान्मुनिपुङ्गव[9]।
विष्कम्भ-[10]शैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ॥३॥
नमस्ते ब्रह्म-[11]बीजाय ब्रह्मगर्भाय वै[12] नमः।
यस्मादनन्त-[13]फलदस्तस्मात् पाहि [14]शिवाचल ॥४॥
यस्मादग्नेरपत्यं[15] त्वं [16]यस्मात् पुण्यं [17]जगत्पते।
हेमपर्वतरूपेण तस्मात् पाहि नगोत्तम ॥५॥
अनेन विधिना यस्तु दद्यात् कनकपर्वतम्।
स याति परमं[18] ब्रह्मलोकमानन्दकारकम्।
तत्र कल्पशतं [19][तिष्ठेत् ततो याति परां] गतिम् ॥६॥

---

1 A अथ
2 A omits ल
3 Corrected from M. P. Both I. O. and A प्रसादाद्भुवनं
4 A वैष्णवं
5 A तल हासस्रो
6 I. O. पञ्चविंशतैः
7 Corrected from M. P. A चल and I. O. वर for धम
8 I. O. व for क
9 Corrected from M. P. Both I. O. and A ०पुङ्गवः
10 M.P. ०शैलांस्तद्वच्च, A ०शैलसहितं
11 I. O. ०राजाय
12 M. P. ते
13 Corrected from M. P. I. O. ०फलदतस्मात्, A ०फलदं तस्मात्
14 A प्रजायते, M. P. शिलोच्चय
15 I. O. ०पत्य
16 Corrected from M. P. I. O. यस्माच्च त्वं, A यस्मादह
17 Corrected from M. P. Both I. O. and A जगत्पतेः
18 A लोकं again after this
19 A reads the b. p. as स्थित्वा प्रयाति परमां

प्रयोगः

अत्र सहस्रेण पञ्चभिः शतैः सार्द्धशतद्वयेन वा सुवर्णपलानामशक्तौ त्वेकपला-[1]दूर्द्ध्व सार्धपलशतद्वयाभ्यन्तरं शक्त्यनुरूपसुवर्णेन मेरुं तच्चतुर्थ-[2]चतुर्थभागेन चतुरो विष्कम्भ[3]-गिरीन् निर्माय तेषु धान्याचलवत् सर्वमुपकरणमारोपयेत्। तत्र च दानदिन[4]-पूर्वतरदिने [5]निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने च दानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु धान्याचल-पदस्थाने सुवर्णाचलपदनिवेशाद्वाक्यानि कृत्वा रात्रिजागरान्तं धान्याचलोक्तं कर्म विधेयम्। ततः प्रातः [6]कृतनित्यः कृतनित्येभ्यो गुर्वृत्विग्भ्यो नमस्त इत्यादिमन्त्राभ्यामामन्त्र्य [7]सुवर्णा-चलं दद्यात्। तत्र च[8] धान्याचल-[9]दानवाक्ये यवमय-गोधूममय-तिलमय-माषमयपद-स्थानेषु[10] सुवर्णमयपदं धान्याचलपदस्थाने सुवर्णाचलपदञ्च दत्त्वा दानवाक्य[11] कुर्य्यात्। ततः स्वस्त्यादिब्राह्मणगृह-[12]प्रस्थापनान्तं कर्म धान्याचलग्रन्थेनैव कार्य्यम्।

इति सुवर्णाचलदानम्।

---

1 A °धिकेन
2 A omits चतुर्थ
3 I. O. omits म्भ
4 I. O. omits दिन
5 A सोपवास°
6 A omits it
7 I. O. मचलं
8 A omits it
9 I. O. °दानवाक्यैः, A °वाके
10 I. O. omits षु
11 I. O. वाक्यानि
12 A omits प्र

तथा तिलाचलदानम्। (मत्स्यपुराणम्—८७ अः)

[1][अथातः सम्प्रवक्ष्यामि] तिलशैलं विधानतः।
यत्-[2]प्रदानान्नरो याति विष्णुलोकमनुत्तमम्[3] ॥१॥
उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः[4]।
त्रिभिः कनिष्ठो विप्रेन्द्र तिलशैलः प्रकीर्तितः ॥२॥
[5][पूर्ववच्चापरं सर्वं विष्कम्भपर्वतादिकम्]।
दानमन्त्रं[6] प्रवक्ष्यामि यथावन्मुनिपुङ्गव[7] ॥३॥
यस्मान्मधुवधे[8] विष्णोर्देहस्वेदसमुद्भवाः।
तिलाः कुशाश्च [9]समिधस्तस्माच्छन्नो भवन्त्विह ॥४॥
[10]हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम्।
भवादुद्धर शैलेन्द्र तिलाचल नमोऽस्तु ते ॥५॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम्।
स वैष्णवं[11] पदं याति पुनरावृत्तिदुर्लभम् ॥६॥
[12]दीर्घायुष्यमवाप्नोति [13][पुनरेत्य च मानवः]।
पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत् ॥७॥

प्रयोगः

अत्र दशभिः पञ्चभिस्त्रिभिर्वा तिलद्रोणै[14]-र्मेरुं [15]तच्चतुर्थचतुर्थभागेन चतुरो विष्कम्भगिरीन् निर्माय[16] तेषु धान्याचलवत् सर्वमुपकरणमारोपयेत्। [17][तत्र च] दानदिनपूर्वेतर-

---

1 M. P. reads the b. p. as अतःपरं प्रवक्ष्यामि

2 A प्रसादान्नरो

3 M. P. सनातनम् for अनुत्तमम्

4 M. P. ०स्मृतः

5 M. P. reads the b. p. as पूर्ववच्चापरान् सर्वान् विष्कम्भानभितो गिरीन्

6 I. O. दानमन्त्र, M. P. दानमन्त्रान्

7 A ०सत्तम

8 Corrected from M. P. A ०बाध, I. O. ०वधं

9 M. P. मासाश्च तस्माच्छान्त्यै

10 M. P. हव्यं कव्यं च

11 A वैष्णव

12 A दीर्घायुष्यमवाप्नोति, I. O. दीर्घायुष्लमवाप्नोति, M. P. दीर्घायुष्यं समाप्नोति

13 M. P. पुत्रपौत्रैश्च मोदते for the b. p.

14 A ०द्रोणे

15 A omits तच्च...र्थ

16 I. O. omits य

17 I. O. तत्र for the b. p.

दिने निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने च दानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु धान्या-चलपदस्थाने तिलाचलपदनिवेशाद्वाक्यानि कृत्वा [1][रात्रिजागरणान्तं धान्याचलोक्तं] कर्म विधेयम्। ततः प्रातः कृतनित्यः कृतनित्येभ्यो गुर्व्वृत्विग्भ्यो [2][यस्मान्मधुवधे विष्णोरित्यादि] मन्त्राभ्यातामन्त्र्य [3]तिलाचलं दद्याम। [4]तत्र च धान्याचलदानवाक्ये यव-[5][मय-गोधूम-मय-माषमय]-पदस्थानेषु तिलमयपदं धान्याचलपदस्थाने तिलाचलपदञ्च[6] दत्त्वा [7]दानवाक्यं कुर्य्यात्। ततः स्वस्त्यादिब्राह्मणगृहप्रस्थापनान्तं कर्म धान्याचलग्रन्थेनैव कार्य्यम्।

इति तिलाचलदानम्।

---

1 I. O. रात्रिजागरान्त' for the b p.

2 A यस्मादित्यादि and I.O. यस्मान्मधु-वधेरित्यादि for the b. p.

3 A तिल'

4 A यत्र for तत्र च

5 A माषगोधूममय for the b.p.

6 A ०पद'

7 A वाक्य', I.O. वाक्यानि

ततः कार्पासाचलदानम् । (मत्स्यपुराणम्—८८ अः)

[अथातः सम्प्रवक्ष्यामि कार्पासाचलमुत्तमम् ।
यत्प्रदानान्नरो नित्यमाप्नोति परं पदम् ॥१॥][1]
कार्पास-[2]पर्वतं दद्याद्विंशद्भारैं[3]-रथोत्तमः[4] ।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः ।
भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः ॥२॥
धान्यपर्वतवत् [5][सर्वं विदध्यान] मुनिपुङ्गव[6] ।
प्रभातायान्तु शर्वर्य्यां दद्यादिदमुदीरयन् ॥३॥
[7]त्वमेवावरणं यस्माल्लोकानामिह सर्वदा ।
[8][कार्पासाचल नस्तस्माद]-घौघध्वंसनो भव ॥४॥
इति [9]कार्पासशैलेन्द्रं यो [10]दद्याच्छर्वसन्निधौ ।
रुद्रलोके वसेत् कल्पं ततो राजा भवेदिह ॥५॥

प्रयोगः

अत्र विंशत्या दशभिः पञ्चभिर्वा कार्पासभारैरशक्तौ त्वेकभारेण मेरुं तच्चतुर्थभागेन चतुरो विष्कम्भगिरीन् निर्माय तेषु धान्याचलवत् सर्वमुपकरणमारोपयेत् । तत्र च दानदिन-पूर्वतरदिने निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने च सङ्कल्पपुण्याहादिवाचनवरणवाक्येषु धान्याचलपदस्थाने कार्पासाचलपदनिवेशाद्वाक्यानि कृत्वा रात्रिजागरणान्तं धान्याचलोक्तं कर्म विधेयम् । ततः कृतनित्येभ्यो गुर्वृत्विभ्य'स्त्वमेवावरण'मित्यादिमन्त्रेणाभिमन्त्र्य कार्पासा-चलं दद्यात् । तत्र च धान्याचलवाक्ये यवमय-गोधूममय-माषमयपदस्थानेषु कार्पासमयपदं धान्याचलपदस्थाने कार्पासाचलपदं दत्वा दानवाक्यं कुर्य्यात् । ततः स्वस्त्यादिब्राह्मणगृह-प्रस्थापनान्तं कर्म धान्याचलग्रन्थेनैव कार्य्यम् ।

इति कार्पासाचलदानम् ।

---

1 Supplied from M. P. I. O. and A omit the b. p
2 A and M. P. ०पर्वतसहद
3 Corrected from M. P. I. O. विंशतावै० ; A विंशत्यावै०
4 A and M. P. ०रिद्धोत्तम:
5 I. O. सर्वमापाद्य, M. P. सव-मासाद्य
6 I. O. and A मुनिपुङ्गव:
7 I. O. त्वमेवावरणं, A त्वमेव वारणं
8 A and M.P. कार्पासाद्रे नमस्तुभ्यम the for b. p.
9 I. O. हास्यामि for कार्पास
10 I. O. and A दद्यात् पर्वसन्निधौ

अथ घृताचलदानम्। (मत्स्यपुराणम्—८६ अः)

अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम्।
[1]तेजोऽमृतमयं दिव्यं महापातकनाशनम् ॥१॥
विंशत्या घृतकुम्भानामुत्तमः [2]परिकीर्तितः।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्वधमः[3] स्मृतः ॥२॥
अल्पवित्तोऽपि कुर्वीत द्वाभ्यामिह विधानतः।
विष्कम्भपर्वतांस्तद्वत् चतुर्भागेण कल्पयेत् ॥३॥

[4]कुम्भपरिमाणं परिभाषोक्तमनुसन्धेयम्।

[5]शालितण्डुलपात्राणि कुम्भोपरि निवेशयेत्।
कारयेत् संहतानुच्चान्[6] यथाशोभं विधानतः ॥४॥
[7]वेष्टयेच्छुक्लवासोभिरिक्षुदण्डफलादिकैः।
धान्यपर्वतवच्छेषं विधानमिह पठ्यते ॥५॥

फलादिकैरित्यादिशब्देन माल्यविलेपनयोर्ग्रहणं धान्याचले [8]तथोक्तेः।

अधिवासनपूर्वन्तु [9]तद्वद्धोमसुरार्चनम्।
प्रभातायान्तु शर्वर्यां गुरवे [10]विनिवेदयेत्।
विष्कम्भपर्वतांस्तद्वदृत्विग्भ्यः शान्तमानसः ॥६॥
संयोगाद् घृतमुत्पन्नं यस्मादमृततेजसोः।
तस्माद् घृतार्चिर्विश्वात्मा प्रीयतामत्र शङ्करः ॥७॥
यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम्।
घृतपर्वतरूपेण [तस्मान्नः पाहि भूधर][11] ॥८॥

---

1 I. O. तेभग्रो घृतमयं
2 I. O. and M. P. स्याद्घृताचल:
3 Corrected from M. P. I. O. and A ०वर:
4 I. O. अम्बुपरिमाण
5 Corrected from M. P. I. O. सालिं तण्डुलपात्राणि, A शालि॰ तण्डुलपत्राणि
6 I. O. ०नुर्वीय
7 A वेष्टयेद्शुक्लवासोभि॰
8 I. O. तथोक्त:
9 A तद्वर्द्धमसुरान्वितं
10 M P. तन्निविद्येत्
11 A तस्मान्न परि भूधर: and M. P. तस्मात् त्वं पाहि नोऽनिशम् for the b. p.

अनेन विधिना दद्याद् घृताचलमनुत्तमम् ।
महापातकयुक्तोऽपि स लोकं याति शाङ्करम् ॥९॥
हंससारसयुक्तेन किङ्किणीजालमालिना ।
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः ।
विहरेत् पितृभिः सार्द्धं यावदा-[1]हूतसंप्लवम् ॥१०॥

प्रयोगः

अत्र विंशत्या दशभिः पञ्चभिर्वा शालितण्डुलपूर्णपात्रपिहितमुखैः शुक्लवस्त्रवेष्टितैर्घृतकुम्भैः-रशक्तौ तु द्वाभ्यां तथा तद्घृतकुम्भाभ्यां मेरुमिक्षुखण्डादिवेष्टितं चतुर्थभागघृतपूर्णतथाभूत-घृतभाण्डैश्चतुरो विष्कम्भगिरीन् निर्माय तेषु धान्याचलवत सर्वमुपकरणमारोपयेत् । तत्र दानदिनपूर्वतरदिने निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने च दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु धान्याचलपदस्थाने घृताचलपदनिवेशाद्वाक्यानि कृत्वा रात्रिजागरणान्तं धान्या-चलोक्तं कर्म विधेयम् । ततः प्रातः कृतनित्यः 'संयोगाद्घृतमुत्पन्न'मित्यादिमन्त्राभ्यामभिमन्त्र्य कृतनित्येभ्यो गुर्व्वृत्विग्भ्यो घृताचलं दद्यात् । तत्र धान्याचल-[2]दानवाक्ये यवमय-गोधूममय-तिलमय-माषमयपदस्थानेषु शालितण्डुलपूर्णपात्र-[3]पिहिताननशुक्लवस्त्रवेष्टितघृतभाण्डात्मकपदं धान्याचलपदस्थाने शालितण्डुलपूर्णपात्रपिहितमुखशुक्लवस्त्रवेष्टितघृतकुम्भात्मकघृताचल-[4]पदञ्च दत्त्वा दानवाक्यं कुर्य्यात् । स्वस्त्यादिब्राह्मणगृहप्रस्थापनान्तं कर्म धान्याचलग्रन्थेनैव कार्य्यम् ।

इति घृताचलदानम्[5] ।

---

1 M. P. ०भू०
2 A omits दान
3 A पिहित for पिहितानन
4 A ०पदं
5 A समाप्तं after this

[1] [अथ रत्नाचलदानम् ।] (मत्स्यपुराणम्—९० अः)

अथातः संप्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्वतः स्यादनुत्तमः ॥१॥
मध्यमः पञ्चशतिकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भपर्वताः स्युः समन्ततः ॥२॥
पूर्वेण [2]वज्रगोमेदैर्दक्षिणेने-[3]न्द्रनीलकैः ।
पुष्परागयुतः कार्य्यो विद्वद्भिर्गन्धमादनः ॥३॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलाचलः ।
पद्मरागैः ससौपर्णै रुत्तरेण तु विन्यसेत् ॥४॥

[पूर्वेण वज्रगोमेदैर्मन्दरः कर्तव्य इति सम्बन्धः । सौपर्णैर्मरकतैरत्र][4] सुपार्श्वमिति सम्बन्धः । [धान्याचले तथा][5] दर्शनात् ।

धान्यपर्वतवच्छेषमत्रापि परिकल्पयेत ।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान् ॥५॥
पूजयेत् [6]पुष्पपानीयैः प्रभाते च विसर्जयेत् ।
पर्वतं गुरुऋत्विग्भ्य [7]इमौ मन्त्रावुदीरयेत् ॥६॥

अत्र देवान् पुष्पपानीयैः पूजयेत् । प्रभाते पर्वतं[8] गुरुर्ऋत्विग्भ्यो विसर्जयेत दद्यादिति सम्बन्धः ।

यथा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः[9] ।
त्वञ्च रत्नमयो नित्य-[मतः पाहि महाचल][10] ॥७॥

---

1 A omits the bracketed portion, I. O. तथा रत्नाचलदानं
2 A रजसोमेदैः०
3 A ०रुनीलकैः
4 I. O. omits the bracketed portion, A reads it as सौवर्णैर्मरकतैरत्र पूर्वेण वज्रगोमेदैर्मन्दरः । कर्त्तव्य इति सम्बन्धः ।
5 I. O. धान्याचलमिति for the bracketed portion
6 A पुष्पानीयैः, M. P. ०गन्धाद्यैः
7 A इति मन्त्रमु०, I. O. and M. P. इमान् मन्त्रानु०
8 A दत्वा after this
9 I. O. ०स्थितः
10 M. P. नमस्तेऽस्तु सदाऽचल, and A ०महाचल: for the b. p.

यस्माद्रत्न-[प्रसादेन वृष्टिं][1] प्रकुरुते हरिः ।
[2][सदा रत्नप्रदानेन] तस्मान्नः पाहि [3]पर्वत ॥८॥
अनेन विधिना यस्तु [4]दद्याद्रत्नमयं गिरिम् ।
स याति [5][वैष्णवं लोकममरेश्वरवन्दितः] ॥९॥
यावत् कल्पशतं [6]साग्रमुषित्वेह नराधिप[7] ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥१०॥
ब्रह्महत्यादिकं किञ्चिद् [8]यदत्रामुत्र वा कृतम् ।
तत् सर्वं नाशमायाति [9]गिरिर्वज्रहतो यथा ॥११॥

प्रयोगः

अत्र [10]मुक्ताफलानां सहस्रेण शतपञ्चकेन शतत्रयेण वा [11]मेरुमुत्तममेरुपक्षे सपादशतसंख्य-[12]सपादशतसंख्यकेन मध्यममेरुपक्षे त्रिषष्टित्रिषष्टिसंख्यकेन कनिष्ठमेरुपक्षे चाष्टत्रिंशदष्टत्रिंशत्संख्यकेन यथोक्तकमहीरकादि-[13]रत्नचयद्वयेन विष्कम्भगिरीन् निर्माय तेषु धान्याचलवत् सर्वमुपकरणमारोपयेत् । तत्र च दानदिनपूर्वतरदिने निवेदनोपवाससङ्कल्प-[14]वाक्ययोरपरदिने च[15] दानसङ्कल्प-पुण्याहादिवाचन-[16]वरणवाक्येषु धान्याचलपदस्थाने रत्नाचलपदनिवेशाद्वाक्यानि कृत्वा रात्रि-[17]जागरणान्तं धान्याचलोक्तं कर्म विधेयम् । ततः प्रातः [18]कृतनित्यः कृतनित्येभ्यो गुर्वृत्विग्भ्यो 'यथा देवगणा' इत्यादि मन्त्राभ्यामभिमन्त्र्य रत्नाचलं दद्यात् । तत्र धान्याचलदानवाक्ये यवमयगोधूममय-[19]तिलमय-माषमयपदस्थानेषु यथाक्रमं वज्रगोमेदमयेन्द्रनीलपुष्परागमय-वैदूर्यविद्रुममय-पद्मराग-[20]मरकतमयपदानि धान्याचलपदस्थाने [21]रत्नाचलपदञ्च दत्त्वा दानवाक्यं कुर्यात् । स्वस्त्यादिब्राह्मणगृहप्रस्थापनान्तञ्च कर्म धान्याचलग्रन्थेनैव कर्तव्यम् ।

इति रत्नाचलदानम् ।

---

1 M.P. प्रदानेन तुष्टिं for the b. p.
2 I.O. सदानन्दप्रसादेन for the b.p.
3 A पर्वत:
4 A दद्याद् रत्नमयं
5 M.P. विष्णुसालोक्यममरेश्वरपूजितः for the b. p.
6 M. P. साग्रं वसेदिह, A साग्रमुषित्वाह
7 A नराधिपः
8 A यत्र द्रव्यायत्र
9 Corrected from M. P. I. O. गिरिर्वज्रहतो, A गिरीन्द्रजहतो
10 A मुक्ताफलसहस्रेण
11 A मेरुत्तरमेरुपक्षे
12 A omits it
13 I. O. रत्नद्वयद्वयेन, A रत्नेन
14 A omits वाक्य
15 A omits च
16 A omits वरण
17 I. O. ०जागरान्तं
18 A omits it
19 I. O. omits तिलमय
20 A मरकतपदानि
21 I. O. रत्नाचलपदं, A रत्नाचपदञ्च

अथ रौप्याचलदानम्। (मत्स्यपुराणम्—६१ अः)

अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।

[1]यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम ॥१॥

दशभिः पलसाहस्रैरुत्तमो रजताचलः ।

पञ्चभिर्मध्यमः प्रोक्तस्तदर्धेनावरः[2] स्मृतः ॥२॥

[3]अशक्तो विंशतेरूर्द्ध्वं [4]कारयेच्छक्तितः सदा[5] ।

[6]विष्कम्भपर्वतांस्तद्वत् तुरीयांशेन कल्पयेत् ॥३॥

पूर्ववद्राजतां-[7]स्तद्वन्मन्दारादीन् विधानतः ।

कलधौतमयांस्तद्वल्लोकेशानर्चयेद्बुधः ॥४॥

[8][कलधौतमयान् सुवर्णमयान् ।]

ब्रह्मविष्ण्वर्कवान् कार्यो नितम्बोऽत्र हिरण्मयः ।

[9]राजतं स्याद् यदन्येषां सर्वं तदिह काञ्चनम् ॥५॥

ब्रह्मविष्ण्वर्कवविल्य-[10][तिदेशमात्रार्थं तेन] त्रिपुरारि-[11]रप्यत्र हिरण्मयः कर्तव्यः ।

शेषञ्च पूर्ववत् कुर्याद्धोमजागरणादिकम् ।

दद्यात् ततः प्रभाते तु गुरवे रौप्यपर्वतम् ॥६॥

विष्कम्भशैला-[12]नृत्विग्भ्यः पूज्य वस्त्रविभूषणैः ।

इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्विमत्सरः ॥७॥

पूज्य वस्त्रविभूषणैरिति पर्वतं विष्कम्भशैलांश्च वस्त्रगौवर्णपुष्पादिभिः सम्पूज्य दद्यादित्यर्थः ।

---

1 I. O. यत्प्रसादान्नरो
2 M. P. ०धमः
3 A अशक्तौ
4 A कारयेद्राजतः
5 M. P. ०तस्सदा
6 I. O. विष्कम्भपर्वतस्तद्वत्
7 M. P. कुर्वन् for तद्वत्
8 A omits the bracketed portion
9 I. O. राजत
10 A ०त्रार्थोत्तेन for the b. p.
11 I. O. ०मप्यत्र, A ०वपात्र
12 I. O. ०ह्वत्विग्भ्यः

पितॄणां वल्लभो यस्मा-[1]द्धर्मेन्दोः शङ्करस्य च ।
पाहि राजत तस्मान्नः शोकसंसारसागरात् ॥८॥
इत्थं [2]निवेद्य यो दद्या-[3]द्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥९॥
सोमलोके स गन्धर्वैः किन्नराप्सरसां गणैः ।
पूज्यमानो वसेद्विद्वान् यावदाहूतसंप्लवम् ॥१०॥

प्रयोगः

अत्र [4]रजतपलानां दशभिः पञ्चभिर्वा सहस्रैः सार्द्धपलसहस्रद्वयेन वा अशक्तौ तु पलानां विंशतेरूर्द्ध्वं शक्त्यनुरूपपरिमाणरजतेन [5][मेरुं तच्चतुर्थभागेन] चतुरो विष्कम्भगिरीन् निर्माय तेषु [6]धान्याचले यद्राजतमुपकरणं तत् सर्वं काञ्चनमयं मन्दारादिवृक्ष[7]-पञ्चकञ्च राजतमन्यच्च धान्याचलोक्तं[8] सर्वमुपकरणं तथैवारोपयेत् । तत्र च दानदिनपूर्वतरदिने निवेदनोपवाससङ्कल्पवाक्ययोरपरदिने च दानसङ्कल्प-पुण्याहादिवाचन-वरणवाक्येषु धान्याचलपदस्थाने रौप्याचलपदनिवेशाद्वाक्यानि कृत्वा [9]रात्रिजागरणान्तं धान्याचलोक्तं कर्म विधेयम् । ततः प्रातः कृतनित्यः कुशहस्तः शान्तचेताः 'पितॄणां वल्लभ' इत्यादिमन्त्रेणाभिमन्त्र्य कृतनित्येभ्यो गुरूत्विग्भ्यो यथेच्छवस्त्र-सौवर्णपुष्पादिभिरर्चितं रौप्याचलं दद्यात् । तत्र [10]च धान्याचलदान-[11]वाक्ये हैमवृक्षपञ्चकपदस्थाने राजतवृक्षपञ्चकपदं यत्र यत्र राजतपदं तत्र तत्र हैमपदं यवमय-गोधूममय-तिलमय-[12]माषमयपदस्थानेषु [13][रजतमयपदं धान्याचलपदस्थाने रौप्याचलपदञ्च] दत्त्वा दानवाक्यं कुर्यात् । ततः स्वस्त्यादिब्राह्मणगृहप्रस्थापनान्तं कर्म धान्याचलप्रन्थेनैव कर्तव्यम् ।

इति [14]रौप्याचलदानम् ।

---

1 I. O. ०धर्मोक्त:
2 Corrected from M. P. I. O. and A निवेश्य
3 I. O. ०द्राजता०
4 A रजतपलद्दशभि:
5 I. O. मेरुचतुर्थभागेन वा for the b. p.
6 A धान्याचलोक्तमुपकरणं
7 A omits वृक्ष
8 I. O. adds तत् after it
9 I. O. and A रात्रिजागरान्तं
10 I. O. omits it
11 A omits it
12 I. O. मायपद०
13 A reads the bracketed portion as राजतमयपदस्थाने रौप्याचपदं
14 A रौप्याचलदानमाहादानं

[1] [अथ शर्कराचलदानम् ।] (मत्स्यपुराणम्—९२ अः १-१६, ३४-३५)

अथातः संप्रवक्ष्यामि शर्कराशैलमुत्तमम् ।
यस्य प्रदानाद्विष्णवर्करुद्रा-[2]स्तुष्यन्ति सर्वदा ॥१॥
अष्टाभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामवरः[3] स्मृतः ॥२॥
भारेण [4]वार्द्धभारेण कुर्याद् यद्यल्पवित्तवान् ।
विष्कम्भपर्वतान् कुर्यात् तुरीयांशेन मानवः ॥३॥
धान्यपर्वतवत् सर्वमापाद्यामरसंयुतम्[5] ।
मेरोरुपरि तद्वच्च [6]स्थाप्यं [7]हेमतरुत्रयम् ॥४॥
मन्दारः पारिजातश्च [8]तृतीयः कल्पपादपः ।
[9]एतद्वृक्षत्रयं मूर्ध्नि [10]सर्वेष्वपि निवेशयेत् ॥५॥
हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः ।
[11]निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले ॥६॥
[12]मन्दारे कामदेवस्तु [13]प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गे तु धनदः स्यादुदङ्मुखः ॥७॥
प्राङ्मुखो वेदमूर्त्तिस्तु[14] हंसः[15] स्याद् विपुलाचले ।
हैमी [16]सुपार्श्वे [17]सुरभिर्दक्षिणाभिमुखी भवेत् ॥८॥
धान्यपर्वतवत् सर्वमावाहनमखादिकम्[18] ।
कृत्वाथ गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ।

---

1 A omits the bracketed portion
2 I. O. ०स्तुष्यन्ति
3 I. O. ०वामवरः, M.P. ०भ्यामधमः
4 Corrected from M. P. I. O. and A चार्द्धभारेण
5 I. O. ०माद्यामानवंयुतं, A ०संयुतः
6 A स्थाप्य
7 A हेमतरुत्रं
8 I. O. तुरीयः
9 A एतत्त्रयं
10 A सन्धिष्वपि
11 Corrected from M. P. A निवेश्यो I. O. निवेश्य
12 I. O. मन्दरे
13 Corrected from M P. I. O. प्रत्यमुखः, A प्रत्येक तु
14 I. O. वेदमूर्त्तिश्च
15 A हंस
16 I. O. सुपार्श्वं
17 Corrected from M. P. I. O. and A सुरभौ
18 Corrected from M. P. I. O. ०वाहनमध्यादिकं, A ०वाहनमुखादिकाम्

ऋत्विग्भ्यश्चतुरः [1]शैलानिमान् [2]मन्त्रानुदीरयन् ॥६॥
[3][सौभाग्यामृतसारोऽयं परमः शर्कराचलः ।]
तस्मादानन्दकारी [4]त्वं भव शैलेन्द्र सर्वदा ॥१०॥
अमृतं पिबतां ये तु निपेतुर्भुवि [5]शीकराः ।
देवानां [6]तत्समुत्थस्त्वं पाहि नः [7]शर्कराचल ॥११॥
[8][मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ।]
[9]तन्मयोऽसि महाशैल पाहि संसारसागरात् ॥१२॥
यो दद्याच्छर्कराशैलमनेन विधिना नरः ।
सर्वपापविनिर्मुक्तः स याति [परमां गतिम्][10] ॥१३॥
[11][चन्द्रादित्यप्रतीकाशमधिरुह्यानुजीविभिः ।
सहैव यानमातिष्ठेत् [12]तत्र विष्णुप्रचोदितः ॥१४॥]
ततः कल्पशतान्ते [13]तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नो यावज्जन्मार्बुदत्रयम् ॥१५॥
भोजनं शक्तितः कुर्यात् सर्वशैलेष्वमत्सरः[14] ।
[15]सर्वत्राक्षारलवणमश्नीयात् तदनुज्ञया ।

कुर्य्यात् गुर्वृत्विजः कारयेदित्यर्थः ।

[16]पर्वतोपस्करान् सर्वान् [17]प्रापयेद्ब्राह्मणालयम् ॥१६॥

---

1 A शैलानदान
2 Corrected from M. P. I. O. and A मन्त्रानुदीरयेत्
3 I. O. reads the bracketed portion as तस्मादमृतसारोऽयं परमः शर्करायुतः and M. P. as ०पर्वतः शर्करायुतः
4 I. O. तु
5 A शीकरः
6 Corrected from M. P. I. O. तत्समुत्थोऽयं, A वजतो यस्मात्
7 A शर्कराचल:
8 Corrected from M. P. I. O. reads the bracketed portion as मनोभुवमनुर्मध्यात्तत्तता: शर्कराचलः and A omits it
9 A यतन्मयो
10 I. O. शिवमन्दिरं and M. P. परमं पदम् for the bracketed portion
11 I. O. omits the bracketed portion
12 Corrected from M. P. A स तु विष्णुप्रभोदितं
13 A त
14 Corrected from M. P. I. O. and A ०शु मत्सरः
15 A सर्वत्राक्षर०
16 I. O. सर्वतो०
17 A प्रापयाद्ब्राह्मणालयं

पश्येदपीमान-[1]धनोऽतिभक्त्या
स्पृशेन्मनुष्यैरिह[2] दीयमानान्[3] ।
शृणोति भक्त्याथ मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति ॥१७॥
दुःस्वप्नः [4][प्रशममुपैति पठ्यमानैः]
शैलेन्द्रैर्भवभयभेदनैर्मनुष्यैः[5] ।
यः कुर्य्यात् किमु मुनिपुङ्गवेह सम्यक्
शान्तात्मा [6]सकलगिरीन्द्रसम्प्रदानम् ॥१८॥

प्रयोगः

अत्राष्टाभिश्चतुभिर्वा [7]शर्कराभारैः शर्कराभारद्वयेन वा अशक्तौ त्वेकभारेणार्द्धभारेण वा मेरुं तच्चतुर्थभागेन [8]चतुरो विष्कम्भगिरीन् निर्माय तेषु धान्याचलवत् सर्वमुपकरणमारोपयेत् । तत्र च दानदिनपूर्वतर-[9][दिने निवेदनोपवास]-सङ्कल्पवाक्ययोरपरदिने च[10] दानसङ्कल्प-पुण्याहादि-वाचन-वरणवाक्येषु धान्याचलपदस्थाने शर्कराचलपदनिवेशाद्वाक्यानि कृत्वा [11]रात्रिजागरणान्तं धान्याचलोक्तं कर्म विधेयम् । ततः [12]प्रातः कृतनित्यः सोभाग्यामृत-[13]सारोऽयमित्यादिमन्त्रै-रभिमन्त्र्य [14]कृतनित्येभ्यो गुरुर्त्विग्भ्यः शर्कराचलं दद्यात् । तत्र च[15] धान्याचलदानवाक्ये यवमयगोधूममय-तिलमय-माषमयपदस्थाने शर्करामयपदं धान्याचलपदस्थाने [16]शर्कराचलपदञ्च दत्त्वा [17]दानवाक्यं कुर्य्यात् । ततः स्वस्त्यादिब्राह्मणगृहप्रस्थापनान्तं कर्म धान्याचल-[18]ग्रन्थेनैव करणीयम् ।

इति शर्कराचलदानम् ।

इति [19][महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेन]-देवविरचिते
श्रीदानसागरेऽचलदानावर्तः ।

---

1 A °थ यो° for °धनो°
2 M. P. °रपि
3 A दीप्यमानं
4 A reads the bracketed portion as प्रशममुपैति पठ्यमानै
5 Corrected from M. P. I. O. °भेदनिर्म्मनुष्यः, A °भेदा°ोमनुष्यैः
6 A कमल for सकल
7 A omits this
8 A चतरे
9 A reads the bracketed portion as दिनोपवास
10 A omits it
11 I. O. and A रात्रिजागरान्तं
12 A omits it
13 A inserts शर्कराचल here
14 I. O. कृतनित्या
15 I. O. omits it
16 I. O. शर्कराचलं पदं, A पदञ्च
17 A वाक्यं
18 A °ग्रन्थेन कुर्य्यात्
19 A reads the bracketed portion as महाराजा सामन्ताधिपतिः निःशङ्कर- भुवनख्यातिश्रीकाम

अथ रुद्रदैवतस्वरूपधेनुसहितविष्णुदैवतधेनुदानावतः । (३)

मत्स्यपुराणे (८२।२—२०क) :—

गुडधेनुविधानस्य [1]यद्रूपमिह यत् फलम् ।
तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥१॥
कृष्णाजिनं चतुर्हस्तं प्रागग्रीवं[2] विन्यसेद् भुवि ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य यत्नतः[3] ॥२॥
[4]लघ्वेणकाजिनं तद्वद्वत्सस्य परिकल्पयेत् ।
प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां [5]सवत्सकाम् ॥३॥
उत्तमा गुडधेनुः[6]स्यात् सदा भारचतुष्टयम् ।
वत्सं भारेण कुर्वीत भाराभ्यां[7] मध्यमा स्मृता ॥४॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा[8] भारकेण तु ।
चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः ॥५॥

भारपरिमाणञ्च [9]परिभाषोक्तमनुसन्धेयम् । चतुर्भिश्च भारैरुत्तमा धेनुः, भारद्वितयेन मध्यमा, एकेन भारेण कनीयसी [10]स्ववित्तानुसारेण यथायथं [11]दातव्या । सर्वत्र धेनुचतुर्थांशेन वत्सपरिकल्पनं बोद्धव्यम् ।

धेनुवत्सौ घृतास्यौ तौ[12] [13]श्वेतसूक्ष्माम्बरावृतौ ।
[14]शुक्तिकर्णाविक्षुपादौ [15]शुचिमुक्ताफलेक्षणौ ॥६॥

---

1 A यद्गूढमिह
2 I. O. प्राग्रीवां, M. P. प्रागग्रं
3 M. P. सर्वत:
4 A लघ्वेकाजिनं
5 Corrected from M. P. A सवत्सकां, I. O. सपानकां
6 A स्या
7 M. P. द्वाभ्यां वै, A उभाभ्यां
8 A कनिष्ठो
9 A पारिभाषिकमनु०
10 A स्ववित्तानुसारेण, I. O. स्ववित्तानुसारतो
11 A दातव्यं
12 M. P. घृतास्यौ च, A घृतस्यै तौ
13 I. O. and M. P. सित for श्वेत
14 I. O. शुक्ति for शुक्ति
15 A शुचिमुक्ताफलेक्षणो

सितसूत्र-[1]शिरालौ तौ सितकम्बलकम्बलौ ।
[2]ताम्रगण्डुकपृष्ठौ तौ सितचामररोमकौ[3] ॥७॥

सितसूत्र-[4]शिरालाविति यथा [5][ग्रीवा देहेऽवतिष्ठते], तथा श्वेतसूत्राणि दैर्घ्य-[प्रस्थाभ्यां देयानीत्यर्थः ।][6]

विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ[7] ।
[8][क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥८॥
सुवर्णशृङ्गाभरणौ राजतखुरसंयुतौ ।
नानाफलसमायुक्तौ [9]घ्राणगन्धकरण्डकौ ।]

सुवर्णशृङ्गाभरणौ सुवर्णशृङ्गौ[10] सुवर्णाभरणौ च यथाशक्ति हैमतिलकादिमण्डिताविल्यर्थः । गन्धकरण्डः[11] अभग्नः [12]कस्तूरीकोषः ।

इत्येवं [13]रचयित्वा तौ दीपधूपैरथार्चयेत् ॥९॥

[14][दीपधूपौ पूजोपचारोप-[15]करणौ ।]

या लक्ष्मीः सर्वभूतानां या च [16]देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं [17]प्रयच्छतु ॥१०॥
[18]देहस्था या च [19]रुद्राणी शङ्करस्य [20]तु या प्रिया ।
धेनुरूपेण सा देवी मम पापं [21]व्यपोहतु ॥११॥
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।

---

1 Corrected from M. P. I. O. ०सिरालौ तौ, A ०ग्रीवावुभौ
2 A त्वत्र०
3 Corrected from M. P. I. O. ०रोमकौ, A ०कामकौ
4 A ०ग्रीवाविति
5 I. O. reads the bracketed portion as विवा देहेमतिष्ठन्ते
6 I. O. reads the bracketed portion as दृष्टावाभ्यां देयादित्यर्थः
7 M. P. ०स्तनावुभौ
8 A omits the bracketed portion
9 Corrected from M. P. I. O. प्राण for घ्राण
10 A क्षौमपुच्छौ
11 A ०करणक:
12 I. O. कन्दरीकोष:
13 I. O. गर्जयित्वा
14 I. O. reads the bracketed portion as दीपपुष्पा पूजोपचारस्योपलक्षकौ
15 A ०स्करणौ
16 A रुद्देऽवरस्थिता
17 A प्रयच्छ मे
18 I. O. देहस्था
19 A रुद्राणां
20 I. O. तथा, M. P. सदा
21 A व्यपोहति

चन्द्रार्कशक्रशुक्राणां या धेनुः साऽस्तु मे [1]श्रिये ॥१२॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा [2]धेनुर्वरदाऽस्तु मे ॥१३॥
[3][स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजाञ्च या ।
सर्वपापहरा धेनु-[4][स्तस्माच्छान्तिं प्रयच्छ मे ॥१४॥
एवमामन्त्र्य तां धेनुं] ब्राह्मणाय निवेदयेत् ।]
विधानमेतद्धेनूनां सर्वासामिह पठ्यते ॥१५॥
[5]यास्तु पापविनाशिन्यः पठ्यन्ते दश धेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥१६॥
प्रथमा गुडधेनुः स्याद् घृतधेनुस्तथापरा ।
तिलधेनुस्तृतीया च चतुर्थी जल-[6]संज्ञता ॥१७॥
क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा ।
सप्तमी शर्कराधेनु-[7]र्दधिधेनुस्तथाष्टमी ।
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ॥१८॥
[8][कुम्भाः स्युर्द्रव[9]-धेनूनामितरासान्तु[10] राशयः ।
अत्र रसशब्देन लवणेक्षुरसयोर्ग्रहणम् ।

तथा च पद्मपुराणम् :—

प्रथमा गुडधेनुः स्याद् घृतधेनुस्तथापरा ।
तिलधेनुस्तृतीया च चतुर्थी जलकायिनी ॥१९॥
क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा ।

---

1 I. O. श्रिये, M. P. reads the entire line as चन्द्रार्कशक्र-शक्तियां धेनुरूपाऽस्तु सा श्रिये
2 I. O. मे शान्तिं प्रयच्छतु
3 I. O. omits the bracketed portion
4 Supplied from M. P. A reads दशमी only for the bracketed portion
5 I. O. आद्य, M. P. यास्ता:
6 I. O. ०संज्ञिका
7 I. O. ०रष्टमी लवणस्य तु
8 I. O. omits the bracketed portion
9 Corrected from M. P. A दधि for द्रव
10 Supplied from M. P. A omits न्तु

सप्तमी शर्कराधेनुरष्टमी लवणस्य च ।

रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ॥२०॥]

[1]मत्स्यपुराणे (८२।२० ख-२२, २३ ख, २५) :—

सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ॥२१॥

नवनीतेन [तैलेन तथैवान्ये][2] महर्षयः ।

एतदेव[3] विधानं स्यात् त एवोपस्कराः स्मृताः ॥२२॥

मन्त्रावाहनसंयुक्ताः सदा[4] पर्वणि पर्वणि ।

[5]यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदा ।

[6]अमेययज्ञफलदाः सर्वपापहराः शुभाः ॥२३॥

अयने विषुवे पुण्ये व्यतीपाते तथा[7] पुनः ।

गुडधेन्वादयो देया [8]उपरागादिपर्वसु ॥२४॥

अत्रोक्तसमयानामन्यतमे यजमानो गोमयोपलिप्तभूमौ कुशानास्तीर्य्य तदुपरि चतुर्हस्तं प्राग्ग्रीवं कृष्णाजिनं प्रसार्य्य तत्पार्श्वे तथैव [9]स्वल्पमजिनमास्तीर्य्य [10]चतुर्हस्ताजिने [11]यथा-शक्त्युक्तधेनु[12]-परिमाणानामन्यतमपरिमाणद्रव्यमयी-[13]मुक्तोपकरणयुतां प्राङ्मुखीमुदक्पादां धेनुं स्वल्पाजिनोपरि च धेनुचतुर्थां-[14][शद्रव्यमयमु]-क्तोपकरणयुतं वत्समुपकल्प्य सवत्सां धेनुं दीपधूपादिभिरभ्यर्च्य ॐ[15] या लक्ष्मीरित्यादिमन्त्रैरामन्त्र्यार्चिताय ब्राह्मणाय दद्यात् । तत्र गुडधेनुदान[16]-वाक्यम्—ॐ अद्यामुकसगोत्रायामुक-[17]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्तगुडधेनुदानफलप्राप्तिकामोऽहमेतां लघ्वेणकाजिनस्थधेनुचतुर्थांशगुडमयघृतास्य-सितसूक्ष्माम्बरावृतशुक्तिकर्णेक्षुपादमुक्ताफलेक्षण-सित-[18][कम्बलगलकम्बल]-ताम्रगण्डकपृष्ठसित-

---

1 Supplied by conjecture

2 M. P. रत्नैश्च तथाऽन्ये तु for the bracketed portion

3 M. P. एतदेवं

4 A ह्या

5 Corrected from M. P. A यथाश्राद्धं, I. O. यथाश्रद्धं

6 M. P. अशेष०, A अनेक०

7 M. P. and I. O. ऽथवा

8 M. P. ०स्तूपरागादि०, A उप-वासादि०

9 I. O. अल्प०

10 A चतुर्हस्ताजिन

11 I. O. यथा इत्युक्त

12 A adds दान after this

13 I. O. and A ०युक्तो०

14 I. O. शो for the bracketed portion

15 A omits it

16 A omits दान

17 A वेद for वेदामुक

18 I. O. सूत्रसिरागल for the bracketed portion

चामररोमक-[1]विद्रुमभ्रूयुग-नवनीतस्तनक्षौमपुच्छकांस्योपदोहेन्द्रनीलतारक-सुवर्णशृङ्गाभरणराजत-खुर-नानाफलोपेतगन्धघ्राणवत्ससहितां कृष्णाजिनस्थभारचतुष्टयमितगुडमयीं घृतास्यां सित-सूक्ष्माम्बरावृतां शुक्तिकर्णामिक्षुपादां मुक्ताफलेक्षणां सितसूत्रशिरालां सितकम्बलगलकम्बलां ताम्रगण्डकपृष्ठां सितचामररोमिकां विद्रुमभ्रूयुगां नवनीतस्तनीं क्षौमपुच्छां कांस्योपदोहामिन्द्र-नीलतारकां सुवर्णशृङ्गाभरणां राजतखुरां नानाफलोपेतां गन्धघ्राणां गुडधेनुं ददानि। प्रति-ग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [2]धेनुरियं विष्णुदैवतेत्युक्त्वा यथशाखं कामस्तुतिं पठेत्। [3][तत ॐ] अद्य कृतैतद्दानकर्मणः प्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा [धेनुं पुच्छे][4] गृह्णीयात्। मध्यमधेनुदाने भारद्वयपरिमितामुक-द्रव्यमयीं कनिष्ठधेनुदाने भारपरिमितामुकद्रव्यमयीमिति वाक्यमूहनीयम्। घृतजलक्षीरमधु-[5]दधीक्षुरस-नवनीत-तिलधेनुदानेषु गुडधेनुदानवाक्य एव धेनुचतुर्थांशगुडमयपदमपनोय कुम्भस्थधेनुचतुर्थांशामुकद्रव्यमयपदं वत्से[6] योजनीयम्। भारचतुष्टयपरिमितगुडमयीमिति-पदमपनीय कुम्भस्थेयत्परिमाणामुकद्रव्यमयीति पदं गुडधेनुपदस्थापनीयामुकधेनुपदं धेनौ योज्यम्। एवं तिल-शर्करा[7]-लवण-सुवर्ण-धेनूनां दानवाक्ये धेनुचतुर्थांशामुकद्रव्यमयपदं[8] वत्से योज्यम्। इयत्परिमाणामुकद्रव्यमयीममुकधेनुमिति धेनौ विशेषः। स्वरूपधेनु-[9]दाने तु वस्त्रकांस्यपात्राभरणनानाफलव्यतिरिक्तानां घृतास्यत्वादीनां गुडधेन्ववयवत्वेनोपादानात्, स्वरूपधेनौ च तदनुपयोगात् स्वरूपधेनुदाने तेषां निवृत्तिः। तथा गुडधेनूक्तसमये[10] गोमयो-पलिप्तभूम्यास्तीर्णकुशोपरिस्थापितोक्तकृष्णाजिनद्वये धेनुवत्सौ प्राङ्मुखौ पृथक् पृथक् स्थापयित्वा सितसूक्ष्म-[11]वस्त्रावृतौ सौवर्णतिलकाद्यलङ्कृतौ कांस्यपात्रसहितौ च कृत्वा पार्श्वेषु यथालाभनानाफलानि दत्त्वाभ्यर्च्यार्चिताय ब्राह्मणाय ॐ[12] या लक्ष्मीरित्यादि पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा[13] दद्यात्। मत्स्यपुराणोक्तस्वरूपधेनुदानफलप्राप्तिकामोऽहमेतां लघ्वेणकाजिनस्थसितसूक्ष्माम्बरावृतां सौवर्णाभरणां कांस्यदोहनां नानाफलोपेतां स्वरूपधेनुं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीपाठान्ते धेनुरियं रुद्रदैवतेति वदेत्। काम-

---

1 I. O. विद्रुमयुग, A युगल
2 I. O. धेनुरिदं
3 A omits the bracketed portion
4 A पुच्छं for the bracketed portion
5 A दूग्ध०
6 I. O. ०पदं वत्स, A ०पदवत्स
7 I. O. शर्कराचल
8 A ०पदवत्स
9 A ०स्थाने
10 A मय for समये
11 A ०वस्त्रान्वितौ
12 A omits it
13 A ०दूरयुक्त्वा for ०मुक्त्वा

स्तुत्यादिस्वीकारान्तं पूर्ववत् । सुवर्णधेनु-[1]दाने तु वक्ष्यमाणाग्नेयपुराणोक्तसुवर्णधेनुपरिमाणमनुसन्धाय कर्तव्यम् ।

आग्नेयपुराणे राजोवाच ।

भगवन् श्रोतुमिच्छामि धेनुमाहात्म्यमुत्तमम् ।
यदक्षयफलं तासां [2][धेनूनां मुनिसत्तम] ॥२५॥

वशिष्ठ उवाच ।

स व्याधो [3]दर्शनाद् यस्या राजाभूत् पुष्पवाहनः ।
तां प्रवक्ष्यामि राजेन्द्र सर्वपाप-[4]प्रणाशिनीम् ॥२६॥
गुडधेनुविधानञ्च [5][यद्रूपमिह यत् फलम्] ।
कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि ॥२७॥ (२१०।१३ख)
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य सर्वतः ।
कृष्णं लघ्वजिनं तद्वत् वत्सस्य परिकल्पयेत्[6] ॥२८॥ (२१०।१४)
प्राङ्मुखीं कल्पयेद्धेनुमुदङ्मुखं तु वत्सकम् ।
उत्तमा गुडधेनुः स्यात् सदा भारचतुष्टयम् ॥२६॥ (२१०।१५)
वत्सं भारेण कुर्वीत द्वाभ्यान्तु मध्यमा स्मृता ।
भारेण च कनिष्ठा च चतुर्थांशेन वत्सकः ॥३०॥ (२१०।१६)
धेनुवत्सौ [7]गुडस्योभौ सितवस्त्र-[8]समावृतौ ।
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ॥३१॥ (२१०।१६)
सितसूत्रशिरालौ तौ सितकम्बलकम्बलौ ।
ताम्रपालक[9]-पृष्ठौ तु सितचामररोमकौ ॥३२॥ (२१०।२०)
विद्रुमौष्ठ-[10]युगोपेतौ नवनीत-[11]स्तनान्वितौ ।
[12][क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥३३॥ (२१०।२१)

1 A ०द्दानसु
2 A reads the bracketed portion as धेनूना मुनिसत्तमः
3 I. O. दृष्वाद
4 A ०विनाशिनीं
5 A reads the bracketed portion as यद्गुरूमिद लक्षणं
6 I. O परिकल्पनं
7 Corrected from A. P. I.O. तथान्यस्यौ, A तदा स्यात्
8 I. O. ०वराहतौ
9 I. O. ०पवक०, A. P. गडुक०
10 A ०युगावेतौ A. P. ०अ युगावेतौ
11 I. O. ०स्तनार्च्चितौ
12 A omits the bracketed portion

नानाफलसमायुक्तौ घ्राणगन्धकरण्डकौ ।

इत्येवं रचयित्वा तु धूपदीपैस्तथार्चयेत् ॥३४॥

धूपदीपौ पूजाद्रव्यस्योपलक्षकौ ।]

या लक्ष्मीः सर्वभूतानां या च [1]देवेष्ववस्थिता ॥ (२१०।२३ख)

धेनुरूपेण सा देवी मम पापं व्यपोहतु ।

विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ॥३५॥ (२१०।२५)

चन्द्रार्कयोश्च या लक्ष्मीर्धेनुरूपास्तु सा [2]श्रिये ।

चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ॥३६॥ (२१०।२६)

या लक्ष्मीर्लोकपालानां सा धेनुर्वरदाऽस्तु मे ।

स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजामपि ॥३७॥ (२१०।२७)

सर्वपापहरा धेनुस्तस्माद्वृद्धिं[3] प्रयच्छ मे ।

एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥३८॥ (२१०।२८)

[विधानमेतद्धेनूनां [4]सर्वासामिह पठ्यते][5] । (२१०।२६क)

यास्तु पापविनाशिन्यः पठ्यन्ते ताश्चतुर्दश ।

तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥३९॥

प्रथमा गुडधेनुः स्याद् घृतधेनुस्तथापरा । (२१०।११क)

तिलधेनुस्तृतीया तु[6] चतुर्थी क्षीरनामिका ॥४०॥

पञ्चमी मधुधेनुस्तु षष्ठी चैव तु शर्करा ।

सप्तमी लवणा धेनू रसधेनुस्तथाष्टमी ॥४१॥

प्रत्यक्षा[7] जलधेनुश्च नवमी दशमी तथा ।

[8][कुम्भाः स्युर्द्रवधेनूनामितरासान्तु] राशयः । (२१०।१३क)

नवमी तिलतैलेन गन्धैः प्रोक्तास्तथापराः ॥४२॥

---

1 A तोवसुवस्थितो

2 Corrected from A. P. I. O. वमे, A श्रिमे

3 I. O and A. P. ०द्वाहमाक्रान्तिं

4 I. O. स सर्वासामिह

5 A. P. reads the whole sentence as समासं सर्वधेनूनां विधानं चैतदेव हि

6 A ०स्तृतीयास्तु, I. O. ०स्तृतीया च

7 A प्रत्यक्ष

8 Corrected from A. P. A कुम्भास्तु रसधेनूनां द्रोणो नैव हि and I. O. कुम्भाः पूर...हि for the b. p.

सर्वाः समफलाः प्रोक्ता मध्यमोत्तमकन्यसाः[1]।
स्वशक्तितो [2]नृपश्रेष्ठ दरिद्रस्य चतुर्गुणम् ॥४३॥

दरिद्रस्य चतुर्गुणमिति कनिष्ठधेनुदाने [3][दरिद्रस्य चतुर्गुण]-मुत्तमधेनु-[4]दानफलं भवतीत्यर्थः।

सुवर्णधेनुश्चाप्यत्र [5]सुवर्णाश्च चतुर्दश।
[6]कन्यसाश्चेश्वराणान्तु दरिद्राणां सदोत्तमाः॥४४॥

ईश्वराणां सदोत्तमा दरिद्राणां [7]कन्यसा इति सम्बन्धः।

अनिर्णिक्तसुवर्णस्य चतुर्भिः कन्यसा मता।
एतदेव विधानं स्यात् सर्वेषान्तु यशस्करम् ॥४५॥
मन्त्रावाहन-[8]संयुक्ता सदा पर्वणि पर्वणि।
[9]यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ॥४६॥
गुडधेनुप्रसङ्गेन [सर्वास्वेवं मयोदिता][10]।
अशेषयज्ञफलदाः सर्वपापहराः शुभाः ॥४७॥
अयने विषुवे पुण्ये व्यतीपाते तथा पुनः।
गुडधेन्वादयो देया [11]उपरागादिपर्वसु ॥४८॥
कार्त्तिक्यान्तु तथा माघ्यां युगादिषु च पर्वसु।
समुपोष्य नरो दद्यात् [सप्तम्यान्तु दिने रवेः][12] ॥४९॥

सप्तम्यान्तु [13]दिने रवेरिति रविवारसहितायां सप्तम्यामित्यर्थः[14]।

यथालाभं [15]यथाश्रद्धं दत्त्वा धेनुं यतव्रतः।
दिनत्रयं तदाहारो याति विष्णोः परं पदम् ॥५०॥

---

1 A ०कन्यकाः, I. O. ०कल्पयोः
2 A नरश्रेष्ठ
3 I. O. तद्गुण for the b. p.
4 A omits दान
5 I. O. and A सुवर्णाश्चतुर्दश
6 A कन्यसा०, I. O. कन्यसा मेपुरा-णान्तु
7 A कन्यथा
8 A ०संयुक्तं
9 I. O. and A यथाभावं
10 I. O. reads the bracketed portion as सर्व्वासु च समोदिताः
11 A उपरागादिपर्व्वासु, I. O. उप-वासादिपर्व्वसु
12 I. O. reads the bracketed portion as तत् सप्तम्यां नरेश्वरः
13 A omits it
14 I. O. सप्तम्यादित्यर्थः
15 A यथाभावं

[1]तदाहार इति [2]धेनुद्रव्याहारः स्वरूपधेनोरभि-[3]मतगोरसाहार इत्यर्थः ।

इह लोके च सौभाग्यमायुरारोग्यमेव च ।
वैष्णवं लोकमाप्नोति मरणे स्मरणं हरेः ॥५१॥
दशार्बुदसहस्राणि दश चाष्टौ च धर्मवित् ।
न [4]शोकदुःखमाप्नोति दौर्गत्यं जायते न च ॥५२॥
इति पठति य इत्थं यः शृणोतीह [5]सम्यङ्
मधु-[6]मुरनरकारेरर्चनं वापि[7] पश्येत् ।
[8]मतिमपि च जनानां यो ददातीन्द्रलोके
[9]शतमपि विबुधौघैः पूज्यते कल्पमेकम् ॥५३॥

अत्रोक्तसमयानामन्यतमे गोमयोपलिप्तभूभागे कुशानास्तीर्य[10][तेषामुपरि[11] यथोक्तं कृष्णाजिनमास्थाप्य] तत्पार्श्वे तथैव [12]स्वल्पं कृष्णाजिनं प्रसार्य [13]चतुर्हस्ताजिने [14]यथाशक्त्युक्तपरिमाणाना-[15]मन्यतमपरिमाणद्रव्यमयीमुक्तोपकरणयुतां प्राङ्मुखीं धेनुमुपकल्प्य स्वल्पाजिनधेनुचतुर्थांशद्रव्यमयमुक्तोपकरणयुतमुदङ्मुखं वत्सं चोपकल्प्य सवत्सां धेनुमुक्तोपचारैः सम्पूज्यार्चिताय ब्राह्मणाय ॐ[16] या लक्ष्मीरित्यादि मन्त्रान् पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्तगुडधेनुदानफलप्राप्तिकामोऽहमेतां [17]लघ्वेणकाजिनस्थधेनुचतुर्थांशगुडमयसितवस्त्र-[18]वरावृत-शुक्तिकर्णेक्षुपाद-मुक्ताफलेक्षण-सितसूत्र-[19]ग्रीव-सितकम्बलगलकम्बल-ताम्रपालकपृष्ठ--सितचामररोमक--विद्रुमौष्ठयुग--नवनीतस्तन--क्षौमपुच्छ-[20]कांस्योपदोहेन्द्रनील-तारक-नानाफलसमायुक्त-गन्धघ्राणवत्ससहितां [21]कृष्णाजिनस्थभारचतुष्टयपरिमितगुडमयीं सितवस्त्रवरावृतां शुक्तिकर्णामिक्षुपादां मुक्ताफलेक्षणां सितसूत्र-[22]शिरालां सितकम्बल-[23]गल-

---

1 I. O. तथाहार
2 A धेनुव्याहार:
3 I. O. ॰मत: पारसाहार
4 I. O. शोक॰
5 A सम्यक
6 A ॰पुर॰
7 I. O. वाद्दि
8 I. O. इतिमपि
9 A सतमपि, I. O. मतमपि
10 A omits the bracketed portion
11 I. O. तस्मै परि
12 A स्वग्र
13 A चतुर्हस्ताजिन
14 I. O. यथाशक्त्या तस्त॰
15 A omits मन्यत
16 A omits it
17 A वर्षेका॰
18 A ॰वराचिर्चत
19 I. O. ॰शिराल
20 A कांद्यदोह-इन्द्रनीलतारका
21 I. O. कलाT जिनस्थ॰
22 A omits शिराला
23 A omits गलकम्बलां

कम्बलां ताम्रपात्रकपृष्ठां सितचामररोमिकां विद्रुमौष्ठयुगां नवनीतस्तनीं क्षौमपुच्छां कांस्योपदोहामिन्द्रनीलतारकां नानाफलसमायुक्तां गन्धघ्राणां गुडधेनुं ददानि। [1]स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [2]मध्यमधेनुदाने भारद्वयपरिमितामुकद्रव्यमयीं कनिष्ठधेनुदाने भारपरिमितामुकद्रव्यमयीमिति [3][भारचतुष्टयपरिमितामुकद्रव्यमयीमित्यस्य स्थाने वाक्ये विशेषः। घृतक्षीरमधुरसजलनवनीततैलधेनूनां दाने गुडधेनुदानवाक्य एव] भारचतुष्टयपरिमितगुडमयीमिति पदमपनीय [4]कुम्भस्थेयत्परिमाणामुकद्रव्यमयीमिति पदं [5]धेनौ योजनीयम्[6]। शर्करातिललवणधेनूनां दाने भारचतुष्टयपरिमितामुकद्रव्यमयीममुकधेनुमिति च पदं धेनावूहनीयम्। [7][चतुर्थांशगुडमयीपदमपनीय चतुर्थांशपरिमितामुकद्रव्यमयीपदञ्च वत्से योजनीयम्।] घृततिलधेनुदाने तु दानवाक्ये कामनायामियद्भारपरिमितघृतपदमियद्भारपरिमिततिलपदञ्च यथाक्रमन्निवेशनीयम्। सुवर्णधेनुदाने चतुर्दशसुवर्णान् यथाक्रममास्तीर्य्य कृष्णाजिने धेनुं तत्पार्श्वे च धेनुसुवर्णचतुर्थांशसुवर्णं स्वल्पकृष्णाजिने वत्सार्थं स्थापयित्वा यथोक्तोपकरणां सवत्सां धेनुं कृत्वा दद्यात्। दानवाक्ये आग्नेयपुराणोक्तसुवर्णधेनुदानफलप्राप्तिकामोऽहमेतां धेनुचतुर्थांशसुवर्णमयवत्ससहितां [8]चतुर्दशसुवर्णमयीं [9]धेनुमिति विशेषः। चतुःसुवर्णधेनुदान एतां चतुःसुवर्णमयीमिति विशेषः। स्वल्पधेनुदाने तु यथोक्तकृष्णाजिनद्वये प्राङ्मुखीं धेनुमुदङ्मुखञ्च वत्सं यथायथं स्थापयित्वा यथाशक्त्युपयुक्तवस्त्रेण सितेनाच्छाद्य कांस्यपात्रद्वयं दत्त्वा नानाफलानि च पार्श्वे दत्त्वाभ्यर्च्यार्चिताय ब्राह्मणाय ॐ या लक्ष्मीरित्यादि पठित्वा सवत्सां धेनुं ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्तप्रत्यक्षधेनुदानफलप्राप्तिकामोऽहमेतां [10]लघ्वेणकाजिनस्थसितवस्त्रवरावृतकांस्यदोहन-नानाफलसहित-[11]वत्ससहितां कृष्णाजिनस्थां सितवस्त्रवरावृतां कांस्योपदोहनां नानाफलोपेतां धेनुं ददानि। प्रतिग्रहीता [12]स्वस्तीत्युक्त्वा सावित्रीपाठान्ते गौरियं रुद्रदैवतेति वदेत्। कामस्तुत्यादि पूर्ववत्। यदा च रविवारयुक्तसप्तम्यामाग्नेयपुराणोक्तगुडधेन्वादयो दीयन्ते, तदा दानदिनपूर्वतरदिने यजमानः कृतनित्यो घटिकाधिकप्रहर-[13]त्रये हविष्यं भुक्त्वाऽऽचम्य शुचौ देश उपविश्य [14]पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो

---

1 I. O. भद्यादि०
2 A मध्यमधेनुदाने
3 A omits the b. p.
4 I. O. कुम्भस्थयत्०
5 A वत्स
6 I. O. omits it
7 A omits the b. p.
8 I. O. omits चतुर्दश
9 I. O. सुवर्णधेनुमिति
10 A लघुकृष्णाजिन and omits स्थ
11 A omits it
12 I. O. स्वस्ति
13 A ०द्वय
14 A omits it

वा कृताञ्जलिः 'ॐ सूर्य्यः सोमो यमः कालः महाभूतानि पञ्च च। आग्नेयपुराणोक्त--[1]सवत्सामुकधेनुदानकर्म मया कर्तव्य'-मिति निवेद्य [2]गृहीतोदकपूर्णपात्र उदङ्मुखः सङ्कल्पं कुर्य्यात्। 'ॐ श्व [3]उपोष्यापरदिने आग्नेयपुराणोक्त-[4]सवत्सामुकधेनुदान-[5]कर्माहं करिष्ये'। ततो [6][नियमेन सुप्त्वा] परदिने [7]उपोष्यापरदिने स्नात्वा धेनुं दद्यात्। तत्र च दानवाक्ये आग्नेयपुराणोक्तसवत्सामुकधेनुदानफलप्राप्तिकामोऽहमेताममुक-[8]धेनुमिति विशेष.। सर्व-दानेष्वेवैतेषु दानदिनादारभ्य दिनत्रयं यावत् धेनुद्रव्यमात्राहारस्तिष्ठेत्। स्वरूपधेनुदाने [9]त्वभिमतगोरसाहारः।

---

1 A सवत्सा and I. O. सोपवासामुक for सवत्सामुक

2 A गृहीतोपूर्णपात्र

3 A उपोष्य परदिने

4 I. O. and A सोपवासामुक०

5 A ०महं

6 I. O. नियमसुप्त्वा च for the bracketed portion

7 A उपोष्य परदिने

8 A ०धेनुं ददामि

9 A त्वभियुतगोरसाहार:, I. O. ०दानेऽभिमततगोरसाहार:

तथा तिलधेनुदानम्।

तिलधेनुं प्रवक्ष्यामि सर्वदुःखविनाशिनीम्।
यां दत्त्वा न पुनर्भूयो भवे संप्रतिपद्यते ॥१॥

यां दत्त्वा ब्रह्महा गोघ्नः पितृहा गुरुघातकः[1]।
आगारदाही गरदः सर्वपापरतोऽपि वा ॥२॥

महापातकयुक्तोऽसौ युक्तो यश्चोपपातकैः।
पापशुद्धिव्रतं कृत्वा तिलधेनुं प्रयच्छति ॥३॥

पापशुद्धिव्रतं कृत्वेति यथेच्छप्राजापत्यादीनामन्य-[2]तमकृच्छ्रं कृत्वेत्यर्थः।

अनुलिप्ते [3]महीपृष्ठे वस्त्राजिन-[4]समावृते।
धेनुं तिलमयीं कृत्वा सर्वरत्नैरलङ्कृताम् ॥४॥

[5]स्वर्णशृङ्गीं सुवर्णेन पलरौप्येण वा खुराम्।
गन्धघ्राणवतीं राजन् मिष्टान्न-[6]रसनां तथा ॥५॥

सुवर्णेन पलरौप्येण वा [7][खुरामिति सुवर्णेन कृतखुरां] [8]रौप्यपलनिर्मितखुरां वा।

गुडास्यां कम्बलसूलामिक्षुपादाक्षिमौक्तिकाम्।
पञ्चाशत्पलश्रवणां [9]द्वात्रिंशद्दन्तमूलकाम् ॥६॥

पञ्चाशत्पलानि यज्ञीयतरु-[10][सम्बन्धीनि ग्राह्याणि]। [11][दन्तार्थं मूलका द्वात्रिंशद् ग्राह्याः]।

स्रग्दामपुच्छां कुर्वीत नवनीतस्तनान्विताम्।
फलैर्मनोरमैर्भक्ष्यैर्मणि[12]-विद्रुमभूषिताम् ॥७॥

---

1 A गुरुपातका:
2 A ०तमं
3 I. O. मह्हीपृष्ठ:
4 A समाछत
5 A स्वर्णांशृङ्गां
6 I. O. ०वसना
7 A खुरां for the bracketed portion
8 I. O, रूप्यपल०, A रूप्यफल०
9 A त्रिंशद् तु मूलकां
10 I. O. reads the bracketed portion as समुत्थानि पत्राणि
11 I. O. reads the bracketed portion as दन्ताथ मूलकगुरु-कश्चिद्द्वात्रिंशद्ग्राह्या: and A as दन्ता मूलकार्थं द्वात्रिंशद्ग्राह्यं
12 A भक्ष्यैमणि०, I. O. वृन्तैर्मणि०

तिलद्रोणेन कुर्वीत [1]आढकेन तु[2] वत्सकम् ।
सितवस्त्र-[3]युगच्छन्नां चारुवस्त्रोपशोभिताम् ।
कांस्योपदोहनां [4]दद्यान्मन्त्रेणानेन बुद्धिमान् ॥८॥
तिलाश्च पितृदैवत्या निर्मिता-[5]श्चेह गोसवे ।
[6]ब्राह्मणांस्तन्मयीं धेनुं [7]केशवः प्रीयतामिति ॥९॥
एवं दत्वा महीपाल [8]पूर्वप्रोक्तान्महाभयात् ।
आत्मानं पुत्रपौत्रांश्च सर्वांस्तांस्तारयेत् खलु ॥१०॥
यश्च गृह्णाति राजेन्द्र दरिद्रो यज्ञकारणात् ।
पितॄन् सन्तारयेत् सर्वान् ददतश्चानुमोदकान् ॥११॥
[9]दीयमानान्तु पश्यन्ति दातुमिच्छन्ति ये नराः ।
सर्वपापविनिर्मुक्ता-[10][स्ते यान्ति परमां गतिम्] ॥१२॥

दानदिनात् [11][पूर्वतरदिने यथोक्त]-प्राजापत्यादीनामन्यतमं कृच्छ्रं[12] कृत्वा दानदिने गोमयोपलिप्तभूमौ वस्त्रमास्तीर्य्य तदुपरि कृष्णाजिनं प्रसार्य्य परिभाषोक्तद्रोणपरिमितांस्तिलान् कृत्वा परिभाषोक्त-[13]सर्वरत्नालङ्कृतां [14]स्वर्णशृङ्गाद्युपकरणसहितां तिलधेनुमुपकल्प्य तत्पार्श्वे तादृक्-[15]क्रमार्पितस्वल्पकृष्णाजिनधेनुचतुर्थांशतिलमयमुक्तोपकरणसहितं वत्समुप-[16]कल्प्यार्चित-मर्चिताय ब्राह्मणाय ॐ तिलाश्चेति मन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेय-पुराणोक्ततिलद्रोणमयतिलधेनुदानफलप्राप्तिकामोऽहमेतां वस्त्राजिनस्थ-सर्वरत्नालङ्कृत-[17][सुवर्ण-शृङ्गसुवर्णखुर]-गन्धघ्राण-मिष्टान्नरसन--गुडास्य-सूत्रकम्बलेक्षुपाद--मौक्तिकाक्षि-पञ्चाशत्पलश्रवण-द्वात्रिंशन्मूलकदन्तस्रग्दामपुच्छनवनीतस्तनफलभक्ष्यान्वित--मणिविद्रुम--शोभित--सितवस्त्रयुग--

1 A माढकेन
2 I. O. च
3 A ०कुश०
4 I. O. दद्यान्मन्त्रे च
5 A ०श्चे तु गोरसा
6 A ब्राह्मणां तन्मयीं, I. O. ब्राह्मणा-स्तन्मयां
7 A केशव प्रियतामिति
8 A पूर्वप्रेतां महाभयायात्
9 A दीयमानन्तु, I. O. दीयमाना तु
10 I. O. reads the bracketed portion as स्तेऽपि यान्ति परां गतिं
11 A पूर्व्वं यथेक्त
12 A omits this
13 A सर्व्वालङ्कृतां-
14 A स्वर्णशृङ्गीम् उपकरण०
15 A क्रमार्पितास्यक्
16 A ०कल्पितमर्चिताय
17 A reads the bracketed portion as सुवर्णसुखुर

च्छन्नचारुवस्त्रोपशोभितकांस्योपदोहन-धेनु-[1]चतुर्थांशतिलमयवत्ससहितां तिलधेनुं ददानि। ॐ केशवः प्रीयताम्। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [2]रूप्यखुरधेनुदानवाक्ये तु वत्सविशेषण-सुवर्ण-[3]खुरपदस्थाने रूप्यखुरपदनिवेशः[4]। धेनुविशेषण-सुवर्णखुरामितिपदस्थाने रूप्यखुरामितिपदनिवेशनं विशेषः।

[5][इति तिलधेनुः]

---

1 A ०चतुर्थीं तिलमय०

2 A रूप्यखुरां; I. O. रूप्यखुर०

3 A खुरापार्श्वस्थाने

4 A निवेश

5 A omits the bracketed per-tion

तथा घृतधेनुदानम् ।

घृतधेनुं प्रवक्ष्यामि तन्मे निगदतः शृणु ।
[1]तिलाभावे नृपश्रेष्ठ समुपोष्य यतव्रतः ॥ १॥
[2][वासुदेवं जगन्नाथं] घृतक्षीरादिना शुभम् ।
सम्पूज्य विधिवद्भक्त्या तथा कृत्वा [3]घृताचिषम् ॥२॥
गव्यस्य सर्पिषः [4][कुम्भं पुष्पमाल्यविभूषितम्] ।
[5]कांस्यापिधानं कुर्वीत सितवस्त्रयुगेन वा[6] ॥३॥
[7]सुवर्णेन च शृङ्गे द्वे मौक्तिकाक्षी [8]सुविद्रुमैः ।
[9]ओष्ठाविक्षुमयान् पादान् कलधौत-[10]पलेन वा ॥४॥

[11]सुवर्णेन च [12][शृङ्गे द्वे] शृङ्गे चागुरुकाष्ठजे[13] इति च श्रुतेः सुवर्णपत्रावृतागुरु-[14]काष्ठशृङ्गी, मौक्तिकाक्षी सौवर्णे वाक्षिणी इति च श्रुतेः [15]मुक्तागर्भसुवर्णयुक्ताक्षी धेनुः कार्या । [16]सुविद्रुमैरोष्ठाविति सम्बन्धः । कलधौतपलेन वेति रौप्यपलकृतखुरा ।

सौवर्णे वाक्षिणी कुर्याच्छृङ्गे [17]चागुरु-[18]काष्ठजे ।
[19]सप्तधान्यमये पार्श्वे शशिघ्राणां फलस्तनीम् ॥५॥

सप्तधान्यानि परिभाषोक्तानि । शशिघ्राणां [20]गन्धमयघ्राणाम् ।

---

1 A तिलद्रोणं
2 I. O. reads the b. p. as वासुदेव जगन्नाथ
3 I. O. कृतान्विता
4 A reads the b. p. as कुम्भः पुष्पमाल्यविभूषितः
5 A कांस्यापिधानं, I. O. कांस्योपधानं
6 I. O. च
7 A सौवर्णेन
8 I. O. सुविद्रुमैः
9 A ओष्ठाभिक्षुमयान, I. O. एष्टाविक्षुमयान्
10 A ०पदेन वा, I. O. ०पलेन च
11 A सौवर्णेन
12 A omits the bracketed portion
13 I. O. reads ०गुरुकाष्ठिजे, and omits च after इति, A ०गुरुकाम्बोज
14 A ०काम्बोजशृङ्गी, I. O. ०काष्ठशृङ्ग
15 A मुक्तागजस्थचन्द्रघताक्षी
16 A सविद्रुमैरोष्ठमिति, I. O. सविद्रुमैर्वौष्ठाविति
17 I. O. चागुरु०
18 A ०काम्बोज
19 I. O. सप्तैतान्यमये
20 I. O. कर्मैरसमघ्राणां

तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखम् ।
कम्बलं क्षौमलाङ्गूलं रोमाणि सितसर्षपैः ॥६॥

कम्बलं क्षौमलाङ्गूलमिति क्षुमाभववस्त्रं गलकम्बलं लाङ्गूलञ्चेति सम्बन्धः ।

ताम्रपात्रमयं पृष्ठं दद्याद्धेनुं नराधिप ।
[1][तद्वद्वत्सञ्च विप्राय प्रीणयेच्च घृतार्चिषम्] ॥७॥
[2]एतां ममोपकाराय गृह्णीष्व त्वं द्विजोत्तम ।
प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः ॥८॥
या देव्योऽमृतवाहिन्यो घृतक्षीरवहाः शुभाः ।
गवां लोकनिवासिन्य-[3]स्ता मां रक्षन्तु दुष्कृतात् ॥९॥
[4]इत्युदाहृत्य विप्राय दद्याद्धेनुं नराधिप ।
[5]दत्त्वैकरात्रं विप्राय घृताहारः फलं शृणु ॥१०॥
घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
त्रिषु लोकेषु पुण्येषु पुण्यक्षेत्रेषु जायते ॥११॥
पितुरूर्द्धं [6][च ये] सप्त पितरस्तस्य येऽप्यधः ।
तांस्तेषु नृप लोकेषु स [7]नयेद्युक्तमङ्गलः ॥१२॥
सकामानामियं [8]व्युष्टिः कथिता नृपसत्तम ।
निष्कामोऽपि [9][परं याति] विष्णुलोकमनामयम् ॥१३॥

अभीष्टपुण्य-[10]दिनात् पूर्वेतरदिने कृतनित्यः पूर्ववद्धविष्यभोजनादिकं कृत्वा सूर्य्यादिदेवताभ्यः सोपवासाग्नेयपुराणोक्तवासुदेवघृतक्षीराभिषेकपूजाहोमपूर्वकदानोत्तरघृताहारसहितं घृतधेनुदानकर्म निवेद्य सङ्कल्पं कुर्य्यात् । ॐ श्व [11]उपोष्यापरदिने वासुदेवघृत-[12]क्षीराभिषेकपूजाहोमपूर्वकदानोत्तरैकदिनघृताहारत्वसहितमाग्नेयपुराणोक्तघृतधेनुदानकर्माहं करिष्ये । ततो नियमेन

---

1 A reads the bracketed portion as तद्वद्वत्सञ्च विप्राय प्रणयेच्च घृतार्च्चितं and E. O. as तावद्वत्सञ्च वेधाणां घ्रापयेत् घृतार्चिषं
2 I. O. and A यथा
3 I. O. ०तासां
4 I. O. इत्युक्त्वा च
5 I. O. दत्त्वैकरात्रिं
6 I. O. reads the bracketed portion as नमे
7 A नयेमुक्तमङ्गलः
8 A वृष्टिः
9 I. O. reads the bracketed portion as वरं वाचि
10 I. O. ०र्थिदिनात्
11 A उपोष्य परदिने
12 A क्षीरस्नपन०

सुप्त्वाऽपरदिने कृतनित्य उपोष्यापरदिने प्रातः स्नात्वा वासुदेवप्रतिमां घृतक्षीराभ्यां [1]स्नापयित्वा यथाशक्ति घृतार्चिषे नम इति [2]सम्पूज्याग्निमुपसमाधाय ॐ घृतार्चिषे स्वाहेत्याज्यं हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा [3]गोमयोपलिप्तभूभागे घृतकुम्भं पुष्पमालालङ्कृतं [4]स्थापयित्वा घृतधेनुमुक्तोप-[5]करणयुतामुपकल्प्य [6]तच्चतुर्थांशेन घृतेन उक्तोपकरणसहितं धेनुपार्श्वे [7][वत्स-मुपकल्प्य सवत्सां] [8]धेनुमर्चिताय ब्राह्मणाय ॐ एतां[9] ममोपकारायेति श्लोकद्वयं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्तकुम्भपरिमितधेनुदानफलप्राप्तिकामोऽहमेतां धेनुचतुर्थांशकुम्भस्थघृतमय[10]-पुष्पमाल्यभूषित--[11]कांस्यापिधान-सितवस्त्रयुगाच्छादितसुवर्णावृता-गुरुकाष्ठशृङ्गमौक्तिकसहितसौवर्णाक्षि---[12]युगविद्रुमौष्ठ -[13]युगेक्षुरौप्यपलकृतपादसप्तधान्यपार्श्वक-[14]गन्धघ्राण-फलस्तनशर्कराजिह्व-गुडक्षीरमुखक्षौमगलकम्बललाङ्गूलसितसर्षपरोमक-ताम्र-[15]पात्र-क[16]पृष्ठवत्ससहितां घृतकुम्भमयीं पुष्पमाल्यविभूषितां [17]कांस्योपदोहां सितवस्त्रयुगच्छन्नां सुवर्णा-वृतागुरुकाष्ठशृङ्गीं मौक्तिक[18]सहितसुवर्णाक्षियुगां विद्रुमौष्ठीमिक्षुरौप्य-[19]पलपादां सप्तधान्य-पार्श्वां [20]गन्धघ्राणां फलस्तनीं शर्कराजिह्वां गुडक्षीरमुखीं क्षौमगलकम्बललाङ्गूलां सितसर्षपरोमकां ताम्रपात्रपृष्ठां घृतधेनुं ददानि। घृतार्चिः प्रीयताम्। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततो यजमानो [21]घृतमात्रेण पारणं कृत्वा तमहोरात्रं नियतः [22]स्वपेत्।

महाभारते (अनु—५७।३०=वन—१८६।१३):—

सुदक्षिणां काञ्चनचारुशृङ्गीं कांस्योपदोहां द्रविणोत्तरीयाम्।
धेनुं तिलानां [23]ददतां द्विजाय लोका वसूनां सुलभा भवन्ति ॥१४॥

द्रविणोत्तरीयामिति यथाशक्ति-[24]सुवर्णाञ्चलवस्त्रावृतामित्यर्थः। अत्र परिमाणविशेषा-

---

1 A स्नपयित्वा
2 I. O. सम्पूज्याग्निं०
3 A गोमयलिप्त०, I. O. गोपयोपलिप्त०
4 A स्नपयित्वा
5 A ०करणामुपकल्प्य
6 I. O. तच्चतुर्थभागेन
7 A reads the bracketed portion as मुपकल्प्य
8 I. O. धेनुसहितामर्चिताय
9 I. O. and A यथा
10 A omits मय
11 A कांस्याभिधान, I. O. कांस्योपधान
12 A omits युग
13 A reads द्रुमौष्ठ and omits युगेक्षु
14 A कर्पूर०
15 I. O. पात्र०
16 A वाससहितां
17 I. O. कांस्योपधानां
18 A सहितां
19 A omits पल
20 A घ्राणां, I. O. कर्पूरघ्राणां
21 I. O. घृतेन पारणं
22 I. O. क्षिपेत्
23 I. O. ददतौ
24 A सुवर्णाञ्चलवस्त्रावृतामित्यर्थः, I. O. सुवर्णकर्माञ्चलवस्त्राच्छन्नामित्यर्थः

श्रुतेरपेक्षायां मत्स्यपुराणोक्ततिलधेनुपरिमाणग्रहो बोद्धव्यः । [1]मत्स्यपुराणीयतिलधेनूक्तपरिमाणानामन्यतमपरिमाणतिलराशिमयीं तिलधेनुमुक्तोपकरणयुतामर्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्ततिलधेनुदान-[2]फलप्राप्तिकामोऽहमेतां [3]तिलराशिमयीं [4]काञ्चनशृङ्गीं कांस्योपदोहां द्रविणोत्तरीयां तिलधेनुं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । सुदक्षिणामिति श्रवणाच्च यथाशक्ति [5]बहुदक्षिणादानम् ।

[6][इति घृतधेनुः ।]

---

1 A reads यथाशक्ति before this

2 A omits फल

3 A omits it

4 I. O. सुवर्णशृङ्गीं

5 A वकु for बहु

6 I. O. reads the bracketed portion after विष्णुधर्मे below and A omits it

विष्णुधर्मोक्तधेनुदानानि।

अथ जलधेनुदानम्।

विष्णुधर्मे :—

जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया [1]यया।
देवदेवो हृषीकेशः [2]सर्वेशः सर्वभावनः ॥१॥
जलकुम्भं नरव्याघ्र सुवर्णरजतान्वितम्।
[3][रत्नगर्भं सतोयन्तु ग्राम्यधान्य]-समन्वितम् ॥२॥
सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम्।
कुष्ठमांसीमुरोशीर-[4]बालकामलकैर्युतम् ॥३॥
प्रियङ्गुपत्रसहितं सितयज्ञोपवीतिनम्।
सच्छत्रोपानहञ्चैव दर्भविष्टरसंस्थितम् ॥४॥
चतुर्भिः [5]संवृतं भूयस्तिल-[6]पात्रैश्चतुर्दिशम्।
[7]पिहितं दधिपात्रेण घृतक्षौद्रवता [8]मुखे ॥५॥
उपोषितः समभ्यर्च्य वासुदेवं जनेश्वरम्।
पुष्पधूपोप-[9]चारैस्तु यथाविभवमादृतः[10] ॥६॥
सङ्कल्प्य जलधेनुञ्च कुम्भं तमभिपूज्य च।
पूजयेत् वत्सकं तद्वत् कृतं [11]घृतमयं बुधः ॥७॥

जलधेनुं सङ्कल्प्य [12]सम्यङ् निर्माय इत्यर्थः।

एवं [13][पूज्य च] गोविन्दं जलधेनुं [14]सवत्सकाम्।
[15][सितवस्त्रधरः शान्तो वीतरागो विमत्सरः] ॥८॥

---

1 I. O. मया
2 I. O. सर्व्वग:
3 I. O. reads the bracketed portion as रत्नगर्भमग्रैर्वैस्तु ग्राम्यैर्व्वीयैः
4 A ०कनकामलकोयुतां
5 I. O. संस्थिता भूप तिल०
6 A पत्र०
7 I. O. स्थगितं
8 A मुखं
9 I. O. ०द्वारैस्तु
10 A ०व्रत:
11 I. O. कृतमयं
12 A सम्यक निर्मय
13 I. O. सम्पूज्य for the b. p.
14 A सवतसिका, I. O. सवत्सकं
15 A omits the b. p.

दद्याद्विप्राय राजेन्द्र प्रीत्यर्थं जलशायिनः ।
जलशायी जगद्योनिः प्रीयतां मम केशवः ॥९॥
इति चोच्चार्य्य भूनाथ विप्राय प्रतिपाद्य ताम् ।
[1][अपक्वान्नाशिना स्थेय]-महोरात्रमतःपरम् ॥१०॥
अनेन विधिना दत्त्वा जलधेनुं नराधिप ।
सर्वान् कामानवाप्नोति ये [2]दिव्या ये च [3]मानुषाः ॥११॥
शरीरारोग्यमावाधाप्रशमः सर्वकामिकः ।
नृणां भवति दत्तायां [4]जलधेन्वां न संशयः ॥१२॥
आह्लादहेतुजननं [दानानां नास्ति][5] तादृशम् ।
[6]जलधेनुर्यथा नृणां जन्मान्येकोन-[7]विंशतिम् ॥१३॥
न [8][च दाहो न चैवार्त्ति]-र्न मोहो विप्रजायते ।
अपि जन्मसहस्रेषु जलधेनुप्रदायिनाम् ॥१४॥
एकजन्मकृतं वाञ्छा त्रिजन्मोत्थं समाहृता ।
सप्तजन्मकृतं पापं हन्ति दत्ताम्बुगौर्नृणाम् ॥१५॥

वाञ्छा जलधेनुदानेच्छामात्रम् एकजन्मकृतं पापं हन्ति समाहृता [9]सम्भृतीकृता जन्मत्रय-कृतं पापं हन्ति इति [10]स्तुतिः । [11]दानदिनपूर्वतरदिने पूर्ववद्[12] हविष्यभोजनादिकं[13] कृत्वा [14]सूर्य्यादिदेवताभ्य उपवासपूर्वकं विष्णुधर्मोक्तवासुदेवपूजापूर्वक-[15]जलधेनुदानकर्म मया कर्त्तव्यमिति निवेद्य सङ्कल्पं [16]कुर्य्यात् । ॐ श्व [17]उपोष्यापरदिने वासुदेवपूजापूर्वकदानोत्तरा-पक्वान्नाशनसहितजलधेनुदानकर्माहं करिष्ये । ततो नियमेन सुप्त्वा परदिने उपोष्यापरदिने प्रातः स्नात्वा श्वेतवस्त्रः प्रशान्तचित्तो [18]यथोक्तोपचारैर्वासुदेवम् 'ॐ जलशायिने केशवाय नमः'

---

1 A अपक्वान्नाशिनस्त्थेय for the b. p.
2 I. O. देव्या
3 A मानवाः
4 A जलधेनुप्रसंशयः
5 I. O. reads the bracketed portion as नास्ति विप्रेन्द्र
6 A जलधेनुं यथा
7 I. O. ०सप्तति
8 I. O. reads the bracketed portion as दाहो न क्रमो नास्ति
9 I. O. सं only
10 I. O. श्रुतिः
11 I. O. दानदिनपूर्वदिने; A दानपूर्व-तरदिने
12 A omits it
13 I. O. हविष्याहारादि
14 A सूर्यादिदेवता
15 A omits जलधेनुदान
16 A कुर्युः
17 A उपोष्य परदिने
18 A omits यथोक्तो

इति सम्पूज्य यथोक्तरूपां जलधेनु'[1] जलचतुर्थभागघृतमयवत्ससहितामुपकल्प्यार्च्चिताम[2]-र्च्चिताय ब्राह्मणाय ॐ जलशायीत्यादि मन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोक्तजलधेनुदानफलप्राप्तिकामोऽहमेतां सुवर्णरजतान्वित-रत्नगर्भ-ग्राम्यधान्यसहित-सितवस्त्र-युगच्छत्र--दूर्वापल्लवशोभित-कुष्ठमांसीमुरोशीरबालकामलकप्रियङ्गु--[3]पत्रसहित--[4]सितयज्ञोपवीति--सच्छत्रोपानत्क[5]-दर्भविष्टरस्थ-तिल-[6]पूर्णपात्रचतुष्टय-[7]युत--[8]घृतमधुसहितदधि-[9]पात्रपिहितानन--धेनुचतुर्थांश-[10]घृतमयवत्ससहित-सुवर्णरजतान्वित-[11]रत्नगर्भ-ग्राम्यधान्यसहित-[12]सितवस्त्रयुग--च्छत्र--दूर्वापल्लवशोभित-कुष्ठमांसी-[13]मुरोशीरबालकामलकप्रियङ्गुसहित-सितयज्ञोपवीति--सच्छत्रोपानत्क[14]--दर्भविष्टरस्थ--तिलपूर्णपात्रचतुष्टययुत[15] घृतमधु--[16]युक्तदधिपात्रपिहिताननजलकुम्भमयीं जलधेनुं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततो यजमानोऽपक्वान्नेन कृतपारणो नियतस्तमहोरात्रं नयेत्।

[17][इति जलधेनुः।]

---

1 A omits it
2 A omits र्च्चिताम
3 I. O. पट्ट for पत्र
4 A शितयज्ञोपवीत॰ I. O. यज्ञोपवीत॰
5 A ॰सच्छत्रोपानतयुक्त
6 A पूत्र for पूर्णपात्र
7 A यद्यत्
8 I. O. मधुसहित before this
9 A पात्रपिहितासन; I. O. पात्रापिहित
10 A पिहित for घृत
11 I. O. वत्स for रत्न
12 A omits सित
13 A omits मुरोशीर
14 I. O. ॰सच्छत्रोपानक
15 A omits युत
16 A दधियुक्त॰
17 A omits the bracketed portion

अथ तिलधेनुदानम् ।

तथा :—

तिलधेनुं प्रवक्ष्यामि केशवप्रीणनं [1]परम् ।
[2][दत्ता या स्याद् यथा चास्या नरेन्द्र] विधिरुत्तमः ॥१॥
यां दत्त्वा [3]ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः ।
[4]आगारदाही गरदः सर्वपापयुतोऽपि च[5] ॥२॥
महापातकयुक्तो वा [6]युक्तो वाप्युपपातकैः ।
[7]स मुच्यतेऽखिलैः पापैर्विष्णुलोकञ्च गच्छति ॥३॥
[8]अनुलिप्ते महीपृष्ठे वस्त्राजिनसमावृते ।
धेनुं तिलमयीं कृत्वा सर्वरत्नैः समन्विताम् ॥४॥

अजिनं कृष्णमृगाजिनम् ।

स्वर्णशृङ्गीं रूप्यखुरां गन्धघ्राणवतीं शुभाम् ।
मिष्टान्नजिह्वां कुर्वीत [9]गुडास्यां सूत्रकम्बलाम् ॥५॥

सूत्रकम्बलामिति सूत्रमय-[10]गलकम्बलाम् ।

इक्षुपादां ताम्रपृष्ठां कुर्य्यान्मुक्ताफलेक्षणाम् ।
प्रशस्तपत्रश्रवणां [11][फलदन्तां[12] मनोहराम्] ॥६॥

[13][प्रशस्तपत्रं यज्ञीयतरुपत्रम् ।]

स्रग्दामपुच्छां[14] कुर्वीत नवनीतस्तनान्विताम् ।
फलैर्मनोहरैर्भक्ष्यैर्मणिमुक्ताफलान्विताम् ॥७॥

---

1 I. O. परां, A तथा
2 A reads the bracketed portion as यत्त् यास्यादथा वा स्यान्नरेन्द्र
3 A ब्रा ह्मणा
4 I. O. अगारदाही
5 I. O. वा
6 I. O. युतो
7 A समुत्सृजपाताखिलैः
8 A स्वर्ण०, I. O. अथ०
9 A गुडस्या
10 A ०गलकम्बला, I. O. ०गुडकम्बला
11 I. O. reads the bracketed portion as फलदन्तवतीं शुभा
12 A फलदा
13 A omits the bracketed portion
14 I. O. ०पुच्छा

तिलद्रोणेन कुर्वीत आढकेन तु वत्सकम् ।
[1][वरवस्त्रयुगच्छन्नां चारुच्छत्र]-समन्विताम् ॥८॥
ईदृक्संस्थानसम्पन्नां कृत्वा श्रद्धासमन्वितः ।
कांस्योपदोहनां दद्यात् केशवः प्रीयतामिति ॥९॥
सम्यगुच्चार्य्य विधिना दत्त्वैतेन नराधिप ।
सर्वपापविनिर्मुक्तः पितरं स पितामहम् ॥१०॥
[2]प्रपितामहं तथा पूर्वपुरुषाणां चतुष्टयम् ।
आत्मानं [3]तनयं पौत्रं प्रपौत्रं तदधस्त्रयम् ।
तारयेदवनीपाल तिलधेनुप्रदो नरः ॥११॥
यश्च गृह्णाति विधिवत् तस्यापि विविधं फलम् ।
चतुर्दश [4]तथा ये च ददतश्चानुमोदकाः ॥१२॥
दीयमानां प्रपश्यन्ति तिलधेनुञ्च ये नराः ।
[5]तेऽप्यघौघविनिर्मुक्ताः प्रयान्ति परमां गतिम् ॥१३॥
प्रशान्ताय सुशीलाय तथाऽमत्सरिणे बुधः ।
तिलधेनुं नरो दद्यात् वेदस्नाताय धर्मिणे ॥१४॥

[6]वेदस्नाताय कृतसमस्तशाखाध्ययनाय धर्मिणे स्वधर्मानुष्ठायिने ।

त्रिरात्रं यस्तिलाहारस्तिलधेनुं प्रयच्छति ।
[7]दत्त्वैकरात्रञ्च नरस्तिलानत्ति नरेश्वर ॥१५॥
[8]दानाद्विशुद्धपापस्य तस्य पुण्यवतो नृप ।
[9]चान्द्रायणादप्यधिकं शस्तं तत्तिलभक्षणम् ॥१६॥

[10]अत्र पूर्वोत्तरदानयोर्वासुदेवपूजाश्रुतेरत्रा-[11][पि केशव]-प्रीतिश्रुतेश्च केशवपूजा कर्तव्या । दानदिनपूर्वचतुर्थदिने प्रातः स्नात्वा [12]गृहीतोदकपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्य्यात् । ॐ

---

1 A reads the bracketed portion as सुवर्णयुगमच्छन्नां चारुपुच्छ

2 I. O प्रपितामहे

3 A तनयन्

4 A यथा

5 I. O. तेप्यशेषाघविनिर्मुक्ताः

6 A वेदस्नानाय

7 I. O. दत्त्वैकरात्रिञ्च

8 I. O. दानाद्विशुद्धपापस्य

9 I. O. इन्द्राय पादयधिकं

10 I. O. दान

11 I. O. reads the bracketed portion as पि के एव

12 I. O. and A गृहीतोदपूर्ण०

अद्यादि [1]त्रिरात्रतिलाहाररूप-[2]प्राच्याङ्गदानदिनतिलाहाररूपोदीच्याङ्ग[3]-सहितं विष्णुधर्मोक्त-तिलधेनुदानकर्माहं[4] करिष्ये। ततस्तद्दिनमारभ्य त्रिरात्रं तिलाहारो भूत्वा चतुर्थदिने प्रातः स्नात्वा ॐ केशवाय नम इति यथाशक्त्युप-[5]चारैर्वासुदेवं [6]सम्पूज्योक्तरूपां तिलधेनुमर्चिताय उक्तरूपाय ब्राह्मणाय ॐ केशवः प्रीयतामित्युच्चार्य्य ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोक्ततिलधेनुदानफलप्राप्तिकामोऽहमेतामास्तीर्णवस्त्राजिनस्थतिलाढकमय--सर्वरत्नालङ्कृत-सुवर्णशृङ्ग-रूप्यखुर-गन्धघ्राण-मिष्टान्नजिह्व-गुडास्य--सूत्रमयगलकम्बलेक्षुपाद--ताम्रपृष्ठ-मुक्ताफले-क्षण--प्रशस्तपत्रश्रवण-[7]फलदन्त--स्रग्दामपुच्छ--नवनीतस्तन-[8]फलमूलरत्नमुक्तान्वितवत्ससहिता-मास्तीर्ण[9]-वस्त्राजिनस्थतिलद्रोणमयीं सर्वरत्नालङ्कृतां [10]सुवर्णशृङ्गीं रूप्यखुरां [11]गन्धघ्राणां मिष्टान्न-जिह्वां गुडास्यां सूत्र-[12]गलकम्बलामिक्षुपादां ताम्रपृष्ठां मुक्ताफलेक्षणां प्रशस्तपत्रश्रवणां [13]फल-दन्तां स्रग्दामपुच्छां नवनीतस्तनीं वस्त्रयुगच्छन्नां फलमूलरत्नमुक्ता-[14]फलच्छत्रकांस्योपदोहनान्वितां धेनुं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततो यजमानस्तिलमात्राहार-[15]स्तद्दिनं नयेत्

---

1 A omits त्रिरात्र

2 I. O. प्राच्यक्त०

3 A ०दिच्याङ्ग and I. O. ०दिच्याङ्ग

4 A ०दानमहं

5 I. O. ०वासरै० for ०चारै०

6 I. O. पूज्योक्तरूपां

7 I. O. फलदन्त०

8 I. O. रत्नमुक्ताफलान्वित०

9 I. O. and A ०मास्तीर्य

10 A omits it

11 I. O. omits it

12 A omits गल

13 A omits it

14 I. O. ०फलान्वितां for ०फलच्छत्र

15 A ०स्तं दिनं

अथ घृतधेनुदानम् ।

तथा :—

तिलाभावे तथा दद्याद् घृतधेनुं [1]यतव्रतः ।
येन भूप विधानेन तदिहैकमनाः शृणु ॥१॥
वासुदेवं जगन्नाथं घृतक्षीराभि-[2]षेचितम् ।
सम्पूज्य पूर्ववत् [3]पुष्पगन्धधूपादिभिर्नरः ॥२॥

पूर्ववदिति भक्त्याद्यतिशयेनेत्यर्थः ।

अहोरात्रोषितो [नाम्ना अभिस्तूय][4] घृतार्चिषम् ।

अहोरात्रोषितः सन् घृतार्चिर्नाम्ना ॐ घृतार्चिषे नम इत्येवं गन्धपुष्पादिभिर्वासुदेवप्रतिमां घृतक्षीरस्नपन-[5]पूर्वकमभ्यर्च्य [येन केनचिद् वैष्णवेन स्तवेन][6] स्तुत्वेत्यर्थः ।

[7]गव्यस्य सर्पिषः कुम्भं पुष्पमालाविभूषितम् ॥३॥
कांस्योपदोहसंयुक्तं सितवस्त्रयुगेन च ।
[8][हिरण्यगर्भसहितं मणिविद्रुममौक्तिकैः ॥४॥
इक्षुयष्टिमयान् पादान् खुरान् रूप्यमयांस्तथा ।
सौवर्णे चाक्षिणी कुर्याच्छृङ्गे चागुरुकाष्ठजे ॥५॥
सप्तधान्यमये पार्श्वे पत्रोर्णं वापि कम्बलम् ।]
कुर्यात्तुरुष्ककर्पूरैर्घ्राणं [फलमयांस्तनान्][9] ॥६॥

पत्रोर्णं [10]धौतकौशेयवस्त्रं कम्बलं [11]गलकम्बलं तुरुष्कः [12]सिह्लकः ॥

---

1 A प्रयव्रतः

2 A ०षेचनं

3 A पुष्पं गन्धपुष्पादिभिन्नरः

4 I. O. reads the bracketed portion as रात्रावभिस्तूय

5 A omits it

6 I. O. येषककेनविद्वैष्णावेन स्तुवेन for the bracketed portion

7 I. O. सन्तास्य

8 A omits the bracketed portion

9 I. O. फलमयींस्तनान् and A फलमयान् स्तानान for the bracketed portion

10 A धौतकेषेयवस्त्रं, I. O. धौतकौशकारकर्पटः

11 I. O. गजकम्बल

12 A सिन्दुकं

तद्वच्छर्करया जिह्वां गुडक्षीरमयं [1]मुखम् ।
क्षौमसूत्रेण लाङ्गूलं रोमाणि सितसर्षपैः ।
ताम्रपात्रमयं पृष्ठं कुर्य्यात् श्रद्धासमन्वितः ॥७॥
ईदृक्स्वरूपां सङ्कल्प्य घृतधेनुं नराधिप ।
तद्वत्कल्पनया धेन्वा घृतवत्सं प्रकल्पयेत् ॥८॥

सङ्कल्प्येति सम्यक् कल्पयित्वा [2]सम्भृतीकृत्येत्यर्थः ।

[3]तं विप्रन्तु [4]समानाय्य मनसैव [5]घृतार्चिषम् ।
कल्पयित्वा [6]ततस्तस्मै प्रयतः प्रतिपादयेत् ॥९॥
एतां ममोपकाराय गृह्णीष्व त्वं द्विजोत्तम ।
प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः ॥१०॥
इत्युदाहृत्य विप्राय देयाद्धेनुं नराधिप ।
घृतवस्त्रसुवर्णानां सम्यक् कल्पनया कृतम् ॥११॥

घृतं सम्यङ्निरूपितं [7]घृतवत्सधेन्वादि दोषरहितं [8][वस्त्रमुत्कृष्टं केशरादिरहितं] सुवर्णं सर्वोत्कृष्टं [9]न्यायार्जितमुपादाय निर्मितमित्यर्थः ।

दत्त्वैकरात्रं स्थित्वा च घृताहारो नराधिप ।
मुच्यते सर्वपापेभ्यस्तदा दानफलं शृणु ॥१२॥
घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
[10][तेषु लोकेषु लोकेश [11]पुण्यक्षेत्रेषु जायते] ॥१३॥
[12]पितुरूर्द्ध्वं नयेत् सप्त [चावरानपि सप्त च][13] ।
तांस्तेषु नृप लोकेषु स नयत्यन्तकल्मषः ॥१४॥
सकामानामियं व्युष्टिः कथिता नृपसत्तम ।
[14]विष्णोर्लोकं नरा यान्ति [15]निष्कामघृतधेनुदाः ॥१५॥

---

1 A शुभं
2 A सम्भृतिकृत्येत्यर्थः
3 I. O. तन्तु विप्रं
4 A समासाद्य
5 I. O. घृतार्चिषः, A घृतार्चितं
6 A ततस्तस्यै
7 I. O. घृतवत्साभिरन्नादिदोषरहितं
8 I. O. शुद्धं for the bracketed portion.
9 I. O. न्यायार्जितमुपायविनिर्मिता-मित्यर्थः
10 I. O. reads the bracketed portion as तेषु लोकेष्ववत्पूज्यो स पुण्येषु प्रजापते
11 A स पुण्येषूपजायते
12 I. O. विष्णुकूर्द्ध्वं
13 I. O. reads the bracketed portion as चावरानपि सम्मत
14 I. O. विष्णुलोकं
15 I. O निष्कामा०

दानदिनपूर्वतरदिने [1]पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्यः सोपवासविष्णुधर्मोक्त-वासुदेवघृतक्षीरस्नपनपूजापूर्वकं[2][घृतधेनुदानकर्म मया कर्तव्यमिति निवेद्य सङ्कल्पं कुर्य्यात्। ॐ श्व उपोष्यापरदिने विष्णुधर्मोक्तघृतार्च्चिर्घृतक्षीर-स्नपन-पूजापूर्वकं] दानान्तरैकरात्रघृताहारत्वसहितं घृतधेनुदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वाऽपरदिने उपोष्यापरदिने स्नात्वा वासुदेवं घृतक्षीराभ्यां स्नपयित्वा ॐ घृतार्च्चिषे नम इति यथाविधि सम्पूज्य वैष्णवस्तवेन [3]स्तुत्वा यथोक्तरूपां घृतधेनुं [4]तच्चतुर्थभागकल्पित-[5]तद्रूपवत्ससहिता-[6]मर्च्चितामर्च्चिताय विद्यातपःशालिने घृतार्च्चिरयमिति ध्यातरूपाय ब्राह्मणाय ॐ एतां ममोपकाराय इत्यादिमन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोक्तघृतधेनुदानफलप्राप्तिकामोऽहमेतां धेनुचतुर्थभागघृतकल्पित--पुष्पमाला--[7]विभूषित--कांस्योपदोह--सितवस्त्रयुगाच्छादित--हिरण्य--गर्भमणिविद्रुममौक्तिकसहितेक्षुयष्टिमयपाद-[8]रौप्यखुर-सौवर्णाक्षियुगागुरुकाष्ठमयशृङ्ग--सप्तधान्य-पार्श्वद्वय-पत्रोर्णगलकम्बल-तुरुष्ककर्पूरघ्राण-फलस्तन-शर्कराजिह्व--गुडक्षीरमुख--क्षौमसूत्रलाङ्गूल-सितसर्षपरोमक-ताम्रपृष्ठ-वत्ससहितां गव्यघृतकुम्भमयीं पुष्पमाला-[9]विभूषितां कांस्योपदोहां सितवस्त्र-[10]युगाच्छादितां हिरण्यगर्भां मणिविद्रुममुक्तासहितामिक्षुयष्टि-[11]पादां रौप्यखुरां सौवर्णाक्षियुगामगुरुकाष्ठशृङ्गीं सप्त-[12]धान्योभयपार्श्वां पत्रोर्णगलकम्बलां तुरुष्ककर्पूरघ्राणां फलस्तनीं शर्कराजिह्वां गुडक्षीरमुखीं क्षौमसूत्रलाङ्गूलां सितसर्षप-[13]रोमकां ताम्रपात्रपृष्ठां घृतधेनुं ददानि। स्वस्त्यादिस्त्रोकारान्तं पूर्ववत्। ततो यजमानो घृतमात्राहारस्तद्दिनं नियतोऽतिवाहयेत्[14]।

---

1 I. O. पूर्ववत् हविष्याहारादि
2 A omits the bracketed portion
3 I. O. कृत्वा
4 A चतुर्थभाग०
5 A तद्भव०
6 A omits मर्च्चिता
7 I. O. ०भूषित०
8 A omits रौप्य
9 I. O. ०भूषितां
10 A युगच्छादितां, I. O. युगाच्छादितां
11 I. O. ०पद्मां, A ०पादां
12 A ०धान्योपभोगपार्श्वां
13 I. O. and A ०रोमिकां
14 A नियतो वाहयेत्, I. O. नियमतोतिवाहयेत्

विष्णुधर्मोत्तरोक्तधेनुदानानि ।

अथ घृतधेनुदानम् ।

विष्णुधर्मोत्तरे (३।३०७।१-१५) :—

घृतधेनुप्रदानञ्च निबोधत द्विजोत्तमाः ।
गव्यस्य सर्पिषः कुम्भं पूर्णन्तु परिकल्पयेत् ॥१॥
[1]कलसञ्च तथा पूर्णं तस्या वत्सं प्रकल्पयेत् ।
[2]कांस्योपदोहसंछन्नौ सितवस्त्र-[3]युतौ तथा ॥२॥
[4]हिरण्यगर्भौ कर्तव्यावनुलिप्तौ च बाह्यतः ।
इक्षुयष्टिमयान् पादान् [5]खुरान् रूप्यमयांस्तथा ॥३॥
[अनुलिप्तौ [6][च गन्धेन] यथेच्छ-[7]चन्दनादिना ।][8]
सौवर्णे चाक्षिणी कार्य्ये शृङ्गे चागुरुकाष्ठजे ॥४॥
सप्तधान्यैश्च कर्तव्ये तस्याः पार्श्वे पृथक् कृतैः ।
तस्याः पटञ्च कर्तव्यं कम्बलञ्च द्विजोत्तमाः ॥५॥
कुर्य्यात् तुरुष्ककर्पूरै-[9]र्घ्राणं फलमयांस्तनान् ।
तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखम् ॥६॥
क्षौमसूत्रेण लाङ्गूलं रोमाणि सितसर्षपैः ।
ताम्रपात्रमयं पृष्ठं कुर्य्याच्छ्रद्धा-[10]समन्वितः ॥७॥
[11]एतद्विरचनं कृत्वा घृतक्षीराभि-[12]षेचनैः ।
[13]हरिं [14]घृतार्चिषेत्येवं नाम्ना संपूजयेद्विभुम् ॥८॥

---

1 A फलकच
2 I. O. कांस्यपिधानसंछन्नौ
3 I. O. ०युरौ
4 A हिरण्यगर्भौ, I. O. हिरण्यनाभौ
5 I. O. खुरा
6 I. O. omits the bracketed portion
7 A कच for च
8 V. D. omits the b. p.
9 I. O. ०र्घ्राणौ
10 I. O. ०समन्वितं
11 A एतद्दैवच
12 A ०सेच
13 I. O. हविं, A हवि:
14 I. O. क्षतार्चिषेत्येवं

[1][ततस्तु गन्ध]-वस्त्रान्नधूपपुष्पादिभिर्नरः ।
घृतेन [2][दीपनं दद्यात्] तथैव च घृतार्चिषः ।
होमं विप्रा-[3]स्तथा दद्याद् [4]धेनुं विप्राय भक्तितः ॥६॥
घृतार्चिःप्रीतये विप्रं कल्पयित्वा [5]घृतार्चिषम् ।
[6]एकरात्रञ्च तां दत्त्वा घृताहारो भवेन्नरः ॥१०॥
विमुक्तः सर्वपापेभ्यो लोकानाप्नोति [7]शाश्वतान् ।
अनेन विधिना दत्त्वा सोपवासो नरः शुचिः ॥११॥
[8]सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ।
विमानेनार्कवर्णेन गवां लोके महीयते ॥१२॥
घृतक्षीरवहा नद्यो यत्र पायस-[9]कर्दमाः ।
यत्र [10]कामफला वृक्षा यत्र सिद्धिश्च [11]मानसी ॥१३॥
गन्धर्वाप्सरसां यत्र सततं [12]गीतमुत्तमम् ।
[13]तत्रास्ते सुचिरं लोके यावदिन्द्राश्चतुर्दश ॥१४॥
मानुष्यमासाद्य भवत्यरोगः [14]शीलेन रूपेण दमेन युक्तः ।
मनोऽभिरामः [15]प्रमदाप्रियश्च धनान्वितः सर्वसुखोपपन्नः ॥१५॥

यथेष्ट-[16][दानदिन]-पूर्वतरदिने [17]पूर्ववत् कृतहविष्यभोजनादिः सूर्य्यादिदेवताभ्य उपवास-पूर्वकं विष्णुधर्मोत्तरोक्तवासुदेवघृत-[18]क्षीरस्नपनसहितपूजाहोमपूर्वकं घृतधेनुदानं मया कर्तव्यमिति निवेद्य सङ्कल्पं कुर्य्यात् । ॐ [19]श्व उपोष्यापरदिने [20]विष्णुधर्मोत्तरोक्तवासुदेवघृतक्षीरस्नपनसहित-पूजाहोमपूर्वकदानान्तरैकरात्र-घृताहारत्वसहितं घृतधेनुदानकर्माहं करिष्ये । ततो नियमेन सुप्त्वा

1 A reads the bracketed portion as ततः सुगन्धि
2 I. O. and V. D. read the bracketed portion as दीपं दद्याच्च
3 I. O. ०स्तदा
4 I. O. धेनु
5 I. O. घृतार्चितां
6 A एकरात्रिञ्च
7 A शाश्वता
8 A सर्वकामः समृद्धः स्याद्
9 A ०कर्द्दमः
10 A कामफेला
11 I. O. मानसा
12 A शीतमुत्तमं, I. O. जातमुत्तमं
13 Corrected from V. D. I. O. तत्रास्ति, A तत्रस्ति
14 I. O. शरीर
15 I. O. प्रमदाधिपश्च
16 A द्विने for the bracketed portion
17 A पूर्वकृतहविष्यभोजनादि
18 A omits क्षीर
19 A उपोष्य only for श्व उपोष्या
20 I. O. विष्णुधर्म्मोक्त०

परदिने [1][उपोष्यापरदिने धेन्वर्थं घृतकुम्भं] तत्पार्श्वे[2] धेनुचतुर्थांशघृतकलसञ्च वत्सार्थं [3]स्थापयित्वा धेनुवत्सौ यथोक्तोपकरणसहितौ कृत्वा [4]वासुदेवं घृतक्षीराभ्यां स्नपयित्वा ॐ घृतार्चिषे नम इति यथाशक्त्युपचारैः संपूज्य घृतदीपं दत्त्वा ॐ घृतार्चिषे [5]स्वाहा इत्याज्यं हुत्वा, शूद्रो ब्राह्मणद्वारा होमं कारयित्वा, घृतधेनुमभ्यर्च्य ब्राह्मणाय ध्यातवासुदेवरूपायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तघृतधेनुदानफलप्राप्तिकामोऽह-मेतां धेनुचतुर्थांशकलसघृतमयकांस्योपदोहसंछन्न-सितवस्त्रयुत-हिरण्यगर्भेक्षु-[6]यष्टिपाद-रौप्यखुर-[7]सौवर्णाक्षियुगागुरुकाष्ठश्रृङ्ग--[8]सप्तधान्यपार्श्व-पट्टवस्त्रकम्बल-[9][तुरुष्ककर्पूरघ्राण-फलस्तन-शर्करा-जिह्व-गुडक्षीरमुख-क्षौमसूत्रलाङ्गूल-सितसर्षपरोमक-ताम्रपृष्ठवत्ससहितघृतपूर्णकुम्भमयीं कांस्यो-पदोहसंछन्नां सितवस्त्रयुतां] हिरण्यगर्भामिक्षुयष्टिपादां रूप्यखुरां सौवर्णाक्षियुगामगुरुकाष्ठ-श्रृङ्गीं सप्तधान्यपार्श्वां [10]पट्टवस्त्रकम्बलां तुरुष्ककर्पूरघ्राणां फलस्तनीं शर्कराजिह्वां गुडक्षीरमुखीं क्षौम-[11]सूत्रलाङ्गूलां सितसर्षपरोमकां ताम्रपात्रपृष्ठां घृतधेनुं ददानि। घृतार्चिः प्रीयताम्। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [12]ततस्तद्दिनं यजमानो घृतमात्राहारो नियतस्तिष्ठेत्।

---

1 A reads the bracketed portion as उपोषा शुचिधेन्वर्थं घृतकुम्भं and I. O. as उपोषापरदिने घृत-कुम्भपूर्णं

2 I. O. तत्पार्श्वेन

3 A स्नापयित्वा

4 I. O. वासुदेवप्रतिमां

5 A नमः before स्वाहा

6 I. O. मध for यष्टि

7 I. O. सुवर्णाक्षि०

8 I. O. मष्टधान्य०

9 A omits the b. p. here and reads it between ॐ and उपोषा in the previous page

10 I. O. पुष्प for पट्ट

11 I. O. वस्त्र for सूत्र

12 A. ततस्तदि', I. O. ततस्तद्दिन

अथ जलधेनुदानम् ।

तथा (३।३०६।१-१५) :—

जलधेनुं प्रवक्ष्यामि [1]प्रीतये जलशायिनः ।
जलकुम्भं [2]द्विजश्रेष्ठाः [3]सुवर्णरजतान्वितम् ॥१॥
कल्पयेद्रत्नगर्भन्तु [4]स्थापयेत्तं यवोपरि ।
[5]सर्वधान्यैस्तथा ग्राम्यैः [6]समन्तात् परिवारयेत् ॥२॥

ग्राम्यसर्वधान्यानि परिभाषोक्तानि ।

सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम् ।
कुष्ठमांसी-मुरोशीर-[7]बालकामलकैर्युतम् ॥३॥
प्रियङ्गुपत्रसहितं सितयज्ञोपवीतिनम् ।
सच्छत्रोपानहञ्चैव[8] [9]सोष्णीषञ्च प्रकल्पयेत् ॥४॥
तिलपात्रैर्युतं कृत्वा सहिरण्यैश्चतुर्दिशम् ।
[10]दध्योदनयुतेनाथ [पात्रेण स्थगितं मुखे][11] ॥५॥
[12]कल्पयेदेवमेवन्तु [वारिधानीन्तु वत्सकम][13] ।
उपोषितः समभ्यर्च्य देवेशं जलशायिनम् ॥६॥
पुष्पधूपोपहारैश्च यथाविभवमा-[14]हतः ।
[15]आहताम्बरवीताय दद्याद्विप्राय भक्तिमान् ॥७॥

---

1 A प्रीयये
2 I. O. जलश्रेष्ठाः
3 A सुवर्णरजतान्वितां
4 A स्थापयेत्तं
5 I. O. पूर्व्वधान्यैस्तथा याम्यैः
6 I. O. ०सर्व्वतः परिवारयेत्
7 I. O. ०वश्चिकामलकैर्युतः, V. D. ०बालु०
8 A ०च्चैव
9 I. O. and V. D. सौष्णीषं परिकल्पयेत्
10 I. O. दधीदन०
11 A पात्रेणः स्थितं मुखं for the bracketed portion
12 I. O. कल्पयेदेवमेवन्तु
13 Corrected from V. D. A वारिधानीन्तु वत्सिकां and I. O. वारिधानी तु वत्सकं for the bracketed portion
14 V. D. ०ग्नितः, A ०हृतः
15 A आहृतम्बरवीताय, I. O. अहताम्बरवीताय

जलशायी जगद्योनिः प्रीयतां मम केशवः ।
इति चोच्चार्य्य [1]तं दद्यात् [प्रीणयेच्च द्विजोऽपि तम्][2] ॥८॥
अहोरात्रोषितो दद्याद् यथाविधि मयेरितम् ।
[3]अपक्वान्नाशिना स्थेयमहोरात्रमतः परम् ॥९॥
अनेन विधिना [4]दत्त्वा जलधेनुं द्विजोत्तमाः ।
सर्वाह्लादानवाप्नोति कामानाप्नोति शाश्वतान् ॥१०॥
मोक्षमाप्नोति सर्वेभ्यः पापेभ्यः स तथा नरः ।
सौभाग्यं महदाप्नोति रूपञ्च परमन्तथा ॥११॥
पुरुषः स तथा याति यस्य यस्य च दर्शनम् ।
करोति [5]परमाह्लादं तस्य तस्य द्विजोत्तमाः ॥१२॥
नित्याभितृप्तो भवति तथैव च [6]निरामयः ।
सर्वबाधाप्रशमनं प्राप्नोति गतकल्मषः ॥१३॥
[7]वारुणं लोकमाप्नोति सकृद्दत्त्वा द्विजोत्तमाः ।
दत्त्वा तामसकृद् विप्रा लोकमाप्नोति वैष्णवम् ॥१४॥
आह्लादहेतोः परमं पवित्रं दानं मयेदं कथितं [8]द्विजेन्द्राः ।
धन्यं यशस्यं [9]दुरितापहारि [10]कामप्रदं [लोकहितं प्रशस्तम्][11] ॥१५॥

दानदिनपूर्वेतरदिने [12]पूर्ववद्धविष्यभोजनादिकं कृत्वा सूर्य्यादिदेवताभ्यः सोपवासविष्णुधर्मोत्तरोक्त-जलशायिकेशवपूजापूर्वक-[जलधेनुदानकर्म मया कर्तव्यमिति[13] निवेद्य सङ्कल्पं कुर्य्यात् । ॐ श्व [14]उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-केशवपूजापूर्वक][15] दानान्तरैक-[16]रात्रापक्वान्नाहारत्वसहितं जलधेनुदानकर्माहं करिष्ये । ततो नियमेन सुप्त्वा अपरदिने उपोष्यापरदिने

1 I. O. तद्दद्यात्
2 I. O. reads the bracketed portion as प्रणमेच्च द्विजाय तां
3 I. O. अपक्वान्नाशिना
4 A दद्यात्
5 I. O. परमात्मनं
6 A निवारवः
7 A कारणं
8 A द्विजोत्तमाः
9 Corrected from V. D. I. O. दुर्गितापकारि, A दूषितापहारि
10 I. O. कादर्थप्रदं
11 A reads the bracketed portion as लोकहितप्रकारं
12 I. O. पूर्ववत् हविष्याहारादि
13 A कर्त्तव्यं
14 A उपोषा परदिने
15 A omits the b. p.
16 A ०रात्रोपवासत्व०

जलकुम्भमयीमुक्तोपकरणसहितां जलधेनुं तत्पार्श्वे तच्चतुर्थांशजलभृद्वारिधानीमयमुक्तोपकरणसहितं [1]वत्सञ्च स्थापयित्वा वासुदेवं यथाशक्त्युपचारैः ॐ जलशायिने नम इति सम्पूज्य [2]ब्राह्मणायार्चिताय [3]नवाम्बराच्छाताया-[4]र्चितां ताम् ॐ [5]जलशायीत्यादिकमन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-जलधेनुदान-फलप्राप्तिकामोऽहमेतां[6] धेनुचतुर्थांशजलभृद्--वारिधानीमय-सुवर्ण-[7]रजतान्वित-[8]रत्नगर्भ--[9]यवस्थ-[10]ग्राम्यसर्वधान्यपरिवारित-सितवस्त्रयुगच्छन्न---दूर्वापल्लवशोभित- कुष्ठमांसीमुरोशीर-[11]बालकामलकप्रियङ्गुपत्रसहित-सित[12]-यज्ञोपवीति-सच्छत्रोपानत्क-[13]सोष्णीष--सहिरण्यतिलपात्र-[14][चतुष्टययुत--दध्योदनपात्र-स्थगितमुख]-वत्ससहितां जलकुम्भमयीं सुवर्णरजतान्वितां रत्नगर्भां [15]यवस्थां[16][ग्राम्यसर्वधान्य-परिवारितां सितवस्त्रयुगच्छन्नां दूर्वापल्लवशोभितां कुष्ठमांसीमुरोशीर]-[17]बालकामलक-प्रियङ्गु-पत्रसहितां सितयज्ञोपवीतिनीं सच्छत्रोपानत्कां सोष्णीषां सहिरण्यतिलपात्रचतुष्टय-[18]-युतां दध्योदनयुतपात्र-[19]स्थगितमुखीं जलधेनुं ददानि। प्रतिग्रहीता जलशायी केशवः प्रीयतामिति वदेत्। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततो यजमानोऽ[20]पक्वान्नाशी तद्दिनं नियतो नयेत्।

---

1 I, O. रत्नञ्च
2 A ब्राह्मणयोरर्चिताय, I. O. ब्राह्मणाया-र्चिताय
3 I. O. वराम्बरा०
4 A ०र्चिताय and omits ताम्
5 जलशायिनेत्यादिकमन्त्रं
6 I. O. काम एतां
7 I. O. रचितान्वित
8 A पञ्च before रत्न
9 I. O. ०मधस्थ, A ०ग्रमस्थ
10 A ग्रामसर्व्वधान्य०, I. O. ग्राम्यधान्य०,
11 A ०बालक, I. O. ०वणिकामलक
12 A reads सहितं and omits सित
13 A सोष्णीसहित, I. O. रोष्णीष
14 I. O. स्थसितमुख for the bracketed portion
15 A वयस्थां
16 A reads the bracketed portion once again after सच्छत्र पानत्कां, a line below.
17 I. O. वणिकामलक०
18 A omits चतुष्टय
19 I. O. स्थसित०, A स्थमित०
20 A ०पक्काशी

अथ तिलधेनुदानम्।

तथा (३।३०८।१-१५) :—

तिलधेनुं प्रवक्ष्यामि सर्वपापभयापहाम्।

[1]धेन्वाकारान्तु तां कुर्य्यादाविके[2] कम्बले बुधः ॥१॥

[3]तिलैः षोडशभिः प्रस्थैश्चतुर्भिर्वत्समेव च।

[4]तिलप्रसारणं कुर्य्याद् धेन्वा[5] धेनुप्रमाणतः ॥२॥

ततस्तु [6]रचयेद्धेनुं [7]तिलैर्वक्ष्याम्यहं द्विजाः।

हेमशृङ्गीं रूप्यखुरां गन्धघ्राणवतीं शुभाम् ॥३॥

मिष्टान्नजिह्वां कुर्वीत गुडास्यां सूत्रकम्बलाम्।

इक्षुपादां ताम्रपृष्ठां कुर्य्यान्मुक्ताफलेक्षणाम् ॥४॥

प्रशस्त-[8]पत्रश्रवणां फलदन्तवतीं शुभाम्।

स्रग्दामपुच्छां कुर्वीत नवनीतस्तनान्विताम् ॥५॥

[9][प्रशस्तपत्रं यज्ञीयतरुपत्रम्]।

फलैर्मनोहरैर्भक्ष्यै[10]-र्मणिमुक्ताफलान्विताम्।

शुभ्रवस्त्रयुगच्छन्नां चारु-[11]च्छत्रसमन्विताम् ॥६॥

कांस्योप-[12]दोहनां कृत्वा वासुदेवन्तु[13] पूजयेत्।

गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा ॥७॥

जुहुयाच्च तिलानेव नाम्ना तस्यैव[14] मानवः।

तमेव प्रीणयेद्दद्याद्धेनुं तामा[15]-हिताग्नये ॥८॥

---

1 Corrected from V. D. I. O. धेन्वाकारा तु, A धेन्वाकारन्तु

2 A कुर्य्यादाविवे

3 I. O. तिलै षोड़शभिः, A ति-षोड़शभिः

4 Corrected from V. D. A तिलधेसारणं, I. O. तिलप्रदानवत्

5 A omits it

6 A वरयेद्धेनुं

7 A पर्व०

8 A ०पात्र०

9 A reads the bracketed portion as प्रशस्तपात्रं यज्ञीयेतरपात्रं

10 A ०र्भक्षै०, I. O. ०र्नृ चै०

11 A चन्द्र for च्छत्र

12 Corrected from V. D. A ०दोहांनां, I. O. ०दोहनं

13 I. O. वासुदेवञ्च

14 A तस्मैव

15 I. O. तासां

त्रिरात्रं यस्तिलाहारस्तिलधेनुं प्रयच्छति ।
दत्त्वैक-[1]रात्रं च पुनस्तिलानत्ति द्विजोत्तमाः ॥९॥
चान्द्रायणाद्यप्यधिकं[2] शस्तं तत्तिलभक्षणम् ।
सर्वपातकनिर्मुक्तः पितरं स पितामहम् ॥१०॥
तस्यापि पितरञ्चैव तारयेद् दुष्कृतान्नरः[3] ।
आत्मानं पुत्रपौत्रांश्च प्रपौत्रमपि तारयेत् ॥११॥
[4][सुहृदं वाप्यथोद्दिश्य] तिलधेनुप्रदो नरः ।
तारयेद्दुष्कृतात्तञ्च[5] यमुद्दिश्य प्रयच्छति ॥१२॥
यश्च गृह्णाति विधिवद्दीयमानाञ्च[6] पश्यति ।
सोऽपि पापविनिर्मुक्तः स्वर्गलोके महीयते ॥१३॥
महापातकसंयुक्तो युक्तो [7]यश्चोपपातकैः ।
तिलधेनुप्रदानेन सोऽपि पावनमाप्नुयात् ॥१४॥
स लोकमासाद्य नरो वसूनां तत्रापि भुक्त्वा [8]त्रिदशेन्द्रभोगान् ।
[9]मानुष्यमासाद्य भवत्यरोगो धनान्वितो रूपसुखोपपन्नः ॥१५॥

दानदिनपूर्वचतुर्थदिने प्रातः गृहीतोदकपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्यात्[10] 'ॐ अद्यादि त्रिरात्रतिलाहाररूपप्राच्याङ्गदानदिन[11]-तिलाहाररूपोदीच्याङ्गसहितं [12]विष्णुधर्मोत्तरोक्ततिलधेनुदानकर्माहं करिष्ये'। ततस्तद्दिनादारभ्य तिलमात्राहारो [13][दिनत्रयं भूत्वा] [14]चतुर्थदिने कम्बलमा-[स्तीर्य्य तत्र षोडशसंख्य][15]-प्रस्थपरिमिततिलैर्धेन्वाकारं[16] [17]विरचय्य [18][तत्पार्श्वे तच्चतुर्थांश]-तिलैर्वत्साकारमारचय्य धेनु-[19]मुक्तोपकरणान्वितां[20] कृत्वा वत्सञ्चैवं-

1 I. O. °त्राश्च
2 I. O. and V. D. °भ्यधिकं
3 A °दुःकृतं नरः
4 Corrected from V. D. I. O. सुहृद्दञ्चाप्यथोद्दिश्य for the b. p.
5 I. O. °र्थञ्च
6 I. O. °द्दीयमानाञ्च
7 A यः सोपपातकैः
8 A विविधेन्द्रभोगान्
9 I. O. मनुष्य°
10 A कुर्य्यः
11 I. O. omits दिन
12 I. O. and A विष्णुधर्मोक्त°
13 I. O. भुक्त्वा for the bracketed portion
14 I. O. चतुर्थ्द्दिने
15 I. O. reads the bracketed portion as धाकततस्मैतत्राम
16 A °तिलधेन्वाकार
17 A विचार्य
18 A च तत्पार्श्वे चतुर्थांश for the b. p.
19 I. O. and A °युक्तो°
20 I. O. °र्थितां

[1]विधोपकरणयुतं विधाय वासुदेवप्रतिमां [2]यथाशक्त्युपचारैः पूजयित्वा ॐ वासुदेवाय स्वाहेति तिलान् हुत्वा[3] शूद्रो ब्राह्मणद्वारा होमं कारयित्वा, आहिताग्नये [4]ब्राह्मणायार्चितायार्चिताम् ॐ[5] वासुदेवः प्रीयतामित्युक्त्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [6]विष्णुधर्मोत्तरोक्ततिलधेनुदानफलप्राप्तिकामोऽह--[7]मेतामाविककम्बलस्थधेनुचतुर्थांशतिल[8]--मयहेमशृङ्ग--रूप्यखुर-गन्धघ्राण-मिष्टान्नजिह्व-गुडास्य-सूत्रगल[9]-कम्बलेक्षु-[10]यष्टिपाद-ताम्रपृष्ठ--मुक्ताफलेक्षण-[11][पत्रश्रवण-फलदन्त-स्रग्दामपुच्छ]-नवनीतस्तन-फल-[12]भक्ष्यसमन्वित-[13]मणिमुक्तालङ्कृत-वस्त्रयुगच्छन्न -छत्रान्वित-कांस्योपदोह[14]-वत्स-[15]सहितामाविककम्बलस्थ--षोडशसंख्यप्रस्थपरिमित-तिलमयीं हेमशृङ्गीं रूप्यखुरां गन्धघ्राणां मिष्टान्नजिह्वां गुडास्यां सूत्रगलकम्बलामिक्षुपादां ताम्रपृष्ठां मुक्ताफलेक्षणां [16]पत्रश्रवणां फलदन्तां स्रग्दामपुच्छां नवनीतस्तनीं [17]फलभक्ष्यसमन्वितां [18]मणिमुक्तालङ्कृतां वस्त्रयुगाच्छादितां छत्रसहितां [19]कांस्योपदोहां तिलधेनुं ददानि। स्वस्त्यादिस्वोकारान्तं पूर्ववत्। [20][ततस्तद्दिनं यजमानस्तिलमात्राहारो नियतो नयेत्]।

इति [21]महाराजाधिराज-[22]निःशङ्कशङ्कर-श्रीमद्बल्लालसेन-[23]देवविरचिते
दानसागरे धेनुदानावर्तः।

---

1 A ०विविधो०
2 I. O. यथाशास्त्रोपचारैः
3 A कृत्वा
4 I. O. ब्राह्मणायार्च्चितायार्च्चितां, A ब्राह्मणायाच्चितां
5 I. O. स्वं
6 I. O. विष्णुधर्मोक्त०
7 I. O. ०मेतानाविक०, A ०मेतां माविं०
8 A ०तिति०
9 I. O. ०गज०
10 A omits यष्टि
11 I. O. reads the bracketed portion as गन्धस्रवणफलदन्तस्रग्दामप्रचुर
12 I.O. ०भक्षसमन्वित, A ०भक्षान्वित
13 I. O. omits मणि
14 I. O. कांस्योपदोहनसहित
15 I. O. ०सहितां आवि०, A ०मेत आवि०
16 I. O. प्रशस्तश्रवणां
17 A फलभक्षसहितां
18 I. O. मणिमुक्तान्वितां, A omits it
19 I. O. कांस्योपदोहनां
20 A reads the bracketed portion as ततस्तद्दिनं यजमानस्तिलाहारो नियतो नयेत् and I. O. as ततस्तद्दिने यजमानस्तिलमात्राहारो नियतस्तिष्ठेत्
21 I. O. समस्तप्रक्रियाविराजमानमहाराज०
22 A निःशङ्क०
23 I. O. omits देव

अथ रुद्रदैवतगवीदानावर्तः। (४-७)

तत्र [1]गोदानस्तुतिः विष्णुधर्मोत्तरे (३।२६१।१ख-३) :—

यथा देवा यथा वेदा [2]ब्राह्मणाश्च यथा द्विजाः।
तथा [3]गावो विनिर्दिष्टाः सर्वलोकसुखावहाः ॥१॥
[4][एकं गोब्राह्मणं ज्ञेयन्तयो]-र्यज्ञः प्रतिष्ठितः।
विप्रेषु मन्त्रास्तिष्ठन्ति गोषु संतिष्ठते हविः ॥२॥
गवां [5]दानं द्विजश्रेष्ठा दुष्कृतान्यपकर्षति ॥३॥

तथा (३।३०६।१-२क, ३क) :—

[6]गावः पवित्रा मङ्गल्या गोषु लोकाः प्रतिष्ठिताः।
तास्वायत्तानि यज्ञानि देवतातिथिपूजनम् ॥४॥
बालपुष्टिश्च [7]भवति तथा [8]श्राद्धक्रिया द्विजाः।
तस्मात् सर्वप्रदानानां गवां दानमनुत्तमम् ॥५॥

तथा (३।३०६।२३-२६) :—

[9][शतं वर्षसहस्राणि] तपस्तप्तं सुदुश्चरम्।
गोभिः पूर्व-[10]विसृष्टाभिर्गच्छेम[11] श्रेष्ठतामिति ॥६॥
लोकेऽस्मिन् दक्षिणानाञ्च सर्वासां वयमुत्तराः।
भवेम न च लिप्येम [12]दोषेणेति परन्तपाः ॥७॥
[13] शकृत्तासां पवित्रार्थं [14]कुर्वीरन् देवमानुषाः।
तथा सर्वाणि भूतानि स्थावराणि चराणि च ॥८॥

---

1 A गोपालस्तुति:
2 I. O. ब्रह्मणाश्च
3 I. O पारो
4 I. O. reads the bracketed portion as एकं गोब्राह्मणं यज्ञि-तपो and A as एकांशो ब्राह्मण-श्च यस्तपो.
5 I. O. दान
6 I. O. गाव: पवित्र , A गाव पविता
7 I. O. पुष्टिश्च
8 A श्रद्धा०
9 A reads the bracketed portion as शतसूर्यसहस्राणां
10 I. O. ०निसृष्टाभि०
11 A ०र्गच्छम
12 A दोषं गति
13 I. O. सकृता च
14 A कुर्वीमन्देवमानुषा:

प्रदातारश्च [1]गोलोकान् गच्छेयुरिति [2]मानवाः ।
[3]एतद्वरं ददौ तासां सर्वमेव [4]पितामहः ॥९॥

तथा (३।३०६।४४-५२क) :—

अपामधस्ताल्लोको वै तस्योपरि महीधराः ।
[5]नागानामुपरिष्टाद्भूः पृथिव्युपरि मानवाः ॥१०॥
मनुष्यलोकादूर्द्ध्वं न्तु खगानां [6]गतिरुच्यते ।
आकाशस्योपरि रविर्द्वारं [7]स्वर्गस्य तत् [8]स्मृतम् ॥११॥
देवलोकः परस्तस्माद्ब्रह्मलोकस्ततः परः ।
[9][तत्रोपरि गवां लोको विष्णुलोकस्ततः परः ॥१२॥]
लोकस्त्वधो दुष्कृतीनां [10]नराणां पृथिवी मता ।
[खमस्थिराणां विषयः स्वर्गः सुकृतकर्मणाम् ॥१३॥][11]
ब्राह्मे तपसि युक्तानां ब्रह्मलोकः सनातनः ।
गवामेव हि गोलोको [12]दानारोहा हि सा गतिः ॥१४॥
एकान्तिनो [विष्णुभक्ता विष्णुलोकं व्रजन्ति ते][13] ।
[14]गोप्रदानरता यान्ति गोलोकं सर्वकामदम् ॥१५॥
तत्र कामफला वृक्षाः नद्यः पायसकर्दमाः ।
सुवर्णसिकताश्चान्या विमलाम्बुयुताः[15] शुभाः ॥१६॥
[16]यथाकामेप्सितास्तत्र भवन्ति [17]शुभकर्मणाम् ।
[18]देशाः मनोहराः शुभ्राः देवारामविभूषणाः ॥१७॥

---

1 A गोलोके
2 I. O. मामद्दा:
3 A एतद्वत्र'
4 A पितामहा:
5 I. O. नामानामुपविष्टाद्ध्:
6 I. O. पति॰
7 A सूर्यस्य
8 A कृतं
9 I. O. omits the bracketed portion
10 I. O. and V. D. कर्मिणां
11 V. D. omits the b. p.
12 I. O. and V. D. दुरारोहा
13 A reads the bracketed portion as विष्णुलोकं व्रजन्ति पुरुषो विभो:
14 I. O. and A गोप्रदानवता
15 Corrected from V. D. I. O. ॰ययुता:
16 A यथाकोमेप्सितास्तत्र, I. O. यथाकामेप्सिता' तत्र
17 A शुभधर्मणां
18 I. O. देशा, A देवा:

दिव्येन गीतनृत्येन वादित्रेण मनोहराः ।
तत्रेप्सितानां कामाना-[1]माप्तिर्भवति नित्यदा ॥१८॥

अथ परिभाषा ।

महाभारते :—

[2][न वधार्थं] प्रदातव्या [3][न कीनाशे न नास्तिके] ।
[4]न गोजीविने[5] दातव्या तथा गौर्भरतर्षभ ॥१॥

कीनाशे [कृषिवले ।

ददत् स तादृशानां वै नरो गां पापकर्मणाम् ।
अक्षयं नरकं यातीत्येवमाहुर्महर्षयः ॥२॥

विष्णुधर्मोत्तरे (३।३०६।७) :—

नैका बहूनां दातव्या न द्वयोर्द्विजपुङ्गवाः ।][6]
सा तु [7]विक्रयमापन्ना दातुर्नरकदायिनी ॥३॥

तथा (३।३०६।२२) :—

एकाश्च दशगुर्दद्याद्दश दद्याच्च [8]गोशती ।
शतं सहस्रगुर्दद्यात् [9]सर्वे तुल्यफला हि ते ॥४॥

[10]अथादेया [11][गौः ।

यो दद्यादुपयुक्तार्थं जीर्णां धेनुञ्च निष्फलाम् ।
तमः स प्रविशेद्दाता द्विजा क्लेशेन योजयेत् ॥१॥
कल्माषं ब्राह्मणे दत्वा दाता यात्यन्तिमां गतिम् ।
जीर्णनिर्मोकनिर्मुक्तः पन्नगेन्द्रः क्षितौ यथा ॥२॥

---

1 Corrected from V. D. I. O. ०मप्ति०; A ०मार्ति०
2 A निर्व्वाणार्थं
3 A reads the bracketed portion as कीतवे नास्तिकेन च
4 A omits it
5 I.O. गोजीविन दातव्या, A गोजीविनी प्रदातव्या
6 A omits the bracketed portion
7 I. O. नि:क्रय०
8 I. O. गोमत
9 A सर्व्व
10 A यथादेया
11 I. O. omits the bracketed portion

महाभारते (=वि. ध. ३।३०६।३ख-५क) :—]

हीनाङ्गी [1]क्षीरपा वृद्धा दुःखदोहा निरिन्द्रिया ।
व्याधिता विषमा [2]व्याला तथैव प्रपलायिनी ॥३॥
मूल्यैस्तथाप्यसंशुद्धैः क्रीता च द्विजपुङ्गवाः ।
न दातव्या [3]द्विजा [4]धेनुर्दत्त्वा नरकमाप्नुयात् ॥४॥

[5]आदित्यपुराणे :—

[6]उन्मत्तामङ्गहीनाञ्च [7]मृतवत्सां महाशनाम् ।
[8]केशचेलपुरीषास्थि -[9]क्रव्यादां [10]सन्धिनीं खलाम् ॥५॥
[11]पुटधेनुं [12]यमजसूं नित्यं [13]युगलितस्तनीम् ।
न दद्याद्ब्राह्मणेभ्यस्तु सदोष[14]-वृषभं [15]तथा ॥६॥

महाशनामति[16]-प्रचुरभक्षणशीलां [17][सन्धिनीम् ऋतुमतीं] [18]पुटधेनुं [19]दुर्निवारां [यमजसूं वत्सद्वयप्रसवशीलां][20] [21]युगलितस्तनीं संलग्नवृन्तद्वयाम्[22] ।

---

1 A क्षीरदा
2 A व्याल
3 A दत्ता
4 I. O. धेनुर्दत्त्वा, A धेनुं दत्त्वा
5 A omits it
6 I. O. उन्मत्तामङ्गहीना च, A उत्तमामङ्गहीनाञ्च
7 I. O. मृतवत्सां
8 I. O. केशवेल पुरीयास्थि
9 A द्रव्यानां
10 I. O. सन्धिनी
11 I. O. पटाधेनुं
12 A यमजसुं
13 A सम्वलितस्तनीं
14 A सदोष
15 A यथा
16 I. O. ०मिति०
17 A reads the bracketed portion as सन्धिनीं ऋतवा । तुमतीं, I. O. as सन्धिनीमृतुमती
18 I. O. पटाधेनुं
19 I. O. दुर्निवारं ; A दुनिवारां
20 A omits the bracketed portion
21 A सम्वलितस्तनीं
22 I. O. संलग्नस्तद्वयं

तत्रादावलङ्कृतगवीदानावर्तः । (४)

[1]सम्वर्तः :—

> यो ददाति शफै रूप्यैर्हेमश्रृङ्गीमरोगिणीम् ।
> सवत्सां वस्त्रसंयुक्तां [सुशीलां गां][2] पयस्विनीम् ॥१॥

शफैः खुरैः। वस्त्रसंयुक्तां वस्त्राच्छादिताम् ।

> यावन्ति तस्या रोमाणि सवत्सायाः [दिवं गतः][3] ।
> तावतो वत्सरानास्ते स गत्वा ब्रह्मणोऽन्तिके[4] ॥२॥

[5]अत्र यजमानो [6]गामुक्तलक्षणामुक्तोपकरणयुतां [7]सवत्सामभ्यर्च्यार्चिताय ब्राह्मणाय दद्यात् । अद्यामुक-[8][सगोत्रायामुक]-वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [9]सम्वर्तोक्त-गोदानफलप्राप्तिकामोऽहमेतां [10]रूप्यशफां हेमश्रृङ्गीं [11][सवत्सां गां ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गौरियं रुद्रदेवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं] दक्षिणामेतत्काञ्चनं ददानि । [12]प्रतिग्रहीता स्वस्ती-त्युक्त्वा गां [13]पुच्छे गृह्णीयात् । [14][अत्र दक्षिणाबाहुल्यात् [15]फलबाहुल्यमुन्नेयम्] ।

याज्ञवल्क्यः (१।२०४-५) :—

> [16]हेमश्रृङ्गैः [17]शफैरौप्यैः सुशीला [18]वस्त्रसंयुता ।
> [19][सकांस्यपात्रा दातव्या] [20]क्षीरिणी गौः सदक्षिणा ॥३॥

---

1 A omits it
2 I. O. reads the bracketed portion as सुशीलाञ्च
3 A reads the bracketed portion as शरीरतः
4 A ब्राह्मणोन्तिके
5 I. O. अत्र
6 I. O. गायुक्तलक्षणायुक्तोपकरणयुतां
7 A सवत्सा अर्चिताय
8 I. O. reads the bracketed portion as गोत्रामुक
9 A सम्वर्त्तोक्त
10 I. O. रूप्यखुरां
11 A omits the bracketed portion
12 I. O. ग्रहीत्वा
13 I. O. पृच्छे
14 A omits the bracketed portion
15 I. O. फलबाहुल्यादुन्नेया
16 A हैमश्रृङ्गी:, Yāj. हेमश्रृङ्गी
17 A सहैरौप्यैः
18 A वत्ससंयुता
19 A omits the bracketed portion
20 I. O. and A क्षिरिणी

दातास्याः स्वर्गमाप्नोति [वत्सरान् रोमसम्मितान्][1] ।
कपिला चेत्तारयति [2]भूयश्चासप्तमं कुलम् ॥४॥

गां बहुक्षीरामुक्तोपकरणयुता-[3]मभ्यर्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [4][धेनुरोम-समानसंख्यकाल]-स्वर्गप्राप्तिकामोऽहमेतां हेमश्रृङ्गीं रौप्यशफां [5]वस्त्रसंयुतां [6]सकांस्यपात्रां गां ददानि । [7][स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।] कपिलादाने तु याज्ञवल्क्योक्त-[8]कपिलागवीदानफलप्राप्तिकामोऽहमेतां कपिलां गामिति वाक्ये विशेषः । उभयतोमुखी-[9]दानवाक्ये याज्ञवल्क्योक्तोभयतोमुखीदानफलप्राप्तिकामोऽहमेतामुभयतोमुखीं गामिति विशेषः ।

तथा याज्ञवल्क्यः (१।२०६-७) :—

सवत्सा-[10]रोमतुल्यानि युगान्युभयतो-[11]मुखीम् ।
दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना [12]ददत् ॥५॥

पूर्वेणेति पूर्वोक्तगोदानविधिनेत्यर्थः ।

यावद्वत्सस्य पादौ द्वौ [13]मुखं योन्यां प्रदृश्यते ।
तावद् गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥६॥

बृहस्पतिः—

हेमश्रृङ्गीं रौप्यखुरां वस्त्र-[14]कांस्याज्यसंयुताम् ।
सवत्सां कपिलां दत्त्वा कुलान् सप्त समुद्धरेत् ॥७॥

कपिलामुक्तोपकरण-[15]युतामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । बृहस्पत्युक्तगोदानफलप्राप्तिकामोऽहमेतां हेमश्रृङ्गीं रौप्यखुरां वस्त्रकांस्याज्यसंयुतां[16] सवत्सां कपिलां [17]गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. reads the bracketed portion as वत्सरा रोमसम्मितान्, A as वत्सर only
2 I. O. भूय श्चासप्तम, A भूयमासप्तमं
3 I. O. ०मभ्यर्चितायार्चिताय, A! ०मर्चिताय only
4 A धेनूनामसमानसंख्याभोग्य for the bracketed portion
5 I. O. वस्त्रयुतां, A वत्ससंयुक्तां
6 I. O. कांस्यपात्रां
7 A omits the bracketed portion
8 I. O. कपिल०
9 I. O. ०दाने तु वाक्ये
10 A ०मामतुल्यानि
11 A ०मुखी
12 I. O. ददन्, A दद्यात्
13 A मुखा
14 A ०कांश्यादसंयुतां
15 A ०युक्तामर्चिताय, I.O. ०युतासमन्विताय
16 I. O. ०कांस्याद्यसंहितां, A ०कांश्यहिसंयुतां
17 A omits it

यमः—

रुक्मशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योपदोहनां[1] धेनुं [2]वस्त्रच्छन्नामलङ्कृताम् ॥८॥

[3]अलङ्कृतां हेमतिलकादिभिः ।

[4]दत्त्वा द्विजेन्द्राय नरः स्वर्गलोके महीयते ।
यावन्ति धेनुरोमाणि तावन्त्यब्दान्यसंशयः[5] ॥९॥
दशधेनुप्रदानेन तुल्यैका कपिला मता ॥१०॥

[6]धेनुमुक्तोपकरण-[7]युतामभ्यर्च्यार्चिताय विद्यातपोवृत्तसम्पन्नाय[8] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । धेनुरोम-[9]समानसंख्या-[10]ब्दसोत्कर्षस्वर्गप्राप्तिकामोऽहमेतां [11]रुक्मशृङ्गीं रौप्यखुरां मुक्ताभूषितलाङ्गूलां [12]कांस्योपदोहनां वस्त्रच्छन्नामलङ्कृतां [13]धेनुं ददानि । स्वस्त्यादिस्त्रोकारान्तं पूर्ववत् । कपिलादाने तु यमोक्तकपिलाधेनुदानफलप्राप्तिकामोऽहमेतां [14]कपिलां धेनुमिति वाक्ये विशेषः ।

महाभारते (अनु—७६।१४) :—

अपां फेनसवर्णान्तु सवत्सां कांस्यदोहनाम् ।
प्रदाय [15]वस्त्रसंवीतां वारुणं लोकमश्नुते ॥११॥

अपां फेनसवर्णां समुद्रफेनवर्णां[16] [सवर्णवत्सां गा][17]-मुक्तरूपामुक्तोपकरण-[18][युतामभ्यर्च्यार्चिताय] ब्राह्मणाय [19][ॐ अद्यादि] तुभ्यमन्तमुक्त्वा दद्यात् । वारुणलोकप्राप्तिकामोऽहमेतां [20]सवर्णवत्सां कांस्योपदोहनां [21]वस्त्राच्छादितां जलफेनसवर्णां गां ददानि । स्वस्त्यादि-

---

1 A कांस्योपदोहनं
2 A सवत्सामलङ्कृतां
3 A omits it
4 I. O. दद्याद्द्विजेन्द्राय
5 I. O. ०न्यसंशयं, A ०द्विसंशयः
6 I. O. धेनुं गायुक्तोपकरण०
7 A ०युक्तामभ्यर्चिताय
8 I. O. ०वृत्तसंपूर्णाय ; A व्रतपूर्णाय
9 A omits समान
10 I. O. ०ब्दसोत्कर्ष०
11 A रूप्यशृङ्गीं
12 A कांस्योपदोहां
13 I. O. धेनुं गां
14 I. O. कपिला
15 A वस्त्रसंवीतं
16 I. O. ०वर्णा
17 A सुवर्णवत्सा for the bracketed portion
18 A युतां तुभ्यमभ्यर्चिताय for the b. p.
19 A omits the bracketed portion
20 I. O. सुवर्णवत्सां
21 A समुद्रफेनवर्णां before this

स्वीकारान्तं पूर्ववत् । जलफेनसवर्णादित्रयोदशधेनुदानानां महाभारतोक्तानां समान-[वर्ण-वत्स][1]-प्रकरणत्वात् यत्रापि समानपदं नास्ति तत्रापि धेनुवत्सयोः समानवर्णत्वं[2] बोद्धव्यम् । तथाहि योजना सवत्सामपां फेन-[3]सवर्णां वत्ससहितैरपां फेन-[4]सवर्णैरित्यर्थः । एव-मन्यत्राप्युन्नेयम् ।

तथा (अनु—७६।२०) :—

पाण्डुकम्बल-[वर्णाभां सवत्सां कांस्यदोहनाम्][5] ।
[6][वस्त्रसंवीतगां दत्त्वा] साध्यानां लोकमश्नुते ॥१२॥

पाण्डुकम्बल-[7]वर्णां श्वेतलोहितवर्णां समानवर्णवत्सां गामुक्त-[8][रूपामुक्तो]-पकरणयुताम-भ्यर्च्यार्चिताय ब्राह्मणाय ॐ[9] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । साध्यलोकप्राप्तिकामोऽह-मेतां पाण्डुकम्बल-[10]वर्णाभां सवर्णवत्सां कांस्योपदोहनां [11]वस्त्रसंवीतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—७६।१५) :—

वातधेनुसवर्णान्तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां वायुलोके महीयते ॥१३॥

वातधेनुसवर्णां मलिनपिङ्गलां [12]सवर्णवत्सां गामुक्तरूपामुक्तोपकरणामभ्यर्च्यार्चिताय[13] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्ष-वायुलोक-प्राप्तिकामोऽहमेतां [14]सवर्ण-वत्सां [15]कांस्योपदोहनां वस्त्राच्छादितां वातधेनुसवर्णां[16] गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. वस्त्र for the bracketed portion
2 A ०पद्त्व
3 A ०सवर्णा, I. O. ०सवत्सां
4 I. O. and A ०सवर्णैरर्थः
5 I. O. reads the bracketed portion as वस्त्राभां वत्सां कांस्यो-पदोहनां
6 I. O. प्रदाय वस्त्रसम्वीतां for the bracketed portion
7 I. O.०वर्णां
8 A reads the bracketed portion as रूपां वस्त्रयुक्तो
9 A omits it
10 I.O. ०वस्त्राभां
11 A omits वस्त्र
12 A omits सवर्ण
13 I. O. ०करणयुक्तामभ्यर्च्यार्चिताय
14 A सवत्सां, I. O. सुवर्णवस्त्रां
15 A कांस्योपदोहां
16 A धेनुं सवर्णां

तथा (अनु—७६।१६) :—

हिरण्यवर्णां [1]पिङ्गाक्षीं सवत्सां [2]कांस्यदोहनाम् ।
प्रदाय वस्त्रसम्वीतां कौबेरं लोकमश्नुते ॥१४॥

समानवर्ण-[3]पिङ्गलाक्षवत्ससहितां गामुक्तरूपामुक्तोपकरणयुतामभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात् । कौबेरलोकप्राप्तिकामोऽहमेतां [4]हिरण्यवर्णां पिङ्गाक्षीं [5]सवर्णपिङ्गाक्षवत्ससहितां कांस्योपदोहनां वस्त्रसम्वीतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

पलालधूम्र[6]-वर्णान्तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसम्वीतां पितृलोके महीयते ॥१५॥ (अनु—७६।१७)

पलाल-[7]धूम्रवर्णां मलिन-[8]पाण्डुरां [9]सवर्णवत्सां गामुक्तप्रकारामुक्तोपकरणयुताम-भ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात् । सोत्कर्षपितृलोकप्राप्तिकामोऽ-हमेतां पलालधूम्र[10]-वर्णां सवर्णवत्सां[11] कांस्योपदोहनां वस्त्रसम्वीतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[12]वयोपपन्नां [13]नीलाङ्गीं सर्वरत्नसमन्विताम् ।
गन्धर्वाप्सरसां[14] लोकान् दत्त्वा प्राप्नोति मानवः ॥१६॥ (अनु—७६।२२)

[15]वयोपपन्नां तरुणीं [16]सवर्णवत्सामित्यध्याहार्य्यं प्रकरणात् । सर्वरत्नानि परिभाषोक्तानि ग्राह्याणि । [17]सवर्णवत्सां गामुक्तरूपामुक्तोपकरणयुतामभ्यर्च्यार्चिताय[18] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात् । [19]गन्धर्वाप्सरो-लोकप्राप्तिकामोऽहमेतां [20]सवर्णवत्सां [नीलाङ्गीं सर्वरत्नान्वितां][21] गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. पिङ्गलाक्षीं
2 I. O. कांस्योपदोहनां ; A कांस्योप-दोहनां
3 A पिङ्गाक्षीं for पिङ्गलाक्ष
4 I. O. हिरण्यवर्णां
5 A सवर्णां पिङ्गाक्षवत्सां
6 I. O. ०धूम०
7 I. O. ०धूम०
8 I. O. and A ०पाण्डरां
9 I. O. सवर्णवत्सां
10 I. O. ०धूम०
11 I. O. सवर्णवत्सां, A सवत्सां
12 A पयोपपन्नां
13 I. O. नीलाङ्गी
14 I. O. गन्धर्व्वाप्सरसान्
15 A पयोपपन्नां
16 A सुवर्णवत्सामित्याध्याहार्य्यं
17 A सुवर्णवत्सां
18 A ०युतामर्च्चिताय
19 A गन्धर्व्वाप्सरस०
20 A सुवर्णां वत्सां
21 A नीलां for the bracketed portion

तथा (अनु—७६।८) :—

समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्वीतां [ब्रह्मलोके महीयते][1] ॥१७॥

[2]सुव्रतां सुखदोह्यां कपिलामुक्तरूपामर्चयित्वार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षब्रह्मलोकप्राप्तिकामोऽहमेतां [3]सवर्णवत्सां वस्त्रसम्वीतां कपिलां [4]धेनुं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[5]तथा (अनु—७६।११) :—

समानवत्सां [6]श्वेताञ्च धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्वीतामिन्द्रलोके महीयते ॥१८॥

गामुक्तरूपामर्चयित्वार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षेन्द्रलोकप्राप्तिकामोऽहमेतां सवर्णवत्सां वस्त्रसम्वीतां [7]श्वेतां धेनुं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—७६।१२) :—

[8][समानवत्सां कृष्णान्तु] धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्वीतामग्निलोके महीयते ॥१९॥

धेनुं-[मुक्तरूपां][9]-मर्चयित्वार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षाग्निलोकप्राप्तिकामोऽहमेतां [10]सवर्णवत्सां वस्त्रसम्वीतां कृष्णां धेनुं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—७६।६) :—

रोहिणीं तुल्यवत्सान्तु धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्वीतां सूर्य्यलोके महीयते ॥२०॥

रोहिणीं लोहितां धेनुमुक्तरूपामर्चयित्वार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षसूर्य्यलोकप्राप्तिकामोऽहमेतां रोहिणीं [11]तुल्यवर्णवत्सां वस्त्रसंवीतां धेनुं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A ब्रह्मलोकमवाप्नुयात् for the bracketed portion
2 A omits it
3 A सवत्सां
4 A धेनु, I. O. श्वेतधेनुं
5 I. O. omits it
6 I. O. श्वेतान्तु
7 I. O. omits it
8 I. O. reads the bracketed portion as समानवर्णां कृष्णाया
9 I. O. reads the bracketed portion as रूपमुक्ता
10 A सुवर्णवत्सां
11 A तुल्यवत्सां

[1][समानवत्सां धूम्रान्तु] धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसम्वीतां याम्यलोके महीयते ॥२१॥ (अनु—७६।१३)

धूम्रां कृष्णलोहितच्छविं धेनु-[2]मुक्तरूपामर्चयित्वार्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात् । सोत्कर्षयाम्यलोकप्राप्तिकामोऽहमेतां सवर्णवत्सां [3]वस्त्रसंवीतां [4][धूम्रधेनुं गां] ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् ।

तथा (अनु—७६।१६) :—

समानवत्सां गौरीन्तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां वसूनां लोकमश्नुते ॥२२॥

गौरी-[5]मतिपीतवर्णां गामुक्तरूपामर्चयित्वार्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतां सवर्णवत्सां वस्त्रसंवीतां गौरीं धेनुं [6]गां ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् ।

तथा (अनु—७६।१०) :—

समानवत्सां [7]शवलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां सोमलोके महीयते ॥२३॥

[8]शवलां नानावर्णां गामुक्तरूपामर्चयित्वा-[9]र्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षसोमलोकप्राप्तिकामोऽहमेतां सवर्णवत्सां वस्त्रसंवीतां [10]शवलां धेनुं[11] गां ददानि । [12][स्वस्त्यादिस्त्रीकारान्तं पूर्ववत्] ।

तथा (अनु—७६।१८) :—

सवत्सां पीवरीं दत्त्वा [13]दृतिकण्ठामलङ्कृताम् ।
वैश्वदेवमसम्बाधं[14] स्थानं श्रेष्ठं प्रपद्यते ॥२४॥

---

1 A reads the bracketed portion as ब्राह्मणाय धूम्रवर्णां
2 A omits मुक्त
3 A वस्त्रमतां
4 I. O. धेनुगां, A धूम्रधेनुं
5 I. O. मभि for मति
6 A omits it
7 I. O. शरलां, A सवर्णां
8 A सवलां, I. O. शरलां
9 A omits °र्च्चिताय
10 A सवलां, I. O. शरलां
11 A omits धेनुं
12 A omits the bracketed portion
13 I. O. दृति°
14 A °पन्नाधं

अलङ्कृतां यथाशक्ति हैमतिलकादिभिः। पीवरीं स्थूलदेहां [1]दृतिकण्ठां चर्मपट्टिकावेष्टित-[2]कण्ठाम्। स्थूलवत्सां [3]गामुक्तरूपामर्चयित्वार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। असम्बाध-श्रेष्ठवैश्वदेवस्थानप्राप्तिकामोऽहमेतां समानवत्सां [4]दृतिकण्ठामलङ्कृतां धेनुं [5]गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

कपिलायाः प्रदानेन मुच्यते नात्र संशयः।
तस्मादलङ्कृतां दद्यात् [6][कपिलां गां] द्विजातये ॥२५॥

अलङ्कृतां हैमतिलकादिभिः।

श्रोत्रियाय दरिद्राय गृहस्थायाग्निहोत्रिणे।
पुत्रदाराभि-[7]सक्ताय तथा ह्यनुपकारिणे ॥२६॥

गामुक्तरूपामर्चितां यथोक्तरूपाय ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मुक्तिप्राप्तिकामोऽहमेतां कपिलामलङ्कृतां धेनुं गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—५७।२८-२९) :—

प्रयच्छते यः कपिलां सचेलां कांस्योपदोहां कनकाग्रशृङ्गीम्।
तैस्तैर्गुणैः कामदुघा हि भूत्वा नरं प्रदातारमुपैति सा गौः ॥२७॥
यावन्ति रोमाणि भवन्ति धेन्वास्तावत् फलं प्राप्य स गोप्रदाता।
पुत्रांश्च पौत्रांश्च [8]कुलञ्च सर्वमासप्तमन्तारयते परत्र ॥२८॥

कपिलां[9]सवत्सामुक्तरूपामभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-[10]कनकशृङ्ग-कपिलादानफलप्राप्तिकामोऽहमेतां [11]सचेलां कांस्योपदोहां कनकाग्रशृङ्गीं [12][सवत्सां कपिलां] धेनुं गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. दृति०
2 A ०कथां
3 A omits गा
4 I. O. दृति०
5 A omits गां
6 I. O. reads the bracketed portion as कपिलाम्
7 A ०सक्ताय, I. O. ०भूताय
8 I. O. कुलं हि
9 A omits स
10 A कनकशृङ्गी
11 A omits it
12 A सवत्सां for the bracketed portion

तथा (cf. अनु—५७।२८) :—

प्रयच्छते यः कपिलां [1]सचेलां कांस्योपदोहां [2]द्रविणोत्तरीयैः ।
तैस्तैर्गुणैः कामदुघा हि भूत्वा नरं[3] प्रदातारमुपैति सा गौः ॥२६॥

[4]द्रविणोत्तरीयैरिति द्रविणैर्यथाशक्ति सुवर्णेन वस्त्रत्रयेण च सहिताम् ।

यावन्ति रोमाणि भवन्ति धेन्वास्तावत् फलं प्राप्य स गोप्रदाता ।
पुत्रांश्च पौत्रांश्च कुलञ्च सर्वमासप्तमन्तारयते परत्र ॥३०॥
(अनु—५७।२६, cf. वन—१८६।१२)

कपिलां धेनुमुक्तरूपामभ्यर्च्यार्चिताय ब्राह्मणाय [5][अद्यादि] तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-सोत्तरीयकपिलादानफलप्राप्तिकामोऽहमेतां सचेलां कांस्योपदोहां [6]समानवत्सां [7]द्रविणोत्तरीयैर्युक्तां कपिलां धेनुं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

आग्नेयपुराणे :—

अर्चयित्वा पुरा [8][गां वै] [9]गोरसैस्तत्रगेऽहनि ।
[10]वत्सैः [11]पीतां ततो दद्यात्तर्पितां [12]नृपसत्तम ॥१॥

[13]तत्रगेऽहनि दानदिनपूर्वतरदिने । [14]वत्सैरिति जात्याख्यायामेकस्मिन् बहुवचनम् ।

कृतोपवासः संप्राश्य पञ्चगव्यं नरेश्वर ।
घृतक्षीराभिषेकञ्च कृत्वा विष्णोः समाहितः ॥२॥
समभ्यर्च्य च गोविन्दं पुष्पादिभिररिन्दम ।
उदङ्मुखीमर्चयित्वा तथा पृथ्वीं पयस्विनीम् ॥३॥

पृथ्वीं पृथुदेहाम् ।

वस्त्राभरणसंवीतां सितयज्ञोपवीतिनीम् ।
[15]स्वर्णशृङ्गीं रूप्यखुरां हिरण्योपरि संस्थिताम् ।

---

1 I. O. omits it
2 I. O. द्रविणैरुत्तरीयैः
3 A नरः
4 I. O. द्रविणैरुत्तरीयैरिति
5 A दद्यादि for the bracketed portion
6 I. O. omits it
7 I. O. द्रविणोत्तरीययुक्तां
8 A गां and I. O. [illegible] for the b. p.
9 I. O. गोवत्ससत्रगेऽहनि, A गोरसैस्तत्रयेऽहनि
10 I. O. वत्सः
11 I. O. पीतास्मि
12 A नृपसत्तमः, I. O. [illegible]
13 I. O. तत्रयेऽहनि, A तत्रगेऽहनि
14 I. O. रत्नैरिति
15 I. O. सुवर्णशृङ्गीं

[1]वस्त्राभरणसंवीतामिति वस्त्रेणाभरणेन च[2] यथाशक्ति तिलकादिना अलङ्कृताम् ।

[3]सुवर्णं वाचयित्वाग्रे [4]ब्राह्मणायोपपादयेत् ॥४॥

[5]इमां त्वं [6]प्रतिगृह्णीष्व [7]गोविन्दो [8]गोप्रियङ्करः ।

[9]पापानामपनोदाय [10]गोविन्दः प्रीयतामिति ॥५॥

इमां [11]त्वमित्यादि मन्त्रमग्रे वाचयित्वा पठित्वा [12]गां प्रतिपादयेत् । [13]सुवर्णं दक्षिणारूपमित्यर्थः ।

[14]सम्यगुच्चार्य तं विप्रं गोविन्दं नृप कल्पयेत् ।

या धेनुः [15]कश्यपस्यासीदत्रेर्वा गौतमस्य च ॥६॥

सा [16]निकामफला देवी इह लोके परत्र च ।

अनुव्रजेच्च गच्छन्तं [17]पादान्यष्टौ नराधिप ॥७॥

या धेनुः कश्यपस्यासीदित्यादि[18] मन्त्रं सम्यगुच्चार्य ब्राह्मणं गोविन्दरूपं ध्यात्वा तं गच्छन्तमष्टौ [19]पादान्यनुव्रजेदिति[20] सम्बन्धः ।

अनेन विधिना धेनुं यो विप्राय प्रयच्छति ।

गोविन्दप्रीणनाद्राजन् विष्णुलोकं स गच्छति ॥८॥

सप्तावरान् सप्तपूर्वानात्मानं चैव मानवः ।

संसारसागरात् सद्यो [21][मोचयत्येव निश्चयम्] ॥९॥

[22]अश्वमेधसहस्रस्य [23]गोसवस्य च मानवः ।

फलं प्राप्नोति राजेन्द्र विधानेन न संशयः ॥१०॥

---

1 A ष्णाभरण०
2 A omits it
3 A सुवर्ण
4 A ब्राह्मणाय उपपादयेत्, I. O. ब्राह्मणोपपादयेत्
5 A उमां
6 I. O. प्रतिग्रह्णीषु, A प्रतिग्रह्णीय
7 A गोविन्दा
8 I. O. गोविप्रयङ्करः, A गाः प्रियङ्कर
9 I. O. मम मायापनोदाय, A पापापपापनोदाय
10 A गोविन्दाः
11 I. O. भूमिमित्यादि०
12 A मां
13 A सुवर्ण
14 A सम्यगश्चिंताय
15 I. O. कस्यपस्यासीदत्रेर्व्वा, A कस्यपस्यासीदातुर्व्वा
16 A निगमफला
17 I. O. पदान्यष्टौ
18 A ०दिना
19 I. O. पदा०
20 I. O. व्रजेदित्यथः
21 I. O. मोचयत्यवनीपते for the b. p.
22 I. O. पदे पदे तं यज्ञस्य
23 A गोरसस्य

सर्वकाम-[1]प्रदास्ताश्च सर्वकालञ्च[2] पार्थिव[3] ।
धेनवः पापनोदाश्च यावदिन्द्राश्चतुर्दश ॥११॥
सर्वेषामेव [4]पापानां कृतानामविजानता[5] ।
प्रायश्चित्तमिदं प्रोक्तमनुतापोपबृंहितम् ॥१२॥
इक्ष्वाकुणैषा राजेन्द्र पुरा दत्ता महात्मना ।
[6]प्रज्ञावता [शुभा लोकाः][7] प्राप्ता [8]राजन्महीतले ॥१३॥
[9][तथैवान्यैर्महीपालैर्नृप वैश्यादिभिस्तथा ।
लोकाः कामदुहः प्राप्ता दत्त्वैतद्विधिना नृप] ॥१४॥

अत्र दानात् पूर्वतरदिने प्रातः कृतनित्यो गां स्थूलदेहां [10]बहुदुग्धां [11]क्षीरघृतादिभिरभ्यर्च्य [12]घटिकाधिकप्रहरत्रये [13][हविष्यं भुक्त्वाचम्य] शुचौ देशे उपविश्य पादौ [14]प्रक्षाल्याचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः 'ॐ सूर्यः सोमो यमः कालः पञ्चभूतानि आग्नेयपुराणोक्त-सोपवास-गोदानकर्म [मया कर्तव्य'मित्युक्त्वा][15] उदङ्मुखो गृहीतोदपूर्णताम्रपात्रः सङ्कल्पं कुर्यात् । 'ॐ श्वः पञ्चगव्यप्राशनपूर्वकमुपोष्यापरदिने आग्नेयपुराणोक्त-वासुदेव-घृतक्षीरस्नपन-पूजापूर्वकगोदानकर्माहं करिष्ये' । ततो नियमेन सुप्त्वा परदिने [16]कृतनित्यः पञ्चगव्यं [17]प्राश्योपोष्यापरदिने कृतनित्यो वासुदेवप्रतिमां घृतक्षीराभ्यां स्नपयित्वा बहुपूजोपचारैर्यथाशक्ति संपूज्य गां वत्सपीतस्तन्यां [18]घासादिना सन्तर्प्य सुवर्णश्रृङ्गीं रूप्यखुरां सौवर्णपलचतुष्टयार्पित-[19][खुरचतुष्टयां कृत्वा] वस्त्रेणाच्छाद्य यथाशक्ति हेमतिलकादिनालङ्कृत्य सितयज्ञोपवीतं परिधाप्य उदङ्मुखीं कृत्वाऽभ्यर्च्यार्चिताय ब्राह्मणाय ॐ इमां त्वमित्यादिमन्त्रं पठित्वा अद्यादि तुभ्य-

1 I. O. प्रदाता च
2 A सर्व्वकामञ्च
3 I. O. पार्थिवः
4 A सोपानां
5 A ०जानतां
6 I. O. यशी यज्ञे
7 A सुभा लोका for the b. p.
8 A राजा मह्यीयते
9 A omits the bracketed portion
10 A बहुदुग्ध, I. O. बहुदुघां
11 A क्षीरघृतादिभिरभ्यर्च्चय, I. O. क्षीरादिभिरभ्यर्च्य
12 I.O. घटिकाद्दिक and A घटिकाय for घटिकाधिक
13 I. O. हविष्य दत्वाचम्य for the bracketed portion
14 I. O. प्रक्षाल्य
15 A omits the bracketed portion
16 A कृतनित्यकृत्यः
17 A प्राश्यापरद्दिने
18 A घासादीनां
19 A सुखं चतुष्टया for the b. p.

मन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-[1]गोविन्दस्नपनपूजापूर्वकगोदानफलप्राप्तिकामोऽहमेतां वस्त्राभरणसंवीतां सितयज्ञोपवीतिनीं सुवर्णशृङ्गीं [2]रूप्यखुरां हिरण्योपरि [3]संस्थितां धेनुं गां ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् । ततो यजमानः ॐ या धेनुरित्यादिमन्त्रं पठित्वा गोविन्दोऽयं मयि [4][प्रीतो यातीति [5]ध्यायन् तं] ब्राह्मणमष्टौ पदान्यनुव्रजेत् ।

तथा :—

समानवत्सां कपिलां सचेलां कांस्योपदोहां कनकाग्रशृङ्गीम् ।
तैस्तैर्गुणैः कामदुघा हि भूत्वा नरं प्रदातारमुपैति सा गौः ॥१५॥

समानवत्सां [6]कपिलवत्सां सचेलां [7]वस्त्राच्छादितां गा-[8]मुक्तरूपामुक्तोपकरणयुतामभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-[9]कपिलगवीदानफलप्राप्तिकामोऽहमेतां [10]समानवत्सां कपिलां [11]सचेलां कांस्योपदोहां कनकाग्रशृङ्गीं [12]गां ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् । उभयतोमुखीदाने तु दानवाक्ये आग्नेयपुराणोक्तोभयतोमुखीदानफलप्राप्तिकामोऽहमेतां सचेलां कांस्योपदोहां कनकाग्रशृङ्गीमुभयतो-[13][मुखीं गामिति] विशेषः ।

तथा [14]ह्याग्नेयपुराणम् :—

यावद्वत्सस्य पादौ द्वौ शिरश्चापि [15]प्रदृश्यते ।
तस्मिन् काले प्रदातव्या विधिना द्विजसत्तम ॥१६॥

विधिना [16]कपिलादानोक्तविधिनेत्यर्थः ।

अन्तरीक्षस्थितो वत्सो यावद्योन्यां प्रदृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥१७॥
यावन्ति [17]तस्या रोमाणि वत्सस्य च नराधिप ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१८॥

---

1 I. O. omits गोविन्द
2 I. O. रौप्यखुरां
3 I. O. संस्थां
4 A प्रीति for the bracketed portion
5 A ध्यायन । ॐ, I. O. ध्मापमयान्तं
6 A कपिलां वत्सां
7 A वस्त्राच्छादितां
8 A omits ०मुक्तरूपा०
9 A कपिलां
10 A omits it
11 A omits it
12 A omits it
13 A मुखीमिति for the b. p.
14 I. O. चाग्नेयपुराणं
15 I. O. न दृश्यते
16 A omits कपिला
17 I. O. तस्य

मत्स्यपुराणे (२०५।२-९) :—

[1]रुक्मशृङ्गीं रूप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योपदोहनां राजन् [2]सवत्सां [3]द्विजपुङ्गवम् ।
[4]प्रसूयमानां गां दत्त्वा [5]महत् पुण्यफलं लभेत् ॥१९॥
यावद्वत्सो योनि-[6][गतो यावद्]-गर्भं न मुञ्चति ।
[7][तावद्गौः[8] पृथिवी ज्ञेया सशैलवनकानना ॥२०॥]
प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ।
ससमुद्रगुहा तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥२१॥
यावन्ति [9]धेनो रोमाणि वत्सस्य च नराधिप ।
तावत्-[10]संख्यानब्दगणान् देवलोके महीयते ॥२२॥
[11]पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
उद्धरिष्यत्यसन्देहो[12] नरकाद्भूरिदक्षिणः ॥२३॥
घृतक्षीरवहाः कुल्या दधिपायसकर्दमाः ।
[13]यत्र तत्र गतिस्तस्य [14]भवेच्चेप्सितकामदा ।
गोलोकः सुलभस्तस्यब्रह्मलोकश्च [15]पार्थिव ॥२४॥
स्त्रियश्च तं चन्द्रसमान-[16]वक्त्राः प्रतप्तजाम्बुनदतुल्यरूपाः[17] ।
महानितम्बास्तनु[18]-वृत्तमध्याः [19]सेवन्त्यजस्रं [20]नलिनाभनेत्राः ॥२५॥

1 I. O. and A रूप्य०, M. P. स्वर्ण०
2 I. O. सवत्सा
3 I. O. and M. P. द्विजपुङ्गवे
4 A अप्रसूयमानां
5 A स तत्
6 I. O. गतस्तावद् for the bracketed portion
7 I. O. omits the bracketed portion
8 M. P. ०वै
9 A and M. P. धेनुरोमाणि
10 A संख्यां च्चयगणान, I. O. संख्या-न्युपगमाद्, M. P. संख्यं युगगणं
11 A पितृ
12 M. P. ०सन्देहान्
13 I. O. सक
14 A भवेद्देप्सित०, M. P. द्रुमा-मृतं प्सित०
15 A पार्थिव:
16 I. O. ०वर्णाः
17 I. O. ०तल्यरूपा:
18 I. O. मध्य० for तनु०
19 M. P. भजन्त्य०
20 I. O. पद्मिनाभनेत्रा:

अत्र द्रविणसंयुतामिति श्रवणात् सुवर्णशृङ्गाद्यतिरिक्त-[1][सुवर्णदानं भूरिदक्षिणा इति श्रवणाच्च यथाशक्ति विस्तरा दक्षिणा देया। तदत्र यदा गौः प्रसूयमाना दृश्यवत्सावयवा भवति, तदा तां पूर्वोत्पन्नवत्ससहितां सुवर्णशृङ्गाद्युक्ता]-लङ्कारसहिता-[2]मर्चितामर्चिताय विद्या-तपोवृत्त-[3]सम्पन्नाय ब्राह्मणाय[4] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मत्स्यपुराणोक्त-प्रसूयमान-गवीदानफलप्राप्तिकामोऽहमेतां रुक्मशृङ्गीं रौप्यखुरां मुक्ताभूषितलाङ्गूलां कांस्योपदोहनां द्रविण-संयुतां सवत्सां प्रसूयमानां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

यो नरो गां प्रयच्छेत सवत्सां कांस्यदोहनाम्।
हेमशृङ्गीं रौप्यखुरां दुकूलक्षौमवाससाम् ॥१॥

दुकूलं [5]पट्टवस्त्रं क्षौमं क्षुमाभवं वस्त्रम्।

शय्यास्तरण-[6]सम्पन्नां [7]बहुपुष्पफलैर्युताम्।
ब्राह्मणांस्तर्पयित्वाग्रे गन्धमाल्यैरलङ्कृतान्[8] ॥२॥
दानकाले ततस्तस्याः [9]सुरा गात्रेषु संस्थिताः।
[10][ब्रह्मा तस्याः स्थितो मूर्ध्नि शक्रो यानं समाश्रितः।
चन्द्रादित्यौ ततो नेत्रे घ्राणे वायुः प्रतिष्ठितः ॥३॥
मुखं तस्याः श्रितो[11] वह्निर्जिह्वां सोमः स्वयं प्रभुः।
कर्णयोस्तु दिशः सर्वाः शिरो रुद्राः समाश्रिताः ॥४॥]
पादयोर्लोकपालाः स्युः [12]सर्वास्थीनि च पर्वताः।
[13][समुद्राः सप्त जठरे ग्रीवायां तपनाः श्रिताः।
साक्षां गङ्गा सरिच्छ्रेष्ठा पार्श्वौ तु वसवः शुभाः ॥५॥

---

1 A omits the bracketed portion
2 A omits ०मर्चिता०
3 A ०समनुयाय
4 A ब्राह्मणाय before विद्यातपोवृत्त०
5 I. O. जर्णावस्त्रं
6 I. O. ०सम्पन्नं
7 I. O. बहुपुष्पफलैर्युतां ; A रक्तपुष्पसमन्वितां
8 A ०कृतां
9 I. O. सुरा गात्राणि ; A सर्वगात्रेषु
10 A omits the bracketed portion
11 I. O. स्मृतो
12 A सर्वस्थानि
13 A omits the bracketed portion

प्रजापतिरुपस्थश्च मूत्रं तीर्थानि सर्वशः ।
पुरीषन्तु [1]विभुस्तस्या नासा×××संस्थिताः ॥६॥]
साध्या [2]विश्वेऽथ लोकाश्च [3]पुच्छमाश्रित्य [4]संस्थिताः ।
मन्त्रा यज्ञाश्च दानानि नियमा ऋषिभिः सह ॥७॥
नक्षत्राणि [5]ग्रहाश्चैव ताराुरूपाणि यानि च ।
गायत्री चैव [6]त्रिष्टुभ् [7]जगतीं [8]पंक्तिरेव च ॥८॥
[9]अनुष्टुभ् ऋग्यजुश्चैव सामान्यथर्वणस्तथा ।
लोकस्य[10] मातरश्चैव मघावर्षमथापि [11]वा ॥९॥
धर्मो नारायणश्चैव भूतानि सरितस्तथा ।
[12]रोमाणि तस्याः संश्रित्य [13]तस्या [14]देवा व्यवस्थिताः ॥१०॥
यक्षाश्च राक्षसाश्चैव तथा चाप्सरसः शुभाः ।
गन्धर्वाश्च महात्मानो ये चान्येऽप्येवमादयः ॥११॥
तस्या [15]विषाणयोर्मध्ये सर्व एव समाश्रिताः ।
फलानि यज्ञदानानां गतयश्च पृथग्विधाः ॥१२॥
[16]वत्सं समाश्रिताः सर्वे सर्वदेवमयं शुभम् ।
[17]देवैरध्यासितां तान्तु सर्वलोकनमस्कृताम् ॥१३॥

ध्यात्वेति शेषः ।

विप्रेभ्यो [18]मन्त्रमुच्चार्य्य प्रदद्यात् सुसमाहितः ।
कुशान् सुवर्ण-[19]बीजांश्च तिलान् [20]सिद्धार्थकांस्तथा ।
प्रदद्यात्तां ततोऽद्भिश्च मन्त्रेणानेन सुव्रत ॥१४॥

---

1 I. O. विभूतस्या
2 I. O. विश्वे च
3 A पुच्छाश्रित्य
4 A संश्रिताः
5 A ग्रहाश्चैव ; I. O. महांश्चैव
6 I. O. त्रिष्टभ, A तृष्टुप
7 I. O. जगतीं
8 A पुक्तिरेव
9 A अनुष्टुप ; I. O. अथष्टुद
10 A लोकपा
11 I. O. च
12 I. O. रूपाणि
13 I. O. तस्य
14 A देवा
15 A विषाणयोर्वत्स
16 A वत्सां
17 I. O. देवैरध्यासिताद्यान्तु ; A देवव्युध्यासितातान्तु
18 I. O. मन्त्रवचसे
19 A ०बीजानि
20 I. O. सिद्धार्थकास्तथा

प्रदद्यात्तां तत इति ततो ब्राह्मणत्रयहस्ते कुशसुवर्णादिके दत्ते [1]गामन्यस्मै ब्राह्मणाय दद्यादित्यर्थः ।

सर्वदेवमयीं [2]दोग्ध्रीं सर्वलोकमयीं तथा ।
सर्व-[3]लोकनिमित्ताय [4]सर्वलोकाभयाय च ।
प्रयच्छामि महाभागामक्षयाय शुभाय गाम् ॥१५॥
एवं दत्त्वा स तां गान्तु यत्र यत्राभिजायते ।
तत्र तत्र गता सा तु [5]तन्तु तारयते भयात् ॥१६॥
तथा [6]कामदुघा चैव सर्वलोक-[7]प्रदा तथा ।
सर्वदानफला चैव [8]सर्वयज्ञफला तथा ॥१७॥
सर्वलोकांस्तथा गत्वा रमते च [9]यथामरः ।
इह जातश्च[10][तामेव कामगां स प्रपद्यते] ॥१८॥
[11][स तदा मानुषे लोके गोसहस्री महायशाः] ।
[12][धनवान् रूपवांश्चैव बहुपुत्रश्च] जायते ॥१९॥

गां सवत्सामुक्तोपकरणयुतां कृत्वा ब्राह्मणत्रयं गन्धमाल्याभ्यामलङ्कृत्य वस्त्रादिना सन्तर्प्य [13][प्रत्येकं तेषां हस्ते] सुवर्णं कुशान् तिलान् [14]श्वेतसर्षपान् यथालाभं धान्यादि [15]शस्यश्चामन्त्रकमेव दत्त्वा गाञ्च यथोक्तसर्वदेवमयीं[16] ध्यात्वाभ्यर्च्य ॐ सर्वदेवमयीमित्यादि [17]पठित्वा अर्चितायापरब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [18]स्कन्दपुराणोक्तालङ्कृतगवीदानफलप्राप्तिकामोऽहमेतां सवत्सां कांस्यदोहनां हेमशृङ्गीं रूप्यखुरां दुकूल-[19]क्षौम-

---

1 A गामद्भ्यस्मै
2 A दोग्धीं
3 I. O. ०लोकानिमित्ताय
4 I. O. सर्व्वलोकभयाय, A सर्व्वलोकभयाय
5 A अन्तु
6 I. O. कामदुहा
7 I. O. ०पदा
8 A सर्व्वज्ञानफला
9 A यथारमः
10 I. O. तामिकामपां संप्रतिपद्यते for the bracketed portion
11 I. O. अन्यथा मानुषो जातो गोसहस्री महाबल: for the bracketed portion
12 A रक्तवस्त्रपरश्चैव रक्तप्रदश्च for the bracketed portion.
13 A प्रत्येकस्तेषां for the bracketed portion
14 A सर्षपान्
15 I. O. मन्यथा for शस्यश्च
16 I. O. ०देवतामयीं
17 A पाद्याद्यर्चिताया०
18 I. O. स्कन्दपुराणोक्तोभयमुखालङ्कृत०
19 I. O. omits क्षौम

वस्त्राच्छादितां शय्यास्तरण [1]बहुपुष्पफलयुतां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। उभयतोमुखीदानवाक्ये तु जातिस्मरत्वप्राप्तिकामोऽहमेतामुभयतोमुखीमिति [2]निवेशो विशेषः। सवत्सामिति[3] चोभयतोमुखीदानवाक्येऽपि[4] न खण्डनीयम्।

तथाहि स्कन्दपुराणम् :—

प्रसूयमानां यो गान्तु दद्यादुभयतोमुखीम्।
यथोक्तेन विधानेन स जातिस्मरतां लभेत् ॥२०॥

यथोक्तेनेति पूर्वधेन्वा[5] विधानेन इत्यर्थः।

[6]वराहपुराणे (२०५।२४-२५) चित्रगुप्त-[7]वाक्ये :—

तरुणी क्षीरसम्पन्ना गौः सुवर्णमयी[8] शुभा।
सवत्सा [9]क्षौमवासाश्च [10][स्वर्गं याति महामनाः] ॥२१॥

सुवर्णमयी [11]बहुसुवर्णालङ्कृता यथाशक्ति [12]बहुसुवर्णघटिततिलकाद्यलङ्कृतेति यावत्। शुभा [13]सल्लक्षणोपेता क्षौमवासाः क्षुमाभववस्त्राच्छादिता।

अस्य लेखं मया दृष्टं तिस्रः कोट्यस्त्रिविष्टपे।
[[14]ऋषीणां [15]प्रचुयतश्चैव समृद्धे][16]जायते कुले ॥२२॥

गामुक्तरूपां सवत्सामुक्तोपकरणयुतामभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। वराहपुराणोक्तालङ्कृतगवीदानफलप्राप्तिकामोऽहमेतां [17]सुवर्णमयीं सवत्सां क्षौमवाससां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[18]आदिपुराणे :—

गां दद्याद्वेद-[19]पूर्णाय विप्राय गृहमेधिने।
सुवर्णालङ्कृतशृङ्गीं वस्त्रघण्टासमन्विताम्।
[20]प्रत्यग्रां त्रिःसमृद्धान्तु ललाटतटदर्पणाम् ॥२३॥

---

1 A ०रक्त०
2 A निवेशाद्धि
3 A सवत्सा
4 A तु
5 I. O. ०धेनु
6 I. O. omits it
7 I. O. ०गुप्तवाक्ये
8 Varāha P. सुवर्णयुता
9 Varāha P. क्षौमवासाश्च
10 I. O. याति तेन महात्मना for the bracketed portion
11 A रत्न for बहु, I. O. omits it
12 A रत्नसुवर्णघटिततिलकाद्यलङ्कृत इति
13 A लक्षणोपेता
14 A ऋषीणां
15 A पृष्ठतश्चैव
16 Varāha P. स्वर्गात् परिच्युतश्चापि ऋषीणां for the b. p.
17 A omits it
18 I. O. आदित्यपुराणे
19 A ०पुराय
20 A प्रत्यग्रां

[1]प्रत्यग्रां [2]नवतरुणीं त्रिःसमृद्धामिति मत्स्यपुराणोक्त-[3]सलक्षण-[4]बहुत्रयग्रहणम् ।

[5][तथा मत्स्यपुराणम् (२०७।१०-१२) :—]

[6][उरः पृष्ठं] [7]शिरःकुक्षी[8] श्रोणी च वसुधाधिप ।
[9]षडुन्नतानि धेनूनां पूजयन्ति विचक्षणाः ॥२४॥
[10][कर्णौ नेत्रे ललाटञ्च] पञ्च[11]भास्करनन्दन ।
समायतानि[12]शस्यन्ते [13][पुच्छं सास्ना च सक्थिनी ॥२५॥]
चत्वारश्च[स्तना राजन् ज्ञेया ह्रस्वा]][14] मनीषिभिः ।
शिरोग्रीवाऽऽयताश्चैते[15] भूमिपाल दश स्मृता ॥२६॥

[16][श्रवणपुच्छादीनि च पञ्चदश] सङ्कीर्त्य समायतानीति योज्यम् । समानि चायतानि च [17]समायतानि यथासंख्यं सम्बन्धः । तदेवं [18][समता मावयवा] पञ्च समा दश चायता इति [19]बहुत्रयम् ।

[20][रजतच्छन्नचरणां मुक्तालाङ्गूलभूषिताम् ।]
कांस्योपदोहां [21]तृप्ताञ्च [22]लवणान्नतृणोदकैः ॥२७॥

---

1 A प्रत्यग्रां
2 A नरभर्णों
3 A सलक्षण
4 A बहुत्रयग्रहणं ; I. O. बहुत्रय-लक्षणं
5 A omits the bracketed portion
6 I. O. उरः पृष्ठः for the bracketed portion
7 A शिर
8 I. O. कुक्षं, A कक्षी
9 A षड उन्नतानि
10 I. O. reads the bracketed portion as कर्णौनेत्रोललाटञ्च and A as कर्णं नेत्रे ललाटे च
11 Corrected from M. P. I. O. भास्करनन्दन and A स्य सुवमानसा
12 Corrected from M. P. I. O शस्यन्ते ; A शस्यन्ति
13 Corrected from M. P. I. O. पुच्छसास्ना च सक्थिनी ; A पुच्छसास्या-वसक्थिनी
14 Corrected from M. P. I. O. तुरारा जन्मेत्रमष्टौ ; A स्तना राजान-वमष्टौ
15 Corrected from M. P. I. O. and A ॰युनस्त्वेते
16 I. O. omits the bracketed portion
17 A omits it
18 A समता सवयवा: and I. O. षडमता अवयवा:
19 A बत्रयहय
20 A रजताच्छन्नमुक्ताफलालाङ्गूलभूषितां for the bracketed portion
21 A तृप्ताञ्च ; I. O. पृष्टाञ्च
22 A लवणान्नतृणोदकैः ; I. O. लवणा-न्नतृणोदकैः

गवां पुच्छं गृहीत्वा [1][तु ससुवर्णेन पाणिना] ।
[2][गृहस्थो वेदविद्विप्रो वाचयेत्तु] प्रतिग्रहम् ॥२८॥
भोग्यसौख्यप्रदा श्वेता धूम्राभा पापनाशिनी ।
कृष्णा [3]स्वर्गप्रदा ज्ञेया गौरी च कुलवर्द्धिनी ॥२९॥

धूम्राभा कृष्णलोहितच्छविः । गौरी अतिपीता ।

रक्ता रूपप्रदा ज्ञेया पीता दारिद्र्यघातिनी[4] ।
पुत्रप्रदा कृष्णसारा नीला धर्मविवर्द्धिनी ॥३०॥

कृष्णसारा कृष्णसार-[5]मृगवर्णा नीला श्यामवर्णा ।

कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ।
पीतोदकां जग्धतृणां दुग्धदोहां न दापयेत् ॥३१॥

पीतोदकां [6]जग्धतृणामिति [7]यजमानप्रमुक्तिमन्तरेण स्वयंपीतोदका[8] [9][जग्धतृणा च प्रतिषिद्धा] । यजमानप्रमुक्तान्तु[10] तृणाद्यैस्तर्पणीयेत्युक्तं [11]लवणान्नतृणादकैर्दद्यादिति श्रुतेः । एवञ्च दानदिने स्वातन्त्र्येण [12]तृणाद्युपभोक्ता दानपूर्वकाले वारणीयः । गामुक्तलक्षणां [13]स्वप्रमुक्तां लवणान्नतृणोदकैस्तर्पयित्वा उक्तालङ्कारैरलङ्कृत्यार्चयित्वा ब्राह्मणं वेदविदं गृहस्थमभ्यर्च्य तत्करे सुवर्णं दत्त्वा तस्मै ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । भोग्यसौख्यप्राप्तिकामोऽहमेतां सुवर्णशृङ्गीं वस्त्राच्छादितां घण्टाविभूषितां ललाटतटदर्पणां रजतच्छन्नचरणां [14]मुक्ताभूषितलाङ्गूलां कांस्योपदोहनां श्वेतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । धूम्रकृष्णगौररक्त-[15]पीतकृष्णसारनीलकपिलशबल[16]-गवीदानवाक्येषु यथावर्णं भोग्यसौख्य-

---

1 A सवर्णवत्सानिना for the bracketed portion
2 A गृहस्थो वेदविद्विप्रा वाचयेति for the bracketed portion
3 A सुखप्रदा
4 A ०पातिनी
5 A omits मृग
6 I. O. जग्धतृणामिति
7 I. O. यज्ञपान for यजमान
8 A ०पीतोदकां ; I. O. ०ह्रीपोदकां
9 I. O. जग्धतृणामिति च प्रतिषिद्धा for the b. p.
10 A ०प्रमुक्तान्तु ; I. O. प्रमुक्ता च
11 I. O. लवणामिदृणोदकै०
12 A तृणादुपयोगी ; I. O. तृणाद्युपभोक्ता
13 I. O. उपकरणयुक्ता
14 I. O. मुक्ताविभूषित०
15 A omits पीत and I. O. reads it before रक्त
16 A सवत्स ; I. O. शरत्

प्राप्तिकामोऽहं-[मेतां श्वेतां गामिति पदस्थाने][1] यथायथममुककामोऽहमिति अमुकवर्णा-मिति च पदं निवेशनीयम्।

नन्दिपुराणे :—

यो गां सुपरिपूर्णाङ्गीं [2]हेमश्रृङ्गीमकोपनाम्।
सुशीलां राजतैः पादैश्चित्रवस्त्रसुसंहिताम् ॥१॥

सुपरि-[3]पूर्णाङ्गीमव्यङ्गीमकोपनामहिंसका[4] [सुशीलामपलायिनीम्][5]।

[6]सलौहपात्रां [7]कुतपे निविष्टचरणान्तथा।
सदक्षिणां प्रदद्याद् गां सोऽक्षयं स्वर्गमाप्नुयात् ॥२॥

कुतपे नेपालकम्बले।

यावन्ति गवीरोमाणि [8]सप्रसूति-कुलस्थितौ।
तावन्त्यब्दानि वसति स्वर्गे दाता न संशयः ॥३॥
[9]एतच्छतगुणं पुण्यं कपिलादानतः स्मृतम् ॥४॥

गामुक्तरूपामुक्तोपकरणयुतामभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादितुभ्यमन्तमुक्त्वा दद्यात्। नन्दिपुराणोक्त-[10] गवीदानफल[11]-प्राप्तिकामोऽहमेतां हेमश्रृङ्गीं राजतपादां [12]चित्रवस्त्रसुसंहितां सलौहपात्रां कुतपनिविष्टचरणां गां ददानि। स्वस्त्यादिस्त्रीकारान्तं पूर्ववत्। कपिलादाने तु नन्दिपुराणोक्त-कपिलागवीदानफलप्राप्तिकामोऽहमेतां [13][हेमश्रृङ्गीं राजतपादां कपिलामिति] पूर्वोक्तदानवाक्ये [14][विशेषः। उभयतोमुखीदाने तु दानवाक्ये] नन्दिपुराणोक्तोभयतोमुखी-दानफलप्राप्तिकामोऽहमेतामुभयतोमुखीं गामिति निवेशो विशेषः।

तथाहि नन्दिपुराणे :—

---

1 I. O. धेनुं गां इति पदभावे for the bracketed portion
2 A हैमश्रृङ्ग० ; I. O. हेमश्रृङ्गी०
3 A ०पूर्णश्रृङ्गी० for ०पूर्णाङ्गी०
4 I. O. ०हिंसिकां
5 A omits the bracketed portion, I.O. reads it as सुशीला-मपलायिनीं
6 I. O. सलोहपात्र
7 A कुतपनिविष्टचरणान्तथा ; I. O. कुतपे निविष्टचरणां तथा
8 A सप्रस्थिति०
9 I. O. एतद्व्रतगुणं
10 I. O. कपिलाप्रसूयमाना and A कपिला before this
11 A omits फल
12 A चित्रवस्त्रां संहितां
13 I. O. इति only for the bracketed portion
14 I. O. omits the bracketed portion

यश्चोभयमुखीं दद्याद्विप्राय[1] वेदवादिने ।
देवाय [2]चाप्यभीष्टाय स कुलान्येकविंशतिम् ॥५॥
[3]समुद्धृत्य नरस्तिष्ठेन्नरकाद्ब्रह्मणोऽन्तिके[4] ।
युगानि रोमतुल्यानि यदि [5]श्रद्धापरो नरः ॥६॥

यश्चेति चकारो धेनुदानधर्मसमुच्चयार्थः ।

[6]आदिपुराणे :—

कपिलां ये प्रयच्छन्ति चेलच्छन्नां स्वलङ्कृताम् ।
[7]स्वर्णशृङ्गीं रूप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
[8]स्वलङ्कृतां यथाशक्तिसुरूप[9]-हेमतिलकाद्यलङ्कृताम् ।
[10][श्वेतवस्त्रपरिच्छन्नां घण्टास्वनरवैर्युताम् ॥७॥

अत्र चेलच्छन्नां] श्वेतवस्त्रपरिच्छन्नामिति च पदद्वयदर्शनात् प्रथममभिमत[11]-वर्णवस्त्रेणाच्छाद्य पुनः श्वेतवस्त्रेणाच्छादनं कर्तव्यम् ।

घण्टास्वनरवैर्युतामिति[12] घण्टां दत्त्वा किङ्किनीमालापि [13]देयेति ।

सहस्र[14] यो [15]गवां दद्यात् [16]कपिलां वापि सुव्रताम् ।
[17]सममेव पुरा प्राह ब्रह्मा [18]वेदविदां वरः ॥८॥

[19]सुव्रतां सुखदोह्याम् ।

देवलोके वसेन्नित्यं कपिलां ददते हि यः ।
दीर्घायुश्चैव जायेत [20]भोगवांश्च [21]प्रियाव्रतः ॥९॥

---

1 I. O. ०द्विप्रवै
2 I. O. चाद्यभीष्टाय
3 A सम्भन्वात्य
4 I. O. ०नरका ब्रह्मणोन्तिके
5 A श्रद्दपरो
6 I. O. आदित्यपुराणे
7 I. O. सुवर्णशृङ्गीं : A सुवर्णशृङ्गी
8 A अलङ्कृतां
9 A omits सुरूप
10 I. O. omits the bracketed portion
11 A ०मभिमतं
12 I. O. omits इति
13 I. O. नेयति
14 I. O. सहस्रं
15 A गवाम्
16 I. O. कपिला वापि
17 I. O. मद्य तव
18 A ब्रह्मविदां
19 A सुव्रता ; I. O. सुव्रतं
20 A भोगांश्च
21 I. O. प्रियाव्रतः

ऐश्वर्यबलसम्पन्नो धनधान्यसमृद्धिमान् ।
यो ददाति द्विजश्रेष्ठ कपिलां नात्र संशयः ॥१०॥
यावन्ति [1]रोमकूपानि कपिलाङ्गे [2]भवन्ति वै ।
तावत्कोटिसहस्राणि वर्षाणां दिवि मोदते ॥११॥

[3]सुखदोह्यां कपिलां गां वस्त्रेणाच्छाद्योक्तालङ्कारैरलङ्कृत्यापरेण[4] श्वेतवस्त्रेणाच्छाद्याभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5]आदिपुराणोक्तालङ्कृतकपिल[6]-गवीदानफलप्राप्तिकामोऽहमेतां चेलच्छन्नां [7]स्वलङ्कृतां सुवर्णशृङ्गीं रूप्यखुरां मुक्ताभूषितलाङ्गूलां श्वेतवस्त्रपरिच्छन्नां घण्टास्वनरवयुतां कपिलां [8]गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथाः—

[9]श्वेतां गां [10]ददते यस्तु दिव्यरत्नैरलङ्कृताम् ।
घण्टामालाकुलां गन्धपुष्पैश्चैवाभ्यलङ्कृताम्[11] ॥१२॥

दिव्यरत्नैरुत्कृष्टमुक्तादिभिः । घण्टामालाकुलां किङ्किणीमालालङ्कृतग्रीवाम् ।

मुखे [12]धूपः प्रदातव्यो घृतेनास्यञ्च पूरयेत् ।
सुवर्णशृङ्गाभरणा तथा रूप्यखुरा शुभा ।

[13][शुभा शुभलक्षणा ।]

पटच्छन्ना[14] शुभा चैव दातव्या ध्यानयोगिने ॥१३॥

शुभा सुरूपा ।

यस्तु दद्याच्च गां श्वेतां तस्य पुण्यफलं शृणु ।
जन्मप्रभृति यत् पापं [15][मातृकं पैतृकं च] यत् ॥१४॥
रजोवृत्तस्य[16] दुष्टस्य तत्क्षणादेव नश्यति ।
गां ददानीह इत्येव[17] वाचा पूयेत सर्वशः ॥१५॥

---

1 I. O. रोमकूपाणि
2 I. O. ०भवेच्छिवे
3 A सुखदोह्यं, I. O. अथ दोह्यां
4 I. O. ०ङ्कृत्यपरेण
5 I. O. आदित्यपुराणोक्तालङ्कृत, A आदिपुराणोक्त only
6 A कपिला
7 I. O. omits it
8 A omits it
9 A श्वेता
10 I. O. ददतो
11 A ०पुष्पैश्चैवाभ्यलङ्कृतां, I. O. ०श्चावाभ्यलङ्कृतां
12 I. O. सम
13 A omits the bracketed portion
14 I. O. घण्टाच्छन्ना
15 I. O. मातृप्रभृतिकञ्च for the bracketed portion
16 I. O. ०वृत्तस्य
17 A इत्येवं

पिता पितामहश्चैव तथैव प्रपितामहः ।
नरकस्था विमुच्यन्ते सोमलोकं[1] व्रजन्ति ते ॥१६॥
पुत्रपौत्रैः [2][परिवृता गन्धर्वैश्चाप्सरोगणैः] ।
हृष्टपुष्टाः[3] प्रमुदिता [4]यानैश्चैव सुशोभनैः ॥ ७॥
[5]मुक्तावैदूर्यसम्पन्नैर्हंसयुक्तैर्मनोहरैः[6] ।
सदा हृष्टा[व्रजन्त्येव श्वेतां][7] गां ददते तु ये ॥१८॥

[8]गामुक्तलक्षणामुक्तालङ्कारैरलङ्कृतां[9] घृतपूर्णमुखीं [10][मुखेऽध्यार्पितधूपां] कृत्वाभ्यर्च्याध्यात्मविदे[11] अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [12]आदिपुराणोक्तश्वेतगवीदानफलप्राप्तिकामोऽहमेतां दिव्यरत्नालङ्कृतां [13][घण्टामालाकुलां गन्धपुष्पालङ्कृतां] [14]घृतपूर्णास्यां [15]सुवर्णशृङ्गाभरणां रूप्यखुरां पट्टच्छन्नां श्वेतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अत्र च ददानीति पदं सर्वदानेष्वेव [16]ददानीत्यन्तदानवाक्यं स्मारयति ।

तथा :—

कृष्णां गां [17][ददते यस्तु पट्टच्छन्नां स्वलङ्कृताम् ।
विधिवच्च द्विजातिभ्यो यमलोकं] न पश्यति ॥१६॥

द्विजातिभ्य इति जात्याख्यायामेकस्मिन् [18]बहुवचनमेकस्या बहुभ्यो दानप्रतिषेधात् । [19]स्वलङ्कृतां [20]हेमतिलकाद्यलङ्कृताम् ।

---

1 A ०लोक
2 I. O. परिवृतो गन्धर्वैः सह मोदते for the bracketed portion
3 A ०तुष्टाः
4 I. O. यानैश्चैव
5 I. O. स्वर्गी for मुक्ता
6 I. O. ०रमैः
7 A व्रजन्ते वै तां for the b. p.
8 I. O. युक्तलक्षणायुक्ता०
9 I. O. ०लङ्कारैरलङ्कृतं, A ०लङ्कारैरालङ्कृत्य
10 A मुखध्यार्पितां and I. O. मुखेऽर्पितां for the bracketed portion
11 I. O. omits अध्यात्मविदे
12 I. O. आदित्य for आदि
13 I. O. omits the bracketed portion
14 I. O. घृतपूरितास्यां
15 A युक्तसुवर्णशृङ्गाभरणां, I. O. सुवर्णशृङ्गीं तरुणीं
16 A ददामीत्युत्तर० for ददानीत्यन्त०
17 I. O. reads the bracketed portion as ददाति स्वीकारान्तं स्वस्त्यादि पूर्ववत् । विधिवद्द्विजातिभ्यो यमलोकं
18 I. O. अन्यतरस्यामिति before this
19 A अलङ्कृतां
20 I. O. हैम०

[1]सर्वपापविशुद्धात्मा पितृलोकञ्च गच्छति ।
[2]तस्मात् सर्वप्रयत्नेन कृष्णां गां ददते [3][सदा ॥२०॥
आयुरारोग्यमैश्वर्यं [4]भुक्त्वा कामांश्च मानसान् ।
भोगवान् स भवेद् यस्तु कृष्णां गां ददते] तु यः ॥२१॥

[5]कृष्णवर्णां गामुक्तो-[6]पकरणयुतामभ्यर्चार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा इयात् । [7]आदिपुराणोक्तकृष्णगवीदानफलप्राप्तिकामोऽहमेतां [8]पटच्छन्नां स्वलङ्कृतां कृष्णां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

गौरीश्चैव [9]प्रयच्छेत यस्तु गां वै नरः शुचिः ।
अहोरात्रोषितश्चैव कृतशौचो नरः सदा ॥२२॥

गौरीमतिपीताम्[10] ।

[11]स्वर्णशृङ्गीं रूप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
[12]घण्टामालाकुलाञ्चैव गन्धपुष्पैरलङ्कृताम् ॥२३॥
[13]कुतपन्यस्तपादाञ्च मुखे धूपञ्च दापयेत् ।
[14]भक्ष्यभोज्यान्नपानेन ब्राह्मणान् भोजयेच्छुभान् ॥२४॥

कुतपो नेपालकम्बलः । [15]भक्ष्यं पिष्टकं भोज्यान्नमोदनं पानं पानकम् ।

गां [16]ददानीह [17]इत्येव वाचा [18]पूयेत सर्वशः ।
मातृकं पितृकं चैव यच्चान्यद् दुष्कृतं भवेत् ॥२५॥

गां ददानीति [19][पदप्रयोगेण दाने]समस्तविधि-[20]पालनमिति [21][पूयेतेति पदस्यार्थः] ।

---

1 I. O. सर्वे
2 I. O. तस्मै
3 I. O. omits the bracketed portion
4 A दत्वा
5 I. O. अश्ववर्णां
6 A ०कोलदाय० for ०पकरण०
7 I. O. आदित्य०
8 A पटाच्छन्नां, I. O. नेपपटच्छन्नां
9 A पटोच्छन्नां
10 I. O. ०पीता
11 I. O. सुवर्णशृङ्गीं
12 I. O. यथा for घण्टा
13 I. O. कुतपसत्यप्राप्ति, A कुतपञ्चाक्षरे प्राप्तो
14 A भक्ष०, I. O. भक्त०
15 A भक्ष, I. O. भक्त
16 A ददानीत
17 A इत्येवं
18 A पूयेच, I. O. पूजयेत
19 A reads the bracketed portion as दानेन only
20 A पारण and I. O. भावन for पालन
21 I. O. reads the bracketed portion as पूयेति पदस्यार्थः

पापञ्च तस्य तत् सर्वं दहत्यग्निरिवेन्धनम् ।
अन्नैर्दिव्यैर्मनोज्ञैश्च स्वर्णालङ्कारभूषिताः ।
[1]अग्निलोकं व्रजन्ति ते नराः [2]सुकृतकर्मणा ॥२६॥
पुत्रपौत्रैः परिवृता [3]अलङ्कृतजनैर्वृताः ।
वर्षकोटिसहस्रन्तु पुमान् [4][स दिवि]मोदते ॥२७॥
अथ [5]मानुष्यमायाति कदाचित् कालपर्ययात्[6] ।
[7]ज्ञानैश्वर्यसुसंयुक्तो धनधान्यैः समावृतः ॥२८॥
[8]अथ कोटिसहस्रेण गृहे च परिवारितः ।
दासीदासैरल-[9][ङ्कृतैः स्तूयते सर्वजन्तुभिः] ॥२९॥
अरोगश्चैव जायेत [10]तेजस्वी च भवेन्नरः ।
मेधारूपगुणैर्युक्तः स्वाध्यायार्जितपौरुषः ॥३०॥

अत्र दानदिनपूर्वतरदिने पूर्ववद्धविष्यभोजनादिकं[11] कृत्वा सूर्यादिदेवताभ्य [12]आदिपुराणोक्तसोपवासगौरगवीदानं कर्म मया कर्तव्यमिति निवेद्य [13]'ॐ' श्व उपोष्यापरदिन [14]आदिपुराणोक्तगौरगवीदानकर्माहं करिष्ये' इति सङ्कल्पयेत । ततो नियमेन सुप्त्वाऽपरदिने [15]कृतनित्य उपोष्यापरदिने प्रातः स्नात्वा शुचिर्गामतिपीतवर्णां[16] मुक्तालङ्कार-[17]युतामास्तीर्ण-[18][नेपालकम्बलोपरि स्थापितां] धूपितमुखीं कृत्वा ब्राह्मणलयं शुभाचारं यथाशक्ति-[19]पिष्टकान्नपानकैः सन्तर्प्य अपरं ब्राह्मणमभ्यर्च्य तस्मै [20][अर्चिताय ब्राह्मणाय] गामर्चिताम् [21]ॐ अद्यादि

1 A ०व्रजन्ते ते, I. O. पितृलोकञ्च गच्छति ते
2 A प्रकृत०
3 I. O. कन्यानुमा for अलङ्कृत
4 I. O. परिवि for the bracketed portion
5 A मानुष्यमायान्ति, I. O. सान्निध्ययायाति
6 A ०पर्यायात्
7 I. O. ज्ञानैश्वर्यार्थसंयुक्तो
8 I. O. अयं
9 I. O. reads the bracketed portion as ङ्कारैस्तूयमं सर्व-सम्मतिः
10 A जस्वी
11 I. O. ०भोजनादि
12 I. O. आदित्य०
13 A omits it
14 I. O. आदित्य०
15 I. O. कृतनित्योपोष्या०, A नित्यं उपोष्या०
16 A ०मितिपीतवर्णां, I. O. ०मभिपीतवस्त्रा
17 A omits युता
18 I. O. reads the bracketed portion as नेपालकम्बलोपविष्टाञ्चिता
19 A मिष्टान्नपानकैः, I. O. पिष्टकानुपानैः
20 I. O. omits the bracketed portion. A reads it after गामर्चितां
21 A omits it

तुभ्यमन्तमुक्त्वा दद्यात्। [1]आदिपुराणोक्तगौरगवीदानफलप्राप्तिकामोऽहमेतां सुवर्णशृङ्गीं रूप्यखुरां [2]मुक्ताभूषितलाङ्गूलां घण्टामालाकुलां गन्धपुष्पालङ्कृतां [3]कुतपस्थां गौरीं गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

नीलवर्णां च गां दद्याच्छीलदोग्ध्रीं गुणान्विताम्।
[4]स्वर्णशृङ्गीं रूप्यखुरां मुक्तालाङ्गूलभूषिताम् ॥३१॥

शीलदोग्ध्रीं सुखसन्दोह्यां गुणान्विताम् [5]अव्यङ्गीम्।

पटच्छन्नां शुभां सौम्यां घण्टा-[6]दामैरलङ्कृताम्।
पञ्च-[7]रङ्गेण सूत्रेण [8]गलवेष्टनशोभिताम् ॥३२॥

घण्टा-[9]दामैरलङ्कृतामिति [10]पञ्चरङ्गसूत्रादिनिर्मितघण्टानिबन्धनालङ्कृतग्रीवां शुभां[11] शुभलक्षणयुतां [12]सौम्यामकोपनाम्।

रुद्रस्य प्रमुखे देया विष्णोश्च ब्रह्मणश्च वै।
गां ददानीह इत्येव वाचा पूयेत सर्वशः ॥३३॥
पिता पितामहश्चैव तथैव प्रपितामहः।
नरकस्था विमुच्यन्ते नीलां गां ददते तु यः ॥३४॥
दधिक्षीरवहा नद्यो वर्तन्ते [13]सर्वतः सदा।
[14]घृतशैलाः प्रपद्यन्ते [15]नवनीतस्य पर्वताः ॥३५॥
हस्त्यश्वरथयानेन[16] [17]गन्धर्वैरप्सरोगणैः।
स्तूयमानो व्रजेच्चैव [18][गवां लोकनिवासिनः] ॥३६॥
वर्षकोटिसहस्राणि लोके [19]तिष्ठति वारुणे।
अथ मानुष्यमायाति [20]कदाचित् कालपर्यये ॥३७॥

---

1 I. O. आदित्य॰
2 A मुक्ताभूषितां लाङ्गूलां I. O. मुक्तालाङ्गूलभूषितां
3 I. O. omits it
4 I. O. सुवर्णशृङ्गीं
5 I. O. अभ्यङ्गत्वाकारसौन्दर्ययुक्ता
6 I. O. ॰दाम॰
7 A ॰रङ्गक
8 I. O. गेलवेष्टनशोभिता
9 I. O. ॰दाम॰
10 A पञ्च and I. O. षट् for पञ्चरङ्ग
11 I. O. शुभा
12 I. O. सौम्य॰ for सौम्या॰
13 I. O. सर्व्वश:
14 I. O. घृतशैला:
15 I. O. नवपीतस्य
16 A ॰यानेन, I. O. ॰द्यानेन
17 I. O. गन्धर्व्वाप्सरसोगणैः
18 I. O. गोलोकस्य निवासिन: for the bracketed portion
19 I. O. तिष्ठन्ति
20 A कदाचित्लोकपर्यये

गोभिः समृद्धे च कुले जायते नात्र संशयः ।
कृषि-[1]भागी बहुधनो [2]दुर्भिक्षञ्च न पश्यति ॥३८॥
पुत्रपौत्रैः परिवृतः [3]श्रीमान् [4]सर्वजनाकुलः ।
दासी-[5]दासैश्च संयुक्तो जायते तत्र मानवः ॥३९॥

गां नील-[6]वर्णामुक्तलक्षणामुक्तोपकरणयुतां कृत्वाऽभ्यर्च्य महेश्वरविष्णु-[7]ब्रह्मप्रतिमात्रयाग्रतो [8]ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [9]आदिपुराणोक्तनीलगवीदान-फलप्राप्तिकामोऽहमेतां सुवर्णशृङ्गीं [10]रूप्यखुरां मुक्ताभूषितलाङ्गूलां पटच्छन्नां घण्टादामा-लङ्कृतां पञ्चरङ्गसूत्रवेष्टितग्रीवां नीलवर्णां[11] गां ददानि । स्वस्त्यादिस्त्रोकारान्तं पूर्ववत् ।

[12][विष्णुधर्मे :—

प्रयच्छते यः कपिलां सचेलां कांस्योपदोहां कनकाग्रशृङ्गीम् ।
यान् यान् हि कामानभिवाञ्छतेऽसौ तांस्तानवाप्नोत्यमलान् हि लोकान् ॥१॥

कपिलां गामुक्तोपकरणां कृत्वाऽभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्तकनकाग्रशृङ्ग-कपिलगवीदानफलप्राप्तिकामोऽहमेतां सचेलां कांस्योप-दोहां कनकाग्रशृङ्गीं कपिलां गां ददानि । स्वस्त्यादिस्त्रोकारान्तं पूर्ववत् ।]

तथा :—

कृतोपवासः [13]संप्राश्य [14]पञ्चगव्यं नरेश्वर ।
घृतक्षीराभिषेकञ्च कृत्वा विष्णोः समाहितः ॥२॥
समभ्यर्च्य च गोविन्दं पुष्पादिभिररिन्दम ।
उदङ्मुखीमर्चयित्वा तथा [15]गृष्टिं पयस्विनीम् ॥३॥

---

1 A भावी
2 I. O. यतोत्तञ्च
3 I. O. श्रीलाम्
4 A सर्वजमाकुला:
5 I. O. दासञ्च
6 I. O. ०वस्त्रामुक्ता० for ०वर्णामुक्त०
7 I. O. ब्रह्मा
8 A ब्राह्मणाय only
9 I. O. आदित्य०
10 I. O. रौप्यखुरां
11 I. O. नीलवस्त्रां
12 I. O. omits the bracketed portion
13 I. O. संप्राप्य
14 I. O. पञ्चगव्ये
15 A भृष्टिं. I. O. तुष्टिं

गपुत्रां वस्त्रसम्वीतां सितयज्ञोपवीतिनीम्[1] ।
स्वर्णशृङ्गीं शुभाकारां हिरण्योपरि संस्थिताम् ॥४॥
[2]सुवर्णं [3]वाचयित्वाग्रे ब्राह्मणायोपपादयेत् ।
इमां त्वं [4]प्रतिगृह्णीष्व गोविन्दः प्रीयतामिति ॥५॥

इमां त्वमित्यादिमन्त्रमग्रे वाचयित्वा पठित्वा गां प्रतिपादयेत् । सुवर्णञ्च दक्षिणारूपमिति सम्बन्धः ।

सम्यगुच्चार्य तं [5][विप्रं गोविन्दमुपकल्पयेत्] ।
अनुव्रजेच्च गच्छन्तं पदान्यष्टौ नराधिप ॥६॥
अनेन विधिना धेनुं यो विप्राय प्रयच्छति ।
गोविन्दप्रीणनाद्राजन् विष्णुलोकं स गच्छति ॥७॥
सप्तावरांस्तथा[6]पूर्वान् सप्तात्मानञ्च मानवः ।
सप्तजन्मकृतात् पापान्मोचयत्यवनीपते ॥८॥
पदे पदे तु यज्ञस्य गोसवस्य च मानवः ।
फलं प्राप्नोति राजेन्द्र [7][दत्त्वा चैवं जगौ] हरिः ॥९॥
सर्वकामप्रदा [8]सा स्यात् सर्वकालेषु [9]पार्थिव ।
[10]भवत्यघौघापहरा यावदिन्द्राश्चतुर्दश ॥१०॥
सर्वेषामेव पापानां कृतानामविजानता[11] ।
प्रायश्चित्तमिदं प्रोक्तं-[12]मनुतापोपबृंहितम ॥११॥

दानदिनात् पूर्वतरदिने पूर्ववद्धविष्य-[13]भोजनादिकं कृत्वा सूर्यादिदेवताभ्यो विष्णुधर्मोक्त[14]-सोपवास[15]-गोविन्द-घृतक्षीर[16]-स्नपनसहितपूजापूर्वक-गोदानकर्म मया कर्त्तव्यमिति निवेद्य सङ्कल्पं कुर्यात् । 'ॐ श्वः पञ्चगव्यप्राशनपूर्वकमुपोष्यापरदिने गोविन्दघृतक्षीरस्नपन-[17]पूजा-पूर्वकगोदानकर्माहं करिष्ये' । ततो नियमेन सुप्त्वाऽपरदिने पञ्चगव्यं प्राश्य उपोष्यापरदिने

1 A ॰वितकं
2 A हिरण्यया, I. O. हिरण्य
3 A वाचयित्वा, I. O. याचयित्वाग्रे
4 A प्रतिगृह्णीय, I. O. प्रतिगृह्णीष्
5 I. O. reads the bracketed portion as विप्रगोविन्द नृपकल्पयेत्
6 I. O. सर्व्वान्
7 A दत्त्वार्थ्यं जगौ for the bracketed portion
8 I. O. साध्यात्
9 I. O. पार्थिव:
10 I. O. भवत्यघौपापचरा
11 I. O. ॰जानतां, A ॰जानता
12 I. O. ॰ममतापोपबृंहितं, A ॰मनुतापो हि बृंहितं
13 I. O. ॰भोजनादि
14 I. O. ॰धर्म्मोक्तं
15 I. O. सोपवासं
16 A ॰क्षीरैः
17 A omits पूजा

[1]प्रातर्वासुदेवं घृतक्षीराभ्यां स्नपयित्वा [2]गोविन्दं नाम्ना संपूज्य धेनुमुदङ्मुखीं सौवर्णपत्र-चतुष्टयार्पितखुरचतुष्टयां[3] कृत्वा सुवर्ण-[4]शृङ्गादिभिरलङ्कृत्याभ्यर्च्य ब्राह्मणाय [5]ध्यातगोविन्द-रूपायार्चिताय इमां त्वमित्यादि पठित्वा [6]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णु-धर्मोक्तकपिलगवीदानफलप्राप्तिकामोऽहमेतां सपुत्रां [7]वस्त्राच्छन्नां सितयज्ञोपवीतिनीं [8]स्वर्ण-शृङ्गीं हिरण्योपरि संस्थितां गां ददानि। [9]स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [10]ततो यजमानो गोविन्दोऽयं मम प्रीतो यातीति ध्यायन् यान्तं ब्राह्मणमष्टौ पदान्यनुव्रजेत्।

[11]तथा कपिलादानानुवृत्तौ :—

दत्त्वा [12]सुधेनुं नृप सोपधानां कल्याणवत्सां सुपयस्विनीञ्च।
यावन्ति रोमाणि भवन्ति तस्यास्तावन्ति वर्षाणि स [13]दोग्धि कामान् ॥१२॥

[14]सुधेनुं [15]सुशीलां सोपधानामास्तरणवस्त्रगण्डूकसहितां कल्याणवत्सां [16]जीवद्वत्सां गां कपिलामुक्तोपकरणयुतां कृत्वाऽभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [17][विष्णुधर्मोक्तसोपधानकपिलगवीदानफलप्राप्तिकामोऽहमेतां सोपधानां सवत्सां कपिलां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

विष्णुधर्मोत्तरे (३।३०६।५२ख-५६क) :—

हेमशृङ्गीं [18]रूप्यखुरां मुक्तालाङ्गूलभूषिताम्।
[19]अहताम्बरसम्वीतां तथा कांस्योपदोहनाम् ॥१॥
त्रिरात्रं स्थण्डिले सुप्त्वा त्रिरात्रं गोरसाशनः।
[20]तृप्तान्तु तर्पिते दत्त्वा वाससा संवृते द्विजे ॥२॥

अत्र त्रिरात्रं [21][स्थण्डिलशयनेन हविष्यभोजनमस्य व्रतरूपत्वादुन्नेयम्]। तर्पिते वस्त्र-[22]स्वर्णादिभिः परितोषिते।

1 I. O. वासुदेवं only
2 A गोविन्द
3 I. O. ०चतुष्टया
4 A ०मुक्ताभिरलङ्कृत्यभ्यर्च्य
5 I. O. ख्यात for ध्यात
6 A omits it
7 I. O. वस्त्रच्छन्ना
8 I. O. omits it
9 A adds ॐ before this
10 A omits it
11 A omits it
12 A सधेनुं
13 I. O. दोग्धि
14 A सधेनुं
15 A सशीतलां
16 I. O. जीवत्वत्सां, A जीववत्सां
17 A omits the bracketed portion
18 I. O. रौप्यखुरां
19 A आहताम्बरसम्वतां
20 I. O. तृप्तान्तु
21 I. O. स्थण्डिलं शयने हविष्यभोजनमन्यत्र तद्वत्त्वादुन्नेयं for the b. p.
22 I. O. ०सुवर्णादि

सदक्षिणां [1]महाभागास्त्रिरात्रं गोरसैस्ततः ।
प्राण-[2]सन्धारणं कृत्वा गवां लोके महीयते ॥३॥
यावन्ति [3]धेनुरोमाणि तावद्वर्षाणि मानवः ।
[4]दत्त्वैवं कपिलां विप्राः प्राप्नोत्यभ्यधिकं फलम् ॥४॥

दानदिनात् [5]पूर्वं सप्तमदिने प्रातः स्नात्वा उदङ्मुखो गृहीतोदपूर्णताम्र[6]-पात्रः सङ्कल्पं कुर्यात् । 'ॐ[7] त्रिरात्रस्थण्डिलशयन-[8]रूपप्राच्याङ्ग-सहितं त्रिरात्रगोरसाहार-[9]रूपोदीच्याङ्ग-सहितञ्च विष्णु-[10]धर्मोत्तरोक्तकपिल-[11]गवीदानकर्माहं करिष्ये' । तदवधि त्रिरात्रं [12][हविष्य-भोजनादिकं भुक्त्वा] भूमौ स्वपेत् । त्रिरात्रञ्च गोरसमात्राहारो भूत्वा दानदिने प्रातः स्नात्वा गां [13]घासान्नादिभिस्तर्पयित्वा उक्तोपकरणयुतां कृत्वाऽभ्यर्च्य ब्राह्मणायार्चिताय प्रथमं सुवर्णादिपरितोषिताय [14][वाससाऽऽच्छादिताय ॐ]अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णु-धर्मोत्तरोक्तस्थण्डिलशयन-[15][सहितकपिल]-गवीदान-[16]फलप्राप्तिकामोऽहमेतां हेमशृङ्गीं रूप्य-खुरां मुक्ताभूषितलाङ्गूलाम् [17]अहताम्बरसंवीतां कांस्योपदोहनां गां ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

[18]तद्दिनात् प्रभृति त्रिरात्रं गोरसाहारो भवेत् । कपिलगवीदानवाक्ये [19]तु [20]अकपिलस्थाने कपिलपद-[21]निवेशो विशेषः ।

इति महाराजाधिराजनिःशङ्क-[22]शङ्करश्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे अलङ्कृतगवीदानावर्तः ।

1 Corrected from V. D. I. O. ०त्रिरात्र
2 I. O. ०सम्बाधनं
3 I. O. धेनौ
4 I. O. नत्वेवं
5 A पूर्व्वमष्टमद्दिने
6 A omits ताम्र
7 A omits it
8 A omits it, I. O. त्रिरात्रगो-रसाहार before it
9 A ०रूपद्रव्याङ्गसहित
10 A ०धर्मोक्त०
11 A omits गवी
12 I. O. हविष्यभुग्
13 A साद्यान्न०
14 A omits the bracketed portion
15 I. O. सहितां कपि for the bracketed portion
16 A omits फल
17 A आहता०
18 A तद्दिना
19 A omits it
20 I. O. अकालस्थाने
21 I. O. ०निवेशे
22 A सङ्कर

अथालङ्कृतबहुगवीदानावर्तः । (५)

महाभारते (अनु—५७।२७) :—

सुवर्ण-[1]शृङ्गैस्तु विराजितानां गवां सहस्रस्य नरः[2] प्रदाता ।

प्राप्नोति [3]पुण्यं दिवि देवलोकमित्येवमाहु[4]-र्दिवि देवसंघाः ॥१॥

अत्र यजमानो यथालाभं सहस्रं [5]गा उपादाय सुवर्णशृङ्गैरलङ्कृत्यार्चयित्वा[6] अर्चिताय ब्राह्मणाय दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे [7]तुभ्यं महाभारतोक्तालङ्कृतगोसहस्रदानफलप्राप्तिकामोऽहमेताः सुवर्णशृङ्गविराजिताः सहस्रं गा[8] ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [9]गाव एता रुद्रदेवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य [10]कृतैतद्दानप्रतिष्ठार्थं [11]तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा गां पुच्छे गृह्णीयात् । बहुभ्यो[12] [दाने सम्प्रदाने] बहुवचनमूहनीयम् ।

आग्नेयपुराणे गोदानानुवृत्तौ :—

चतुःपूर्वान् परांश्चैव समुद्धृत्य पितामहान् ।

स गच्छति दिवं राजन् शतं दत्त्वा यथाविधि ॥२।

यथाविधीत्याग्नेय-[13]पुराणानन्तरोक्तगोसहस्रदानधर्मग्रहणम् ।

तथाग्नेय-[14]पुराणे :—

गोसहस्रन्तु यो दद्यात् सर्वरत्नैरलङ्कृतम् ॥३॥ इति ।

शतं गाः परिभाषोक्तरत्नैः प्रत्येकमलङ्कृत्यार्चयित्वा अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्तगोशतदानफलप्राप्तिकामोऽहमेताः [15]सर्वालङ्कृताः

---

1 I. O. ०शृङ्गस्तु
2 I. O. नर
3 A पुण्यां
4 A ०मत्तं० for ०माहु०
5 A गां
6 I. O. omits अर्चयित्वा
7 I. O. तुभ्यमहं
8 Both I. O. and A गां
9 A गा
10 A कृतैतत् तद्दान०
11 A omits it
12 A दानसंप्रदानक for the bracketed portion
13 A ०पुराणोक्त०
14 A ०पुराणां
15 I. O. omits it

शतं [1]गाः ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र स्वेच्छया बहुभ्योऽपि दानम्। तथा च सम्प्रदाने बहुवचनमूहनीयम्।

[2]विष्णुधर्मोत्तरे :—

[3]गोसहस्रञ्च यो दद्यात् सर्वरत्नैरलङ्कृतम्।
[4]परामृद्धिं श्रियं प्राप्य स्वर्गलोके महीयते ॥४॥

सर्वरत्नानि परिभाषोक्तानि।

दश चोभयतः प्रेत्य मातामहपितामहौ।
गच्छेत् सुकृतिनां लोकान् गावो दत्त्वा यथाविधि ॥५॥

गोसहस्रं यथोक्तमर्चयित्वा अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [5]विष्णुधर्मोत्तरोक्तगोसहस्रदानफलप्राप्तिकामोऽहमेताः सर्वरत्नालङ्कृताः सहस्रं गाः ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। स्वेच्छया बहुभ्यो दाने तु सम्प्रदाने[6] बहुवचनमूहनीयम्।

इति महाराजाधिराजनिःशङ्क-[7]शङ्कर-श्रीमद्बल्लालसेन-[8]देवविरचिते श्रीदानसागरे-ऽलङ्कृत[9]-बहुगवीदानावर्तः।

---

1 I. O. गा, A गां
2 I. O. विष्णुधर्म्मे
3 I. O. गोसहस्रन्तु
4 A परां ऋद्धिं
5 I. O. विष्णुधर्म्मोक्त॰
6 I. O. च after this
7 A सङ्कर
8 A omits देव
9 A॰नलङ्कृत॰

[1]अथानलङ्कृतगवीदानावर्तः । (६)

जावालः—

> होमार्थमग्निहोत्रस्य यो गां [2]दद्यादयाचिताम् ।
>
> [3]त्रिविष्टपपूर्णा पृथिवी तेन दत्ता न संशयः ॥१॥

अत्र यजमानो गामुत्कृष्टामभ्यर्च्याग्निहोत्रिणे अयाचमाना[4]-[य ब्राह्मणाया]-र्चिताय दद्यात् । [5]ॐ अद्यामुकगोत्रायामुक-[6]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं जावालोक्त-गोदानफलप्राप्तिकामोऽहमेतामग्निहोत्रहोमार्थं गां ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गौरियं रुद्रदेवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । [7]तत ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहमेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा गां पुच्छे गृह्णीयात् ।

याज्ञवल्क्यः (१।२०८) :—

> यथा कथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा ।
>
> अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥२॥

अधेनुं [8]दुग्धशून्याम् । अतएव वत्सतरीदानमपि श्रूयते ।

तथा च विष्णुधर्मोत्तरे (३।३०६।१०क) :—

> दत्त्वा वत्सतरीं विप्राः स्वर्गलोके महीयते ।

वत्सतरी-सहितां[9] यथासम्भवधेनुमधेनुं वा [10]यथोक्तरूपां गामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [11][सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतां गां ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

मनुः (४।२३१घ) :—

> गोदो ब्रध्नस्य विष्टपम् ॥३॥

प्राप्नोतीत्यनुषज्यते । ब्रध्नस्य विष्टपं सूर्यलोकम् ।

---

1 A यथायाचितकृत०
2 A दद्याद्याचितं, I. O. दद्याचितां
3 A त्रिविष्टपपूर्णा
4 A omits the bracketed portion
5 A omits it
6 A omits वेदामुक
7 A omits it
8 I. O. दुग्धशून्यं, A गन्धशून्यां
9 A and I. O. omit सहितां
10 A यथारूपां
11 I. O. omits the bracketed portion

गामर्चिताय ब्राह्मणाय [1]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।] [2]ब्रह्मविष्टपप्राप्तिकामोऽहमेतां गां ददानि । स्वस्त्यादस्वीकारान्तं पूर्ववत् ।

आग्नेयपुराणे :—

[3]धेनुं दत्त्वा [4]सुव्रतां [5]सुप्रधानां [6]कल्याणवत्सां सुपयस्विनीञ्च ।
यावन्ति रोमाणि भवन्ति तस्या वर्षाणि तावन्नृप नाकवासः ॥४॥

[7]सुव्रतां सुखदोह्यां सुप्रधानां [8]यूथप्रधानभूतां कल्याणवत्सां शुभलक्षणवत्साम् उक्तरूपां धेनुमर्चिताम्[9] अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। धेनुरोमसमानसंख्यकालं यावत् स्वर्गवासप्राप्तिकामोऽहमेतां कल्याणवत्सां धेनुं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

शिवपुराणे :—

कपिला-[10]प्रदानं यो दद्याद्ब्राह्मणेषु[11] विशेषतः ।
यावन्ति रोमकूपानि तस्य गात्रेषु वै द्विज ॥५॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।
यदि कालक्षयं प्राप्य जायते विपुले कुले ॥६॥

ब्राह्मणेष्विति जात्याख्यायां बहुवचनम् एकस्या बहुभ्यो दाननिषेधात्। कपिला-[12]मर्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शिवपुराणोक्तकपिलादानफलप्राप्तिकामोऽहमेतां कपिलां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

स्कन्दपुराणे :—

यस्तु गां [13]संप्रयच्छेत ब्राह्मणेभ्यो यथातथा ।
तमप्यसौ [14]महाघोरात्त्रायते नरकादपि ॥७॥

ब्राह्मणेभ्य इति बहुवचनं [15]जात्यपेक्षया । अर्चिताय ब्राह्मणाय गामर्चिताम् ॐ

---

1 A omits it
2 A ०पिष्टकामो०
3 I. O. धेनु
4 A सुव्रता
5 A सुप्रधानं
6 A कल्यानवतसा
7 I. O. सुव्रती
8 I. O. सुख for यूथ
9 I. O. omits अर्चिताम्
10 A ०प्रदानां
11 I. O. ब्राह्मणे तु, A ब्राह्मणाय
12 A omits अर्चिताम्
13 A संप्रयच्छेच्च
14 I. O. महाघोरात्रायने
15 I. O. जात्यापेक्षं

अर्घ्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [1]स्कन्दपुराणोक्तालङ्कृतगवीदानफलप्राप्तिकामोऽहमेतां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

वराहपुराणे (२०७।२५) यमपुरानुवृत्तौ :—

तिलान् गाश्च हिरण्यञ्च [2]पृथिवीञ्चापि शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥८॥

न गच्छन्ति यमपुरमित्यर्थः। गा-[3]मर्चितामर्चिताय ब्राह्मणाय ॐ अर्घ्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यमपुरगमनाभावप्राप्तिकामोऽहमेतां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[4]आदित्यपुराणे :—

अथ वत्सस्य चरणौ [5]दृश्येते संमुखौ यदा।
[6]गर्भान्निष्क्रममाणस्य [7][सवत्सा गौर्वसुन्धरा]।
सा चोभयमुखी देया मनोरथशतप्रदा[8] ॥९॥

[9]मनोरथशतप्रदा यथेष्टफलदेत्यर्थः। यदा प्रसूयमाना गौः [10]संमुखदृश्यमानगर्भनिष्क्रान्तचरणद्वयवत्सा [11]भवति, [तदा तामर्चिता][12]-मर्चिताय ब्राह्मणाय ॐ अर्घ्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुक-[13]प्राप्तिकामोऽहमेतामुभयतोमुखीं[14] गां ददानि। स्वस्त्यादि-[15]स्वीकारान्तं पूर्ववत्।

[16][ये तु गां वै प्रयच्छन्ति शुभामुभयतोमुखीम्।
लवणञ्च यथाशक्त्या भक्त्या ये वै ददन्ति च।
तेषां पुण्यकृतां लोकं गवां लोकं व्रजन्ति ते ॥१०॥

शुभां शोभनाकाराम्। प्रसूयमानां गामर्चिताम् ॐ अर्घ्यादि तुभ्यमन्तमुक्त्वा दद्यात्।

---

1 A स्कन्दपुराणोक्तमलङ्कृत०, I. O. स्कन्दपुराणोक्तमीलकृत०
2 A पृथिवी चापि
3 A omits अर्चिताम्
4 A omits it
5 I. O. दृश्यते
6 I. O. गर्भाद्विनिःसृयमानस्य
7 I. O. reads the bracketed portion as ता वत्सा गौर्वसुन्धरा
8 A ०शतप्रदा
9 A omits it
10 I. O. सम्मुख०
11 I. O. भवन्ति
12 A दाता for the bracketed portion
13 A omits प्राप्ति
14 A ०मुखी
15 A ०स्वीकारान्तं
16 I. O. omits the bracketed portion

पुण्यकृल्लोकगोलोकप्राप्तिकामोऽहमेतामुभयतोमुखीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

[1][नरसिंहपुराणे :—

कपिलागोप्रदानेन परार्थे चावनीपते।

[2]वृषभस्य प्रदानेन स्वर्गं मन्मथमाप्नुयात् ॥११॥

परार्थे [3]मातृपित्रादिबन्धुवर्गार्थे कपिलामर्च्चितामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्।] नरसिंहपुराणोक्तपरार्थकपिलादानफलप्राप्तिकामोऽहमेताममुकार्थे[4] कपिलां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

कपिलां लक्षणोपेतां सवत्सां गां पयस्विनीम्।

ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये।

यो दद्याद्विदुषे विद्वांस्तत्फलं [5]नान्तमुच्यते ॥१२॥

[6][तत्फलम् नान्तम्] [7]अनन्तं फलम् [8]मुक्तिः। लक्षणोपेतां सल्लक्षणयुक्तां [9]श्रोत्रियाय विद्याजन्मतपःसम्पन्नायाहिताग्नये[10] अग्निहोत्रिणे दरिद्राय अर्च्चिताय ब्राह्मणाय [11]उत्करूपां कपिलामर्च्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनन्तफलप्राप्तिकामोऽहमेतां लक्षणो-पेतां सवत्सां गां [12]कपिलां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मे :—

सुवर्णदानं गोदानं पृथिवीदान-[13]मेव च।

एतत् प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥१३॥

गामर्च्चितामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपापक्षयकामोऽ-हमेतां गां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A omits the bracketed portion
2 I. O. गोवृषभस्य
3 I. O. माता
4 A ०तां स्वकार्थं
5 A नानुमुच्यते, I. O. नाप्यमुच्यते
6 Both A and I. O. omit the bracketed portion
7 A अनन्त
8 A omits it
9 Both I. O. and A omit it
10 Both I. O. and A omit आहिताग्नये
11 I. O. उत्तमरूपाय
12 A omits it
13 A मुच्यते for मेव च

तथा यममार्गानुवृत्तौ :—

क्षीरप्रपाभिर्दिव्याभिर्मधु[1]-सर्पिर्भिरेव च ।
गोप्रदाता लभेत्तृप्तिं [2]यस्मिन्देशे सुदुर्लभाम् ॥१४॥

गामर्चिता[3]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [4]विष्णुधर्मोक्त-क्षीरप्रपादि-[5][साध्यतृप्तिफलकगोदानफलप्राप्ति]-कामोऽहमेतां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे गोदानानुवृत्तौ (३।३०६।१० ख) :—

गुर्विणीञ्च तथा दत्त्वा वसूनां [6]लोकमश्नुते ॥१५॥

गुर्विणीं गामर्चिता[7]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसु-लोकप्राप्तिकामोऽहमेतां गुर्विणीं गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा गोदानानुवृत्तौ (३।३०६।१७ ख) :—

शुक्लबिन्दुचितां कृष्णां गन्धर्वैः सह मोदते ॥१६॥

दत्त्वेति शेषः । शुक्लबिन्दुचिलितां कृष्णवर्णां गा-[8]मर्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षगन्धर्वलोकप्राप्तिकामोऽहमेतां शुक्लबिन्दुचितां कृष्णां गां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-[9]शङ्कर-श्रीमद्बल्लालसेन-[10]देवविरचिते
श्रीदानसागरे [11]अनलङ्कृतगवीदानावर्त्तः ।

---

1 I. O. म्रं खड for मधु
2 A तस्मिन्देशे
3 A omits मर्चिता
4 A विष्णुधर्मोत्तरोक्त०
5 A reads the bracketed portion as माध्यगोदानतृप्ति
6 I. O. शोक०
7 A omits मर्चिता
8 A omits मर्चिता
9 A सङ्कर
10 A omits देव
11 Both A and I. O. भलङ्कृत०

[1]अथानलङ्कृतबहुगवीदानावर्तः । (७)

विष्णुः—

दशधेनुप्रदो गोलोकम् ॥१॥

प्राप्नोतीति शेषः ।

अत्र यजमानो [2]दशधेनूरर्चिताः अर्चिताय ब्राह्मणाय दद्यात् । ॐ अद्यामुकगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं गोलोकप्राप्तिकामोऽह-[3]मेताः दशधेनूर्गा ददानि । [4][प्रतिग्रहीता स्वस्तीत्युक्त्वा] सावित्रीं पठित्वा धेनव एता रुद्र-[5]दैवता इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । तत ॐ कृतैतद्दानप्रतिष्ठार्थं [6]तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [7][यथेच्छं गाः] पुच्छे गृह्णीयात् ।

गोदानानुवृत्तौ विष्णुः—

[8][शतप्रदश्च ब्रह्मलोकम्] ॥२॥

प्राप्नोतीति शेषः ।

शतं गा[9] अर्चिता अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ब्रह्मलोकप्राप्तिकामोऽहमेताः शतं गा ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अथ स्वेच्छया बहुभ्यो [10]वा दानम् । तथा च दानवाक्ये सम्प्रदाने बहुवचनमूहनीयम् ।

महाभारते (अनु—६६।१६):—

भिक्षवे [11]बहुपुत्राय श्रोत्रियायाहिताग्नये ।
दत्त्वा दशशतं गा वै [12][लोकान् प्राप्नोति उत्तमान्] ॥३॥

---

1 I. O. अथालङ्कृत०, A अलङ्कृत०
2 A दशधेनुरर्चिताः । अर्चिताय, I. O. दशधेनुरर्चिताय
3 A ०मेतां दशधेनु ददानि, I. O. ०मेतां दशधेनुं गां ददानि
4 I. O. प्रतिगृहीतस्वस्त्युक्त्वा for the bracketed portion
5 A ०दैवता
6 I. O. omits it
7 A यथेच्छगाः for the bracketed portion
8 I. O. शतप्रदश्च ब्रह्मलोक for the bracketed portion
9 A गामर्चिता
10 A omits it
11 I. O. बहुपुत्रयाय
12 A लोकल्लोकान् प्राप्नोत्यनुत्तमं for the bracketed portion

भिक्षवे दरिद्राय सहस्रं [1][गा अर्चिता अर्चिताय] [2][उत्कृष्टपाय ब्राह्मणाय] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [3]उत्तमलोकप्राप्तिकामोऽहमेताः सहस्रं गा ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—६६।४५) :—

गवां सहस्रदः प्रेत्य नरकं [4][न प्रपद्यते]।

सर्वत्र विजयश्चापि लभते मनुजाधिप ॥४॥

सहस्रं गा [5]अर्चिता अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नरकाप्राप्ति-सर्वत्रविजय-[6]प्राप्ति-कामोऽहमेताः[7] सहस्रं गा ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—६६।५४क) :—

दशगोसहस्रदो हि शक्रेण सह मोदते ॥५॥

[8]गवां दशसहस्राणय-[9]र्चितान्यर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सातकर्षशकलोकप्राप्तिकामोऽहं[10]-मेता अयुतं गा ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र स्वेच्छया बहुभ्यो दाने संप्रदाने च बहुवचनमूहनीयम्।

तथा गोदानानुवृत्तौ (अनु—६६।५४ख) :—

अक्षयान् लभते [11]लोकान् नरः [12]शतसहस्रदः ॥६॥

लक्षं [13][गा अर्चिता अर्चिताय] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अक्षय-[14]लोकप्राप्तिकामोऽहमेताः[15] लक्षं गा[16] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र [17][बहुसंप्रदानकदाने बहुवचनमूह्यम्]।

---

1 I. O. गा अर्चितार्चिताय and A गां अर्चिताय for the b. p.

2 I. O. ब्राह्मणायोत्कृष्टपाय for the b. p.

3 A अनुत्तम॰

4 I. O. नवपद्यते for the b. p.

5 I. O. गा अर्चितार्चिताय, A गामर्चिताय

6 I. O. ॰लाभप्राप्ति॰

7 A ॰मेतां

8 I. O. परं

9 A omits ॰र्चितान्य॰

10 A ॰मेतां

11 I. O. कामान्

12 I. O. and A शतसहस्रशः

13 A गामर्चिता अर्चिताय, I. O. गा अर्चितार्चिताय for the bracketed portion

14 I. O. फल for लोक

15 Both I. O. and A ॰मेतां

16 I O. गां

17 I. O. स्वेच्छया बहुभ्यो दाने संप्रदाने बहुवचनमूहनीयं for the bracketed portion

शिवपुराणे :—

[1]गोसहस्रप्रदातारो भूमिदातार एव च ।
ये सुवर्णं[2] प्रदातारस्तथा [3]सर्वप्रियंवदाः ॥७॥
[4][ते तत्र गत्वा हृष्टाश्च] निवसन्ति यथासुखम् ।
[5][कल्पायुतसहस्राणां सहस्राणि चतुर्दश] ॥८॥
[6][विचरित्वा पुरवरं] पुनः प्राप्य महीतलम् ।
जायन्ते श्रेष्ठवर्णेषु सुखैश्च [7]परमैर्युताः ॥९॥

[8]सहस्रमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शिवगोसहस्रदानफलप्राप्तिकामोऽहमेताः सहस्रं गा ददानि। स्वस्त्यादिस्वीकारान्तं स्वेच्छया बहुभ्यो दाने [9]संप्रदाने बहुवचनमूहनीयम् ।

इति महाराजाधिराज-निःशङ्क-[10]शङ्कर-श्रीमद्बल्लालसेनदेव[11]-विरचिते श्रीदानसागरे-[12]ऽनलङ्कृतबहुगवीदानावर्तः ।

---

1. I. O. गोसहस्रं
2. A ०प्रदातारस्तथा
3. A सर्वप्रियम्वदः
4. A ते ताह्वापरहृष्टाश्च for the bracketed portion
5. A कल्पायुतसहस्राणि भुवनानि चतुर्दश: for the bracketed portion
6. A विचरित्वा प्रीयकरं, I. O. विचरित्वा सुरवरं
7. I. O. परमैः स्मृतः
8. I. O. सहस्रमर्चितामर्चिताय, A सहस्रमर्चिताय
9. A संप्रदान
10. A सङ्कर
11. A omits देव
12. I. O. ऽलङ्कृत०

अथ विष्णुदैवतवृषभ-[1][दानावर्तः । (८-९)

तथा]-लङ्कृतवृषदानावर्तः । (८)

[2]सम्वर्तः—

यो ददाति [3]वलीवर्दमुक्तेन विधिना शुभम् ।
[4]अव्यङ्गं गोप्रदानाद्धि भुंक्ते दशगुणं फलम् ॥१॥

शुभं शुभ[5]-लक्षणोपेतं [6][शुभलक्षणाश्च गोसहस्रमहादाने लिखितमनुसन्धेयम् । अव्यङ्ग-मत्यव्यङ्गस्यावश्योपादानार्थम् ।] [7][अत्रोक्तेन विधिनेति] सम्वर्तोक्तारोग-[8]गवीदानानन्तर-स्योक्तत्वात्[9] तदलङ्कारपरिग्रहो बोद्धव्यः ।

तथा च सम्वर्तः—

यो ददाति शर्फै[10]रौप्यैर्हैमश्रृङ्गीमरोगिणीम् ।
सवत्सां [11]वस्त्रसंयुक्तां सुशीलां गां पयस्विनीम् ॥२॥
यावन्ति तस्या रोमाणि सवत्साया दिवं गतः ।
[12][तावतो वत्सरानास्ते स नरो] ब्रह्मणोऽन्तिके ॥३॥

अत्र यजमानो वृषमुक्तरूपमुक्तोपकरणयुतमर्चितमर्चिताय ब्राह्मणाय दद्यात् । ॐ अद्यामुकगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सम्वर्तोक्त-वलीवर्द-दानफल-प्राप्तिकामोऽहमेतं सुवर्णश्रृङ्गं [13]रूप्यखुरं वस्त्राच्छादितं वलीवर्दं ददानि । [14][प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा वृषोऽयं विष्णुदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि ।] प्रतिग्रहीता स्वस्ती-त्युक्त्वा वृषं पुच्छे गृह्णीयात् ।

---

1 A वृषदानानुक्रमो एता for the bracketed portion
2 A omits it
3 I. O. वलीवर्दयुक्तेन, A वालिवर्द-युक्तेन
4 I. O. अव्यक्तं, A अव्यङ्ग
5 I. O. ०लक्षणादिपेतं
6 I. O. omits the bracketed portion
7 A अत्रोक्तविधानेति for the b. p.
8 I. O. ०रोगिगवा०
9 I. O. दानानन्तरमन्यो क्तत्वा, A दानान्तरस्योक्तत्वात्
10 I. O. रूप्यै०
11 A वत्स for वस्त्र
12 A तावन्त वत्सरानेव वत्सरे and I. O. तावतो वत्सराद्रास्ते स नरो for the bracketed portion
13 I. O. रौप्यखुरं
14 A omits the bracketed portion

यमः—

दान्तं धुरन्धरं दत्त्वा दशधेनुप्रदो भवेत् ॥४॥

दान्तं विनीतम् ।

अत्र यमोक्तालङ्कृतधेनु-[1] [दानानन्तरमस्य श्रुते]-स्तथाविध-[2]दशधेनुदानफलकत्वाच्च तदीयालङ्कारपरिग्रहः ।

[3][तथा च यमः]—

रुक्मशृङ्गीं रूप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योप-[4]दोहनां धेनुं वस्त्रच्छन्नामलङ्कृताम् ॥५॥
[5]दत्त्वा द्विजेन्द्राय नरः स्वर्गलोके महीयते ।
यावन्ति धेनुरोमाणि तावन्त्यब्दान्य-[6] संशयः ॥६॥

वृषमुक्तरूपमुक्तोपकरण-[7]युतमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । यमोक्तवृषदानफलप्राप्तिकामोऽहमेतं रुक्मशृङ्गं रूप्यखुरं मुक्ताभूषितलाङ्गूलं वस्त्रच्छन्नमलङ्कृतं वृषं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

महाभारते (अनु—७६।२३) :—

[8]दृतिकण्ठमनड्वाहं [9]सर्वरत्नैरलङ्कृतम् ।
दत्त्वा [10]प्रजापतेर्लोकं विशोकः प्रतिपद्यते ॥७॥

[11]दृतिकण्ठं चर्मपट्टिकावेष्टितग्रीवं सर्वरत्नैः परिभाषोक्तैः । वृषं यथोक्त-[12]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विशोकत्वपूर्वक-प्रजापतिलोकप्राप्तिकामोऽहमेतं [13]दृतिकण्ठं सर्वरत्नालङ्कृतमनड्वाहं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. दानानन्तरं तुभ्यं श्रुति for the bracketed portion
2 A omits दश
3 I. O. omits the bracketed portion
4 A ०दोहां
5 I. O. दद्याद्
6 A ०ब्र०
7 I. O. ०युक्तमर्चितमर्चिताय, A ०मर्चिताय
8 I. O. इति for दृति
9 I. O. सर्व्वरत्नमलङ्कृतं
10 I. O. प्रजापतेर्लोकान्, A प्रजापतेर्लोकं
11 I. O. इतिकण्ठं
12 A omits मर्चित
13 I. O. इतिकण्ठं

तथा (अनु—७८।१४-१५) :—

[1]युवानमिन्द्रियोपेतं शतेन सह [2]यूथपम् ।
[3]गवेन्द्रं [4]ब्राह्मणेन्द्राय भूरिश्रृङ्गमलङ्कृतम् ॥८॥

इन्द्रियोपेतं [5]प्रजननसमर्थं [6][गवेन्द्रं गोप्रधानं] भूरिश्रृङ्गं सुवर्णश्रृङ्गम् अलङ्कृतं हेमतिलकादिभिः ।

ऋषभं ये प्रयच्छन्ति श्रोत्रियाय परन्तप ।
[7]ऐश्वर्यं तेऽधिगच्छन्ति जायमानाः पुनः पुनः ॥६॥

वृषमुक्तरूपमुक्तोपकरणयुतं धेनुशतसहितमर्चितं तपोवृत्त[8]-विद्याशालिने वेदविदे ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तगोशत-[9]सहितगवेन्द्रदान-फलप्राप्तिकामोऽहमेतं गोशतसहितं भूरिश्रृङ्गमलङ्कृतं गवेन्द्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—७६।२१) :—

वैराटपृष्ठ-[10]मुक्ताणां सर्वरत्नैरलङ्कृतम् ।
प्रदाय मरुतां [11]लोकानजरान् प्रतिपद्यते ॥१०॥

वैराटं [12]विराटदेशोद्भवं ताम्रं [13][काष्ठेचर इति] प्रसिद्धं [14][सर्वरत्नैः परिभाषोक्तैः ।] [15][विराटताम्रपृष्ठमुक्ताणं]-मुक्तोपकरणमभ्यर्च्यार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अजरमरुल्लोकप्राप्तिकामोऽहमेतं वैराटपृष्ठं सर्वरत्नाल-[16]ङ्कृतमुक्ताणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A प्रधान॰ for युवान॰
2 I. O. यूथयन्
3 I. O. परेन्द्रं
4 A ब्रह्मणेन्द्राय
5 A प्रसवसमर्थं, I. O. भूमं रसमन्नं
6 I. O. परेन्द्रं गोपधानं for the bracketed portion
7 A ऐश्वर्यश्चैव गच्छन्ति
8 A ॰व्रत, I. O. ॰वित्त
9 A omits सहित
10 I. O. and A ॰मुक्ताणां and ॰मुक्ताम respectively
11 I. O. लोकानुत्तमान्
12 A विराटदेशोत्तरं
13 A काष्ठे कुत्र for the bracketed portion
14 A सर्व्वरत्नैरलंकृतं for the bracketed portion
15 I. O. इव for the bracketed portion
16 I. O. ॰ङ्कृतं मुक्ताणां

[1]आग्नेयपुराणे :—

[2]प्रत्यक्षं वृषदानस्य फलं शृणु महामते ।
[3][पवित्रं पावनञ्चैव सर्वदानोत्तमं तथा ॥११॥]
[यादृशश्च[4] वृषो देयो यजमानेन वा यथा ।][5]
[[6]समन्वितो धेनुशतैरुक्षा[7] देयो][8] धुरन्धरः ।
वोढा चैवातिपुष्टाङ्गो द्युतिमान् [9]नृपसत्तम ॥१२॥

धुरन्धरः [10]भारवहनक्षमः वोढा [11]दृढपृष्ठः अतिपुष्टाङ्गः स्थूलावयवः द्युतिमान् दर्शनीयाकृतिः ।

[12]युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ।
[13]दाता [14]तरति [15][संसारसागरञ्चापि तैः सह ॥१३॥
भुनक्ति विविधान् भोगानिह बन्धुजनैः सह ।
रोगशोकविनिर्मुक्तः सर्वदोषविवर्जितः ॥१४॥]

[16][युवा तरुणः भद्रः शुभलक्षणोपेतः सुशीलोऽहिंस्रः सर्वदोषविवर्जितः अध्यङ्गः ।]

अलङ्कृतं[17] परैर्वस्त्रैः [18][स्वर्णशृङ्गं तथैव च ।
चतुर्भिश्चैव राजेन्द्र खुरै रौप्यैं]-रलङ्कृतम् ।

परैर्वस्त्रै र्यथाशक्त्युत्कृष्टवस्त्रैरल-[19]ङ्कृतमित्यत्र कृत्वेत्यध्याहार्यम् ।

1 A आग्नेयपुराणोक्त
2 I. O. प्रत्येक्ष
3 A omits the bracketed portion
4 A यादृशस्य
5 I. O. omits the bracketed portion
6 A समाचितो
7 A रक्ष for रुक्षा
8 I. O. दृषधेनुसमोपेतान् द्वियश्चैव for the bracketed portion
9 I. O. नृपसत्तम:
10 I. O. वह० for भार०
11 A दृढ: पृष्ठ: ; I. O. पृष्ठं न
12 A सुरा
13 I. O. ततो
14 Both I. O. and A भवति
15 I. O. संसारे नात्र कार्या विचारणा for the bracketed portion
16 A omits the bracketed portion
17 I. O. अलङ्कृत्य
18 I. O. पुच्छेऽङ्कि समुपस्थिते । सुवर्ण शृङ्गं राजेन्द्र खुरं रौप्य for the bracketed portion
19 I. O. ०ङ्कृताद्दित्यत्र

[1]सुपुच्छं पट्टवस्त्रेण ब्राह्मणायोपपादयेत् ।
मन्त्रेणानेन राजेन्द्र[2] [शृणुष्व तद्वदामि]ते ॥१६॥
[3]धर्मस्त्वं वृषरूपेण [लोके [4]चरसि नित्यशः ।
तेन धर्मेण विप्राय त्वां ददामि सुलक्षण ॥१७॥][5]
प्रीयतां धर्मराजो मे [6]प्रणिपत्य विसर्जयेत् ।
सप्तजन्मकृतं पापं वाङ्मनःकायकर्मभिः ॥१८॥
तत्सर्वं विलयं [7]याति वृषदानान्न[8] संशयः ।
[9]यानं वृषभसंयुक्तं दीप्यमानं [10]सुतेजसा ॥१९॥
गन्धर्वाप्सरसाकीर्णं गीतनृत्यसमाकुलम्[11] ।
आरुह्य कामगं दिव्यं [12]स्वर्लोकमधिगच्छति ॥२०॥
यावन्ति तस्य रोमाणि वृषभस्य[13] महीपते ।
स्वर्गमाप्नोति तावन्ति अत्रायातो नृपो भवेत् ।
[14]सर्वयाजी महातेजा [15]वीतशोको निरामयः ॥२१॥

यथोक्त-[16]वृषमुक्तोपकरणयुतं कृत्वाऽभ्यर्च्यार्चिताय ब्राह्मणाय ॐ धर्मस्त्वमित्यादि प्रीयतां धर्मराजो मे इत्यन्तं मन्त्रं पठित्वा [17]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्ता-लङ्कृतवृषदानफलप्राप्तिकामोऽहमेतं वस्त्रालङ्कृतं सुवर्णशृङ्गं राजतखुरालङ्कृतं पट्टवस्त्रविभूषित-पुच्छं वृषं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[18]विष्णुधर्मे :—

युवानं बलिनं श्यामं शतेन सह [19]यूथपम् ।
गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृङ्गमलङ्कृतम् ॥२२॥

1 A पुच्छस्य
2 A शृणुस्व वदद्दामि and I. O. तं शृणुष्व वदामि for the bracketed portion
3 A ॐ धर्मस्य
4 A चरति
5 I. O. जगदानन्दकारकः । अष्टमूर्ते-रधिष्ठानः पाहिमां कृष्णता भुवि for the bracketed portion
6 A तामुपभूत्य
7 A याति
8 A ०नु
9 A यान, I. O. पानं
10 I. O सुतेजसा
11 A ०समाकुलं
12 I. O. स्वर्लोका०
13 A गोवृषस्य
14 A सोमयाजी
15 I. O. वीतशोक
16 I. O. वृषभो for वृष
17 A omits it
18 A विष्णुधर्मोत्तरे
19 I. O. यूथयन्

वृषभं [1]ये प्रयच्छन्ति [2]ब्राह्मणायाहिताग्नये ।
[3][ऐश्वर्य्यं चाभिगच्छन्ति] जायमानाः पुनः पुनः ॥२३॥

युवानं तरुणं [4]बलिनं [5]हलादिवहनक्षमं [6][श्यामं नीलवर्णं] शतेन सह [7][गोशतेन सह] यूथपं [8][यूथप्रधानं गवेन्द्रं गोपतिं] भूरिश्टङ्गं सुवर्णश्टङ्गम् अलङ्कृतं यथाशक्ति हैम-तिलकादिना [9]यथोक्तं वृषमुक्तोपकरणयुत-[10]मर्चितमर्चिताय ब्राह्मणाय विद्यातपोवृत्तशालिने अग्निहोत्रिणे ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्तश्याम-[11]वृषदानफलप्राप्ति-कामोऽहमेतं गोशतसहितं भूरिश्टङ्गमलङ्कृतं वृषं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३०६।३२) :—

सहस्रेण [12]गवां सार्द्धं ये प्रयच्छन्ति यूथपम् ।
अलङ्कृतं यथाशक्त्या गोलोकं यान्ति ते नराः ॥२४॥

[13]यथोक्तं वृषं सुवर्णश्टङ्गादिभिरल-[14]ङ्कृत्यार्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्य-मन्तमुक्त्वा [15]दद्यात् । गोलोकप्राप्तिकामोऽहमेतं गोसहस्रसहितमलङ्कृतं वृषं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेन-[16]देवविरचिते
[17]श्रीदानसागरे अलङ्कृतवृषदानावर्तः ।

---

1 A य
2 I. O. श्रोत्रियायाहिताग्नये, A ब्राह्मणाय हिताग्नये
3 I. O. ऐश्वर्य्यं तेभिजायन्ते and A ऐश्वर्य्यं चातिगच्छन्ति for the bracketed portion
4 I. O. omits it
5 A हलादिवद्वहनक्षमं, I. O. हलादिवहनसमर्थ
6 I. O. reads the bracketed portion after यूथप्रधानं, a little below
7 A omits the bracketed portion
8 A omits the bracketed portion
9 I. O. यथोक्त॰
10 A omits मर्चित
11 I. O. ॰वृषभ॰
12 A गवा
13 A यथोक्त॰
14 A ॰ङ्कृतं अर्चितं अर्चिताय
15 A omits it
16 A omits देव
17 I. O. दानसागरे

[1] [अथानलङ्कृतवृषदानावर्तः । (९)

मनुः (४।२३१ग) :—]

[2]अनडुहः श्रियं पुष्टाम् ॥१॥

आप्नोतीति[3] सम्बन्धः । अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्च्चितं वृषं दद्यात् । [4]ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्म्मणे तुभ्यं पुष्टश्रीप्राप्तिकामोऽहमेतमनड्वाहं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अनड्वानयं विष्णुदैवत [5]इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [6]वृषं पुच्छे गृह्णीयात् ।

महाभारते :—

स्वर्गो वै मूर्तिमानेष[7] वृषभं यो गवां पतिम् ।
विप्रे [8]गुणयुते दद्यात् स वै स्वर्गे महीयते ॥२॥

गवां [9]पतिं [10]गोव्रजेषु [11]स्वच्छन्दचारिणं यथोक्तवृष-[12]मर्च्चितमर्च्चिताय विद्यातपःशालिने ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतं वृषभं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[13]तथा (अनु—७३।४५) :—

अनड्वाहं[14] ब्राह्मणाय प्रदाय [15][धुर्य्यं युवानं] बलिनं [16]विनीतम् ।
हलस्य वोढार-[17]मनन्तवीर्य्यं प्राप्नोति [18]लोकान् दशधेनुदस्य ॥३॥

[19][धुर्य्यं शकटवहनक्षम]-मनन्तवीर्य्यं [20]रेतस्विनं विनीतमहिंस्रं यथोक्त-[21]वृषभमर्च्चिताय

1 A omits the bracketed portion
2 I. O. अनडुहः
3 A आप्नोतीह
4 A omits it
5 I. O. °मित्युक्त्वा
6 I. O. वृषपुच्छे, A वृषपुच्छं
7 A मूर्त्तिमानेव
8 A गुणवते
9 A मतं
10 I. O. गोव्रजे
11 I. O. स्वच्छन्दचारिणां
12 A omits मर्च्चित
13 A omits it
14 A अनुड्वाहं
15 A धूर्य्यगवानं for the bracketed portion
16 A नवनीतं
17 Both I. O. and A °मन्तवीर्य्य
18 A लोका
19 A धूर्य्यं कटकवहनक्षमं for the bracketed portion
20 I. O. and A वेतस्विनं and वैतस्विनं respectively
21 I. O. वृष for वृषभ

ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दशधेनु-[1]दलोकप्राप्तिकामोऽहमेत[2]-मनड्वाहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[3][तथा (वन—१८६।८क) :—

दत्त्वानड्वाहं] सूर्यलोकं व्रजन्ति ॥४॥

वृष-[4]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सूर्यलोकप्राप्तिकामोऽह-[5]मेतमनड्वाहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

अनड्वाहञ्च यो दद्याद्धल [6][वन्तं धुरन्धरम्]।

स निस्तरति दुर्गाणि स्वर्गलोकञ्च गच्छति ॥५॥

धुरन्धरं हलादिवहनक्षमं [7]यथोक्तं वृषमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दुर्गनिस्तार-[8]पूर्वक-स्वर्गप्राप्तिकामोऽह-[9]मेतमनड्वाहं ददानि। स्वस्त्यादि स्वीकारान्तं पूर्ववत्।

वराहपुराणे (२०७।५१ख) :—

[10]धुर्य्यप्रदानेन [11]तथा गवाञ्च [12]लोकानवाप्नोति [13]तथा वसूनाम् ॥६॥

हलादिवहनक्षमं वृषमर्चितमर्चिताय [14]ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गोलोकवसुलोकप्राप्तिकामोऽहमेतं वृषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[15][तथा (२०७।५२ख):—

[16]राज्यन्तथा गोवृषभप्रदाने स्वर्गं] शुभं शाश्वतमाप्नुवन्ति[17] ॥७॥

[18]गोवृषभं गवां पतिम्। [19]यथोक्तं वृषमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्य-

1 I. O. लोक and A फल for दलोक
2 I. O. ॰मेम॰ for ॰मेत॰
3 A दत्वानुड्वाहं for the bracketed portion
4 A omits मर्चित
5 A omits मेत
6 A वन्त धुरन्धर for the bracketed portion
7 A यथोक्त
8 A omits पूर्वक
9 A omits मेत
10 Varāha P. धूप॰
11 A omits तथा
12 A लोकान् सम्यगप्राप्नो
13 Varāha P. नरो
14 A omits it
15 A दत्त्वा तथा गोवृषभं स्वर्गं for the bracketed portion
16 I. O. राज्यतथा
17 Varāha P. reads the entire line as गवां तथा गोवृषभप्रदाने: स्वर्गं सुखं शाश्वतमामनन्ति
18 A गोवृषं
19 A यथोक्त

मन्त्रमुक्त्वा दद्यात्। शाश्वतोत्कृष्ट-स्वर्ग-[1]राज्यप्राप्तिकामोऽहमेतं [2]वृषभं ददानि। स्वस्त्यादिस्वोकारान्तं पूर्ववत्।

ब्रह्मपुराणे :—

गोदानानि पवित्राणि विष्णुमुद्दिश्य साधुषु।
ये [3]प्रयच्छन्ति [4]धर्मज्ञ कृशेषु [5]कृषिवृत्तिषु ॥८॥

[6]कृशेषु [7]सुदीनेषु।

[8]ते यान्ति दीप्तवर्णाभै[9]-र्विमानैर्मणिचित्रितैः।
धर्मराजपुरं [10]श्रीमत्सेव्यमानाऽप्सरोगणैः[11] ॥९॥

अत्र गोदानानीति बहुवचनश्रुतेः साधुष्विति बहुवचनं बहुप्रयोगापेक्षम्। कृषिवृत्तिष्विति श्रुतेर्गोदानानीति गोपदं [12]वृषपरम्। [13]यथेष्टसंख्यान् [14]वृषान् हलवहनक्षमानर्चितानर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्त्रमुक्त्वा दद्यात्। [15]ब्रह्मपुराणोक्त-कृषिवृत्ति-द्विजसंप्रदानक-गोदान[16]-फलप्राप्तिकामोऽहमेतान् वृषान् ददानि। [17]विष्णुः प्रीयताम्। स्वस्त्यादिस्वोकारान्तं पूर्ववत्।

आग्नेयपुराणे :—

[18]पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च।
ग्रहणे [19][च व्यतीपाते] संक्रान्तौ च दिनक्षये ॥१०॥
यानमश्वमनड्वाहं हेमरूप्यमणींस्तिलान्।
ये प्रयच्छन्ति पापेषु [20]निरताः सर्वदा मुने।
न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत[21] ॥११॥

पापेषु निरताः सर्वदेति [22]श्रवणादतिप्रचुरपापक्षयार्थमिदं देयम्। उक्तसमयानामन्यतमे

---

1 A लोक
2 A वृषं
3 A प्रयन्ति
4 I. O. धर्म्मज्ञाः
5 A कृषिवृत्तिषु
6 A कृषेषु
7 A सुदिनेषु, I. O. दीनेषु
8 A omits it
9 A दीप्तवर्णैः०
10 A श्रीमान०
11 A ०गणाः
12 A वृषपदं
13 A यथेष्टसंख्या
14 A omits it
15 I. O. ब्राह्मपुराणोक्त
16 A गोलोक
17 A विष्णु
18 I. O. पुण्ये
19 A व्यतीपाते च for the bracketed portion
20 A निरता, I. O. निरतः
21 A दानमित्युतः
22 I. O. वचनादति०

वृषमर्चित[1]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्ता-[2]नलङ्कृतवृषदानफलप्राप्तिकामोऽहमेतमनड्वाहं[3] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[4]आदिपुराणे :—

[5]प्रदेयो लक्षणाढ्यो[6] वा दशधेनुसमो वृषः।

स्वर्गे [7]युगसहस्राणि गवां [8]लोम्ना समानि तु।

लक्षणाढ्यो[9] गोसहस्रोक्तलक्षण-[10]सम्पन्नः। वाशब्दः पूर्वोक्त-[11]दानापेक्षया।

वसन्ति गोप्रदातारो [12]भुञ्जते सुखमक्षयम् ॥१२॥

[13]सुलक्षणं वृषमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [14]आदिपुराणोक्त-वृषदान-फलप्राप्तिकामोऽहमेतं वृषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[15]आदिपुराणे :—

यो ददाति [16]अनड्वाहं सुशीलं [17]साधुवाहिनम्।

उभयोः पार्श्वयोर्दत्वा छत्रोपानह-[18]कम्बलम् ॥१३॥

[19]सुशीलमहिंस्रं साधुवाहिनं [20][हलादिवाहनेषु साधुम्]।

शीलवेदाङ्ग-[21]सम्पन्ने इष्टे शिष्टे [22]द्विजे नरः।

पुण्ये वा जन्मनक्षत्रे [23]अयने विषुवेषु च ॥१४॥

इष्टे [24]अभीष्टे शिष्टे [25]सदाचारे।

दत्वा तस्य अनड्वाहं तस्मिन् स्थाने महामुने।

[26]क्षुतपिपासार्दितस्यापि अग्रतः प्रतिपद्यते ॥१५॥

1 A omits मर्चित
2 A omits न
3 A ॰मेतामहं
4 I. O. आदित्यपुराणे
5 A प्रदेया
6 A लक्षणाढ्या, I. O. लक्षणाढ्यो
7 I. O. च शतसाहस्रं
8 I. O. रोम्ना
9 I. O. लक्षणाढ्यो
10 Both I. O. and A संपूर्णः
11 I. O. ॰देयापेक्षः
12 A भुञ्जन्ति
13 I. O. सलक्षण
14 I. O. आदित्यपुराणोक्त॰
15 I. O. आदित्यपुराणे
16 A स्वनड्वाहं
17 A गाधुवाहिनं
18 A कन्थलं
19 I. O. सुशीलं सहिष्णुं
20 I. O. हलादिवाहने साधुं and A हलादिवाहनेष्वसाधु for the bracketed portion
21 A ॰सम्पन्न
22 A पि वो for द्विजे
23 I.O. इयने, A अपरे
24 A सुभीष्टे
25 A omits it
26 I. O. क्षुतपिपासार्पितस्यापि, A क्षुपपासार्दितस्यापि

उक्तसमयानामन्यतमे यथोक्तरूपं वृषम् एकपार्श्वे [1]छत्रमुपानद्युगमपरत्र च[2] कम्बलं [3]दत्वाऽभ्यर्चितार्चिताय यथोक्तरूपाय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [4]आदिपुराणोक्त-वृषदान-फलप्राप्तिकामोऽहमेतं छत्रोपानत्[5]-कम्बलयुत[6]-मनड्वाहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नरसिंहपुराणे :—

कपिलागोप्रदानेन परार्थे चावनीपते[7]।

[8]गोवृषस्य प्रदानेन [9]स्वर्गं मन्मथमाप्नुयात् ॥१६॥

गोवृषस्य गवां पत्युः परार्थे मातापित्राद्यर्थे। वृषमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नरसिंहपुराणोक्तवृषदानफलप्राप्तिकामोऽहमेतममुकार्थे[10] वृषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३०६।३०-३१) :—

[11]वृषभं ये प्रयच्छन्ति शतेन सह यूथपम्।

सर्वपापविनिर्मुक्तास्ते प्रयान्त्यमरावतीम् ॥१७॥

कल्पावशेषं त्रिदिवे सुख-[12]मुष्य नरोत्तमाः।

[13]मानुष्ये धनसंयुक्ता भवन्ति सुखिनस्ततः ॥१८॥

यूथ-[14]प्रधानं वृषं गोशतसहित-[15]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-गोशतसहित-वृषदानफलप्राप्तिकामोऽहमेतं गोशत-[16]युतं वृषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[17]तथा :—

उक्षाणं ये प्रयच्छन्ति दशधेनु-[18]युतं तथा।

सर्वपापविनिर्मुक्तास्ते व्रजन्त्यमरा-[19]वतीम् ॥१६॥

1 A वर्जोपानद्वपरत्र
2 I. O. omits it
3 A दत्वा अर्चिताय
4 I. O. आदित्यपुराणोक्त०
5 A ०नद्द०
6 A ०युक्त०
7 I. O. चावनीपते
8 A गोवृषभ
9 I. O. स्वर्गे
10 A अमुकनाम्न for अमुकार्थे
11 A. D. उक्षां च
12 A ०मुष्य
13 I. O. मानुष्ये
14 I. O. प्रधान
15 I. O. omits मर्चित
16 A ०युत
17 A omits it
18 I. O. ०युतस्तथा
19 A ०वतीन्

दशधेनुसहितं वृष-[1]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-दशधेनुसहितवृषदान-[2]फलप्राप्तिकामोऽहमेतं दशधेनुसहित-[3]मुक्षाणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०६।३४) :—

गोयुगं ये प्रयच्छन्ति [4]सीरयूपयुतं [5]द्विजाः।
सर्वकाम-[6]समृद्धस्य प्राप्नुवन्ति नराः फलम् ॥२०॥

[7]द्विजा इति सम्बोधनं सीरः हलं यूप ईशादण्डः। हलवहनक्षमं वृषद्वयं सोपकरण-हलसहित-[8]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [9]विष्णुधर्मोत्त-रोक्त-वृषयुगदानफलप्राप्तिकामोऽहमेतत्[10] सीरयूपयुतं गोयुगं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [11]अनलङ्कृतवृषदानावर्तः।

1 A omits मर्चित
2 A omits फल
3 I. O. ०मुक्षाणकं
4 I. O. सीर०
5 I. O. द्विजः
6 A वृषयाय
7 I. O. द्विज
8 A omits मर्चित
9 I. O. विष्णुधर्मो क्त०
10 A ०मेतं
11 A अलङ्कृत०

अथ गवाह्निकदानावर्तः । (१०)

यमः :—

गवां घासप्रदानेन सर्वपापैः प्रमुच्यते ॥१॥

अत्राभिमतदिने प्रातर्यजमानो [1]गृहीतोदकपूर्णताम्रपात्र उदङ्मुखोपविष्टो यथाशक्ति गोभ्यो [2][घासदानं सङ्कल्पयेत् । ॐ सर्वपापविमुक्तिकामो गोभ्यो] घासं दास्ये । ततः-प्रभृति यथेच्छं [3][यथेष्टकालञ्च गोभ्यो घासं] दद्यात् ।

आग्नेयपुराणे :—

घासमुष्टिं परगवे [4]अन्नं दद्याच्च यः सदा ।

अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति ॥२॥

परगवे यथेच्छं बहुकालं [5]घासमुष्टिमन्नञ्च [दातुं [6]सङ्कल्पयेत् । ॐ स्वर्गप्राप्तिकामोऽहमन्नं[7] परगवे घासमुष्टिञ्च][8] दास्ये । ततः स्वयमकृताहारो यथा-[9]सम्भवं घासमुष्टिमन्नञ्च [10]प्रत्यहं दद्यात् ।

नन्दिपुराणे :—

यो गवां रुद्रदत्तानां [11]कोऽपि दद्याद् गवाह्निकम् ।

स गच्छेद् रुद्रभवनं कुलद्वयसमन्वितः ॥३॥

रुद्रदत्तानां शिवभट्टारकाय[12] दत्तानां गवाह्निकं भक्तघासादिरूपम् । [13][गवाह्निकं रुद्रगवीभ्यः पूर्ववत् सङ्कल्पयेत् । ॐ नन्दिपुराणोक्त-रुद्रगवीगवाह्निकदानफलप्राप्तिकामोऽहं रुद्रगवीभ्यो गवाह्निकं दास्ये । ततो यथेच्छं यथेष्टकालञ्च दद्यात् ।

---

1 I. O. गृहीतोदपूर्णपात्र
2 I. O. omits the bracketed portion
3 A यथेष्टकालं घासञ्च गोभ्यो for the bracketed portion
4 A सान्नं
5 A घासमुष्टिं दानकल्प
6 A सर्व before this
7 A मिदं for मन्नं
8 I. O. omits the bracketed portion
9 A ०सम्भारं
10 A omits it
11 I. O. कश्चित्
12 A ०भट्टारकायेव
13 A omits the bracketed portion

तथा :—

योऽन्यासामपि गवां दद्यात् कश्चिन्मर्त्यो [1]गवाह्निकम् ।
सोऽपि गच्छेन्नरः स्वर्गं युगं दिव्यं न संशयः ॥४॥

अन्यासामिति शिवभट्टारकाय दत्ताभ्यो[2]]ऽन्यासां सामान्य-[3]गवामित्यर्थः । पूर्ववद् गोभ्यो [4]गवाह्निकदानं सङ्कल्पयेत् । ॐ [5]अद्य दिव्ययुगावच्छिन्नस्वर्गप्राप्तिकामोऽहं गोभ्यो [6]गवाह्निकं दास्ये । ततो यथेच्छं [7]यथेष्टकालञ्च दद्यात् ।

कालिकापुराणे :—

दद्याद् गवाह्निक-[8]ञ्चैव [9]तमुद्दिश्य [10]निवेदयेत् ।
अथापि किं [11]प्रलापेन यत्किञ्चित् सुकृतं भुवि ।
[12]सर्वन्तत् फलमाप्नोति शिवमुद्दिश्य लीलया ॥५॥

तमुद्दिश्य निवेदयेत् शिवप्रीतये दद्यादित्यर्थः । पूर्ववद् गोभ्यो यथाशक्ति गवाह्निकं [13]सङ्कल्प्य दद्यात् । [14]ॐ कालिकापुराणोक्त-गवाह्निकदानफलप्राप्तिकामोऽहं गोभ्यो गवाह्निकं दास्ये । ततः [शिवो मे][15] प्रीयता-[16]मित्युक्त्वा गोभ्यो गवाह्निकं यथेच्छं [17]यथेष्टकालञ्च दद्यात् ।

विष्णुधर्मोत्तरे :—

सायंप्रातर्मनुष्याणामशनं देवनिर्मितम् । (३।३०६।५६ख)
तत्रैकमशनं [18]दत्त्वा गवां नित्यमतन्द्रितः[19] ॥६॥
द्वितीयं[20] स्वयमश्नाति तेन संवत्सरान्नरः ।
गवां लोकमवाप्नोति यावदिन्द्राश्चतुर्दश ॥७॥

---

1 I. O. पराह्निकं
2 I. O. दत्तान्यो॰
3 A ॰गवोद्दामभित्यर्थः
4 A वाह्निकदानं, I. O. पराह्निकं दानं
5 A omits it
6 I. O. पराह्निकं
7 Both I. O. and A यथेष्ट-कालञ्च
8 A ॰ञ्चेव
9 A तदुद्दिश्य
10 A निवेदयेत्
11 A प्रलपनं
12 I. O. सर्व्वन्तत्, A कुर्व्वन्त
13 A सङ्कल्पं
14 A omits it
15 A शिव for the bracketed portion
16 I. O. मिति वक्त्वा
17 A यथेष्टकामञ्च, I. O. यथेष्ट-कालञ्च
18 I. O. दद्याद्
19 I. O. ॰तन्द्रित:
20 I. O. द्वितीय

पूर्व्वव-[1]देकाशनदानं गवे सङ्कल्पयेत्। ॐ अद्यारभ्य संवत्सरं यावत् प्रत्यहं विष्णुधर्मोत्तरोक्त-[2]गवेकाशनदानफलप्राप्तिकामोऽहं गवे स्वकीयं प्रातरशनं दास्ये। ततः संवत्सरमेकं प्रत्यहं प्रथम-[3]भोजनार्थोपात्तमन्नं गवे दत्त्वा [4]स्वयमेकवारं भुञ्जीत।

तथा :—

अग्रभक्तं[5] नरो दत्त्वा नित्य-[मेव तथा][6] गवाम्।
[7]समाषट्केन लभते नागलोकं समायुतम्॥८॥

[8]समायुतं संवत्सराणामयुतम्। पूर्व्ववद्गवे अग्र-[9]भक्तदानं सङ्कल्पयेत्। ॐ अद्यारभ्य [10]समाषट्कं यावत् प्रत्यहं [11]समायुतनागलोकप्राप्तिकामोऽ[हं गवे अ][12]-ग्रभक्तं दास्ये। ततस्तदवधि संवत्सर-[13]षट्कपर्य्यन्तं प्रत्यहं स्वकीय-[14]भोजनार्थोपात्तान्नादग्रभागमाहृत्य गवे[15] दद्यात्।

तथा :—

[16]गवां लवणदानेन रूपवानभिजायते।
सौभाग्यं महदाप्नोति लावण्यञ्च [17]द्विजोत्तम॥९॥

पूर्ववद् गोभ्यो यथेच्छं लवणदानं [18]सङ्कल्पयेत्। [19]ॐ विष्णुधर्मोत्तरोक्त-गो-[20]लवणदानफलप्राप्तिकामोऽहं गोभ्यो लवणं [21]दास्ये। तदवधि यथेच्छं यथेप्रकालञ्च [22]लवणं दद्यात्।

तथा (३।२९१।६ख) गोभ्यो दानानुवृत्तौ :—

[23]तासां घासप्रदानेन [24]महापुण्यमवाप्नुयात्॥१०॥

1 I. O. ०देकाद्मदानं
2 I. O. गवैकाद्मदान०
3 A ०भोजनार्थदत्तमन्नं
4 A वासा and I. O. माष for स्वय
5 A अग्राभुक्तं, I. O. अग्रभक्तं
6 A मैकतयो for the bracketed portion
7 I. O. समाषकेन, A समासाङ्कं स
8 A omits it
9 I. O. ०भुक्त०
10 A समासाङ्कं
11 A समायुतं
12 I. O. omits the bracketed portion
13 A omits षट्क
14 I. O. भोजनार्थोपात्ताद्न्नाग्रभागमाहृत्य, A भोजनार्थदत्तान्नादाकृष्य
15 A परगवे
16 I. O. गवौ
17 I. O. द्विजोत्तमः
18 I. O. संकल्पा
19 A omits it
20 A लोक for लवणदान
21 A दास्येति
22 A omits it
23 I. O. omits it
24 I. O. महत्पुण्य०

पूर्ववद् गोभ्यो [1]घासदानं सङ्कल्पयेत् । ॐ महापुण्य-[2]प्राप्तिकामोऽहं गोभ्यो घासं दास्ये । ततो घासं यथेच्छकालं दद्यात् ।

तथा (३।२६१।११क) गवां दानानुवृत्तौ :—

औषधञ्च तथा दत्त्वा विरोगस्त्वभिजायते ॥११॥

व्याधितस्य [3]गो रोगोपशान्तये [4]यथेष्टमौषधदानं पूर्ववत् सङ्कल्पयेत् । ॐ विरोगत्व[5]-प्राप्तिकामोऽहं [6][गोभ्य औषधं दास्ये] । [7][ततो गवाह्निकदानाशक्तौ यथेच्छकालञ्च औषधं दद्यात् ।]

इति महाराजाधिराज-निःशङ्क-शङ्कर[8]-श्रीमद्बल्लालसेन-[9]देवविरचिते श्रीदानसागरे गवाह्निकदानावर्तः ।

1 I. O. घासदान
2 A ०प्रीति०
3 A omits गो
4 I. O. यथेच्छ०
5 I. O. त्वभि for त्व
6 I. O. गोभ्य तत्र्ण only for the bracketed portion
7 A reads the bracketed portion as तथा गवां दानाशक्तिवशे-च्छया कालञ्च औषधं दास्ये
8 A सङ्कर
9 A omits देव

अथ विष्णुदैवतभूमिदानावर्तः। (११)

तत्र भूमिदानप्रशंसा।

[1]दानबृहस्पति :—

सुवर्णं रजतं वस्त्रं [2]मणिरत्नं वसूनि च।
सर्वमेतद्भ-[3]वेद्दत्तं वसुधां यः प्रयच्छति ॥१॥

तथा :—

यत् किञ्चित् कुरुते पापं पुरुषो लोभ-[4]मोहितः।
ततसर्वं भूमिदानेन क्षिप्रमेव प्रणश्यति ॥२॥
विप्राय दद्यात् सुगुणान्विताय तपोऽभिजुष्टाय जितेन्द्रियाय।
यावन्मही तिष्ठति [5]सागरान्ता तावत्तपस्तस्य[6]भवत्यतुल्यम् ॥३॥

[7]तथा :—

[8][यथाप्सु पतितः] शक्र तैलबिन्दुर्विसर्पति।
एवं भूमिकृतं दानं [9][मध्ये मध्ये] प्ररोहति ॥४॥
शङ्खं भद्रासनं छत्रं [10]वराश्वा वरवारणाः।
भूमिदानस्य [11]पुष्पाणि फलं [12]स्वर्गः पुरन्दर ॥५॥
आदित्यो वरुणो विष्णु-[ब्रह्मा सोमो हुताशनः।
शूलपाणिश्च भगवानभिनन्दति भूमिदम् ॥६॥
सौवर्णा यत्र प्रासादा वसोर्धाराश्च कामदाः।
गन्धर्वाप्सरसो यत्र][13] तत्र [14]गच्छन्ति भूमिदाः ॥७॥
बहुभिर्वसुधा दत्ता राजभिः [15]सगरादिभिः।

---

1 A omits it
2 I. O. मणिरत्नमसूनि
3 I. O. ०द्यं दत्तं
4 A ०मव्हितः
5 I. O. सागराक्षा
6 I. O. भवेद्तुल्यं
7 I. O omits it
8 A यथापतितं for the b. p.
9 A मध्ये मध्ये for the bracketed portion
10 A वराश्ववरवारणा
11 A पुष्पानि
12 I. O. स्वर्गाः, A स्वर्गं
13 A omits the bracketed portion
14 I. O. गच्छति
15 A सगणादिभि:

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥८॥

षडशीतिसहस्राणि [1]योजनानि वसुन्धरा ।
दत्ता स्वल्पापि राजेन्द्र सर्वकामप्रदायिनी ॥९॥

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ [2]नियतं स्वर्गगामिनौ ॥१०॥

सहस्रमेव धेनूनां शतं [3]वानडुहां समम् ।
[4]दशानडुत्-समं यानं दशयानसमो हयः ॥११॥

दशवाजिसमा कन्या भूमिदानन्तु [5]तत्समम् ।
[6][भूमिदानात् परं नास्ति विद्या]-दानं[7] ततोऽधिकम् ॥१२॥

सुवर्णदानं गोदानं भूमिदानञ्च वासव ।
एतत् [8]प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥१३॥

सम्वर्त :—

सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
[9]हाटकक्षितिगौरीणां [10]सप्तजन्मानुगं फलम् ॥१४॥

अग्नेर-[11][पत्यं प्रथितं] सुवर्णं [12]भूर्वैष्णवी सूर्यसुताश्च गावः ।
तेषामनन्तं [13]फलमश्नुवीत यः काञ्चनं गाञ्च महीञ्च दद्यात् ॥१५॥

बृहस्पति :—

आस्फोटयन्ति पितरः [14]प्रवदन्ति पितामहाः ।
भूमिदोऽस्मत्कुले जातः सोऽस्मान् [15]सन्तारयिष्यति ॥१६॥

महाभारते (cf. अनु—६२।२क—६२ख) :—

अति दानानि सर्वाणि पृथिवीदानमुच्यते ।
अचलाह्यक्षया भूमिर्दोग्धि[16] कामाननुत्तमान् ॥१७॥

---

1 I. O. योजनानां, A योजानाति
2 I. O. नियतौ
3 I. O. वानुडुहा
4 I. O. दशनडुत्समं, A दशानाडुच समं
5 I. O. तत्समं
6 A ततो only for the bracketed portion
7 I. O. ०दानं
8 I. O. प्रयच्छदानो
9 I. O. हाटकं
10 I. O. मधु for सप्त
11 A पत्यप्रथितं and I. O. पत्यं प्रथमं for the bracketed portion
12 A भूर्वैष्णवी सूर्यसुतश्च, I. O. दूरेषु वीतस्य सुतापि
13 I. O. कुल for फल
14 I. O. प्रवदन्ति
15 A सतारयिष्यति
16 A ०र्दोग्ध, I. O. ०र्दोग्धी

[1]दोग्धि वासांसि रत्नानि पशून् व्रीहियवांस्तथा ।
भूमिदः सर्वभूतेषु शाश्वतीरेधते समाः ॥१८॥
यावद्भूमि-[2][स्थितो वायुस्ता]-वद्भूमि-[3][द एधते] ।
[4]न भूमिदानादस्तीह परं किञ्चिद् युधिष्ठिर ॥१९॥
[5]अप्यल्पं प्रददुः सर्वे [6]पृथिव्या इति नः श्रुतम् ।
[7][भूमिमेव ददुः] सर्वे [8]ते भूमिं भुञ्जते [9]जनाः ॥२०॥
[10]स्वकर्मैवोपजीवन्ति नरा इह परत्र च ।
भूमि-[11]र्भूति-[12]र्महादेवी दातारं कुरुते प्रियम् ॥२१॥
य एतां [13]दक्षिणां दद्यादक्षय्यां[14] पृथिवी-[15]पते ।
पुन-[16]र्नरत्वं संप्राप्य भवेत् स पृथिवीपतिः ॥२२॥
यथा दानं [17][तथा भोग इति] धर्मेषु निश्चयः ।
[18][संग्रामे वा तनुं जह्याद्]-द्याद्वा पृथिवीमिमाम् ॥२३॥
इत्येतत् [19]क्षत्रबन्धूनां वदन्ति परमाशिषम् ।
पुनाति [20][दत्ता पृथिवी] दातारमिति शुश्रुम ॥२४॥
अपि पापसमाचारं [21]ब्रह्मघ्नमपि [22]चानृतम् ।
[23]सैव पापं [24]प्लावयति [25][सैव पापात् प्रमोचति] ॥२५॥

---

1 I. O. दोग्धौ
2 I. O. स्थिता वायु ता and A र्थासुविहृता for the bracketed portion
3 A बभूव तु for the bracketed portion
4 I. O. ता before this
5 I. O. अप्यन्नं, A अल्पाप्यं
6 A पृथिव्य, I. O. पृथिवी
7 A भूविवा प्रदुदुः for the bracketed portion
8 A omits it
9 I. O. रिह
10 I. O. स्वकर्मैवोपजीवन्ति, A सुकर्म -वोपजीवन्ति
11 A भूति for र्भूति
12 I. O. महादेवी and A महादेवी for र्महादेवी
13 I. O. पक्षिणां
14 A ०क्षय्यं
15 I. O. ०पते:
16 I. O. ०र्नवत्वं, A ०र्नवत्त
17 I. O. तथाभोगमिति, A यथा-भोग इति
18 I. O. संग्रामे वा तनुं जह्या म and A समासि दातास्तेजसान्व for the b. p.
19 I. O. क्षतु for क्षत्र
20 A दत्वा पृथिवीं for the bracketed portion
21 I. O. ब्रह्मघ्नामपि
22 A चानृणां
23 A नैवपाप
24 I. O. प्रावयति, A पुरं याति
25 A नैव पापात् प्रमुच्यते for the bracketed portion

अपि पाप-[1][कृतां राज्ञां प्रतिगृह्णन्ति] साधवः ।
पृथिवीं [2]नान्यदिच्छन्ति पावनी जननीं[3] यथा ॥२६॥
[4]नामास्याः प्रियदत्तेति गुह्यं देव्याः [5]सनातनम् ।
दानं वाप्यथवाऽऽदानं नामास्याः प्रथमं [6]प्रियम् ॥२७॥
य एतां विदुषे [7]दद्याद्दत्तयां पृथिवीपतिः ।
पृथिव्या-[8]मेतदिष्टं स [9]राज्याद् राज्यमितो व्रजेत् ॥२८॥
[10]पुनरेव [11]जनिं प्राप्य [12]राजैव स्यान्न संशयः ।
[13]तस्मात् प्राप्यैव वसुधां दद्याद्विप्राय पार्थिवः ॥२९॥
भूमिन्तु दत्त्वा साधुभ्यो विन्दते भूमिमुत्तमाम् ।
[14][प्रेत्य चेह] च धर्मात्मा स प्राप्नोति महद्यशः ॥३०॥
यस्य विप्रास्तु [15]शंसन्ति [16]साधोर्भूमिं सदैव हि ।
न तस्य शत्रवो राजन् प्रशासति[17] वसुन्धराम् ॥३१॥
ये तु सङ्कीर्ण-[18]कर्माणो [राजानो रौद्रकर्मणः][19] ।
[20]तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् ॥३२॥३२॥
अल्पान्तरमिदं शश्वत् [21][पुराणा मेनिरे जनाः] ।
यो [22]यजेताश्वमेधेन दद्याद्वा [23]साधवे महीम् ॥३३॥
सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतन्महाराज[24] ददाति वसुधां ददत् ॥३४॥

1 A कृता राज्ञा प्रतिगृह्णाति for the bracketed portion
2 I. O. नायदिच्छन्ति
3 I. O. जननीं
4 A नमास्या
5 I. O. सनातनः
6 I. O. प्रियं
7 A दद्याद्दत्तयं
8 I. O. ०यैन दिष्टं
9 A वाज्याद्
10 I. O. पुनश्चासौ
11 Both I. O. and A जन्म
12 I. O. राजेव
13 A यस्मात्
14 I. O. इत्वा नेह for the bracketed portion
15 A संशन्ति
16 A साधोभूमिं, I. O. सावोर्भूमि
17 A प्रशासन्ति
18 I. O. ०चर्माणो
19 A राजानो रौद्रकर्मिणः for the bracketed portion
20 A तेभ्यो
21 A पुराणं मेधा जनना: for the bracketed portion
22 A जायताश्वमेधेन
23 A सासाधवे
24 I. O. ०महाप्राज्ञ

[1]तपो यज्ञः श्रुतं शीलमलोभः सत्यसन्धता[2] ।
गुरुदैवतपूजा च नातिक्रामन्ति भूमिदम् ॥३५॥
[3]भर्त्तुर्निःश्रेयसे [4]युक्तास्त्यक्तात्मानो [5]रणे हताः ।
ब्रह्मलोकस्थिताः सिद्धा नातिक्रामन्ति भूमिदम् ॥३६॥
यथा जनित्री क्षीरेण [6]स्वपुत्रं भरते सदा ।
[7]अनुगृह्णाति दातारमेवं [8]सर्वरसैर्मही ॥३७॥
मृत्युर्वै किङ्करो [9]दण्डस्तमो वह्निः सुदारुणः ।
घोराश्च वारुणाः पाशा नोपसर्पन्ति भूमिदम् ॥३८॥
पितॄंश्च [10]पितृलोकस्थान् देवलोके च देवताः ।
[11]सन्तर्पयति [12]शान्तात्मा यो ददाति वसुन्धराम् ॥३९॥

तथा :—

[13]शतमप्सरसश्चैव दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र ब्रह्मलोके धराप्रदम्[14] ॥४०॥
नास्ति भूमिसमं दानं नास्ति भूमिसमो गुरुः ।
नास्ति सत्यसमो धर्मो नास्ति दानसमो विधिः ॥४१॥

अथ देयभूमि-[15][परिमाणे फलपरिमाण]-परिभाषा ।

नन्दिपुराणे :—

[16]येनैकः पुरुषो [17]जीवेद् भूमिवित्तेन संयुतः ।
दत्त्वा तु[18] तावतीं भूमिं दशकल्पं वसेद्दिवि ॥४२॥
अनेन क्रमयोगेण यो दद्याद् यावतीं महीम् ।
तावत्कालं वसेत् [19]स्वर्गे भूमिदानप्रमाणतः ॥४३॥

---

1 I. O. ततो
2 A ०सन्धता
3 A भर्त्तुर्निःश्रेयसे, I. O. भर्त्तुर्श्रेश्रेयसे
4 I. O. युक्तास्त्युक्तात्मानो, A युक्ता आत्मानमे
5 A रणो
6 I. O. and A सुपुत्रं
7 I. O. अत्र गृह्णाति
8 A सर्व्वरसा मही
9 A दण्डः श्वाशा
10 I. O. पितृलोकस्था
11 Both I. O. and A सन्तर्पयन्ति
12 A शान्तार्थ
13 A omits शतम
14 A वरप्रदा
15 A परिमाणफलं । परिमाणं for the bracketed portion
16 I. O. यवैकः, A पवित्रः
17 Both I. O. and A जीवै
18 I. O. भू
19 A सर्गं, I. O. स्वर्गं

क्रमयोगेणेति तरुणपुरुष-[1]जीवनोचित-भूम्युत्पत्तिवृद्धौ कल्प-[2]दशकमेण फलवृद्धिः। अपकर्षे तु यथासम्भवं भूमिदानफलापकर्ष इत्यर्थः। परिभाषा चेयमश्रुत-[3]कालविशेषनियमाव-[4][च्छेद-स्वर्गरूपफला] अश्रुतपरिमाणावच्छेदे-[5][न भूमिदानं [6]सम्बध्यत] इति बोद्धव्यम्।

अथ[7] दानायोग्यभूमिः।

महाभारते :—

न चोषरां[8] न [9]निर्दग्धां महीं दद्यात् कथञ्चन।
न श्मशान-[10][मयीं दद्यान्न] च पापनिषेविताम् ॥१॥

अथ दानम्।

तत्र मनुः :—

[भूमिदः सर्वमाप्नोति [11]राज्यपुत्रधनादिकम्][12] ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितां भूमिं दद्यात्। ॐ अद्यामुकसगोत्रायामुक-वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यममुककामोऽहमेतां प्रियदत्तां भूमिं ददानि। प्रति-ग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा भूमिर्वै[13]-विष्णुदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा भूमिं [14]प्रदक्षिणीकुर्यात। अत्र कामनोत्-[15]कर्षे यथेच्छपरिमाणा गुणवती भूमिर्देया। स्वर्गफलकामनायान्तु स्वर्गप्राप्तिकामोऽहमियत्-पुरुषपोषणयोग्यामित्युक्तवाक्येऽन्त-र्भावनीयम्।

याज्ञवल्क्यः (१।२१०) :—

[16]भूमिपश्चन्नवस्त्राम्भस्तिलसर्पिः-[17]प्रतिश्रयान्।
[18][नैवेशिकं स्वर्णधुर्यं] दत्त्वा स्वर्गे महीयते ॥२॥

---

1 I. O. ०जीविनोचित०
2 I. O. ०दशक०
3 I. O. कालविशेष twice
4 I. O. च्छेदनस्वर्गरूपफलैः for the bracketed portion
5 I. O. तु भूमिदाने समुयत for the bracketed portion
6 A सम्बध्यत
7 I. O. omits this
8 A चर्षेवां
9 A निर्दग्धां
10 A परिशाकच्चन for the bracketed portion
11 I. O. omits it
12 Manu (4. 230) reads the b. p. as भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः
13 A omits वै
14 A दक्षिणां कुर्यात्
15 A ०कर्षे
16 I. O. भूमीपाचयन्नवस्त्राम्भस्तिलसर्पिं
17 A प्रतिश्रयान
18 I. O. नैवेशिकस्वर्णधुर्यान् and A नैवेशिकः स्वर्णरूप्य for the bracketed portion

अर्चिताय ब्राह्मणाय यथेच्छसंख्य-[1]पुरुषपोषणयोग्यामर्चितां[2] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [3]सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतामियत[4]-पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

वृद्धवशिष्ठः :—

यत् किञ्चित् कुरुते पापं जन्मप्रभृति मानवः।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥३॥
गवां शतं वृषश्चैको यत्र तिष्ठेद-[5]यन्त्रितः।
तद्धि गोचर्ममात्रन्तु प्राहुर्वेदविदो जनाः ॥४॥

तथा :—

दशहस्तेन वंशेन दश वंशान् समन्ततः।
पञ्च [6]वाप्यधिकं दद्यादेतद् गोचर्म [7]उच्यते ॥५॥

पञ्च [8]वाप्यधिकमित्येकस्मिन् पार्श्वे [9]पञ्चवंशाधिकं वा। अर्चिताय ब्राह्मणाय अर्चितामुक्तपरिमाण-[10]त्रयस्यान्यतमपरिमाणामिच्छया भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आजन्मकृतपापक्षयकामोऽहमेतां गोचर्मपरिमाणां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

यमः :—

तथा दत्त्वा [11]क्षितिं विप्रे ब्रह्मलोके महीयते।

[12][विप्रे जन्मसंस्कारविद्यासम्पन्ने]। अर्चितायोक्तरूपाय ब्राह्मणाय यथेच्छसंख्य-[13][पुरुष-[14]पोषणयोग्यामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षब्रह्मलोकप्राप्तिकामोऽहमियत्]-पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A सुवर्णपुरुषो for पुरुष
2 A भूमिमर्चितां for अर्चितां
3 A सौवर्णं before सोत्कर्ष
4 I. O. omits एताम् and A omits इयत्
5 I. O. ०यन्त्रितः
6 I. O. वाप्यधिकं
7 I. O. मुच्यते
8 I. O. वाप्यधिक०
9 A पञ्चाधिकं
10 A omits त्रय
11 A क्षिति
12 A जन्मसंस्कारसम्पन्ने for the bracketed portion
13 I. O. omits the bracketed portion
14 A omits पोषण

[1]तथा :—

नगरञ्च तथा [2]दत्त्वा [3][राजा भवति] भूतले ॥६॥

अर्चिताय [4]ब्राह्मणायार्चितं नगरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5][भूतलराजत्व]-प्राप्तिकामोऽह-[6]मेतन्नगरं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

बृहस्पतिः :—

[7]फालकृष्टां महीं दत्त्वा [सबीजां शस्यशालिनीम्][8] ।

[9][यावन्ति शस्यबीजानि तावत्] स्वर्गे महीयते ॥७॥

[10][सबीजामुप्तबीजां शस्य]-शालिनीं निष्पन्नशस्य-[11][युक्ताम् । अर्चिताय ब्राह्मणाय फालकृष्टामेकदेशोप्तबीजामेकदेशनिष्पन्न[12]-शस्ययुक्तामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्त]-मुक्त्वा दद्यात् । बृहस्पत्युक्त-फालकृष्टमहीदानफलप्राप्तिकामोऽहमेतां [13]फालकृष्टामुप्तबीजां शस्यशालिनीं प्रियदत्तां महीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

अपि गोचर्ममात्रेण [14]शस्ययुक्तेन मानवः ।

धौतपापो विशुद्धात्मा स्वर्गलोके महीयते ॥८॥

दशहस्तेन [15]दण्डेन त्रिंशद्दण्डा[16]निवर्तनम् ।

तान्येव दश गोचर्म ब्राह्मणेभ्यो ददाति यः ॥९॥

स धौतपापत्वादिपूर्वोक्तफलेन सम्बध्यत इति बोद्धव्यम् । उभयतो हस्तशतत्रयात्मकस्य निवर्तनस्य तान्येव [17]दशेतिक्रमेण एकपार्श्वेन [18]हस्तशतत्रयमपरेण च [19]हस्तसहस्रत्रयात्मकञ्च

1 A omits it
2 A दवत्वा
3 I. O. राजते चैव for the bracketed portion
4 A ब्राह्मणाय तं, I. O. ब्राह्मणायाचिताय
5 A भूतलराज, I. O. सोत्कर्ष-स्वलोक for the b. p.
6 A ०मेतं नगरं
7 I. O. फलकृता
8 I. O. सबीजसस्यमालिनी for the bracketed portion
9 I. O. यावत् सूर्यकृता लोकास्तावत् for the bracketed portion
10 I. O. सबीजमुप्तबीजस्य for the bracketed portion
11 A omits the bracketed portion
12 I. O. नि for निष्पन्न
13 I. O. फालकृ०
14 I. O. सस्यदत्तेन
15 A दत्तेन
16 A त्रिंशद्दण्ड
17 A दशतिक्रमेण
18 A हस्ततत्रयेण
19 A हस्तसहस्रत्रयामेकञ्च

गोचर्मपरिमाणमुन्नेयम् । अर्चिताय ब्राह्मणाय यथोक्तपरिमाणामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । बृहस्पत्युक्त-गोचर्मपरिमाण-भूमिदानफलप्राप्तिकामोऽहं गोचर्म-परिमितां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[1]तथा :—

यस्तु दद्यान्महीं राजन् [2]ब्राह्मणायाहिताग्नये ।
स याति परमं स्थानं [3]गृह्णानश्च न संशयः ॥१०॥

अर्चितायामिहोत्रिणे ब्राह्मणायार्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । परमस्थानप्राप्तिकामोऽहं [4]गोचर्मपरिमितां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

इक्षुभिः [5]सन्ततां भूमिं यवगोधूमशालिनीम् ।
[6]यो ददाति सुरश्रेष्ठ पुनरावर्तते न[7] सः ॥११॥

अर्चिताय ब्राह्मणाय [8][इक्षुसन्ततामेकदेशोप्त]-यवगोधूमशस्यामर्चितां[9] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [10][अपुनरावृत्तिप्राप्तिकामोऽहमिक्षुसन्ततां यवगोधूम-शालिनीं प्रियदत्तां] भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । [11][अत्र फलबाहुल्याद्बहु-भूमिदानम् ।

तथा :—

श्रोत्रियाय कुलीनाय विनीताय तपस्विने ।
गृहस्थाय दरिद्राय सर्वभूतहिताय च ॥१२॥
ईदृशाय शुभा शुद्धा दत्ता स्वल्पापि वासव ।
कुलानां तारयेद्वीर सप्त सप्त च सप्त च ॥१३॥

1 A omits it
2 Both I. O. and A ब्राह्मणाय हिताग्नये
3 A गृह्णाणश्च
4 I. O. omits it
5 A सन्ततं
6 I. O. again यो ददाति सुरश्रेष्ठ यवगोधूमशालिनीं just before this
7 A नरः for न सः
8 I. O. इक्षुसन्ततामिक्षा and A इक्षुसन्ततामेकादशोप्त for the bracketed portion
9 A ०शस्यार्चितां
10 A अमुककामोऽहमेतां for the bracketed portion
11 A omits the bracketed portion

शुभा शुभशस्योत्पत्तियोग्या शुद्धा [1]न्यायोपात्ता। श्रोत्रियाय जन्मसंस्कार-विद्यासम्पन्नाय, कुलीनाय सत्कुलजाय, विनीताय [2]नम्राय, तपस्विने तपोनिष्ठाय, गृहस्थाय कुटुम्बिने, सर्वभूतहिताय करुणामयाय, दरिद्राय ब्राह्मणायोक्तरूपामर्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। एकविंशतिसंख्यक[3]-कुलतारणप्राप्तिकामोऽहं प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते :—

वसुन्धराञ्च यो दद्याद्द्विजाय विदुषात्मने।
दातारं ह्यनुगच्छन्ति सर्वे कामाभिवाञ्छिताः ॥१४॥

अर्च्चिताय विद्यावते ब्राह्मणायार्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुककामोऽहमेतां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।] अस्य दानस्य सार्वकामिकत्वात्[4] कामनोत्कर्षाद्देयोत्कर्षः।

[5]तथा (अनु—६२।१७) :—

भूमिं तु दत्त्वा साधुभ्यो विन्दते [6]भूमिमुत्तमाम्।
प्रेत्य चेह च धर्मात्मा स प्राप्नोति महद् यशः ॥१५॥

साधुभ्यः सच्चरित्रेभ्यः। अर्च्चितेभ्यो [7][यथाशक्ति बहुभ्यो] ब्राह्मणेभ्यो[8]-ऽर्च्चितां भूमिं दद्यात्। [9]ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुक[10]देवशर्मभ्यो युष्मभ्यं महाभारतोक्त-साधुसंप्रदानक-भूमिदानफलप्राप्तिकामोऽहमेतामियत्पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—६२।६१) :—

महीं स्फीतां ददद् राजन् सर्वकामगुणान्विताम्।
राजाधिराजो भवति तद्धि दानमनुत्तमम् ॥१६॥

स्फीतां निष्पन्न-[11]शस्यशालिनीम्। सर्वकामगुणान्वितां[12] यावद्भूमिगुणसहिताम्। अर्च्चिताय

1 I. O. न्यायोपात्त
2 I. O. अमाय
3 I. O. संख्यस
4 A ०कामिकत्वात्
5 A omits it
6 A शान्ति for भूमि
7 A omits the bracketed portion
8 A बहुभ्यो after this
9 A omits it
10 A omits देव
11 I. O. omits शस्य
12 A ०समन्वितां

ब्राह्मणायार्च्चिता-[1]मुक्तरूपां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। राजाधिराजत्व[2]-प्राप्तिकामोऽहमेतां प्रियदत्तां [3]महीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—६२।६७) :—

पुण्यां मृदुरसां भूमिं [4]यो ददाति [5]पुरन्दर।

[6][न तस्य लोकाः] क्षीयन्ते भूमिदानगुणार्जिताः ॥१७॥

पुण्यां गङ्गातीरादिपुण्यदेश-[7]सम्भवां मृदुरसाम् [8]अनूषराम्। अर्च्चिताय ब्राह्मणाय यथोक्तरूपामर्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अक्षयलोकप्राप्तिकामोऽहमेतां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—६६।२७ख-२८ख) :—

शीतवातातपसहां गृहभूमिं सुसंस्कृताम्[9]।

प्रदाय [10]सुरलोकस्थः पुण्यान्ते न विचाल्यते[11]।

मुदितो वसति स्वर्गे शक्रेण सह पार्थिव ॥१८॥

गृहभूमिं गृहावच्छिन्नां भूमिम्। प्रथमं गृहं [12]सुसमृद्धं सुदृढं निर्माय [13][तन्मध्यभूमिं सूपलिप्तां] मनोरमाम् अर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [14][महाभारतोक्तगृहभूमिदानफलप्राप्तिकामोऽहमेतां प्रियदत्तां गृहभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (Cf. अनु—६६।३१ख) :—

क्षेत्रभूमिं ददद्विप्रे पुत्रं श्रियमवाप्नुते ॥१९॥

क्षेत्रभूमिं धान्याद्युत्पत्तिभूमिम्। अर्च्चिताय ब्राह्मणायार्च्चितां क्षेत्रभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।] पुत्रसहितश्रीप्राप्तिकामोऽहमेतां प्रियदत्तां [15]क्षेत्रभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. यथोक्त for उक्त
2 A omits त्व
3 I. O. भूमिं
4 A या
5 A च पर्थिव
6 A तस्य लोका न for the bracketed portion
7 I. O. ०सम्बन्धिनीं
8 A अनुषरां, I. O. मनुषभां
9 A' सुसंस्कृतां
10 I. O. सुवर्लोकस्य, A सवलोकस्थः
11 I. O. विचार्यते
12 I. O. सुगन्धि
13 I. O. reads the bracketed portion as तन्मध्यभूमिं उपलिप्ता and A as तन्मध्यभूमिमुपलिप्तां
14 A' omits the bracketed portion
15 A गृहभूमिं, I. O. भूमिं

तथा (अनु—२३।१००) :—

निवेशनानां क्षेत्राणां वसतीनाञ्च[1] भारत ।

दातारः प्रार्थितानाञ्च[2] पुरुषाः स्वर्गगामिनः ॥२०॥

निवेशनानां वास्तुभुवां[3] क्षेत्राणां शस्योत्पत्तिभुवाम्[4] । देयबहुत्वं दातृबहुत्वापेक्षम् । अर्च्चिताय ब्राह्मणायार्च्चितां वास्तुभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गप्राप्तिकामोऽहमेतां प्रियदत्तां निवेशनभूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् । क्षेत्रदाने[5]त्वेतामियत्पुरुषपोषणयोग्यां प्रियदत्तां [6]क्षेत्रभूमिमिति [7]दानवाक्ये विशेषः ।

वराहपुराणे (२०७।२६) यम-[8]पुरकथनानुवृत्तौ :—

तिलान् गाश्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम् ।

ब्राह्मणेभ्यः प्रयच्छन्ति [9][न गच्छन्ति] न संशयः ॥२१॥

[10]शाश्वतीमनिरोधभोगाम् । ब्राह्मणेभ्य इति[11] बहुवचनं दातृबहु[12]-त्वापेक्षया । अर्च्चिताय ब्राह्मणायार्च्चितां भूमिं ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । यमपुरा[13]-प्राप्तिकामोऽहमेतां प्रियदत्तां [14]पृथिवीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

तथा (२०५।३०-३१ क) [15]चित्रगुप्तवाक्ये :—

क्षितिप्रदो द्विजातिभ्यो ह्ययं [16][याति[17] त्रि]-विष्टपम् ।

तत्रैव[18][तिष्ठते धीरो] ब्रह्मलोके [19]सहानुगः ।

विविधैः कामभोगैश्च[20] सेव्यमानो नरोत्तमः ॥२२॥

यथेच्छसंख्यान् [21]ब्राह्मणानभ्यर्च्य तेभ्यो यथेच्छं बहु[22]-परिमाणामर्च्चितां भूमिम् ॐ[23]

---

1 I. O. वसतानाञ्च
2 A प्रथितानाञ्च
3 A वास्तुहृवां
4 I. O. मत्स्यो॰ for शस्यो॰
5 A क्षेत्रदान॰
6 A omits क्षेत्र
7 A वाक्यविशेष:
8 I. O. पुरुष for पुर
9 A स्वर्गं यान्ति for the bracketed portion
10 I. O. शाश्वतीं निर्व्विरोधभोगां
11 A omits it
12 A omits बहु
13 Both I. O. and A यमपुर॰
14 I. O. भूमिं
15 I. O. विष्णुगुप्तवाक्यं
16 I. O. यावश्चि for the bracketed portion
17 Varāha P. यातु
18 A तिष्ठता वीर and Varāha P. तिष्ठताद्वीर for the bracketed portion
19 I. O. मद्दानुग:
20 I. O. and Varāha P. ॰स्तु
21 I. O. अभ्यर्च्य only
22 A omits बहु
23 A omits ॐ

अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विविधकामभोगान्वित-[1]सहानुगब्रह्मलोकवासप्राप्ति-कामोऽहमेतां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

स्कन्दपुराणे :—

यस्तु क्षेत्रं प्रयच्छेत निष्पन्नफलवन्नरः।
स [2]तत्क्षेत्रं पुमान् [3]भुक्त्वा प्राजापत्यं समश्नुते ॥२३॥

अर्चिताय ब्राह्मणाय [4]पक्कशस्यशालिनीं क्षेत्रभूमिमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-क्षेत्रभूमिदानफलप्राप्तिकामोऽहमेतामियत्पुरुषपोषणयोग्यां निष्पन्न-फलवतीं प्रियदत्तां क्षेत्रभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

तथा :—

यस्तु भूमिं प्रयच्छेत ब्राह्मणाय महात्मने।
सर्वलोकेषु [5][स सुखी] विमानेन सुवर्चसा ॥२४॥

महात्मने अत्यन्तशान्तायेत्यर्थः।

[6]बहून्यब्दसहस्राणि चरते कामरूपवान्।
यदि मानुष्यमायाति नरः [7]कालविपर्ययात्।
तत्र कामदुघा तस्य मही भवति सर्वतः ॥२५॥

अर्चितायोक्तरूपाय [8]ब्राह्मणाय यथेच्छ-[9]परिमाणामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-[10]महात्म-ब्राह्मणसम्प्रदानक—भूमिदानफलप्राप्ति-कामोऽहमेतामियत्पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

शिवपुराणे महेश्वर-[11]पुरकथनानुवृत्तौ :—

गोसहस्रप्रदातारो भूमिदातार एव च।
ये च [12]स्वर्णप्रदातारस्तथा सर्वप्रियंवदाः ॥२६॥

---

1 A महानुग०, I. O. महानुगानुव-च्छिन्नकाम
2 A सु for तत्
3 A भूक्त्वा, I. O. भुक्त्वा
4 I. O. पक्कशस्यशालिनी, A बहुशस्य-शालिनीं
5 A स्व for the bracketed portion
6 A बहुब्द०
7 I. O. काम०
8 I. O. ब्राह्मणाय
9 I. O. ०परिमाण०
10 A omits महात्म
11 I. O. omits पुर
12 I. O. स्वर्गप्रदातारस्तथा, A सुवर्ण-दातारः तथा

ते तत्र गत्वा हृष्टाश्च निवसन्ति यथासुखम् ।
कल्पायुतसहस्राणां सहस्राणि चतुर्दश ॥२७॥
विचरित्वा पुरवरं पुनः प्राप्य महीतलम्[1] ।
जायन्ते श्रेष्ठवर्णेषु सुखैश्च परमैर्युताः ॥२८॥

अर्च्चिताय ब्राह्मणायार्च्चितां भूमिम् [2]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । शिवपुराणोक्त-भूमिदानफलप्राप्तिकामोऽहमेतां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् । अत्र फलबाहुल्याद्भूमिरपि बह्वुत्पत्ति-[3]र्देया ।

[4]कूर्मपुराणे (२२६।१३)) :—

इक्षुभिः सन्ततां भूमिं [5]यवगोधूमशालिनीम् ।
ददाति वेदविदुषे यः स भूयो न जायते ॥२९॥

अर्च्चिताय [6]वेदविदुषे ब्राह्मणायोक्तरूपामर्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अपुनर्जन्मकामोऽह-[7]मेतामिक्षुसन्ततां [8]यवगोधूमशालिनीं प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

नरसिंहपुराणे :—

भूमिदानेन शुद्धेन लभते शान्तिकं [9]फलम् ॥३०॥

शुद्धेन [10]न्यायार्जितेन शान्तिकं दृष्ट-[11]दिव्यान्तरीक्षभौमोत्पातप्रशमनम् । अतो-[12]ऽदृष्टोत्-पातदोषप्रशमनार्थमपि भूमिर्देया । अर्च्चिताय ब्राह्मणाय [13]यथेष्ट-[14]परिमाणामर्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [15]दृष्टार्थकोत्पातदोषप्रशमनकामोऽहमेतां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

आदित्यपुराणे :—

यस्तु गोचर्ममात्रन्तु प्रयच्छति वसुन्धराम् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥३१॥

---

1 I. O. महीतले
2 A reads ददानि । and omits ॐ
3 A ०र्देया
4 A omits it
5 A यथा for यव
6 A वेदविदे ।
7 I. O. ०मेतामिक्षुसंयुतां, A ०मेहा-मिक्षुसन्ततायं
8 A वव for यव
9 A परं
10 A न्यायार्जितदानेन
11 I. O. ०द्दीव्या०, A ०देवा०
12 Both I. O. and A omit the avagraha
13 I. O. यथेष्ट०
14 A ०परिमाणभूमिं
15 A दृष्टमहोत्पात०

गवां शतं वृषश्चैको यत्र तिष्ठत्ययन्त्रितः ।

[1][तां वै गोचर्ममात्रन्तु] मनुराह प्रजापतिः ॥३२॥

अर्च्चिताय ब्राह्मणाय यथोक्त-[लक्षणगोचर्म][2]-परिमितां भूमिम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात् । सर्वपाप-[3][विमुक्तिपूर्वक]-विष्णुलोकप्राप्तिकामोऽहमेतां [4]गोचर्मपरिमितां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अत्र फलबाहुल्याद[5]-त्यन्तोत्कृष्ट-भूमिदानम् ।

तथा :—

रत्नोपकीर्णां वसुधां यो ददाति द्विजातिषु ।

स [6][मुक्तः सर्वकलुषै] रुद्रलोके महीयते ॥३३॥

रत्नोपकीर्णां [7]विप्रकीर्णमुक्तादिरत्नाम् । अर्च्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽर्च्चितां विप्रकीर्ण-[8]मुक्तादिरत्नां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सर्वपापक्षयपूर्वकसोत्कर्ष-रुद्रलोकप्राप्तिकामोऽहमेतां रत्नोपकीर्णां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

[9][पक्वान् [10]ददति केदारान् [11]सफलांश्चैव पादपान् ।]

षष्टिकोटिसहस्राणि अर्बुदानाञ्च वै [12]त्रयम् ।

क्रीडन्ति [13]श्वेतभुवने एतदुक्तं [14]द्विजोत्तमाः ॥३४॥

[15][पक्वान् केदारान् पक्वशस्यशालीनि[16] क्षेत्राणि] अर्च्चिताय ब्राह्मणायो-[क्तरूपाः केदार-भूमीरर्च्चिताः][17] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्त-पक्वकेदारदान[18]-फल-प्राप्तिकामोऽह-[19][मेतान् पक्व]-केदारान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A तद्गोचर्ममात्रं वै for the bracketed portion
2 A गोचर्मलक्षण for the bracketed portion
3 I. O. क्षयपूर्वकसोत्कर्ष for the bracketed portion
4 I. O. omits it
5 A omits द
6 A मुक्तसर्वपापाद for the bracketed portion
7 A विकीर्ण०
8 A ०रत्नादिरत्नां
9 A omits the bracketed portion
10 I. O. ददाति
11 I. O. सफलांश्चैव
12 I. O. द्वयं
13 I. O. श्वेतपुरे
14 I. O. द्विजोत्तम
15 A अथापि only for the bracketed portion
16 I. O. ०शालिने for ०शालीनि
17 A क्तरूपान केदारभूमिमर्च्चितां for the bracketed portion
18 A दान twice
19 A मेतां पक्वद for the bracketed portion

नन्दिपुराणे :—

दत्त्वा भूमिन्तु पुरुषः [1]साश्रयां शस्यदायिनीम् ।
[2]सुसेवां रम्यसंस्थानां [3]फलवृक्षमनोरमाम् ॥३५॥

साश्रयां विश्रामोचितस्थानसहितां सुसेवां सुगमां[4] [5]रम्यसंस्थानां ××फलवृक्षमनोरमां फलवदाम्रादिवृक्षशोभिताम् ।

[6]अनूषरामनाबाधां पाले बहुगुणान्विते ।
अप्येकपुरुषाधारां दत्त्वा भूमिं [7]महामुने ॥३६॥

अनाबाधामाक्षेपरहिताम् एकपुरुषाधारां [8]धृञ् धारणे इत्यस्य धातोरनेकार्थत्वात् धारणं पोषणम् अत [9]एकस्य पुरुषस्य [10]पोषिकामित्यर्थः ।

दशकल्पानि वसति स्वर्गे विगतपातकः ॥३७॥

अर्चिताय विद्यातपः [11]सदाचारादिबहुगुणशालिने ब्राह्मणाय यथोक्तरूपां यथेच्छपरिमाणामर्चितां[12] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पापक्षयपूर्वककल्पदशकावच्छिन्न[13]-स्वर्गप्राप्तिकामोऽहमेतां फलवृक्षमनोरमां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

इक्षुभिः सन्ततां भूमिं यवगोधूम-[14]शालिनीम् ।
गोष्ठवाहनसंपूर्णां [15]बहुवीर्य्यसमन्विताम् ॥३८॥

गोष्ठं गोप्रचारभूमिः । वाहनसंपूर्णां [16][गो-[17]शकटाश्वयानानामन्यतमयथेच्छसंख्यवाहनसहिताम् ।

निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदाम् ।]

---

1 I. O. साश्रया
2 A स्वसेवा
3 I. O. फलवृक्षमनोरमां, A वृक्षमनोरमां
4 A सुसमां
5 I. O. वन्यसंस्थानां
6 A अनुपारा०
7 I. O. महात्मनः
8 A धृतधारण
9 A एकपुरुषस्य
10 A पोषकमित्यर्थः
11 I. O. ०सदाचारादिवद्गुण०
12 A ०परिमाणार्चितां
13 A ०कावावच्छिन्न०
14 A ०संरतां
15 I. O. बाहुवीर्यसमर्जितां
16 I. O. omits the bracketed portion
17 A शकटाश्वाद्यानानां०

[1][सर्वरत्नपरिच्छन्नां विकीर्णप्रसिद्धरत्नाम् ।]

[2]लोके महीयते सद्यो यो ददाति वसुन्धराम् ॥३९॥

अर्चिताय ब्राह्मणायोक्तरूपामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दि-पुराणोक्त-निधिगर्भ-[3]भूमिदानफलप्राप्तिकामोऽहमेताम् इक्षुसन्ततां[4] [5]यवगोधूमशालिनीं गोप्रवाहनसंयुतां [6]निधिगर्भां सर्वरत्नपरिच्छदां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मे :—

हलकृष्टां महीं दत्त्वा सोदकां सुफलान्विताम् ।

सोदकश्चापि [7]शवलं प्राप्नोति परमं पदम् ॥४०॥

[8]सोदकां जलाशयसहितां [9]सुफलान्वितां शोभनफलवद्वृक्ष[10]-सहिताम् । अर्चिताय ब्राह्मणाय उक्तरूपामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । परमपदप्राप्तिकामोऽहमेतां सुफलान्वितां सोदकां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

[11]आदित्या इव दीप्यन्ते तेजसा दिवि मानवाः ।

ये प्रयच्छन्ति वसुधां [12]ब्राह्मणायाहिताग्नये ॥४१॥

अर्चिताय ब्राह्मणायाग्निहोत्रिणे [13]यथेष्टमंहयपुरुषपोषणयोग्यामर्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यसमतेजस्वित्वसहितस्वर्गप्राप्तिकामोऽहमेतामियत्[14]-पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

इक्षुभिः [15]सन्ततां भूमिं यवगोधूम-[16]शाद्वलाम् ।

ये प्रयच्छन्ति विप्रेभ्यो नोपसर्पन्ति ते यमम् ॥४२॥

---

1 A omits the bracketed portion

2 I. O. विधूमकलुषं सर्वं विरजाः सम्मतः सतां before this

3 I. O. भू for भूमि

4 I. O. ०सन्तताय

5 A भूमिं यवगोधूमसंकुलां

6 I. O. निधिगर्भं

7 I. O. सरलं

8 I. O. सोदकं

9 I. O. सुफलां

10 A वृक्ष for वद्वृक्ष

11 A आदित्य

12 Both I. O. and A ब्राह्मणायहिताग्नये

13 I. O. यथेष्ट०

14 I. O. omits एताम्, A omits इयत्

15 A सन्तातं

16 A ०शाद्वलां

दातृबहुत्वापेक्षया सम्प्रदानबहुत्वम्। अर्चिताय ब्राह्मणायार्चितां यवगोधूम-[1]शाद्वलां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यमानुपसर्पणकामोऽहमेतामिक्षुसन्ततां यवगोधूमशाद्वला-[2]मियतीं प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

सुवर्णदानं गोदानं [3]पृथिवीदानमेव च।

एतत् प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥४३॥

अर्चिताय ब्राह्मणाय यथेच्छपरिमाणामर्चितां[4] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपापक्षयकामोऽहमियतीं प्रियदत्तां पृथिवीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[5]विष्णुधर्मोत्तरे :—

गृहभूमिं नरो दत्त्वा वसूनां [6]लोकमश्नुते ॥१॥

अर्चिताय [7][ब्राह्मणायार्चितां गृहकरणयोग्यां] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वसुलोकप्राप्तिकामोऽह-[8]मेतां प्रियदत्तां गृहभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१६ख) :—

शाकभूमिं नरो दत्त्वा लोक-[9]माङ्गिरसं लभेत ॥२॥

अर्चिताय ब्राह्मणाय [10][शाकोत्पत्ति-[11]योग्यामर्चितां भूमिम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [12]आङ्गिरसलोकप्राप्तिकामोऽह-[13]मेतां प्रियदत्तां शाकभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१७क) :—

आरामभूमिं दत्त्वा तु मारुतं [14]लोकमश्नुते।

1 A ०सहितां
2 I. O. ०मेता
3 A वसुधादानमेव
4 A रिमाणमर्चितां
5 A तथा before this
6 I. O. लोकमाप्नुयात्
7 A ब्राह्मणायार्चितां यवगोधूमसहितां for the bracketed portion
8 A omits एतां
9 A ०माङ्गिरसं
10 A omits the bracketed portion
11 I. O. ०मर्चितां
12 I. O. अङ्गिरस०
13 I. O. omits एतां
14 I. O. लोकमाप्नुयात्

आरामो ग्रामसमीपस्थ-[1] [महावीर्य्यतरुवनम्]। अर्चिताय ब्राह्मणाय आरामारोपणयोग्यां ग्रामसमीपभूमिमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मारुतलोकप्राप्तिकामोऽहं प्रियदत्तामारामभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।७ख) :—

जलाशयार्थं यो दद्याद्वारुणं [2]लोकमश्नुते ॥३॥

[3][भूमिमिति विशेषः]। अर्चिताय ब्राह्मणाय जलाशयकरणयोग्यां भूमिमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वारुणलोकप्राप्तिकामोऽहं जलाशयार्थं प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।८) :—

दत्त्वा [4]च देववेश्मार्थं तस्य देवस्य सोऽश्नुते।
यस्तत्र विद्यते नित्यं लोकं द्विजवरा ध्रुवम् ॥४॥

भूमिमिति शेषः[5]। द्विजवरा इति सम्बोधनम्। यो देवस्तत्र कृते वेश्मनि स्थास्यति, तस्य देवस्य लोकं [6]नित्यम-[7][नवच्छिन्नकालं तद्वेश्मार्थं भूमेर्दाता प्राप्नोतीति सम्बन्धः। अर्चिताय देववेश्मकरणोद्यताय भूम्यर्थिने ब्राह्मणायार्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुक]-लोकप्राप्तिकामोऽहममुक[8]-देववेश्मार्थं प्रियदत्तां भूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[9][तथा (३।३०५।९क) :—

उद्यानभूमिं दत्त्वा तु गन्धर्वैः सह मोदते ॥५॥

उद्यानं नानाजातीयतरुसमूहः। अर्चिताय ब्राह्मणायार्चिता-[10]मुद्यानारोपणोचितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षगन्धर्वलोकप्राप्तिकामोऽहं प्रियदत्तामुद्यानभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

---

1 A सहावीर्यतरूपमं and I. O. सजीवतरुवस for the bracketed portion
2 I. O. and V. D. लोकमाप्नुयात्
3 A भूमिरिति विशेषः for the bracketed portion
4 A तदेव॰
5 A विशेषः
6 A नत्वम
7 A omits the bracketed portion
8 A omits अमुक
9 A reads the bracketed portion just before तथा :—दत्त्वा कनकभूमिन्तु etc., a little below
10 I. O. omits उद्यानारोपणोचितां

तथा (३।३०५।६ख) :—

रत्नाकरभुवं [1]दत्त्वा शक्रलोके महीयते ॥६॥

अर्चिताय ब्राह्मणायार्चितां[2] रत्नोत्पत्तियोग्यां[3] भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षशक्रलोकप्राप्तिकामोऽहं प्रियदत्तां रत्नाकरभुवं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१०क) :—

दत्त्वा कनकभूमिन्तु वह्निलोके महीयते ॥७॥

अर्चिताय ब्राह्मणायार्चितां [4]सुवर्णोत्पत्तियोग्यां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षवह्निलोकप्राप्तिकामोऽहं प्रियदत्तां [5]कनकभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१०ख-११क) :—

अन्येषामाकरभुवं[6] लोहानां यः प्रयच्छति।
तस्यापि गतिरुद्दिष्टा[7]लोके हौताशने द्विजाः[8] ॥८॥

द्विजा इति सम्बोधनम्। अन्येषां रजतादीनामष्टानां[9] लोहानाम्। अर्चिताय ब्राह्मणायार्चितां[10] रजतोत्पत्तिभूमिम्[11] ॐ[12] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। हौताशनलोकप्राप्तिकामोऽहं प्रियदत्तां रजताकरभुवं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [13]एवमपि च ताम्रादिलोह-[14]षट्काकरभुवामिच्छया[15]दाने दानवाक्ये अमुक-[16]लोहाकरभुवमिति [17]विशेषः। उत्कृष्टोत्कृष्टलोहाकरभूमिदाने[18]वह्निलोक-[19][वासकालभूयस्त्वमुन्नेयम्]।

तथा (३।३०५।११ख) :—

[20]धात्वाकरभुवं दत्त्वा नाकपृष्ठे[21] महीयते ॥९॥

---

1 A दद्यात्
2 A omits अर्चितां
3 I. O. रत्नोत्पत्ति, A रत्नोपपत्ति
4 A सुवर्णोत्पत्तियोग्य, I.O. सुवर्णोत्‍-पत्ति
5 I. O. सुवर्णोत्पत्तिभूमिं
6 A ०माकारभुवं, I. O. ०माकरभुवां
7 A गतिरुद्दिष्ट
8 A omits it
9 I. O. omits अष्टानां
10 A omits अर्चितां
11 A जरतोत्पत्तिभूमिं
12 A omits it
13 A एवपर
14 A omits षट्का
15 A दान
16 A लोहकर०
17 A शेषः
18 A दान
19 I. O. वासे कालमुन्नेयं for the bracketed portion
20 V. D. धान्याकर०
21 V. D. ०लोके

धातवो [1]गैरिकादयः। अर्चिताय ब्राह्मणायार्चितां [2]धातूत्पत्तिभूमिम् ॐ अद्या‍ तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षनाकलोकप्राप्तिकामोऽहमेतां[3] प्रियदत्तां [4]धात्वाकरभु‍ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१२):—

[5]अञ्जनाकरभूमिन्तु यः प्रयच्छति वै द्विजाः।
पितृभिर्यमलोकस्थः [6][पूज्यते स] नरोत्तमः ॥१०॥

द्विजा इति सम्बोधनम्। अञ्जनं [7]रसाञ्जनम्। अर्चिताय ब्राह्मणायार्चितामञ्जनो‍ पत्तिभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्ताञ्जनाकरभूमिदा‍ [8]फलप्राप्तिकामोऽहं प्रियदत्ता-[9]मञ्जनाकरभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१३क):—

लवणाकरभूमिञ्च सोमलोके महीयते ॥११॥

यः प्रयच्छतीति सम्बन्धः। अर्चिताय ब्राह्मणायार्चितां लवणोत्पत्तिभूमिम् ॐ‍ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षसोमलोकप्राप्तिकामोऽहं प्रियदत्तां लवणाकरभू‍ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१३ख-१४क):—

[10]शिम्बिशस्यप्ररोहान्तु भुवं दत्त्वा नरोत्तमः।
साध्यानां लोकमाप्नोति नात्र कार्य्या विचारणा ॥१२॥

अर्चिताय ब्राह्मणायार्चितां शिम्बिशस्योत्पत्तिभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् साध्यलोकप्राप्तिकामोऽहं प्रिदयत्तां शिम्बिशस्यप्ररोहभुवं ददानि। स्वस्त्यादिस्वीकारान‍ पूर्ववत्।

तथा (३।३०५।१४ख):—

[11]इन्धनाकरभूमिन्तु [12][वह्निलोके महीयते ॥१३॥]

दत्त्वेति सम्बन्धः। अर्चिताय ब्राह्मणायार्चिताम् इन्धनोत्पत्तिभूमिम् [13]ॐ अद्याद‍

---

1 I. O. गौरिकादय:
2 A धातूत्पत्तिं भूमिं, I. O. धातूत्-
-पत्तिभुवं
3 I. O. omits एतां
4 A धात्वाविवभुवं
5 I. O. अञ्जनाकारभूमिन्तु
6 I. O. and V. D. पूज्यतेऽसौ for the bracketed portion
7 I. O. रसाञ्जनादि
8 A omits फल
9 A omits अञ्जनाकर
10 A शिम्बिप्ररोहान्त
11 A ऐन्धनाकरभूमिन्तु
12 V. D. omits the b. p.
13 A omits it

तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षवह्नि[1]-लोकप्राप्तिकामोऽह-[2]मेतां प्रियदत्तामिन्धनाकरभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१४ख) :—

[3]औषधाकरभूमिन्तु [4]नासत्यैः [5][सह मोदते] ॥१४॥

दत्त्वेति सम्बन्धः। अर्चिताय ब्राह्मणायार्चितामावधोत्पत्तिभूमिम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। सोत्कर्ष-[6]नासत्यलोकप्राप्तिकामोऽहं प्रियदत्तामौषधाकरभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१५क) :—

[7]शूकधान्यभुवं दत्त्वा रुद्रलोके महीयते ॥१५॥

अर्चिताय ब्राह्मणायार्चितां यवादि-[8]शूकधान्योत्पत्तिभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षरुद्रलोकप्राप्तिकामोऽहं प्रियदत्तां [9]शूकधान्यभुवं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (३।३०५।१६ख-१७क) :—

इक्षुभूमिं नरो दत्त्वा द्राक्षाभूमिमथापि वा।
सोमलोकमवाप्नोति सर्वकामांश्च विन्दति ॥१६॥

अर्चिताय ब्राह्मणायार्चितामिक्षूत्पत्तिभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णु-धर्मोत्तरोक्तेक्षुभूमिदानफलप्राप्तिकामोऽहं प्रियदत्तामिक्षुभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। द्राक्षाभूमिदान इक्षुपदस्थाने द्राक्षापदनिवेशो वाक्ये[10] विशेषः।

तथा (३।३०५।१५ख-१६क) :—

केदारभूमिं धर्मज्ञ [11][धर्मतो यः प्रयच्छति]।
[12][स महत्पुण्यमाप्नोति ब्रह्मलोकञ्च गच्छति ॥१७॥]

धर्मज्ञ इति सम्बोधनम्। केदारभूमिं क्षेत्रं धर्मतो [13]यथाविध्योत्यर्थः। अर्चिताय

---

1 A ०ब्रह्म
2 I. O. omits एतां
3 I. O. भेषजाकरभूमिन्तु. V. D. omits it
4 A सापरैः
5 V.D. सच्चितसुखधा for the b. p.
6 A नाक for नासत्य
7 A शुक०
8 A ०शुक०, I. O. ०शूकर०
9 A शुक०
10 A वाक्य०
11 I. O. and V. D. यः प्रयच्छति धर्मतः for the bracketed portion
12 A omits the bracketed portion
13 A यथाविधिना ददातीत्यर्थः

ब्राह्मणायार्च्चिताां केदारभूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महापुण्यप्राप्ति-[1][पूर्वक-ब्रह्मलोकगमन]-कामोऽहं प्रियदत्तां केदारभूमिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[2][तथा (३।३०५।३२ख-३३क) :—

[3]पक्कशस्यां वसुमतीं योऽलङ्कृत्य प्रयच्छति।
कामगेन विमानेन ब्रह्मलोकं स गच्छति ॥१८॥

अलङ्कृत्य वस्त्रादिना। भूमि-[4]मुक्तरूपामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। कामगविमानारोहणपूर्वक-ब्रह्मलोकगमनकामोऽहमेतां [5]पक्कशस्यामलङ्कृतां प्रियदत्तां वसुमतीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

तथा (३।३०५।३०ख-३१क) :—

भूमिं क्रीत्वा[6] तु [7][यो दद्याद् ब्राह्मणाय मनस्विने]।
स्वर्गलोकमवाप्नोति पुरुषोऽतिसुदारुणः ॥१६॥

अतिसुदारुण इत्यत्रापिशब्दोऽध्याहार्य्यः। तेन सुदारुणोऽपि [8]स्वर्गं प्राप्नोतीत्यर्थः। अर्च्चिताय मनस्विने ब्राह्मणाय [9]संक्रयेणोत्पादितामर्च्चितां भूमिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गलोक[10]-प्राप्तिकामोऽहमियत्पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-[11]शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे भूमिदानावर्तः।

---

1 A omits the bracketed portion
2 I. O. omits the bracketed portion
3 Corrected from V. D. A' पङ्कशस्या
4 A उक्तरूपां after ब्राह्मणाय, just below.
5 A पङ्क°
6 A कृत्वा
7 I. O. and V. D. यः कुर्य्याद्देव-ब्राह्मणसात्ररः for the bracketed portion
8 I. O. स्वर्गं
9 A संक्रयोगो° for संक्रयेणो°
10 A omits लोक
11 A सङ्कर

अथ प्रजापतिदैवतासनदानावर्त्तः । (१२)

स्कन्दपुराणे :—

आसनं यः प्रयच्छेच्च[1] सपीठं ब्राह्मणाय वै ।

स [2]राज्यस्थानमाप्नोति [3][स्वर्गमाप्नोति विज्वरः] ॥१॥

[4]राज्यस्थानं [5]पृथिवीम् आसनं [6]खट्वादि सपीठं [7]पादपीठसहितम् । अत्र यजमानोऽर्च्चिताय ब्राह्मणाय सपीठमासनमर्च्चितं[8] दद्यात् । ॐ अद्यामुकसगोत्रायामुक-[9]वेदामुकशाखाध्यायिनेऽमुक-[10]देवशर्मणे तुभ्यं स्कन्दपुराणोक्तासनदानफलप्राप्तिकामोऽहमेतत् सपीठमासनमर्चितं [11]ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा आसनमिदं प्रजापतिदैवतमित्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । [12]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा आसनं स्पृशेत् ।

आदित्यपुराणे :—

[13]सुसन्धि चित्राभरणोपशोभितं यस्त्वासनं वेदविदे प्रदद्यात् ।

ग्रामाधिपत्यं लभते [14]समग्रकं कुलं महत्त्वञ्च लभेत् समग्रम् ॥२॥

[15]सुसन्धि दृढं चित्राभरणोपशोभितं नानाविधगजदन्ताद्यलङ्कृतं [16]ग्रामाधिपत्यं [17]ग्रामस्य जातिपरत्वात्तदाधिपत्यं [18]समग्रकं सार्वभौमिकम्[19] । [20]ब्राह्मणायार्च्चितायार्च्चितं[21] यथोक्तमासनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्तासनदानफलप्राप्तिकामोऽहमेतच्चित्राभरणोपशोभितमासनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. प्रयच्छेत्
2 A वास्तुस्थान०
3 A ब्राह्मणो वेदविज्वर: for the bracketed portion
4 A वास्तुस्थानं
5 A पृथिवी, I. O. पृथ्वीं
6 I. O. षट्वादि
7 A omits पाद
8 A अर्च्चिताय again before अर्चितं
9 A ०शाखा अमुकवेदाध्यायिने
10 A omits देव
11 I. O. omits अर्चितं
12 A omits it
13 I. O. स्वयस्ति, A स्वसन्धि
14 I. O. सशीलं
15 I. O. स्वयस्ति
16 A ग्रामाधिपत्यस्य
17 A ग्रामाधि
18 Both I. O. and A omit it
19 A सर्व्वभौमिकं, I. O. सार्व्वभौमत्वं
20 I. O. ब्राह्मणार्च्चितायार्च्चितं
21 A omits अर्चितं

ब्रह्मपुराणे :—

काष्ठपादुकयानानि पीठ-[1]काष्ठासनानि च ।
यैर्दत्तानि [2]द्विजातिभ्यस्तेऽध्वानं यान्ति वै सुखम् ॥३॥

दातृबहुत्वापेक्षया संप्रदानबहुत्वं देयबहुत्वञ्च । अध्वानं यममार्गम् । अत्र चासन-[3]पदसमभिधानात् पीठपदं[4] [5]पादपीठपरम् ।

सुवर्णमणिपीठेषु पादौ [कृत्वोत्तमेषु च][6] ।
ते प्रयान्ति विमानैस्तु अप्सरोगण-[7]मण्डितैः ॥४॥

अर्चिताय ब्राह्मणायार्चितमासनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ब्रह्मपुराणोक्तासनदानफलप्राप्तिकामोऽहं[8]-मेतदासनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । पादपीठदाने तु वाक्ये आसन-[9]पदस्थाने पीठपद-[10][निवेशो विशेषः] ।

[11][विष्णुधर्मोत्तरे (३।३११।१क) :—

[12]नर आसनदानेन स्थानं सर्वत्र विन्दति ॥५॥

सर्वत्रेति सर्वलोकेषु । ब्राह्मणायार्चिताय यथाशक्त्युत्कृष्टमासनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तासनदानफलप्राप्तिकामोऽहमेतदासनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।६क) :—

पादपीठप्रदानेन[13] स्थानं सर्वत्र विन्दति ॥६॥

अर्चिताय ब्राह्मणाय यथाशक्त्युत्कृष्टं पादपीठमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तपादपीठदानफलप्राप्तिकामोऽहमेतत् पादपीठं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराजनिःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे आसनदानावर्तः ।

---

1 A काम्या for काष्ठा
2 A द्विजाद्भ्यि०
3 A ०पदसम्बन्धिधानात्, I. O. ०सम्बिधानात्
4 I. O. पीठवत्
5 A omits पाद
6 A ह्वत्वा तु ये सुधा for the bracketed portion
7 I. O. ०पण्डितैः
8 I. O. omits अहम्
9 I. O. omits पद
10 I. O. विशेषो निवेशः for the bracketed portion
11 A omits the bracketed portion
12 V. D. नरस्त्वासन०
13 Corrected from V. D. I. O. ०प्रमाणेन

अथ वरुणदैवतवारिदानावर्तः । (१३)

तत्र वारिदानप्रशंसा ।

महाभारते :—

एततसुदुर्लभतरं परलोके द्विजोत्तमाः ।

आपो नित्यं प्रदेयास्ते पुण्यं ह्येतदनुत्तमम् ॥१॥

तथा (cf. अनु—५७।२०) :—

पानीयस्य गुणादित्या प्रेतलोके विशेषतः ।]

तत्र पुण्योदका[1] नाम नदी तेषां विधीयते ॥२॥

अक्षयं सलिलं तत्र पिबन्ति ह्यमृतोपमम् ।

[2][स तत्र तोयं] पिबति पानीयं यः प्रयच्छति ॥३॥

तथा (अनु—५८।२१) :—

[3]सर्वदानैर्गुरुतरं सर्वदानैर्विशिष्यते ।

पानीयं नरशार्दूल तस्माद्दातव्यमेव हि ॥४॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

[4]भूमिपश्वन्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।

नैवेशिकं स्वर्णधुर्य्यान्[5] दत्त्वा स्वर्गे महीयते ॥५॥

[6]इदं ब्राह्मण-[7]मात्रदेयभूम्यादिसमभिव्याहाराद् ब्राह्मणाय दानम् । अत्र यजमानोऽर्चिताय[8] ब्राह्मणायार्चितं जलम्[9] [10][ॐ अद्यादि तुभ्यमन्तमुक्त्वा] दद्यात् । ॐ

1 I. O. पुण्योदको

2 I. O. तत्र तोयं च for the bracketed portion

3 A सर्व्वदानं गुरुतरं

4 I. O. भूदीपाश्वान्न०

5 A स्वर्णमुख्यान

6 A इति

7 A देयमात्र०

8 A omits चर्चिताय

9 A दद्यात् again after this

10 I. O. omits the bracketed portion

अद्यामुक[1]-सगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्ष-[2]स्वर्गप्राप्तिकामोऽह-मेतदम्भो ददानि। प्रतिग्रहीता [3]स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अम्भ इदं वरुणदैवत-मित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणा-मेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा जलं स्पृशेत्।

महाभारते (अनु—५७।३७क) :—

[4]भक्तान्नपानीयरसप्रदाता सर्वान् समाप्नोति रसान् प्रकामम् ॥६॥

अस्य [5][ब्राह्मणसम्प्रदानकदानप्रकरणे] पाठाद्ब्राह्मणसम्प्रदानकत्वम्। पानीयमर्चित-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [6]अत्यर्थसर्वरसप्राप्तिकामोऽह-मेतत्पानीयं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (वन—१९९।२४) :—

पादोदकं पादघृतं [7]दीपमन्नं प्रतिश्रयम्।
[8][ये प्रयच्छन्ति वै राजन्नो[9]-पसर्पन्ति ते यमम्] ॥७॥

गृहीतोदपूर्णताम्र-[10]पात्र उदङ्मुखो ब्राह्मणाय पादोदकदानं[11] सङ्कल्पयेत्। [12]ॐ यमानुपसर्पणकामोऽहं ब्राह्मणाय पादोदकं दास्ये। तदवधि [13]यथेच्छं ब्राह्मणाय पाद-प्रक्षालनार्थिने पादोदकं दद्यात्।

[14]ब्रह्मपुराणे :—

पानीयं ये प्रयच्छन्ति सर्वप्राण्यनुजीवनम्[15]।
तेऽपि [16][तृप्ताः सुखं] यान्ति विमानैस्तं[17] महापथम् ॥८॥

---

1 A अद्यामुके मासि for अद्यामुक
2 I. O. omits स्वर्ग
3 A omits it
4 A भक्ष्यान्नपानीयसंप्रदाता
5 A ब्राह्मणं प्रकरणे for the bracketed portion
6 A अत्यन्त०
7 I. O. पापमन्नं
8 I. O. प्रयच्छन्ति तु ये राजन् उपसर्पन्ति ते यमः for the bracketed portion
9 A न्न for न्नो
10 A पात्रं उदङ्मुखो, I. O. पात्रोदङ्मुखो
11 I. O. पादोदकदान
12 A omits it
13 I. O. यथोक्तं
14 I. O. ब्राह्मपुराणे
15 A सर्वपाण्यनुजीवनं, I. O. सर्वप्राण्यानुजीविनं
16 I. O. तृप्ता स्वयं for the b. p.
17 I. O. ०स्तं

[1][ब्रह्मपुराणे[2] एतद्वचन[3]-पूर्वोत्तरवाक्ययोर्द्विजेभ्य इति [4]श्रुतेर्ब्राह्मणायैतद्दानम्। ब्राह्मणायार्चिताय [5]स्वादुशीतलजलमभ्यर्च्य ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।] [6]ब्रह्मपुराणोक्त-पेयवारिदान-फलप्राप्ति-कामोऽहमेतत् पानीयं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

[7][पादाभ्यङ्गं शिरोऽभ्यङ्गं] स्नानपादोदकं तथा।
ये प्रयच्छन्ति विप्रेभ्यस्ते [8][न यान्ति यमालयम्] ॥९॥

ब्राह्मणेभ्यः स्नानार्थिभ्यः पादधावनार्थिभ्यो वा जलदानं पूर्ववत् सङ्कल्पयेत्। [9]ॐ ब्राह्मणेभ्यो [10]ब्रह्मपुराणोक्त-स्नानोदकदान-फलप्राप्तिकामोऽहं स्नानोदकं दास्ये। तदादि यथेच्छं [11]कालं दद्यात्। पादोदकदानवाक्ये तु स्नानोदकपदस्थाने पादोदकपद-[12][निवेशो विशेषः]।

स्कन्दपुराणे :—

सुगन्धा शीतलाश्चापो रसैर्दिव्यैः समन्विताः।
यः [13]प्रयच्छति विप्रेभ्यस्तस्य दानफलं शृणु ॥१०॥

सुगन्धाः सुधूपिताः। [14][रसैर्दिव्यैः समन्विताः] तथा सुधूपिताः कर्तव्याः यथोत्कृष्टरसयुक्ता भवन्ति।

विमानं सूर्य्यसङ्काशमप्सरोगणसेवितम्।
सोऽधिरुह्य दिवं याति वरुणस्य सलोकताम् ॥११॥
[15][तत्रासावयुतान्यष्टा-[16]वुषित्वा देववत् सुखी।]
[17][असङ्कीर्णे कुले शुद्धे] जायते [18]धनधान्यवान् ॥१२॥

---

1 A omits the bracketed portion
2 I. O. ब्राह्मपुराणे
3 I. O. एतद्वचन्
4 I. O. श्रुतेर्ब्राह्मणा०
5 I. O. जलं स्वादुशीतलजलं चाभ्यर्च्य
6 I. O. ब्राह्मपुराणोक्त०
7 A पादाभ्यङ्गजलं मत्वा
8 I. O. यान्त्यधर्मयमालयं for the bracketed portion
9 A omits it
10 I. O. ब्राह्मपुराणोक्त०
11 I. O. omits it
12 A निवेशः for the bracketed portion
13 A प्रयच्छन्ति
14 I. O. omits the bracketed portion
15 A अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं जलं ददानि for the bracketed portion
16 I. O. ०वुषित्वाद्देववत्
17 I. O. कुले महत्वसंकीर्णो for the bracketed portion
18 A जन for धन

असङ्कीर्णे [1]सुवृत्तिमात्रोपजीविनीत्यर्थः। ब्राह्मणेभ्योऽर्चितेभ्यः [2]सुधूपितं सुरस-[3]मर्चितं वारि दद्यात्। ॐ अद्यामुकसगोत्रेभ्यो[4]ऽमुकवेदामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यं स्कन्दपुराणोक्त-जलदानफलप्राप्तिकामोऽहमेताः सुगन्धा अपो ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

दत्त्वा वारि सुखस्पर्शं पादाभ्यां ब्राह्मणाय वै।
उच्छिष्टमार्जनाच्चापि गोदानफलमाप्नुयात् ॥१३॥

सुखस्पर्शं[5] शीतलम्। ग्रीष्मे शीते च [6]कदुष्णं पूर्ववद् ब्राह्मणेभ्यः सुखस्पर्शपादोदक-[7][दानं सङ्कल्पयेत्] [8]ॐ गोदानफलप्राप्तिकामोऽहं ब्राह्मणेभ्यः सुखस्पर्शं पादप्रक्षालनार्थमुदकं दास्ये। ततः प्रभृति यथोक्तसमयोचितं यथेच्छं ब्राह्मणेभ्यः [9]सुखस्पर्शपादोदकं [10]दद्यात्।

[11]आदित्यपुराणे :—

स्कन्धेन तारयेद् यस्तु [12]तृष्णार्तानां जलप्रदः।
पक्कान् ददाति केदारान् [13]फलवांश्चैव पादपान् ॥१४॥
षष्टिकोटिसहस्राणि अर्बुदानाञ्च वै त्रयम्।
क्रीडन्ति च[14] श्वेतपुरे एतदुक्तं द्विजोत्तमाः ॥१५॥

अत्र फलोत्कर्षश्रवणात्[15] [16]सुशीतलसुवासितजलदानम्। [17]पूर्ववद् यथेच्छं तृष्णार्तेभ्यो ब्राह्मणेभ्यो जलदानं सङ्कल्पयेत्। [18]ॐ आदित्यपुराणोक्तजलदानफलप्राप्तिकामोऽहं तृष्णार्तेभ्यो ब्राह्मणेभ्यो जलं दास्ये। तदादि यथेच्छं[19] तृष्णार्तेभ्यो जलं दद्यात्। ब्राह्मणसम्प्रदानक-[20][दानमध्यपतित]-त्वाद् ब्राह्मणे दानमेतत्।

---

1 I. O. सु,वृत्ति for सुवृत्ति
2 I. O. सुपूजितं
3 A धूम for म
4 A य for भ्यो
5 I. O. सुखस्पर्श
6 I. O. कदुष्टं, A कटुष्णं
7 I. O. दान सङ्कल्पयेत् for the bracketed portion
8 A omits it
9 I. O. omits सुखस्पर्श
10 A दास्ये
11 A आदिपुराणे
12 I. O. तृष्णार्तं ना
13 A सफलांश्च पदे पदे
14 I. O. ते
15 I. O. ॰श्रवणात्
16 I. O. सुशीत for सुशीतल
17 A पूर्ववत्सुखेच्छं
18 A omits it
19 I. O. यथेच्छ
20 I. O. मध्यपति for the bracketed portion

विष्णुधर्मोत्तरे (३।३११।१३क) :—

शौच-[1]स्नानोदकं दत्त्वा [2]विरोगस्त्वभिजायते ॥१६॥

अस्य ब्राह्मणदेय-[3]प्रकरणे श्रवणाद् ब्राह्मणसम्प्रदानकत्वम्। यथेच्छसंख्यब्राह्मणेभ्यः शौच-[4]स्नानोदकदानं सङ्कल्पयेत्। ॐ विरोगत्वप्राप्तिकामोऽहं ब्राह्मणेभ्यः शौचार्थमुदकं दास्ये। [5]स्नानोदकदाने तु शौचार्थमितिस्थाने स्नानार्थमिति निवेशो विशेषः। ततःप्रभृति यथेच्छं शौचस्नानोदके दद्यात्।

अथ [6]शौचस्नानान्यजलदानम्।

[7][मनुः (४।२२६क) :—

वारिदस्तृप्तिमाप्नोति ॥१७॥

नानासत्त्वेभ्यो वारिदानं सङ्कल्पयेत्। ॐ तृप्तिप्राप्तिकामोऽहं नानासत्त्वेभ्यो वारि दास्ये।

नन्दिपुराणे :—]

योऽपि कश्चित्तृषार्ताय जलदानं प्रयच्छति।

स नित्यतृप्तो [8]वसति [9][स्वर्गे युगशतं] नरः ॥१८॥

अत्र फलबाहुल्यात् तृषार्तायेत्येक[10]-वचनमविवक्षितार्थं[11] किन्तु तृषार्तानां [12]सम्प्रदानस्योपदर्शकम्। तृषितेभ्यः पूर्ववद्वारिदानं[13] सङ्कल्पयेत्। [14]ॐ नन्दिपुराणोक्ततृषार्तसंप्रदानक-[15]जलदानफलप्राप्तिकामोऽहं तृषितेभ्यो जलं दास्ये। इति सङ्कल्प्य यथाकालमुपस्थितेभ्यस्तृषितेभ्यो जलं[16] दद्यात्।

[17][महाभारते (अनु—६७।१६) :—

[18]तोयदो मनुजव्याघ्र [19]स्वर्गं गत्वा महाद्युते।

[20]अक्षयं समवाप्नोति लोकमित्यब्रवीन्मनुः ॥१६॥

1 Corrected from V. D. A ०स्नानोदके, I. O. ०दानोदके
2 A विरागस्त्वभिजायते, I. O. विरोगश्चति जायते
3 A ०प्रकरणश्रवणात्
4 A ०स्नानोदकं
5 I. O. स्नानार्थोदकदाने
6 I. O. शौचान्य०, A सामान्य०
7 A omits the bracketed portion
8 A भवति
9 A सर्गे युतशतं for the bracketed portion
10 A अमुक for येत्येक
11 I. O. वचनं सविवक्षितार्थं, A वचनमविवक्षार्थं
12 A सम्प्रदानत्वास्यापदकं
13 Both I. O. and A omit दानं
14 A omits it
15 I. O. omits जल
16 A omits it
17 A omits the bracketed portion
18 I. O. तोयदो
19 I. O. स्वर्ग
20 I. O. अक्षयाम्

[1]पूर्ववन्नानासत्त्वेभ्यो वारि सङ्कल्प्य दद्यात्। ॐ स्वर्गगतिपूर्वकाक्षयलोकप्राप्तिकामोऽहं यथेच्छं [2]नानासत्त्वेभ्यो [3]वारि दास्ये। |

[प्रपाश्च कार्य्याः][4] पानार्थं नित्यन्तु द्विजसत्तम। (cf. अनु—६८।२२ख)
भुक्तेऽप्यथ [5]प्रदीयन्ते पानीयानि विशेषतः ॥२०॥
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम्।
स [दुर्गं विषमं][6] कृच्छ्रं न [7]कदाचिदवाप्नुयात् ॥२१॥

ग्रामे चतुष्पथे [8]वान्यतरे निर्जने देशे [9]पानीयशालां [10]विधाय [11]ज्यैष्ठोपक्रमदिने [12]नानासत्त्वेभ्यो [13]जलपानार्थमुत्सृज्य जलं दद्यात्। ॐ महाभारतोक्त-प्रपादानफलप्राप्ति-कामोऽहं नानाप्राणिभ्योऽवारित[14]-वारिपानार्थं प्रपातमुत्सृज इति सङ्कल्प्य मासद्वयम-[15]वारितं [16][वारि प्रपायां] दद्यात्।

[17]विष्णुधर्मे :—

पानीयं सर्वलोकेषु पावनं परमं स्मृतम्।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती[18] ॥२२॥

पूर्ववन्नानासत्त्वेभ्यो यथाशक्त्युत्कृष्टं वारि सङ्कल्प्य दद्यात्। [19]ॐ शाश्वततृप्तिप्राप्ति[20]-कामोऽहं नानासत्त्वेभ्यः पानीयं दास्ये।

विष्णुधर्मोत्तरे (३।२६८।४–१६क) :—

प्रपां पथि तथा [21]कृत्वा नाकलोके महीयते।
प्रपास्थानं शुभं कृत्वा स्थानमाप्नोति शाश्वतम् ॥२३॥

---

1 I. O. पूर्व्वन्तु for पूर्ववत्
2 I. O. नानासत्त्वेभ्यो
3 I. O. वारिं
4 A पानीयं शालां for the bracketed portion
5 I. O. न दीयन्ते
6 A त्वं विकलं for the b. p.
7 A कदाचिदपिदवाप्नुयात्
8 A वान्यतरा, I. O. राज्यतवा
9 A पानीशालां
10 I. O. निधाय
11 I. O. ज्येष्ठो० and A ष्ठो० for ज्यैष्ठो०
12 I. O. नानासर्व्वभ्यो
13 I. O. जलं for जल
14 I. O. सुवारित and A भू for ऽवारित
15 Both I. O. and A ०वारित
16 A प्रदपादानं for the b. p.
17 A विष्णुधर्मोत्तरे
18 A omits it
19 I. O. omits it
20 A omits प्राप्ति
21 A कृत्वात्

तस्य स्थानात्तथात्यागात् फलवृद्धिः[1] प्रकीर्तिता ।
तस्योपलेपनं कृत्वा सर्वपापैः प्रमुच्यते ॥२४॥
रज्जुं दत्त्वा प्रपास्थाने गोदो भवति मानवः ।
[2]वारिधानीं तथा दत्त्वा तदेव फलमाप्नुयात् ॥२५॥

[3]स्वकृतान्यकृतप्रपासन्निहितकूपपानीयोद्धरणार्थं रज्जुदानम् ।

कुम्भप्रदानाद्[4] भवति [5]पुमान् पूर्णमनोरथः[6] ।
प्रपायाश्च तथा दत्त्वा [7]पुरुषं परिचारकम् ।
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥२६॥
वर्द्धमानानि यो दद्यात् प्रपायां द्विजसत्तमाः ।
[8][त्रिविधां वृद्धिमाप्नोति तेजसा यशसा श्रिया] ॥२७॥

वर्द्धमानानि [9]शरावान् ।

[10]लवणस्य प्रदानेन रसानाप्नोति शाश्वतान् ।
तथा [11]हरीतकं दत्त्वा गवां लोकमवाप्नुयात् ॥२८॥

हरीतकं घासम् । [12]श्रान्तापरगवीभ्यो घासदानमित्यर्थः ।

फलप्रदानेन तथा वह्निष्टोमफलं लभेत् ।
शक्तूनाञ्च प्रदानेन [13][गोसवस्य फलं नरः] ।
गोरसानां प्रदानेन गवां लोकमवाप्नुयात् ॥२९॥
[14][शय्याश्च विविधाः[15] कृत्वा [16]प्रपायामासनानि च ।

---

1 I. O. फलवृद्धि
2 A वारिधानि
3 A सु and I. O. च for स्व
4 I. O. omits द्
5 I. O. and V. D. सदा
6 I. O. पूर्णमनोरथाः
7 I. O. पुरुषं
8 A reads the bracketed portion as त्रिविधं वृद्धिमाप्नोति तेजसां जससां श्रियां
9 I. O. सरावान्, A सरावान
10 I. O. मरणस्य
11 A हरितकान
12 A श्रान्तागवगवीभ्यो, I. O. प्रान्ता-प्रतगवीभ्यो
13 Corrected from V. D. I. O. गोपुरस्य तथा वर; for the bracketed portion
14 A reads the bracketed portion just before हरीतकं घासम्, a little above
15 A शयाश्च विविधां
16 I. O. प्रपायां सासनानि च

स्वर्गलोकमवाप्नोति मानुष्ये [1]स्थानमेव च ॥३०॥
कृत्वा निर्वातं शरणं [2]प्रपास्थाने मनोहरम् ।
स्वारत्नं लोकमाप्नोति [3]वसूनां नात्र संशयः ॥३१॥]

शरणं गृहम् ।

तत्र [4]वह्निन्तथा दत्त्वा शीतत्राणाय [5]मानवः ।
कायाग्निदीप्तिं [6]प्राकाश्यं सौभाग्यञ्च तथाप्नुयात् । ३२॥
इन्धनानां प्रदानेन शत्रुभिर्नाभिभूयते ।
तत्रोपयोज्यभाण्डानां [7][दानात् स्वर्गमवाप्नुयात्] ।
[8]चन्द्रलोकमवाप्नोति स्थापनात्तुहिनस्य तु ॥३३॥

[9]तुहिनस्य [10]श्रान्तस्य [11]तापोपशान्तये तुषारीयन्त्रस्य तदेव शुभस्थानम् । गोमयोपलिप्तां रज्जु-वारिधानीकुम्भ-[12]परिचारकपुरुष-शराव-[13][लवण-गोधासफल-शक्तु]-गोरसानेकशय्यानेकासना-[14]दीन्धनाद्युपयोज्यापरद्रव्य-तुषारीयन्त्रान्वितां [15][निर्वातां प्रपां]राजपथे निर्माय सङ्कल्पपूर्वकं दद्यात् । ॐ विष्णुधर्मोत्तरोक्त-[16]प्रपादानफलप्राप्तिकामोऽहं नाना-[17]सत्त्वेभ्योऽवारित-[18][वारिपान--गोधासदान--लवणफलशक्तुगोरसभक्षण-सुखशयन--सुखोपवेशन-शीतार्तजन्तु-[19]शीतवारण-सन्तप्ततापो[20]-पशमनार्थमेतां] रज्जुवारिधानी-[21]कुम्भ-[22]परिचारकपुरुष--शराव--लवण--[23]गोधासफलशक्तुगोरसानेकशय्यानेकासनादीन्धनाद्युपयोज्या--

---

1 I. O. स्नानमेव
2 Corrected from V. D. I. O. A प्रपास्थानमनोहरं, I. O. प्रपास्थानं मनोरमं
3 A बहूनां
4 Both I. O. and A वह्निस्तथा
5 A मनवः
6 Corrected from V. D. A कायाग्निदीप्तिप्राकाश्यं, I. O. कायाग्निदीप्तिं प्रकाश्यं
7 I. O. प्रदानात् स्वर्गमाप्नुयात् for the b. p.
8 A स्वर्ग for चन्द्र
9 A तत्र हितस्य
10 I. O. प्राप्त
11 A तत्रोपशान्तये, I. O. तापोपशान्तये
12 I. O. प्रतिचारक०
13 A घघासफलशक्तु, I. O. लवणस्वामफलसर्वं for the b. p.
14 I. O. ०मौन्धनाद्युपयोज्यापरद्रव्य०
15 A omits the bracketed portion
16 Both I. O. and A प्रदान०
17 I. O. ०सर्वेभ्यो
18 A omits the bracketed portion
19 I. O. omits शीत
20 I. O. ०तापा०
21 A omits it
22 I. O. प्रतिचारक०
23 I. O. omits गो

परद्रव्यतुषारीयन्त्रान्वितां [1]प्रपां दास्ये। ततोऽवारितं सङ्कल्पिततत्तद्रव्याणि [2][समुपस्थितेभ्यो दद्यात्। अत्र च प्रपायां स्थाननिर्माणोपलेपनरज्जुदानादिषु गुणेषु पृथक् पृथक् फलश्रुतेः सम्पूर्णप्रपाकरणोपयुक्तेन परप्रपायामपि स्थाननिर्माणोपलेपन-रज्जुदानादीनि एकैकशोऽपि सङ्कल्प्य सुस्थेयानि। तद् यथा ॐ विष्णुधर्मोत्तरोक्त-प्रपास्थान-शुभकरण-फलप्राप्तिकामोऽहमेतत् प्रपास्थानं शुभं करिष्य इति सङ्कल्प्य प्रपाभूमिकर्मस्वरूपं कुर्य्यात्। एवमुपलेपनेऽपि[3]। रज्ज्वादिदानेषु सङ्कल्पवाक्यं यथा] ॐ विष्णुधर्मोत्तरोक्तरज्जुदानफलप्राप्तिकामोऽहं प्रपायामेतां रज्जुं दास्ये। एवं वारिधान्यादिदानेष्वपि तत्तदुक्तद्रव्यनिवेशेन[4] वाक्यमूहनीयम्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे वारिदानावर्तः।

---

1 A प्रदास्ये for प्रपां दास्ये

2 A reads the bracketed portion as निर्माणोपलिपनरज्जुदानानि एकैकमपि सङ्कल्पोन्यथारूपं कुर्यात्

3 I. O. ०लेपनोऽपि

4 I. O. ०निवेशन

अथ विष्णुदैवत-तैजसपात्रदानावर्तः । (१४)

[2]विष्णुः :—

तैजसानां [3][प्रदानेन [4]पात्रो भवति कामानाम्] ॥१॥

[5][तेजसां पात्राणां तैजसानामिति] सुवर्ण-[6]रजतताम्रकांस्यपित्तलत्रपुसीसकलोहमयानां पात्राणामिति । बहुत्वं [7]तैजसद्रव्यबहुत्वापेक्षम् । [8][अत एषामन्यतमस्य पात्रस्य दानम् । अत्र यजमानोऽर्चिताय ब्राह्मणायोक्तद्रव्याणामन्यतमस्य पात्रमर्चितं दद्यात् । ॐ अद्यामुक-सगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णूक्ततैजसपात्रदानफलप्राप्तिकामोऽह-मेतत्तैजसपात्रं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पात्रमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा पात्रं स्पृशेत् । तैजसपात्रोत्कर्षबहुत्वे च फलभूयस्त्वम् ।

स्कन्दपुराणे :—

भाजनं यः प्रयच्छेत्तु हेमं रत्नविभूषितम् ।
[9]सोऽप्सरःशतसङ्कीर्णे विमाने दिवि राजते ॥२॥

रत्नविभूषितं नानारत्नालङ्कृतम् । अर्चिताय ब्राह्मणायार्चितं यथोक्तं सौवर्णभाजनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।] स्कन्दपुराणोक्त-हैमभाजन-दानफलप्राप्तिकामोऽह-मेतद्रत्नभूषितं हैमभाजनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

राजतं यः [10]प्रयच्छेच्च विप्रेभ्यो भाजनं शुभम् ।
स गन्धर्वपदं प्राप्य उर्वश्या सह मोदते ॥३॥

विप्रेभ्य इति बहुवचनं [11]जात्यपेक्षया एकस्य भाजनस्य बहुभ्यो दानासम्भवात् । शुभं दर्शनीयम् । अर्चिताय ब्राह्मणायार्चितं [12]राजतभाजनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा

---

1 A ०तैजसदानावर्तः
2 A स्कन्दपुराणे
3 I. O. reads the bracketed portion as पात्राणां दानेन पात्रो भवति मानवाः
4 A पात्रो
5 I. O. reads the bracketed portion as तैजसानामिति
6 A राजत०
7 A तैजसद्रव्यं बहुत्वापेक्षं
8 A omits the bracketed portion
9 I. O. सोऽप्सरा०
10 I. O. प्रयच्छेत
11 I. O. जात्यपेक्षं
12 A रजत०

दद्यात्। स्कन्दपुराणोक्त-[1]राजतभाजन-दानफलप्राप्तिकामोऽहमेतद्-[2]राजतभाजनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथाः—

ताम्रं यो भाजनं दद्याद् ब्राह्मणेभ्यो विशेषतः।
स भवेद् [3][यक्षोराजस्य पत्नी बलसमन्विता] ॥४॥

विशेषत इति विशिष्टमुत्कृष्टमित्यर्थः। ब्राह्मणायार्चितायार्चितं[4] ताम्रभाजनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-ताम्रभाजनदानफलप्राप्तिकामोऽहमेतत्ताम्र-भाजनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मे :—

ताम्रायसानां भाण्डानां दाता [5]रत्नाधिपो भवेत्।
[6]लभतेऽत्रपदं स्थानं बलवान् जायते सदा ॥५॥

अत्र ताम्रायसानामिति द्वन्द्वः[7] क्रियापेक्षया इतरेतरयोगे[8]। अतस्ताम्रपात्राणा-[9][मायसपात्राणां वा मिलितानां वा दानं कर्तव्यम्]। मिलितदाने फलातिरेकः। ब्राह्मणायार्चिताय यथेच्छ-[10]संख्यानि ताम्रपात्राणि लौहपात्राणि चार्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोक्त[11]-ताम्रपात्र-लौहपात्र-दानफलप्राप्तिकामोऽहमेतानि ताम्रपात्राणि लौहपात्राणि च ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अन्यतरपात्रदाने तु [12]विष्णुधर्मोक्तामुकपात्रदान-फलप्राप्तिकामोऽहमेतान्यमुकपात्राणीति निवेशो विशेषः।

विष्णुधर्मोत्तरे (३।३११।१६) :—

तैजसानि तु पात्राणि दत्त्वा सलवणानि तु।
[13]पात्रतामेति कामानां [14]लावण्यञ्चाप्नुयान्महत् ॥६॥

अत्र यद्यपि पात्रबहुत्वं तैजसद्रव्यबहुत्वादप्युपपद्यते तथापि दानचतुष्टयेऽपि बहुत्वोपादानाद् विवक्षितम्। ब्राह्मणायार्चिताय सुवर्णादीनामन्यतमस्य त्रीणि पात्राण्युपादाय लवणेन

---

1 I. O. भाजन only, while A रजतभाजतभाजन
2 A ०द्रजत०
3 I. O. यक्षराजस्य पत्नी बलसमन्वित: and A यक्षराजस्तु यक्षोवरसमन्वित: for the bracketed portion
4 A omits अर्चितं
5 A रत्नाधिपो
6 A लभतेऽनुपगतं
7 I. O. मि द्वित्व for मिति द्वन्द्व:
8 A द्वन्द्वेतरयोग:
9 A चार्चितानां कर्तव्य: for the bracketed portion
10 I. O. ०संख्यमित
11 A विष्णुधर्मोत्तरोक्त, I. O. स्कन्दपुराणोक्त
12 I. O. विष्णुधर्मोत्तरोक्तामुक०
13 I. O. पात्राणामिति
14 A लावण्यञ्चाप्नुयात्

पूरयित्वाऽर्चितानि ॐ[1] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-सलवण-पात्रदान-फलप्राप्तिकामोऽहमेतानि सलवणानि तैजसपात्राणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।१७) :—

तैजसानि तु पात्राणि सतैलानि प्रयच्छतः।

आरोग्यमुत्तमं प्रोक्तं लावण्यमपि चोत्तमम् ॥७॥

ब्राह्मणायार्चिताय सुवर्णादीनामन्यतमस्य त्रीणि पात्राणि तैलपूर्णान्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। उत्तमारोग्य-लावण्यप्राप्तिकामोऽहमेतानि [2]तैलपूर्णानि तैजसपात्राणि [3]ददानि। [4][स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

तैजसानि तु पात्राणि सघृतानि प्रयच्छतः।

आरोग्यमुत्तमं प्रोक्तं स्वर्गे वासस्तथा द्विजाः ॥८॥

द्विजा इति सम्बोधनम्।] [5]ब्राह्मणायार्चिताय सुवर्णादीनामन्यतमस्य त्रीणि पात्राणि घृतपूर्णान्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात। उत्तमारोग्यपूर्वकस्वर्गवासप्राप्तिकामोऽहमेतानि घृतपूर्णानि तैजसपात्राणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[6]तथा (३।३११।१८) :—

तैजसानि तु पात्राणि समधूनि प्रयच्छतः।

लावण्यमुत्तमं प्रोक्तं सौभाग्यमपि चोत्तमम् ॥९॥

ब्राह्मणायार्चिताय सुवर्णादीनामन्यतमस्य [7]त्रीणि पात्राणि मधुपूर्णान्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। उत्तमलावण्यप्राप्तिपूर्वकोत्तमसौभाग्यप्राप्तिकामोऽहमेतानि मधुपूर्णानि [8]तैजसपात्राणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। एषु चतुर्ष्वपि तैजसपात्रोत्कर्षे फलभूयस्त्वम्।

तथा (३।३१०।१७) :—

रुक्मपात्रप्रदानेन पात्रो भवति मानवः।

सर्वेषामेव [9]कामानां [10]यशसस्त्रिदिवस्य च ॥

---

1 A omits it
2 A तैलानि
3 A पद्दानि, I. O. द्दानि
4 A omits the bracketed portion
5 I. O. ब्राह्मणार्चिताय
6 A omits it
7 A omits it
8 A तैजसानि पात्राणि
9 Corrected from V. D. I. O. देवानां, A दानानां
10 I. O. यशसास्त्रिदिवस्य

ह्मणायार्च्चिताय यथेच्छपरिमाणसुवर्णघटितं पात्रमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा विष्णुधर्मोत्तरोक्त-रुक्म-[1]पात्रदानफल-प्राप्तिकामोऽहमेतद्रुक्मपात्रं ददानि । स्वस्त्यादिन्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्वल्लालसेनदेवविरचिते
[2]श्रीदानसागरे तैजसपात्रदानावर्तः ।

I. O. omits पात्र

2 I. O. omits श्री

अथ वरुणदैवतजल-[1]पात्रदानावर्तः। (१५)

आदित्यपुराणे :—

ये ददन्ति घटीपात्रं [2]कुटिकां करकांस्तथा।

तृषार्तेभ्यस्तथा घर्मे [3]लभन्ते शीतलं जलम् ॥१॥

घटीपात्रं ताम्रघट्यादि, कुटिका कलसी, करकः कमण्डलुः। अत्र यजमानो जलाहरणार्थ[4]-गुणपात्राभावाज्जलाहरणासमर्थाय [5]तदर्थिने [6]तृष्णार्तायार्च्चिताय ब्राह्मणाय उक्तपात्राणां यथालाभमन्यतमं पात्रमर्च्चितं दद्यात्। ॐ अद्यामुकसगोत्रायामुक-[7]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमादित्यपुराणोक्तघटी-[8]पात्रदानफलप्राप्तिकामोऽह[9]--मेतद्घटीपात्रं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा घटीपात्रमिदं वरुणदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। [10]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा जलपात्रं स्पृशेत्। कुटिकादाने तु आदित्य-पुराणोक्त-कुटिकादानफलप्राप्तिकामोऽहमेतां [11][कुटिकामिति विशेषः]। [करकदाने[12] तु आदित्यपुराणोक्त-करकदानफलप्राप्तिकामोऽहमेतं करकमिति विशेषः।][13]

[14]ब्रह्मपुराणे :—

जलभाजनदातारः कुटिका-[15]करकप्रदाः।

पूज्यमानाप्सरोभिश्च यान्ति तृप्ता महागजैः ॥२॥

यान्ति स्वर्गं [16]यान्तीत्यर्थः। जलभाजन-[17]मुक्तेतरजलपात्रं [18]कुटिका कलसी करकः कमण्डलुः। उक्तानामन्यतमं जलपात्र-[19]मर्च्चितमर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्त-

---

1 A omits पात्र

2 I. O. कुटिकं करकां तथा, A कुटिकाकरकास्तथा

3 I. O. लभेते

4 A तु for र्थ

5 A तदात्मने

6 A तृषितायार्च्चिताय

7 A omits वेदामुक

8 A पात्रा, I. O. omits it

9 I. O. omits ऽह

10 A omits it

11 I. O. कुटिकां only for the bracketed portion

12 I. O. वारकादाने

13 A omits the bracketed portion

14 I. O. ब्राह्मपुराणे

15 A ०करक:प्रदा:, I. O. ०करकाप्रदः

16 I. O. स्वान्तीत्यर्थः

17 A दान before this

18 I. O. घटि

19 A omits मर्च्चित

मुक्त्वा दद्यात्। [1]ब्रह्मपुराणोक्त-जलभाजन-दानफलप्राप्तिकामोऽहमेतज्जलभाजनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। कुटिकादाने [2]ब्रह्मपुराणोक्तकुटिकादानफलप्राप्तिकामोऽहमेतां [3][कुटिकामिति विशेषः। करकदाने ब्रह्मपुराणोक्तकरकदानफलप्राप्तिकामोऽहमेतं[4]] करकमिति विशेषः। अत्र च[5] फलोत्कर्षाद्द्रव्योत्कर्षः।

स्कन्दपुराणे :—

कमण्डलुन्तु[6] यो दद्याद् ब्राह्मणाय नरोत्तमः।
स तेन कर्मणा देव्यो धर्मनिष्ठत्व[7]-माप्नुयात् ॥३॥

[8]देव्य इति सम्बोधनम्। अर्चिताय ब्राह्मणाय यथाशक्ति ताम्रादीनामन्यतमेन द्रव्येण विरचितं कमण्डलुमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। धर्मनिष्ठत्व[9]-कामोऽहमेतं कमण्डलुं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[10]अद्भिस्तु पूर्णं यो भाण्डं ब्राह्मणाय प्रयच्छति।
[11]रमास्तस्योपतिष्ठन्ते[12] पूज्यते च दिवं गतः[13] ॥४॥

अर्चिताय ब्राह्मणाय [14]यथाशक्ति कुम्भादिभाण्डं जलपूर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्ताप्पूर्णभाण्ड-[15] [दानफलप्राप्तिकामोऽहमेतदप्पूर्णभाण्डं] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[16][तथा :—

भाजनानि च यो दद्याद-[17]प्पूर्णानि शुभानने।
भाजनः स महाभागस्तारयेच्च पितॄन् भयात् ॥५॥

अर्चिताय ब्राह्मणाय यथाशक्ति कुम्भादिरूपं जलपूर्णभाजनत्रयमर्चितम् ॐ अद्यादि

---

1 I. O. ब्राह्मपुराणोक्त
2 I. O. ब्राह्मपुराणोक्त
3 I. O. omits the bracketed portion
4 A ०मेतां
5 A omits it
6 I. O. स्त for न्तु
7 A ०नित्यत्व०
8 A दिव्य
9 Both I. O. and A ०नित्यत्व०
10 I. O. अपान्तु
11 I. O. वसा०
12 I. O. ०तिष्ठन्ति
13 A वियद्गतः, I. O. विगर्हतः
14 A omits यथा
15 A omits the bracketed portion
16 A omits the bracketed portion
17 I. O. ०पूर्णानि

तुभ्यमन्तमुक्त्वा दद्यात् । स्कन्दपुराणोक्ता-[1]प्पूर्णानेकभाजनदानफलप्राप्तिकामोऽहमेतान्यप्पूर्णानि भाजनानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे जलपात्रदानावर्तः ।

---

1 I. O. ०पूर्णा०

अथ प्रजापतिदैवतान्नदानावर्तः । (१६)

तत्र अन्नदानस्तुतिः ।

ब्रह्मपुराणे :—

अन्ने प्रतिष्ठिता लोका-[1][स्तस्मादन्नं प्रशस्यते] ।

अन्नमेव[2] प्रशंसन्ति सदैव पितृमानवाः ।

[3][अन्नस्य हि प्रदानेन स्वर्गमाप्नोति मानवः ॥१॥

तथा :—]

अन्नस्य हि[4] प्रदानेन नरो याति परां गतिम् ।

सर्वकामसमायुक्तः [5][प्रेत्य चाप्यश्नुते] शुभम् ॥२॥

तथा :—

अन्नमूर्जस्वलं[6] लोके दत्त्वोर्जस्वी भवेन्नरः ।

सतां पन्थानमाश्रित्य[7] सर्वपापैः प्रमुच्यते ॥३॥

[8]महाभारते (अनु—६३।२५ख-२६क) :—

अन्नदः पशुमान् पुत्री धनवान् भोगवानपि ।

प्राणवांश्चापि भवति रूपवांश्च तथा [9]नृप ॥४॥

तथा (अनु—६३।३५) :—

अन्नदस्य मनुष्यस्य बलमोजो यशांसि च ।

कीर्तिश्च वर्धते शश्वत् त्रिषु लोकेषु पाण्डव ॥५॥

[10]आग्नेयपुराणे अन्नस्तुत्यनन्तरम्—

तस्मादन्नं सदा देहि श्रद्धया नृपसत्तम ।

ब्रह्महत्यादिकं[11] पापमन्नदस्य प्रणश्यति ॥६॥

---

1 A अन्नमाश्रयं परं for the bracketed portion

2 A तस्मादन्नं

3 A omits the bracketed portion

4 A omits it

5 A प्रत्य चेहाधिकं for the bracketed portion

6 I. O. ०स्करं

7 I. O. ०हत्य

8 A omits it

9 A नृपः

10 I.O. reads the couplet viz. तथा पादोदकं···ति यमं. (V. 7 of p. 342) just before this

11 I. O. ब्रह्महत्याकृतं

तथा :—

अन्नदानात् परं दानं न भूतं न भविष्यति ।
पुण्यं यशस्यमायुष्यं बलपुष्टिविवर्धनम् ।
[1]सर्वस्यान्नप्रदानेन भवतीति विनिश्चयः ॥७॥
महाकाञ्चनचित्राणि सेवितान्यप्सरोगणैः ।
अन्नदस्योपतिष्ठन्ति विमानानि सुरालये ॥८॥
[2]भक्ष्यभोज्यमयाः शैला दिव्यरूपा [3]ह्यलङ्कृताः ।
हृष्ट-[4]पुष्टजना नित्यमुपतिष्ठन्ति चाग्रतः ॥९॥
हस्त्यश्वरथयानैश्च क्रीडमानाश्च ते नराः ।
[5][पुत्रपौत्रैर्वृताः सर्वे हस्त्यश्वरथदायकाः ॥१०॥
गन्धमाल्यैरलङ्कारैः पुष्टहृष्टाश्च नित्यशः ।
गन्धमाल्यप्रदीप्तास्तु दाननिश्चयतत्पराः ॥११॥]
धर्मज्ञाः सत्यशीलाश्च सर्वदुःखविवर्जिताः ।
मोदन्ते [6]दैवतैः सार्द्धं नित्यकालं महामुने ॥१२॥

पद्मपुराणे :—

[7]आपर्वतनदीवापी पृथिवी सर्वकामदा ।
विधिना तेन सा दत्ता [8][योऽन्नं ददाति] सर्वदा ॥१३॥
क्षुधिते यः प्रयच्छेत अन्नं श्रद्धासमन्वितः ।
ब्रह्मणो[9] भुवने स[10] वै ब्रह्मणा सह मोदते ॥१४॥
[11]चान्द्रवारुणलोकश्च [12]याम्यकौबेरकस्तथा ।
[13][गोलोको ब्रह्मलोकश्च] सर्वे चान्ने प्रतिष्ठिताः ॥१५॥
ददत् कन्यामलङ्कृत्य हस्त्यश्वञ्च महा-[14]बलम् ।
अन्नदानस्य चैतानि कलां नार्हन्ति षोडशीम् ॥१६॥

---

1 A सर्व्वमनुष्यदानेन
2 A भोज्य, I. O. भक्ष्य
3 A दा for ह्य
4 I. O. ०पुष्प०
5 A omits the bracketed portion
6 A दैवतं, I. O. पितरैः
7 I. O. आपर्व्वतं
8 I. O. योन्न ददति for the b. p
9 I. O. ब्रह्मणो
10 I. O. सर्व्वो for स वै
11 I. O. चन्द्रवारुणलोकाश्च
12 I. O. याम्या: कौबेरकास्तथा
13 I. O. गोलोके ब्रह्मलोके वा for the bracketed portion
14 A ०धनं

विष्णुधर्मोत्तरे :—

यावतो ग्रसते ग्रासान् विद्वान् विप्रः [1]स्वलङ्कृतः ।
अन्नप्रदस्य तावन्तः क्रतवः परिकीर्त्तिताः ॥१७॥

अथान्नदानधर्माः ।

यमः :—

आदरेण च [2]भक्त्या च यदन्नमुप-[3]दीयते ।
तत् प्रीणयति पात्राणि [4]साम्रुतं मानवर्जितम् ॥१८॥
दुर्लभस्तु [5]मुदा दाता [6]मुदा भोक्ता च दुर्लभः ।
[7]मुदा दाता च भोक्ता च तावुभौ स्वर्गगामिनौ ॥१६॥
योऽन्नं बहुमतं भुंक्ते यश्चान्नं नावमन्यते ।
यश्चान्नं प्रीतितो दद्यात्तस्यान्नमुपतिष्ठते ॥२०॥
प्रीतितोऽन्नञ्च यो दद्याद् गृह्णीयाद् योऽभिपूज्य च ।
प्रीतितोऽप्ययमश्नाति पूजितः स्वर्गमश्नुते ॥२१॥
यो दद्याद्विप्रियेणान्नं यश्चान्नं नाभिनन्दति ।
तावुभौ नरके मग्नौ वसेतां शरदः शतम् ॥२२॥

अथान्नदानविशेषे[8] [9]फलविशेषपरिभाषा ।

कूर्मपुराणे (२।२६।१८) :—

गृहस्थाया[10]-न्नदानेन फलं [11]नाप्नोति मानवः ।
[12]आममेवास्य दातव्यं दत्त्वाप्नोति परां गतिम् ॥२३॥

अन्नदानेन [13]पक्वान्नदानेन फलं [14]नाप्नोतीति [15]गृहस्थायामान्नदानेन यादृशं फलं तादृशं [16]पक्वान्नदानेन नाप्नोतीत्यर्थः । गृहस्थस्या-[17]मान्नदाने सति तस्य पञ्चयज्ञनिष्पत्तेः ।

---

1 A सुसंवृत:
2 A भोक्ता
3 I. O. ०नीयते
4 I. O. मानृतं
5 A यदा
6 A तथा
7 A अन्नदाता
8 A ०विशेष
9 I. O. फफ०
10 I. O. गृहस्थाया०
11 A and K. P. प्राप्नोति
12 I. O. आममेवाभ्य, A अन्नमेवास्य, K. P. आगमे चास्य
13 I. O. पक्वान्नं दानेन, A पक्वान्नदानेन
14 I. O. नाप्नोति पति, A प्राप्नोतीति
15 I. O. गृहस्थायामन्नदानेन, A गृहस्थायान्नदानेन
16 I. O. पक्वान्नदाने, A पक्वान्नदाने
17 A omits मा

अथ सामान्यान्नदानम् ।

नन्दिपुराणे :—

अन्नाद्भूतानि जातानि देवा ह्यन्नस्य[1] काङ्क्षिणः ।
न तस्य पात्रादिविधिर्विना श्राद्धं प्रकीर्तितः ॥१॥

तथा :—

अपि कीटपतङ्गानां शुनाञ्चाण्डाल-[2]योनीनाम् ।
दत्त्वान्नं लोकमाप्नोति प्राजापत्यं समासतः ॥२॥
बान्धवेभ्योऽतिथिभ्योऽन्नं पुत्रेभ्योऽन्नं प्रयच्छतः ।
दीनान्धकृपणानाञ्च स्वर्गः स्यादन्नदायिनाम् ॥३॥
ग्रासमात्रं नरो दत्त्वा [3]त्वन्नानामन्नगृध्नवे ।
[4][स्वर्गे[5] वसेत् समानान्तु] शतं भोगैर्मनोरमैः ॥४॥
ग्रासे ग्रासे फलं ह्येतद् विधिवत् परिकीर्तितम् ।
एतदेवायने[6] प्रोक्तं द्विगुणं पुण्यगौरवम् ॥५॥
अन्नं विना कृशाङ्गस्य दत्त्वान्नं देशकालतः ।
फलं पञ्चगुणं प्रोक्तं सर्वभावसमन्विते[7] ॥६॥

सर्वभाव-[8][समन्वित इति] सम्बोधनम् । अत्र यजमानः प्राणिमात्रेभ्यो गृहीतोदपूर्ण-[9]ताम्रपात्र उदङ्मुखः सङ्कल्प्य यथेष्ट-[10]कालावध्यन्नं दद्यात् । तद् यथा :—[11]ॐ नन्दिपुराणोक्त-प्राणिमात्रान्न-दानफलप्राप्तिकामोऽहं प्राणिभ्योऽन्नं दास्ये । [12]तदवधि यथासम्भवं [13]प्राणिमात्रेभ्यः स्वगृहे अन्यत्र वा भक्तशालां कृत्वाऽ[14]विच्छिन्नमन्नं देयम् ।

---

1 A ह्यन्नाच्च
2 Both I. O. and A ०योनिनां
3 A ह्यन्नानामन्नगृध्नवे, I. O. त्वन्नानामर्थगृध्नवे
4 A सम्वत्सरगणमात्र for the bracketed portion
5 I. O. स्वर्गी
6 I. O. एतदेवापरे
7 A ०समन्वितं
8 I. O. प्रति for the bracketed portion
9 I. O. omits ताम्र
10 A ०कालावधि अन्नं, I. O. ०कामावध्यन्नं
11 A omits it
12 A एद्वधि
13 A प्राणिभ्यः
14 A ०वच्छिन्न ०

अतएव धार्मिकास्ताम्र-[1]पट्टविलिखितां[2] भूमिं [3]समुपकल्प्य आचन्द्रार्क-[4]स्थायिनीं भक्तशालां [5]ददति ।

वायुपुराणे :—

क्षिप्रमत्युष्णमक्लिन्नं[6] दद्यादन्नं बुभुक्षिते ।
सव्यञ्जनं सदा स्निग्धं [7]भक्ष्यं [8][तत् कृत्य यत्नतः] ॥७॥

क्षिप्र-[9][मतिथिप्राप्त्य]-नन्तरमेव । [10]अक्लिन्नमनुपहतम् । [11]भक्ष्यमप्रतिषिद्धम् ।

तरुणादित्यसङ्काशं विमानं हंसवाहनम् ।
[12][अन्नदो लभते] तिस्रः कल्पकोटीस्तथैव च ॥८॥
अन्नदानात् परं दानं न भूतं न भविष्यति ।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः[13] ॥९॥
जीवदानात् परं दानं न किञ्चिदपि विद्यते ।
अन्नाज्जीवति[14] त्रैलोक्यं [15]त्रिलोक्या सह [16]तत्फलम् ॥१०॥

बुभुक्षितेभ्यो [17]यथोक्तमन्नं पूर्ववत् सङ्कल्प्य दद्यात् । ॐ [18]वायुपुराणोक्तान्नदानफल-प्राप्तिकामोऽहं बुभुक्षितेभ्यः सव्यञ्जनं स्निग्धमन्नं दास्ये एवं सङ्कल्प्य बुभुक्षितानन्विष्य[19] तेभ्यो यथोक्तमन्नं दद्यात् ।

महाभारते (अनु—६६।५७) :—

[20]श्रान्ताय क्षुधितायान्नं यः प्रयच्छति भूमिप ।
स्वायम्भुवं महत् स्थानं स गच्छति नराधिप ॥११॥

---

1 I. O. ०पत्राट्ट०
2 I. O. ०लिखितं, A ०विलिखितं
3 I. O. उपकल्प्य
4 I. O. ०स्थायिनीं
5 I. O. ददाति, A ददानि
6 Both I. O. and A ०क्लिष्टं
7 Both I. O. and A भक्ष्यं
8 A सज्ञाच दापयेत् for the bracketed portion
9 I. O. मथि प्रार्थना for the bracketed portion
10 I. O. अक्लिष्ट०
11 I. O. भक्ष्य०
12 A अन्नदानाल्लभते for the bracketed portion
13 I. O. संशयं
14 I. O. ०ज्जीवन्ति
15 A त्रैलोक्यस्येह
16 I. O. तः फलं
17 A omits यथोक्तम
18 A पद्म०
19 A omits ष्य
20 Both I. O. and A श्रान्ताय

[1]श्रान्ताय क्षुधितायान्नं पूर्ववत् [2]सङ्कल्प्य दद्यात्। [3]ॐ स्वायम्भुवस्थानप्राप्तिकामोऽहं श्रान्ताय क्षुधितायान्नं दास्ये इति सङ्कल्प्य [4]यथाकालं श्रान्तं क्षुधितमनुसन्धायान्नं[5] तस्मै दद्यात्।

[6]तथा (अनु—६६।६०) :—

सद्भ्यो[7] ददाति यश्चान्नं[8] सदैकाग्र[9]-मना नरः।

न स दुर्गाण्यवाप्नो-[10]तीत्येवमाह पराशरः[11] ॥१२॥

अभीष्टसमये सद्ब्राह्मणक्षत्रियवैश्यशूद्रेभ्योऽन्नं पूर्ववत् सङ्कल्प्य दद्यात्। [12]ॐ महाभारतोक्त-[13]सद्भ्योऽन्नदानफलप्राप्तिकामोऽहं [14]सद्भ्योऽन्नं दास्ये। ततःप्रभृति [15]अमित-कालावधि [16][सद्भ्यो ब्राह्मणादिभ्योऽन्नं दद्यात्]।

[17]तथा (अनु—७।७=Cf. अनु—६३।१४-१५=वि. ध.—३।३१५।११) :—

यो दद्यादपरिक्लिष्टमन्न-[18][मध्वनि वर्तते]।

[19][श्रान्ताया-[20]दृष्टपूर्वाय तस्य पुण्यफलं महत् ॥१३॥

अपरिक्लिष्टमनुपहतम्। [21]यथोक्तप्राणिनेऽन्नं पूर्ववत् सङ्कल्पयेत। ॐ महापुण्यफल-प्राप्तिकामोऽहं [22]श्रान्तायाध्वगाया-[23]दृष्टपूर्वायान्नं दास्ये इति सङ्कल्प्य यथाकालमध्वगमन्विष्य यथोक्तमन्नं [24]तस्मै दद्यात्। अत्राध्वनि वर्तत इति [25]शतृनिर्देशात् पथि [26][गच्छते पथिकाय] वर्त्मनि कुटीं कृत्वा तरुतले चान्नं दद्यात्।

---

1 A श्रान्ताया, I. O. श्रान्ताया
2 A सङ्कल्पयेत्
3 A omits it
4 A यथाकालश्रान्तं, I. O. यथा-कालमध्यान्नं
5 A ०सन्धायान्न
6 A omits it
7 I. O. सभ्यो
8 A यश्चान्नं
9 I. O. ०चग्र०
10 A ०ति०
11 Both I. O. and A परासर:
12 A omits it
13 I. O. सभ्योऽन्न०, A साङ्गवरान्न०
14 I. O. सभ्योऽन्नं
15 A अभियुतकालि
16 I. O. सभ्यब्राह्मणेभ्योऽन्नं दास्ये for the bracketed portion
17 A omits it
18 A मत्युयामद्भुतं for the bracketed portion
19 A omits the bracketed portion
20 I. O. ०दृष्ट०
21 A यथोक्तं
22 I. O. श्रान्तायाध्वगाया०
23 A अदृष्टाय before this
24 I. O. तस्मै
25 A सत०
26 I. O. गच्छति पथिका: for the bracketed portion

विष्णुधर्मोत्तरे (३।३१६।२३) :—

[1]मृष्टान्नं मानवो दत्त्वा [2][मृष्टान्नार्थिनि काङ्क्षितम्] ।
अक्षयं फलमाप्नोति स्वर्गलोकञ्च गच्छति ॥१४॥

[3][मृष्टं संस्कृतम् ।] सव्यञ्जनमन्नं पूर्ववत् सङ्कल्प्य तदर्थिभ्यो [4]दद्यात् । विष्णु-
त्तरोक्त[6]-मृष्टान्न[7]-दानफलप्राप्तिकामोऽहं यथाशक्ति [8]मृष्टान्नार्थिभ्यो [9]मृष्टान्नं दास्ये इति
य [10]मृष्टान्नार्थिनोऽनुसन्धाय तेभ्यो यथाशक्ति [11]मृष्टान्नं दद्यात् ।

[12]तथान्नदानप्रकरणे (३।३१५।१२) :—

[13]सहस्रपरिवेशस्तु नरकन्तु[14] न गच्छति ।
विमानेनार्कवर्णेन स्वर्गलोके महीयते ॥१५॥

सहस्रपरिवेशः सहस्राय मनुष्येभ्योऽन्नप्रदः[15] । यथासम्भवं सहस्राय मनुष्येभ्यः [16]सिद्ध-
पूर्ववत् सङ्कल्प्य[17] दद्यात् । [18]ॐ विष्णुधर्मोत्तरोक्तसहस्रपरिवेशनफलप्राप्तिकामोऽहं
म्भवं सहस्राय मनुष्येभ्यो व्यञ्जनादिसहितमन्नं दास्ये इति सङ्कल्प्य यथाशक्ति नानादिनैः
मनुष्यान्[19] भोजयेत् ।

देवलः :—

कृत्वापि [20][पातकं कर्म] यो दद्यादन्नमीप्सितम् ।
[21][ब्राह्मणानां विशेषेण स निहन्त्या[22]-त्मनस्तमः ॥१६॥]

A and V. D. मिष्टान्नं
A and V. D. मिष्टान्नार्थिनि काङ्क्षितं and I. O. मृष्टान्नानि तु काङ्क्षितान् for the bracketed portion
A omits the bracketed portion
I. O. मृष्टमन्नं दास्ये
I. O. ०धर्मोक्ता०
I. O. काङ्क्षिभ्यो and A मिष्टान्न-कांक्षगोचर after this
A मिष्टान्न०
A मिष्टान्नार्थिभ्यो, I. O. omits it
A मिष्टमन्नं
A मिष्टान्नार्थिनो०
11 A मिष्टान्नं
12 A अथान्न०
13 I. O. सहस्रायचनैयस्तु
14 I. O. नरकस्तु
15 A ०न्नं दद्यात्
16 I. O. सिद्धान्नं, A नित्यमन्नं
17 A सङ्कल्प्य
18 A omits it
19 I. O. मनुष्यान
20 I. O. पापकर्मा for the bracketed portion
21 A omits the bracketed portion
22 I. O. ०त्मा०

[1]ब्राह्मणानां विशेषेणेत्यभिधानाद् [2][ब्राह्मणेभ्योऽपि दाने] फलमेतद् भवत्येव । [3]एतच्च [4]सामान्यदानमिदम् । ईप्सितमित्यर्थिनः[5] [6]पृष्ट्वा [7][यथायथमभिमतमन्नमुत्पाद्य तेभ्यः पूर्ववत् सङ्कल्पयेत् । ॐ ब्राह्मणप्रमुखनानावर्णेभ्य आत्मीयतमःक्षयकामोऽहं यथासम्भवम्] ईप्सितमन्नं [8]दास्ये । ततःप्रभृति यथायथ-[9]मुपस्थितेभ्य ईप्सितमन्नं दद्यात् ।

अथ विशेषान्नदानम् ।

बृहस्पतिः :—

अन्नदानं गुणाकरं सर्वदानाधिकं स्मृतम् ।
अन्नात् [10]प्राणप्रजननं नृणां सञ्जायते सदा ॥१॥
[11]प्राणाप्यायनमात्रन्तु यो विप्राय प्रयच्छति ।
दुर्भिक्षे तु विशेषेण [12]स[लभेताक्षयां दिवम्][13] ॥२॥

विशेषेणेति[14] सातिशयमित्यर्थः[15] ।

हेमरत्नाम्बर-[16]धरोऽ[17]भुञ्जानो म्रियते नरः ।
[18]अश्नन् विनाप्यलङ्कारैर्जीर्णवस्त्रोऽपि जीवति ॥३॥
तस्मात् प्रदद्याद्विप्रेभ्यः संस्कृतान्नं सदक्षिणम् ।
तेनेह कीर्तिमाप्नोति स्वर्गं [19][चानन्तकं तथा] ॥४॥

अर्चितेभ्यो ब्राह्मणेभ्योऽर्चितमन्नं[20] दद्यात् । ॐ अद्यामुकसगोत्रेभ्योऽमुकवेदामुक-शाखाध्यायिभ्योऽमुकदेवशर्मभ्यो[21] युष्मभ्यमक्षयस्वर्गप्राप्तिकामोऽहमेतत [22]सुसंस्कृतमन्नं

---

1 I. O. omits it
2 A ब्राह्मणेपि for the bracketed portion
3 I. O. एवञ्च
4 A सामान्यं०
5 I. O. ०त्यर्थेन
6 A स्पृष्ट्वा
7 I. O. यथायथसम्भवम् only for the bracketed portion
8 A ददामि
9 A ०मर्चितेभ्यः
10 A प्राणां प्रजनानां
11 A प्राण०
12 A सु
13 I. O. लभेताक्षया द्दिवं, A लभेताक्षयं फलं for the b. p.
14 I. O. विशेषेण
15 I. O. सातिशयामित्यर्थः
16 I. O. ०युतो
17 I. O. omits the avagraha
18 A अश्वन्विताप्यलङ्कारै०
19 I. O. चानन्तकस्तथा, A चानकं तथा for the bracketed portion
20 A ०र्चितान्नं
21 A ०मुकामुकशर्मभ्यो
22 I. O. संस्कृतान्नं

ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अन्नमिदं प्रजापतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वाऽन्नं स्पृशेयुः। ब्राह्मणे दातरि संस्कृतान्नं पक्वान्नं शूद्रे तु [1]शष्कुलाजादयो द्रष्टव्याः।

स्कन्दपुराणे :—

अन्नं यस्तु सुसंस्कृत्य प्रयच्छेत द्विजातये।
[2]सर्वान् कामानवाप्नोति पूज्यते च त्रिपिष्टपे ॥५॥

अत्र द्विजातय इत्येकवचनं जाति-[3]परत्वादविवक्षितं फलबाहुल्या-[4]द्बहुभ्यो दानावगतेः। [5]आवृत्य वा दातव्यम्।

मयूरहंसयुक्तञ्च सर्वकामसमृद्धिवत्।
विमानं सूर्यसङ्काश-[6]मन्नदो लभते शुभम् ॥६॥
यदि [7]मानुषतां याति कदाचिन्नरसत्तम[8]।
धनधान्यसमाकीर्णे कुले जायेत रूपवान् ॥७॥
यथाशक्त्या तु तद्दद्याद्दिवसे दिवसे नरः।
स तेन कर्मणा प्राप्तः प्रजापतिसलोकताम् ॥८॥

दिवसे दिवसे [9]दद्यादिति तेन कर्मणा जन्मान्तरेऽपि प्रतिदिनमन्नमसा ददातीत्यर्थः। अर्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽन्नं सुसंस्कृतमर्चितम् ॐ[10] अद्यादि [11]युष्मभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-द्विजातिसम्प्रदान-[12]कान्नदानफलप्राप्तिकामोऽहमेतत् सुसंस्कृतमन्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

कदाचिदपि[13] यो दद्यादन्नं विप्राय [14]सत्कृतम्।
तस्यापि तच्छतगुणं सहस्रगुणमेव च।

1 I. O. सध्वंसाद्रानयो
2 I. O. सर्व्व
3 I. O. वचन and A वक्ष for पर
4 I. O. ब
5 I. O. and A आहत्या
6 A ०मन्नदानशुभाशुभं
7 I. O. मानुषता
8 Both I. O. and A ०सत्तम:
9 A दद्यात्
10 A omits it
11 A तुभ्यमन्त०
12 A ०त्वान्न०
13 I. O. कदाचिदापं
14 A संस्कृतं

[1]सत्कृतं सत्कार-[2]पूर्वकं यथा स्यात् ।

[3][उपतिष्ठति लोकेषु इहापि च सुखी भवेत् ॥९॥

जन्मसंस्कारविद्याशालिने प्रणिपातपूजादिना [4]सत्कृत्य ब्राह्मणाय यथालाभमर्चित-मन्नं[5] दद्यात् ।] ॐ [6]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं स्कन्दपुराणोक्त-विप्रसम्प्रदानकान्नदान[7]-फलप्राप्तिकामोऽहमेतदन्नं[8] ददानि । [9][प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अन्नमिदं प्रजापतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि ।] प्रतिग्रहीता स्वस्तीत्युक्त्वा अन्नं स्पृशेत् ।

वामनपुराणे (६५।४४) ब्राह्मणाधिकारे :—

दासीदासमलङ्कारमन्नं [10]षड्रससंयुतम् ।
[11]पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्वकालिकम् ॥१०॥

सार्वकालिक-[12]मनियतकालिकं [13]षड्रसा मधुरादयः । अर्चिताय ब्राह्मणाय [14]षड्रस-व्यञ्जन-[15]सहितमन्नम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुरुषोत्तमतुष्टये[16] एतत् [17]षड्रस-संयुतमन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

नन्दिपुराणे :—

ये च भक्त्या प्रयच्छन्ति गुडपानकमुत्तमम् ।
ओदनञ्च [18]द्विजाग्रेभ्यो विशुद्धेनान्तरात्मना[19] ॥११॥

---

1 A संस्कृतं
2 I. O. ०पूर्व्वं
3 I. O. omits the bracketed portion
4 A संस्कृताय
5 A ०मर्च्चितामन्नतं
6 A omits अद्य
7 A omits दान
8 I. O. ०मन्नं
9 A omits the bracketed portion
10 I. O. सड्रस०
11 Corrected from Vāmana P. I. O. and A पुरुषोत्तमस्य तुष्ट्यर्थं
12 I. O. सा for म
13 I. O. सड्रसा
14 I. O. सड्रस०
15 A omits सहित
16 A omits ये
17 I. O. सड्रससंयुक्तमन्नं
18 A द्विजातिभ्यो
19 A ०त्मने

चकाराद्दानमन्त्र[1] समुच्चितम्[2] ।

ते यान्ति काञ्चनैर्दिव्यैर्विविधैश्च [3]यमालयम् ।
वरस्त्रीभिर्यथा-[4]कामं सेव्यमानाः[5] पुनः पुनः ॥१२॥

गुड-[6]पानकं गुड-[7]मिश्रितपानकम् । द्विजाग्रेभ्य इति बहुवचनं [8]दातृबहुत्वात् । विद्यातपःसम्पन्नायार्च्चिताय [9]ब्राह्मणायार्च्चितं गुडपानकमन्नञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्तगुडपानकौ[10]-दनदानफलप्राप्तिकामोऽहमेतद् गुडपानकमोदनञ्च ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

सम्भोजयेत [11]यो [12][भक्तं ब्राह्मणं] तीर्थ-[13]चारिणम् ।
तस्यामृतप्रवाहि-[14][ण्यो नद्यस्तिष्ठन्ति] सर्वशः ।
स्वर्गे नास्य च सन्देहो [15][यत्र यश्चापि कामयेत्] ॥१३॥

स्वर्गे [16][यत्र यमर्थं] कामयते तत्र नास्य सन्देहो निश्चिता प्राप्तिरित्यर्थः । तीर्थचारि[17]-ब्राह्मणाया-[18]र्च्चितायार्च्चितं भक्तम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्ततीर्थ-[19][चारिब्राह्मणसम्प्रदानकभक्तदान]-फलप्राप्तिकामोऽहमेतद्भक्तं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[20]ब्रह्मपुराणे :—

[21]अवाप्य प्राणसन्देहं [22]कायक्लेशसमर्जितम् ।
अन्नं दत्त्वा द्विजातिभ्यः शूद्रः [23]पापात् प्रमुच्यते ॥१४॥

---

1 A °मात्र
2 Both I. O. and A समुचितं
3 A यमालयं
4 I. O. °द्विषैः
5 A सेव्यमानः
6 I. O. °पान
7 I. O. °मिश्रित°
8 I. O. दातृबहुत्वापेक्षं
9 A omits ब्राह्मणाय
10 A नो for नको
11 A reads च before it
12 I. O. भक्तं ब्राह्मणं for the bracketed portion
13 A °कारिणं
14 I. O. यया नद्यस्तितुष्टि for the bracketed portion
15 A यत्रापि चापि कारयेत् for the bracketed portion
16 A यत्रार्थं मर्थं for the b. p.
17 I. O. तीर्थयात्रि°, A तीर्थयात्रि°
18 A omits चिंतायां
19 A यातृसंप्रदान for the bracketed portion
20 I. O. ब्राह्मपुराणे
21 I. O. अवाप्य
22 A कायक्लेशसमर्जितं, I. O. कायक्लेशसमर्जितं
23 A पापाद्विमुच्यते

अन्नमामान्नम् । शूद्रो [1][युद्धकान्तारदुर्ग]-लङ्घनादिनाऽर्जितमामान्नमर्चितमर्चितेभ्यो ब्राह्मणेभ्य ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पाप-[2]प्रमोचनकामोऽहमेत-[3]दन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा शूद्राधिकारे :—

औरसेन बलेनान्नमर्जयित्वाऽविहिंसकः ।
यः प्रयच्छति विप्रेभ्यो [4][न स दुर्गाणि] सेवते ॥१५॥

शूद्राऽर्चितेभ्यो ब्राह्मणेभ्यः परहिंसाव्यतिरेकेण [5]औरसबलार्जित-[6]मामान्नमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [7]ब्रह्मपुराणोक्तौरस[8]-बलार्जितान्नदानफलप्राप्तिकामोऽहमेतदन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[9]तथा शूद्राधिकारे :—

न्यायेनावाप्त-[10][मन्नन्तु नरो] हर्षसमन्वितः ।
द्विजेभ्यो वेदवृद्धेभ्यो दत्त्वा पापात् प्रमुच्यते ॥१६॥

शूद्रो न्यायार्जितमामान्न-[11]मर्चितमर्चितेभ्यो वेदविद्ब्राह्मणेभ्यः [12]प्रमोदपूर्वकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पाप-[13]प्रमोचनकामोऽहमेतदन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

यश्च वाकिञ्चनं विप्रं [14]भोज्यैः पर्वसु पूजयेत् ।
स सर्वकामसम्पूर्णो[15] नरो लोके महीयते ॥१७॥

अकिञ्चनं दरिद्रं पर्वसु अमावस्यादिषु पञ्चसु । उक्त-[16]समये दरिद्राय जन्मसंस्कार-विद्यायुक्तायार्चिताय [17][ब्राह्मणाय नाना]-व्यञ्जनसहितमन्नम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा

---

1 A omits the bracketed portion
2 I. O. ०प्रमोचक०, A ०प्रशमन०
3 I. O. omits द
4 I. O. नासदर्भोाचि for the bracketed portion
5 A सु for औरस
6 I. O. ममसान्न for मामान्न
7 I. O. ब्राह्म०
8 A ०पुराणोक्तसु०
9 A omits it
10 I. O. मन्नं त नरो and A मन्नन्तु नाना for the bracketed portion
11 I. O. omits मर्चित
12 I. O. प्रमोदक
13 I. O. ०प्रमोचक०, A ०प्रशमन०
14 I. O. भोगैः
15 I. O. ०सम्पूर्णो
16 A omits it
17 I. O. ब्राह्मणाय and A नाना for the bracketed portion

ग्रात्। सर्वकामसम्पूर्ण-[1]लोकप्राप्तिकामोऽहमेतद्भोज्यं ददानि। स्वस्त्यादिस्वीकारान्तं वत्। एवं प्रतिपर्वसु यथाशक्ति दद्यात्।

तथा :—

अन्नं ये तु प्रयच्छन्ति ब्राह्मणेभ्यः सुसंस्कृतम्।
[2]श्रोत्रियेभ्यो विशेषेण भक्त्या परमया युताः ॥१८॥
तरुणीभिर्वरस्त्रीभिः सेव्यमानाः प्रयत्नतः।
धर्मराजपुरं यान्ति विमानैरभ्यलङ्कृतैः ॥१९॥

दातृबहुत्वापेक्षया[3] सम्प्रदानबहुत्वम्। अर्चिताय ब्राह्मणायार्चितं[4] सुसंस्कृतमन्नं णतिपूर्वकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [5]ब्रह्मपुराणोक्त-ब्राह्मणमात्रसम्प्रदानक-संस्कृतान्नदानफलप्राप्तिकामोऽह-[6][मेतत् सुसंस्कृतमर्चितमन्नं[7]प्रणतिपूर्वकं ददानि। स्त्यादिस्वीकारान्तं पूर्ववत्। श्रोत्रियाय दानवाक्ये ब्रह्मपुराणोक्त].श्रोत्रियसम्प्रदानक-संस्कृतान्नदानफलप्राप्तिकामोऽहमिति विशेषः।

[8]तथा :—

यावल्लब्धं प्रदातव्यं द्विजातिभ्योऽन्नमुत्तमम्।
स्वाध्याय-[9]समुपेतेभ्यः प्रहृष्टेनान्तरात्मना ॥२०॥

यावल्लब्धं यथाशक्त्युपात्तम्।

यस्य ह्यन्नमुपाश्नाति ब्राह्मणानां शतद्वयम्।
प्रहृष्टमनसा दत्तं न स तिर्यग्गतिर्भवेत् ॥२१॥

यथाशक्त्युपात्तोपकरणसहितमुत्तम[10]-मन्नमुपादाय [11]स्वाध्याययुक्तशतद्वयसंख्यब्राह्मणेभ्य त्सृज्य दद्यात्। ॐ अद्य [12]ब्रह्मपुराणोक्त-ब्राह्मणशतद्वयसम्प्रदानकान्नदानफलप्राप्तिकामोऽहं यथासम्भवगोत्रनामभ्यः [14][वेदविद्भ्यो शताभ्यां ब्राह्मणेभ्यः] यावल्लब्धमुत्तममन्नं ददानि।

1 I. O. प्रजा
2 I. O. अर्चितेभ्यो
3 I. O. ०पेक्षं
4 A अर्चितं after सुसंस्कृतम्
5 I. O. ब्राह्म०
6 I. O. omits the bracketed portion
7 A प्रणमति
8 A omits it
9 I. O. ०समयेतेभ्यः
10 A omits सुत्तम
11 A स्वान्याय०, I. O. आप्याय०
12 I. O. ब्राह्म०
13 I. O. यथासम्भवं नामगोत्रनामभ्यः
14 I. O. शताभ्यां ब्राह्मणाभ्यां and A वेदविद्भ्यो ब्राह्मणेभ्यः for the bracketed portion

दक्षिणा पूर्ववद् यथासम्भवगोत्रनामोल्लेखेन [1]कस्मैचिदेकस्मै देयेति। ततो यथासम्भवं [2][समुदितान् ब्राह्मणान्] भोजयेत्।

आग्नेयपुराणे:—

सुसंस्कृतञ्च[3] यो दद्यादन्नं [4]श्रद्धासमन्वितः।
इन्द्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश ॥२२॥

सुसंस्कृतं सुसिद्धं [5]दाहादिदोषरहितञ्च। अर्च्चितं सुसंस्कृतमन्नमर्च्चिताय ब्राह्मणाय [6]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्तसुसंस्कृतान्नदानफल[7]-प्राप्तिकामो-ऽहमेतत् सुसंस्कृतमन्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। फलोत्कर्षश्रुतेश्च[8] यथेच्छ-मावृत्य[9] दानम्।

कूर्मपुराणे (२।२६।१७):—

दद्यादहरहस्त्वन्नं श्रद्धया ब्रह्मचारिणे।
सर्वपापविनिर्मुक्तो [10]ब्रह्मणः स्थानमाप्नुयात् ॥२३॥

अहरहरिति यदा यदा [11]ब्रह्मचारी प्राप्यते तदा तदा तस्मै भिक्षा [12]प्रदातव्येत्यर्थः। इदमनुष्ठानमात्रं[13] [14]त्रैवर्णिकदेयञ्च।

शिवपुराणे:—

[15]अन्नं यस्तु प्रयच्छेत सम्वीतं ब्राह्मणाय वै।
राज्यस्थानमवाप्नोति स्वर्गञ्चाप्नोति विज्वरः ॥२४॥

सम्वीतं सुसंस्कृतम्। अर्च्चिताय ब्राह्मणाय सुसंस्कृतमर्च्चित[16]-मन्नम् ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात्। शिवपुराणोक्तान्नदानफलप्राप्तिकामोऽहमेतदन्नं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

---

1 A कस्मै वेदविदे कस्मै
2 A समुदितौ ब्राह्मण and I. O. समुदितौ ब्राह्मणा for the bracketed portion
3 A सुसंस्कृतं
4 A श्राद्ध०
5 I. O. दाह्याद्दि०
6 A omits ॐ
7 A omits फल
8 A कर्षादितेच्छां
9 I. O. ०वृत्या, A ०वृत्त्या
10 A ब्राह्मण, K. P. ब्राह्मणं
11 A ब्रह्म
12 I. O. omits प्र०
13 I. O. ०मात्र
14 A त्रैवर्णिकस्तु देयं
15 A चान्नं
16 A omits मर्च्चित

पद्मपुराणे (सृष्टिखण्डम् १५।१४०ख—१४१क) :—

यः पात्रपूरणीं भिक्षां यतीनान्तु प्रयच्छति ।

[1]विमुक्तः सर्वपापेभ्यो [2]न स दुर्गतिमाप्नुयात ॥२५॥

यथासम्भवमुपस्थिताय [3]यतये भिक्षापात्रं यावता [4]पूर्यते तावदन्नं यथाशक्ति [5]दद्यात् । अनुष्ठानमात्रमिदम् ।

महाभारते (अनु—६५।११) :—

पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।

गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥२६॥

अर्चितेभ्यो ब्राह्मणेभ्यो घृतमिश्रितं[6] पायसमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [7][महाभारतोक्तघृतमिश्रित]-पायसदानफलप्राप्तिकामोऽहमेतं [8]सर्पिर्मिश्रं पायसं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

यथाशक्ति [9][च यो] दद्यादन्नं विप्रे [10]सुसंस्कृतम् ।

स तेन कर्मणाप्नोति प्रजापतिसलोकताम् ॥२७॥

विप्रे जन्मसंस्कारविद्यायुक्ते ब्राह्मणे सुसंस्कृतं सुसिद्धं [11]दाहादिदोषरहितञ्च । यथाशक्ति सोपकरणमन्नमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । प्रजापतिसालोक्यप्राप्तिकामोऽहमेतत् सुसंस्कृतमन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । यथाशक्ति दद्यादिति श्रुतेः [12]शक्तौ बहुभ्योऽपि दद्यात् । बहुभ्यो दाने ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दानमिति [13]विशेषः ।

[14]तथा (अनु—५७।२०ख) :—

अन्न-[15]पानप्रदानेन तृप्यन्ते कामभोगतः ॥२८॥

---

1 A विमुक्त
2 Padma p. नासौ
3 A प्रयतये
4 A पूर्यन्ते
5 I. O. दद्यादित्यनुष्ठान०
6 I. O. घृतमिश्रं
7 A महाभारतोक्तानियतकालिक for the bracketed portion
8 I. O. सर्पिषा मिश्रं
9 A omits the bracketed portion
10 A सु०
11 I. O. दानादि०
12 A शक्तो
13 A शेषः
14 A omits it
15 A ०दान०

अर्चिताय [1]ब्राह्मणायार्चितमन्नम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [2]कामभोग-तृप्तिकामोऽहमेतदन्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—५७।३७क) :—

[3]भक्तान्नपानीयरस-[4]प्रदाता सर्वान् समाप्नोति रसान् प्रकामम् ॥२६॥

[5][अर्चिताय ब्राह्मणायार्चितमन्नम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अत्यर्थ-सर्व[6]-रसप्राप्तिकामोऽहमेतदन्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [7][दानधर्मे ब्राह्मणाय दानप्रकरणे] पाठात् ब्राह्मणसम्प्रदानकमिदं दानद्वयम्।

तथा (अनु—११२।१५) :—

ब्राह्मणानां सहस्राणि दश भोज्य[8] नरर्षभ[9]।
[10]नरोऽधर्मात् प्रमुच्येत पापेष्वपि रतः सदा ॥३०॥

यथोक्तसंख्यब्राह्मणेभ्यो [11]भोज्यान्युत्सृज्य दद्यात्। [12]ॐ यथासम्भवगोत्र-[13]नामभ्यो दशसहस्रसंख्यब्राह्मणेभ्यः पापक्षयकामोऽहं [14]दशसहस्रसंख्यानि भोज्यानि उत्सृजे[15]। ततो ब्राह्मण-[16]सहस्रदशकपूरणावधि भोज्यानि दद्यात्।

तथा (अनु—११२।१४) :—

यस्य [17]ह्यन्नमुपाश्नन्ति ब्राह्मणानां [18][शता दश]।
हृष्टेन मनसा दत्तं न [19]स तिर्यग्गतिर्भवेत् ॥३१॥

यथाशक्ति सहस्रसंख्यब्राह्मणेभ्योऽन्न-[20]मुत्सृज्य दद्यात्। [21]तिर्यग्गत्यगमनकामोऽहं

---

1 I. O. ब्राह्मणार्च्चितमन्नम्
2 A ॐ before it
3 I. O. भक्तान्न०
4 A ०प्रदात्
5 A ॐ अर्च्चिताय भोगतृप्तिकामोऽह-मेतदन्नं for the bracketed portion
6 A omits सर्व
7 A तथा दानधर्मे दानप्रकरण for the bracketed portion
8 A भोज्यं
9 I. O. and A नवर्षभ
10 A नरो धर्मा
11 A भोज्यान्नं उत्सृज्य, I. O. भोज्यानुत्सृज्य
12 A omits it
13 I. O. ०सनामभ्यो
14 I. O. दशसहस्रसंख्या, A दशसहस्र
15 I. O. उत्सृज्य, A उत्सृजेत्
16 I. O. omits सहस्र
17 I. O. भून्य० for ह्यन्न०
18 A शतं सदा for the bracketed portion
19 A च
20 A ०मुतसृजेत्
21 I. O. अतिर्यग्गतिभवन०

यथासम्भवगोत्रनामभ्यः [1]सहस्राय ब्राह्मणेभ्यो यथासम्भवमन्नमुत्-[2]सृजे। ततो ब्राह्मण-सहस्रपूरणावधि अन्नं दद्यात्।

तथा (अनु—११२।१६) :—

भैक्षेणान्नं समाहृत्य विप्रो वेदपुरस्कृतः।
[3][स्वाध्यायनिरते विप्रे] [4]दत्त्वेह सुखमेधते ॥३२॥

भैक्षमनेक-[5]गृहार्जिता भिक्षा। [6][ब्राह्मणोऽनेकगृहा-[7]र्जितभिक्षासमा]-हृतमन्न-[8][मर्चित-मर्चिताय] स्वाध्यायशालिने ब्राह्मणाय ॐ अद्यादि तुभ्यमन्नमुक्त्वा दद्यात्। सुखप्राप्ति-कामोऽहमेतदन्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—११२।२८-२६) :—

भोजयित्वा दशशतं नरो वेदविदां नृप।
न्याय-[9]विद्धर्मविदुषां स्मृतिभाष्यविदां[10] तथा ॥३३॥
न याति नरकं घोरं [संसारञ्च न][11] सेवते।
सर्वकामसमायुक्तः प्रेत्य चाप्यश्नुते सुखम् ॥३४॥

यथोक्तसंख्येभ्यो वेदविद्भ्यो ब्राह्मणेभ्यो [12]भोज्यान्युत्सृज्य दद्यात्। ॐ यथासम्भवगोत्र-नामभ्यो वेदविद्भ्यः [13]सहस्राय ब्राह्मणेभ्यो महाभारतोक्तवेदवित्-[14]सहस्रसंप्रदानकभोज्यदानफल-प्राप्तिकामोऽहं [15]सहस्रभोज्यान्युत्सृजे। [16]कस्मैचिद् ब्राह्मणाय दक्षिणादानं पूर्ववत्। न्याय-विद्-धर्मवित्-स्मृतिविद्-[भाष्यविन्मिलित][17]-ब्राह्मणसंप्रदानक-[18][भोज्यदानेषु प्रत्येक]-वाक्येषु न्यायविद्भ्यो [19][धर्मविद्भ्यो वा स्मृतिविद्भ्यो भाष्यविद्भ्यो वा मिलितेभ्यो] वेत्यूहनीयम्।

---

1 A सहस्र
2 A ०सृजेत्, I. O. ०सृज्य
3 I. O. स्वाध्यायनिरतो विप्र for the bracketed portion
4 I. O. and A दत्त्वेव
5 I. O. ०गृहान्वितो
6 I. O. मया only for the bracketed portion
7 A ०न्वितभिक्ष०
8 A मर्चिय for the bracketed portion
9 A ०व०
10 I. O. ०विदा
11 A संसारान्तं पूर्ववत। वान्तम for the bracketed portion
12 A भोज्यान्नमुतसृज्य, I. O. भोज्यानुत्सृज्य
13 A सहस्र
14 A omits सहस्र
15 A भोज्यानुत्सृजेत्, I. O. सहस्र-भोज्यान्नमुत्सृज्य
16 A कस्यचिद्
17 I. O. भाष्यविद्विनिते and A भाष्य-विन्नीतिविद for the bracketed portion
18 A दानेषु प्रत्येक and I.O. भोज्य-दानफलप्राप्तिकामोऽहं for the bracketed portion
19 A वा स्मृतिविद्भ्यो वा इति तेभ्यो for the b. p.

तथा (अनु—६३।२४ख) :—

नित्यं मिष्टान्नदायी च स्वर्गे वसति सत्कृतः ॥३५॥

[1]अस्य ब्राह्मण-[2]संप्रदानकदानप्रकरणे [पाठाद् ब्राह्मणेभ्यो दानम् । ब्राह्मणेभ्यो मिष्टमन्नं यथेष्टकालं[3] सङ्कल्प्य दद्यात् । तद् यथा यथासम्भवगोत्रनामभ्यो ब्राह्मणेभ्यः सत्कारपूर्वक-स्वर्गवासप्राप्तिकामोऽहं मिष्टान्नं दास्ये । तदवधि यथेष्टकालं यथासम्भवं[4] मिष्टमन्नं ब्राह्मणेभ्यो दद्यात् ।

विष्णुधर्मोत्तरे (३।३१५।१०क, ११ख)][5]ब्राह्मणाय दानानुवृत्तौ :—

परमान्नप्रदानेन तृप्तिर्भवति शाश्वती ।

श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत्[6] ॥३६॥

उक्तरूपाय ब्राह्मणायार्चितायार्चितं पायसम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तपरमान्नदानफलप्राप्तिकामोऽहमेतत् परमान्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१६।७ख) :—

विद्याध्ययनसक्ता[7]-नामन्नदानं महाफलम् ॥३७॥

श्रुताध्ययनसम्पन्नेभ्यो ब्राह्मणेभ्योऽर्चितेभ्योऽर्चितमन्नम् ॐ अद्यादि [8]युष्मभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-विद्याध्ययनसक्त[9]-पात्रकान्नदानफलप्राप्तिकामोऽहमेतदन्नं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१६।२२) :—

बाले क्रीडनकं दत्त्वा मिष्टमन्नं तथैव च ।

फलं मनोहरञ्चापि अग्निष्टोमफलं लभेत् ॥३८॥

अर्चिताय वटवे[10] अर्चितं मिष्टमन्नम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अग्निष्टोमफलप्राप्तिकामोऽहमेतत् मिष्टान्नं[11] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. अन्य
2 A ०संप्रदानप्रकरणात
3 I. O. यथेच्छकालं after this
4 I. O. यथासम्भव
5 A omits the bracketed portion
6 I. O. मृत्यु
7 A ०सक्ता०
8 A तुभ्यमन्त०
9 A ०सक्त
10 I. O. बाले
11 I. O. मिष्टमन्नं

तथा :—

[1]देवमुद्दिश्य विप्राणां यो ददातीह भोजनम् ।
स देवः प्रीतिमानस्य कामानिष्टान् प्रयच्छति ॥३६॥

भोजनं भोजनीयमन्नम् । अर्चितेभ्यो ब्राह्मणेभ्योऽर्चितमन्नम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात् । अमुकदेवप्रीतय एतद्भोजनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे अन्नदानावर्तः ।

---

1 I. O. देवानुद्दिश्य

अथ विष्णुदैवतभक्ष्यदानावर्तः । (१७)

नन्दिपुराणे :—

भक्षयेद्विविधैर्भक्ष्यै[1]-र्ब्राह्मणं वेदपारगम् ।

तस्यामृतप्रवाहिण्यो[2] [नद्यस्तिष्ठन्ति सर्वशः ॥१॥

अत्र यजमानो विद्यावेदव्रतेऽर्चिताय ब्राह्मणायार्चितं नानाविधं पिष्टकादिभक्ष्यं दद्यात् । ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिने]ऽमुकदेवशर्मणे तुभ्यं नन्दि-पुराणोक्त-भक्ष्यदानफलप्राप्तिकामोऽहमेतद्भक्ष्यं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा भक्ष्यमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं [3]दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा भक्ष्यं[4] स्पृशेत् ।

महाभारते (अनु—५७।३७क) :—

भक्ष्यान्न-पानीय-रसप्रदाता सर्वान् समाप्नोति रसान् प्रकामम् ॥२॥

भक्ष्याणि पिष्टकफलमूलानि । एषामन्यतममुपादायार्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5][अनन्त-सर्वरसप्राप्तिकामोऽहमेतद् भक्ष्यं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३१५।७ख) :—

भक्ष्यदः स्वर्गमाप्नोति ॥३॥

भक्ष्याणां पिष्टकफलमूलानामन्यतममर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।] स्वर्गप्राप्तिकामोऽहमेतद् भक्ष्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते

श्रीदानसागरे भक्ष्यदानावर्तः ।

---

1 I. O. सम्भोजयेत यो भक्त्या

2 A omits the bracketed portion

3 A omits दक्षिणाम्

4 A omits भक्ष्यं

5 I. O. omits the bracketed portion

अथ सोमदैवतलवणदानावर्तः । (१८)

सम्वर्तः—

गुडमिक्षुरसञ्चैव लवणं व्यञ्जनानि च ।

सुरभीणि च पानानि दत्त्वात्यन्तं[1] सुखी भवेत् ॥१॥

अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्चितं लवणं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्तसुखप्राप्तिकामोऽहमेतल्लवणं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा लवणमिदं सोमदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा लवणं स्पृशेत ।

आदित्यपुराणे :—

लवणञ्च यथाशक्ति भक्त्या ये वै ददन्ति च ।

तेषां पुण्यकृतां[2] लोकं गवां लोकं व्रजन्ति ते ॥२॥

यथाशक्ति लवणमुपादायार्चिताय ब्राह्मणाय अर्चितं लवणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्त-लवणदानफलप्राप्तिकामोऽहमेतल्लवणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मे :—

लवणस्य प्रदातारस्तिलानां सर्पिषां तथा ।

तेजस्विनोऽभिजायन्ते [3]भोगिनश्चिरजीविनः ॥३॥

अर्चिताय ब्राह्मणाय अर्चितं लवणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्त[4]-लवणदानफलप्राप्तिकामोऽहमेतल्लवणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत ।

विष्णुधर्मोत्तरे (३।३१४।१३ख) :—

सर्वान् कामानवाप्नोति लवणं यः प्रयच्छति ॥४॥

अर्चिताय ब्राह्मणायार्चितं लवणम् अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णु-

---

1 I. O. दत्त्वात्यर्थं
2 I. O. पुण्यकृतं
3 A योगिन०
4 I. O. विष्णुधर्मोत्तरोक्त

धर्मोत्तरोक्त-लवणदानफलप्राप्तिकामोऽहमेतल्लवणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र काम्योत्कर्षाद्दैयोत्कर्षः कर्तव्यः[1]।

तथा (३।३१६।२७) :—

यवसानां[2] प्रदानेन धेनुमत्सु द्विजातिषु।
लवणस्य च धर्मज्ञ फलमक्षयमश्नुते ॥५॥

धर्मज्ञ इति सम्बोधनम्। धेनुमद्भ्यो ब्राह्मणेभ्योऽर्चितेभ्यो[3]ऽर्चितं लवणं दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यमक्षयफल-प्राप्तिकामोऽहमेतल्लवणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे लवणदानावर्तः।

1 A omits कर्तव्यः
2 A यवषाणां
3 A omits अर्चितेभ्यो

अथ विष्णुदैवतघृतदानावर्तः । (१९)

तत्र घृतदानप्रशंसा ।

महाभारते (अनु—६५।७-८) :—

बृहस्पतेर्भगवतः पूष्णश्चैव भगस्य च ।

[1]अश्विनोश्चैव वह्नेश्च प्रीतिर्भवति सर्पिषा ॥१॥

परमं भेषजं ह्येतद् यज्ञानामेतदुत्तमम् ।

रसानामुत्तमं चैतत् फलानाञ्चैवमुत्तमम् ॥२॥

विष्णुधर्मे :—

घृतमग्निर्घृतं सोमो यन्मयाः सर्वदेवताः ।

घृतं प्रयच्छता दत्ता भवन्त्यखिलदेवताः ॥३॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।

नैवेशिकस्वर्णधूर्यान् दत्त्वा स्वर्गे महीयते ॥४॥

अत्र यजमानोऽर्चिताय ब्राह्मणाय अर्चितं घृतं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतत् सर्पिर्ददानि । [प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा घृतमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि][2] । प्रतिग्रहीता स्वस्तीत्युक्त्वा घृतं स्पृशेत् ।

विष्णुः :—

मधुघृततिलदानेना[3]-रोग्यम् ॥५॥

अर्चिताय ब्राह्मणायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ॐ आरोग्यप्राप्तिकामोऽहमेतद्घृतं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A भ्रातत्र०

2 A omits the bracketed portion

3 I. O. ०दानाद०

यमः :—

तथा घृतप्रदानेन दीर्घं विन्दति जीवितम् ॥६॥

अर्चिताय ब्राह्मणायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दीर्घ[1]-जीवितप्राप्तिकामोऽहमेतद्घृतं ददानि[2]। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु—६५।६) :—

फलकामो यशस्कामः पुष्टिकामश्च नित्यदा।
घृतं दद्याद्द्विजातिभ्यः पुरुषः शुचिरात्मवान् ॥७॥

यथेच्छसंख्यब्राह्मणेभ्योऽर्चितेभ्योऽर्चितानि घृतानि दद्यात्। ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यं महाभारतोक्तघृतदानफलप्राप्तिकामोऽहमेतानि घृतानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। एतच्च नित्यदेतिपदश्रवणादावृत्त्य देयम्।

वराहपुराणे (२०६।१८ख-२२) चित्रगुप्तवाक्ये :—

दधि क्षीरं घृतञ्चैव येन दत्तं द्विजातिषु।
एष [आयातु नः पार्श्वे अस्मिन्][3] पूजां करोम्यहम्[4] ॥८॥
नीयतां नीयतां शीघ्रं [यत्र यत्र न चालयेत्][5]।
गोरसस्य तु पूर्णानि भाजनानि सहस्रशः ॥९॥
[6]तत्र दत्त्वा च पीत्वा च बान्धवेभ्यो विभागशः।
ततः पश्चादयं यातु यत्र लोकोऽनसूयकः ॥१०॥
तत्रैव वसतां[7] वीरो[8] बहुवर्षशतान्ययम्।
बहुसुन्दरनारीभिः सेव्यमानो महातपाः।
अमराख्यो भवेत्तत्र[9] [गोलोके सुसमाहितः][10] ॥११॥

---

1 A घृत०
2 A omits ददानि
3 Varāha P. reads the b. p. as वा यातु नः पार्श्वमस्मै
4 I. O. and Varāha P. प्रयच्छथ
5 Corrected from Varāha P. I. O. and A यातु तिष्ठतु चालये for the b. p.
6 Varāha P. यत्र
7 I. O. and Varāha P. रमतां
8 Varāha P. धीरो
9 I. O. महातत्र
10 Varāha P. reads the b. p. as गोलोकेषु समाहितः

अर्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽर्चितानि घृतानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । हपुराणोक्त-घृतदानफलप्राप्तिकामोऽहमेतानि घृतानि ददानि । स्वस्त्यादिस्वीकारान्तं वत् ।

नन्दिपुराणे :—

ये च क्षीरं प्रयच्छन्ति घृतं मधु गुडं दधि ।

ब्राह्मणेभ्यः प्रयत्नेन शुद्धेभ्यस्तु सुसंस्कृतम् ॥१२॥

सम्प्रदानबहुत्वं दातृबहुत्वापेक्षया[1], शुद्धेभ्यो जन्मविद्यासंस्कारसम्पन्नेभ्यः, सुसंस्कृतमप-केशकीटादिकं सुरभि च ।

चक्रवाकप्रयुक्तैस्तु विमानैश्च[2] हिरण्मयैः ।

यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥१३॥

अर्चिताय ब्राह्मणायार्चितमुत्कृष्टं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दि-णोक्त-घृतदानफलप्राप्तिकामोऽहमेतद् घृतं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[3]विष्णुधर्मे :—

लवणस्य प्रदातारस्तिलानां [4]सर्पिषान्तथा ।

तेजस्विनोऽभिजायन्ते भोगिनश्चिरजीविनः ॥१४॥

अर्चिताय ब्राह्मणायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्त-सर्पि-फलप्राप्तिकामोऽहमेतत् सर्पिर्ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे घृतदानावर्तः ।

---

1 I. O. दातृबहुत्वापेक्षं
2 A विमानैस्तु
3 A विष्णुपुराणे, though it reads विष्णुधर्मोक्त three lines below
4 A सर्पिषस्तथा

अथ विष्णुदैवतदधिदानावर्तः। (२०)

वराहपुराणे (२०६।१८ख-२२) चित्रगुप्तवाक्ये :—

दधि क्षीरं घृतञ्चैव येन दत्तं द्विजातिषु।
एष [1][आयातु नः पार्श्वे अस्मिन्] पूजां प्रयच्छथ ॥१॥
नीयतां नीयतां शीघ्रं [यत्र यत्र न चालयेत्][2]।
गोरसस्य तु पूर्णानि भाजनानि सहस्रशः ॥२॥
[3]तत्र दत्त्वा च पीत्वा च बान्धवेभ्यो विभागशः।
ततः पश्चादयं यातु यत्र लोकोऽनसूयकः ॥३॥
तत्रैव वसतां[4] वीरो[5] बहुवर्षशतान्यपि[6]।
बहुसुन्दरनारीभिः सेव्यमानो महातपाः।
अमराढ्यो भवेत्तत्र [गोलोके सुसमाहितः][7] ॥४॥

अत्र यजमानोऽर्च्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽर्च्चितानि दधीनि दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यं वराहपुराणोक्त-दधिदानफलप्राप्तिकामोऽहमेतानि दधीनि ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दधीदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिदं[8] काञ्चनं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा दधि स्पृशेयुः।

नन्दिपुराणे :—

ये च क्षीरं प्रयच्छन्ति घृतं मधु गुडं दधि।
ब्राह्मणेभ्यः प्रयत्नेन शुद्धेभ्यस्तु सुसंस्कृतम् ॥५॥

---

1 Varāha P. वा यातु नः पार्श्वमस्मै for the b. p.
2 Corrected from Varāha P. I. O. and A यातु तिष्ठतु चाक्षये for the b. p.
3 Varāha P. यत्र
4 I. O. and Varāha P. रमतां
5 Varāha P. धीरो
6 I. O. and Varāha P. ०शतान्यथ
7 Varāha P. गोलोकेषु समाहितः for the b. p.
8 I. O. दक्षिणामेतत्

चक्रवाकप्रयुक्तैस्तु विमानैश्च हिरण्मयैः ।
यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥६॥

सम्प्रदानबहुत्वं दातृबहुत्वापेक्षम् । अर्चिताय जन्मविद्यासंस्कारसम्पन्नाय [1]ब्राह्मणायार्चितमपनीतकेशकीटादिकं[2] दधि दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं नन्दिपुराणोक्तदधिदानफलप्राप्तिकामोऽहमेतद्दधि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दधीदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । [तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा दधि स्पृशेत् ।

विष्णुधर्मोत्तरे (३।२०६।६५ख)][3] :—

तथा दध्नः प्रदानेन मङ्गलान्याप्नुते सदा ॥७॥

अर्चिताय ब्राह्मणायार्चितं दधि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तदधिदानफलप्राप्तिकामोऽहमेतद्दधि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे दधिदानावर्तः ।

---

1 A omits ब्राह्मणाय
2 A ०कीटादिरहितं
3 A omits the bracketed portion

अथ विष्णुदैवतक्षीरदानावर्तः। (२१)

वराहपुराणे (२०६।१८ख-२२) चित्रगुप्तवाक्ये :—

दधि क्षीरं घृतञ्चैव येन दत्तं द्विजातिषु।
एष [आयातु नः पार्श्वे अस्मिन्][1] पूजां प्रयच्छथ ॥१॥
नीयतां नीयतां शीघ्रं [यत्र यत्र न चालयेत्][2]।
गोरसस्य तु पूर्णानि भाजनानि सहस्रशः ॥२॥
[3]तत्र दत्त्वा च पीत्वा च बान्धवेभ्यो विभागशः।
ततः पश्चादयं यातु यत्र लोकोऽनसूयकः ॥३॥
तत्रैव वसतां[4] वीरो[5] बहुवर्षशतान्ययम्।
बहुसुन्दरीनारीभिः सेव्यमानो महातपाः।
अमराख्यो भवेत्तत्र [गोलोके सुसमाहितः][6] ॥४॥

अत्र यजमानोऽर्चितेभ्यो ब्राह्मणेभ्योऽर्चितानि क्षीराणि दद्यात्। ॐ अद्यामुक-सगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं वराहपुराणोक्त-क्षीरदानफलप्राप्तिकामोऽहमेतानि क्षीराणि ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा क्षीरमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा क्षीरं स्पृशेयुः।

नन्दिपुराणे :—

ये च क्षीरं प्रयच्छन्ति घृतं मधु गुडं दधि।
ब्राह्मणेभ्यः प्रयत्नेन शुद्धेभ्यस्तु सुसंस्कृतम् ॥५॥

---

1 Varāha P. reads the b. p. as वा यातु नः पार्श्वमस्मै

2 Corrected from Varāha P. I. O. यातु तिष्ठतु चालयम् for the b. p.

3 Varāha P. यत्र

4 I. O. and Varāha P. रमतां

5 Varāha P. धीरो

6 Varāha P. reads the b. p. as गोलोकेषु समाहितः

चक्रवाकप्रयुक्तैश्च विमानैश्च हिरण्मयैः ।

यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥६॥

ाम्प्रदानबहुत्वं दातृबहुत्वापेक्षया । अर्चिताय जन्मविद्यासंस्कारशालिने ब्राह्मणायार्चित-
ातकेशकीटादिकं क्षीरं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुक-
ाणे तुभ्यं नन्दिपुराणोक्त-क्षीरदानफलप्राप्तिकामोऽहमेतत क्षीरं ददानि । स्वस्त्यादि-
रान्तं पूर्ववत् ।

[1][विष्णुधर्मोत्तरे (३।३०६।६६क) :—

क्षीरदस्तृप्तिमाप्नोति सर्वदुःखैर्विमुच्यते ॥७॥

प्रर्चिताय ब्राह्मणायार्चितं क्षीरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-
नफलप्राप्तिकामोऽहमेतत् क्षीरं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे क्षीरदानावर्तः ।

---

1 A' omits the bracketed portion

अथ सोमदैवतेक्षुरसदानावर्तः। (२२)

सम्वर्तः :—

गुडमिक्षुरसञ्चैव लवणं व्यञ्जनानि च।

सुरभीणि च पानानि दत्त्वात्यन्तं[1] सुखी भवेत् ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं गुडं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्तसुखप्राप्तिकामोऽहमेतं गुडं ददानि। [प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गुडोऽयं सोमदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि।][2] प्रतिग्रहीता स्वस्तीत्युक्त्वा गुडं स्पृशेत्। [3]इक्षुरसदानवाक्ये तु गुडपदस्थाने इक्षुरसपदनिवेशो विशेषः।

नन्दिपुराणे :—

ये च क्षीरं प्रयच्छन्ति घृतं मधु गुडं दधि।

ब्राह्मणेभ्यः प्रयत्नेन शुद्धेभ्यस्तु सुसंस्कृतम् ॥२॥

चक्रवाकप्रयुक्तैस्तु विमानैश्च हिरण्मयैः।

यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥३॥

अर्चिताय विद्यातपःसम्पन्नाय ब्राह्मणाय यथाक्रमर्चितं गुडम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नन्दिपुराणोक्तगुडदानफलप्राप्तिकामोऽहमेतं गुडं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१४।१४क) :—

[4]सिकतादस्तथा तपः[5] ॥४॥

[6]प्राप्नोतीति शेषः। [सिकता शर्करा।][7] [8][अर्चिताय ब्राह्मणायार्चितां शर्कराम्[9]

---

1 A दत्त्वात्यर्थं

2 I. O. reads the bracketed portion twice

3 I. O. इक्षुरसदाने तु वाक्ये

4 A सितादस्तथा

5 V. D. श्रियम्. A omits it

6 I. O. प्राप्नोति

7 I. O. omits the bracketed portion

8 A omits the bracketed portion

9 I. O. ०अर्चितं शर्करा

ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। तपःप्राप्तिकामोऽहमेतां सिकतां ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (३।३१४।१२ख) :—

खण्डप्रदश्च सौभाग्यम् ॥५॥

प्राप्नोतीति शेषः।] अर्चिताय ब्राह्मणायार्चितं खण्डम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतत्खण्डं[1] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [2]ऐक्षवदानावर्तः।

---

1 A मेतं मीतां   2 I. O. ऐक्षदानावर्तः

अथ विष्णुदैवतपानकदानावर्तः । (२३)

सम्वर्तः :—

गुडमिक्षुरसश्चैव लवणं व्यञ्जनानि च ।

सुरभीणि च पानानि दत्त्वात्यन्तं[1] सुखी भवेत् ॥१॥

पानानि पानकानि । सुरभीणि सुगन्धिद्रव्यसंयुतानि[2] । अत्र यजमानो[3][ऽर्चिता ब्राह्मणाया]-र्चितानि सुरभिपानकानि दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे[4][तुभ्यमत्यन्तसुखप्राप्तिकामोऽहमेतानि सुरभीणि पानानि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पानानीमानि विष्णुदैवतानि इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं]तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि प्रतिग्रहीता स्वस्तीत्युक्त्वा पानकं स्पृशेत् ।

महाभारते (अनु—५७।२०ख) :—

अन्नपानप्रदानेन तृप्यन्ते कामभोगतः ॥२॥

पानं पानकम् । अर्चिताय ब्राह्मणायार्चितं पानकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् कामभोगतृप्ति[5]-प्राप्तिकामोऽहमेतत् पानकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३१५।६) :—

पानकानि सुगन्धीनि शीतलानि प्रयच्छतः[6] ।

सर्वकामसमृद्धिः स्यान्नात्र कार्य्या विचारणा ॥३॥

सुगन्धीनि सुगन्धिद्रव्यसंयुतानि[7] । अर्चिताय ब्राह्मणायार्चितानि [8]सुगन्धिशीतलपान

---

1 A दत्त्वात्यर्थं

2 A सुगन्धद्रव्ययुतानि

3 A omits the bracketed portion

4 A omits the bracketed portion

5 A omits तृप्ति

6 A प्रयच्छतः

7 A सुगन्धिद्रव्ययुतानि

8 I. O. सुशीतल०

कानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुककामोऽहमेतानि [1]सुगन्धिशीतलपानकानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१५।८ख) :—

वारुणं लोकमाप्नोति तथा पानप्रदो नरः ॥८॥

अर्चिताय ब्राह्मणायार्चितं पानकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वारुण-लोकप्राप्तिकामोऽहमेतत् पानकं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्वल्लालसेनदेवविरचिते श्रीदानसागरे पानकदानावर्तः।

---

1 A सुगन्धीनि

अथ वनस्पतिदैवत-[1]फलदानावर्तः। (२४)

[2]संवर्तः :—

फलमूलानि पानानि शाकानि विविधानि च।
[3]पानानि दत्त्वा विप्रेभ्यो मुदा युक्तः सदा भवेत् ॥१॥

अत्र यजमानोऽर्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽर्चितानि विविधानि फलानि दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं सम्वर्तोक्तफलप्राप्तिकामोऽहमेतानि फलानि ददानि। [4][प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा फलानि वनस्पतिदैवतानि इत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः। ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिदं काञ्चनं ददानि।] प्रतिग्रहीतारः स्वस्तीत्युक्त्वा फलानि स्पृशेयुः।

स्कन्दपुराणे :—

फलानि यः प्रयच्छेत ब्राह्मणेभ्यः समाहितः।
[5]फलानां तत्र भोगी स्याद्रूपेण सुभगश्च ह ॥२॥

अर्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्योऽर्चितानि फलानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्तफलदानप्राप्तिकामोऽहमेतानि फलानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[6]ब्रह्मपुराणे :—

ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च।
हंसयुक्तैर्विमानैस्तु यान्ति धर्मपुरं नराः ॥३॥

अत्र पुष्पाणि चेति समुच्चये चकारः। पुष्पदानेऽपीदं फलमित्यर्थः[7]। अर्चिताय ब्राह्मणायार्चितानि फलानि यथेच्छं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [8]ब्रह्मपुराणोक्तफलदानप्राप्तिकामोऽहमेतानि फलानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A °पानकदानावर्तः
2 A and I. O. omit संवर्तः, which is supplied from the following explanatory note
3 A यानानानि दत्त्वा विप्रेभ्यो
4 I. O. omits the bracketed portion
5 A स तु भागी परत्र स्याद्°
6 I. O. ब्राह्मपुराणे
7 I. O. फलमित्यादेः
8 I. O. ब्राह्म°

वराहपुराणे (२०७।५४ख) :—

फलैस्तु लभते पुत्रम् ॥४॥

दत्तैरिति शेषः। अर्चिताय ब्राह्मणायार्चितानि फलानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुत्रप्राप्तिकामोऽहमेतानि फलानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु—५७।२६ख) :—

लभते च शिवं स्थानं फलपुष्पप्रदो नरः ॥५॥

अत्र फलपुष्पप्रद[1] इति क्रियापेक्षया इतरेतरयोगे द्वन्द्वः। अर्चिताय ब्राह्मणायार्चितमुत्कृष्टं फलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शिवस्थानप्राप्तिकामोऽहमेतत् फलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१६।२२) :—

बाले क्रीडनकं दत्त्वा मिष्टमन्नं तथैव च।
फलं मनोहरञ्चापि अग्निष्टोमफलं लभेत् ॥६॥

अर्चिताय वटवेऽर्चितान्यभीष्टानि फलानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अग्निष्टोमफलप्राप्तिकामोऽहमेतानि फलानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।२३क) :—

दत्त्वा पूगफलं विप्राः सफलां विन्दते क्रियाम् ॥७॥

विप्रा[2] इति सम्बोधनम्। अर्चिताय ब्राह्मणायार्चितं गुवाकफलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त[3]-पूगफलदानफलप्राप्तिकामोऽहमेतत पूगफलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१४।११क) :—

इक्षुमृद्वीकयोर्दानात् परं सौभाग्यमाप्नुयात् ॥८॥

मृद्वीका द्राक्षा। अर्चिताय ब्राह्मणायार्चितां मृद्वीकाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। परमसौभाग्यप्राप्तिकामोऽहमेतां मृद्वीकां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. omits प्रद
2 A and I. O. विप्र
3 A and I. O. विष्णुधर्मोक्त

[1] [तथा :—

फलानाञ्च तथा दानं कृष्णपक्षे महाफलम् ॥६॥

अभीष्टमासिक-कृष्णपक्षसम्बन्ध्यभिमततिथौ ब्राह्मणायार्चितायार्चितानि फलानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाफलप्राप्तिकामोऽहमेतानि फलानि ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।]

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे फलदानावर्तः।

---

1 A omits the bracketed portion

अथ विष्णुदैवतमधुदानावर्तः । (२५)

यमः :—

गन्धौषधमथाभ्यङ्गं माक्षिकं लवणं तथा ।

यः प्रयच्छति विप्राय सौभाग्यं स तु विन्दति ॥१॥

माक्षिकं मधु । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं मधु दद्यात् । ॐ अद्या-मुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सौभाग्यप्राप्तिकामोऽहमेतन्माक्षिकं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा माक्षिकमिदं विष्णुदैवतमित्युक्त्वा यथा-शाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा मधु स्पृशेत् ।

विष्णुः :—

मधुघृततैलदानेनारोग्यम् ॥२॥

अर्चिताय ब्राह्मणायार्चितं मधु ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आरोग्यप्राप्ति-कामोऽहमेतन्मधु ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

नन्दिपुराणे :—

ये च क्षीरं प्रयच्छन्ति घृतं मधु गुडं दधि ।

ब्राह्मणेभ्यः प्रयत्नेन शुद्धेभ्यस्तु सुसंस्कृतम् ॥३॥

चक्रवाकप्रयुक्तैस्तु विमानैश्च[1] हिरण्मयैः ।

यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥४॥

दातृबहुत्वापेक्षया संप्रदानबहुत्वम् । अर्चिताय जन्मसंस्कारविद्याशालिने ब्राह्मणाया-पनीतकेशकीटादिकमर्चितं मधु ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्त-मधुदानफलप्राप्तिकामोऽहमेतन्मधु ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[2][विष्णुधर्मोत्तरे (३।३१४।१२ख) :—

सर्वान् कामान् मधुप्रदः ॥५॥

---

1 A विमानैस्तु

2 A omits the bracketed portion

प्राप्नोतीति शेषः। अर्चिताय ब्राह्मणाय मधु अर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुककामोऽहमेतन्मधु ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।] अत्र [काम्योत्कर्षे देयोत्कर्षः करणीयः][1]।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे मधुदानावर्तः।

1 A काम्योत्कर्षा श्रेयोतकष: for the b. p.

अथ विष्णुदैवताभ्यङ्गदानावर्तः । (२६)

सम्वर्तः :—

तैलमामलकं यच्छन् पादाभ्यङ्गं तथैव च ।

[1]नरः सुहृष्टस्तेजस्वी सुखवांश्चैव जायते ॥१॥

अत्र यजमानः पादाभ्यङ्गार्थं तैलं घृतमर्चितमर्चिताय ब्राह्मणाय दद्यात् । ॐ अद्यामुकसगोत्रायामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सम्वर्तोक्तपादाभ्यङ्गदानफलप्राप्तिकामोऽहमेतं पादाभ्यङ्गं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अभ्यङ्गोऽयं विष्णुदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [2]अभ्यङ्गार्थद्रव्यं स्पृशेत् ।

यमः :—

गन्धौषधमथाभ्यङ्गं माक्षिकं लवणं तथा ।

यः प्रयच्छति विप्राय सौभाग्यं स तु विन्दति ॥२॥

अभ्यङ्गार्थं तैलं घृतं वार्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सौभाग्यप्राप्तिकामोऽहमेतदभ्यङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[3]ब्रह्मपुराणे :—

पादाभ्यङ्गं शिरोऽभ्यङ्गं स्नानपादोदकं तथा ।

ये प्रयच्छन्ति विप्रेभ्यस्ते यान्त्याश्चर्यमालयम् ॥३॥

विप्रेभ्य इति बहुत्वं दातृबहुत्वापेक्षम् । पादाभ्यङ्गार्थं तैलं घृतं वार्चितमर्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [4]ब्रह्मपुराणोक्तपादाभ्यङ्गदानफलप्राप्तिकामोऽहमेतं [5][पादाभ्यङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । शिरोऽभ्यङ्गदाने ब्रह्मपुराणोक्तशिरोऽभ्यङ्गदानफलप्राप्तिकामोऽहमेतं] शिरोऽभ्यङ्गमिति विशेषः ।

---

1 I. O. नमः

2 A अभ्यङ्गार्थं द्रव्यं

3 I. O. ब्राह्मपुराणे

4 I. O. ब्राह्मपुराणोक्त०

5 I. O. omits the bracketed portion

नन्दिपुराणे :—

पादाभ्यङ्गन्तु यो दद्यात् पान्थाय परिखेदिने ।

स [1]शुभाभरणैः पादैर्बन्दिभिर्नित्यवन्दितः ।

भवेन्नृपो महाभागो मण्डले दशयोजने ॥४॥

पादाभ्यङ्गं पादाभ्यङ्गार्थं तैलादि । गृहीतोदपूर्णपात्र उदङ्मुखो खिन्नाय पथिकब्राह्मणाय [2]पादाभ्यङ्गार्थं यथेच्छं तैलादिकं सङ्कल्प्य दद्यात् । ॐ नन्दिपुराणोक्तपादाभ्यङ्गदान-फलप्राप्तिकामोऽहमेतं पादाभ्यङ्गं ददानि । ततस्तथाभूतब्राह्मणप्राप्तौ दद्यात् ।

विष्णुधर्मोत्तरे (३।३११।१२ख) :—

रोगनाशमवाप्नोति तथाभ्यङ्गप्रदः सदा[3] ॥५॥

सदेत्यनेकदा । ब्राह्मणायार्चिताय पादाभ्यङ्गार्थं तैलं घृतं वार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । रोगनाशप्राप्तिकामोऽहमेतदभ्यङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरेऽभ्यङ्गदानावर्तः ।

---

1 I. O. शुभातरणैः

2 I. O. दीयाभ्यङ्गार्थं

3 I. O. ०स्तथा

अथ गन्धर्वदैवतगन्धदानावर्तः । (२७)

ब्रह्मपुराणे :—

सुगन्धागुरुकर्पूरपुष्पधूपान्[1] द्विजोत्तमाः ।

प्रयच्छन्ति द्विजातिभ्यो भक्त्या परमयाश्रिताः ॥१॥

सुगन्धमनेकसुरभिद्रव्ययोगरूपम् । द्विजोत्तमा इति सम्बोधनम् । द्विजातिभ्य इति [2]बहुवचनं दातृबहुत्वापेक्षम् ।

ते सुगन्धाः सुवेशाश्च सुप्रभाः स्रग्विभूषिताः ।

यान्ति धर्मपुरं यानैर्विचित्रैरभ्यलङ्कृताः ॥२॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं गन्धम् ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं ब्रह्मपुराणोक्तसुगन्धदानफलप्राप्तिकामोऽहमेतत् सुगन्धं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा सुगन्धमिदं गन्धर्वदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा सुगन्धं स्पृशेत् । अगुरुदाने तु ब्रह्मपुराणोक्तागुरुदानफलप्राप्तिकामोऽहमेतदगुरु [कर्पूरदाने ब्रह्मपुराणोक्त][3]-कर्पूरदानफलप्राप्तिकामोऽहमेतत् कर्पूरमिति च विशेषः ।

मार्कण्डेयपुराणे (१०।५७क) :—

शीतं [4]जयन्तोन्धनदास्तापं चन्दनदायिनः ॥३॥

ब्राह्मणायार्चिताय चन्दनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । तापजयकामोऽहमेतच्चन्दनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत ।

महाभारते (अनु—५७।३८) :—

[5]स्रग्गन्धधूपान्यनुलेपनानि स्नानानि माल्यानि च मानवो यः[6] ।

दद्याद्द्विजेभ्यः स भवेदरोग-[7]स्तथाभिरूपश्च [8]नरेन्द्रलोके ॥४॥

---

1 I. O. ०कर्पूरं पुष्पधूमान्

2 A दातृबहुत्वापेक्षया बहुवचनं

3 A omits the bracketed portion

4 Mārkaṇḍeya P. जयन्ति धनदा०

5 A सुगन्ध०

6 I. O. वः

7 I. O. ०स्तथा

8 A चन्द्रलोके

सम्प्रदान-[बहुत्वं देय][1]-बहुत्वापेक्षम् । ब्राह्मणायार्चिताय यथेच्छं चन्दनादिगन्धद्रव्यमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तगन्धदानफलप्राप्तिकामोऽहमेतद् गन्धद्रव्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मे :—

गन्धमाल्यप्रदानेन तुष्टिर्भवति निश्चला ॥५॥

ब्राह्मणायार्चिताय कुङ्कुमचन्दनागुरुकर्पूरकस्तूरीजाती-[2]फलानामन्यतममर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । निश्चलतुष्टिकामोऽहमेतं गन्धं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३११।१६क) :—

नरश्चन्दनदानेन सर्वपापैः प्रमुच्यते ॥६॥

ब्राह्मणायार्चिताय यथेष्टं चन्दनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सर्वपापप्रमोचनफलप्राप्तिकामोऽहमेतच्चन्दनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।१६ख) :—

तथैवागुरुदानेन यशसा[तु विराजते][3] ॥७॥

ब्राह्मणायार्चितायार्चितमगुरु ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तागुरुदानफलप्राप्तिकामोऽहमेतदगुरु ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।२०क) :—

सौभाग्यकारकं प्रोक्तं प्रदानं कुङ्कुमस्य तु ॥८॥

ब्राह्मणायार्चितायार्चितं कुङ्कुमम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सौभाग्यप्राप्तिकामोऽहमेतत् कुङ्कुमं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।२०ख) :—

तथा कर्पूरदानेन सर्वान् कामानवाप्नुयात् ॥९॥

ब्राह्मणायार्चिताय कर्पूरमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [4]अमुकप्राप्ति-

1 I. O. omits the bracketed portion
2 A फलान्यतम०
3 A तु विवर्धते and V. D. सुविराजते for the b. p.
4 I. O. अमुककामो०

कामोऽहमेतत् कर्पूरं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अत्र [1]काम्योत्कर्षाद्देयोत्कर्षः कर्तव्यः ।

तथा (३।३११।२१क) :—

[2]मृगदर्पप्रदानेन यशसा तु विराजते[3] ॥१०॥

ब्राह्मणायार्चितायार्चितां कस्तूरिकाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तमृगदर्पदानफलप्राप्तिकामोऽहमेतं मृगदर्पं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।२१ख) :—

दत्त्वा जातीफलं विप्राः सफलां विन्दते क्रियाम् ॥११॥

विप्रा इति सम्बोधनम् । ब्राह्मणायार्चिताय जातीफलमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तजातीफलदान[4]-फलप्राप्तिकामोऽहमेतज्जातीफलं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।१३ख) :—

स्नानीयानि सुगन्धानि[5] दत्त्वा सौभाग्यमश्नुते ॥१२॥

ब्राह्मणायार्चिताय सुगन्धानि स्नानोचितद्रव्याण्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सौभाग्यप्राप्तिकामोऽहमेतानि सुगन्धीनि स्नानीयानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे गन्धदानावर्तः ।

---

1 A काम्योत्कर्षापेक्षया देयोत्कर्षः
2 V. D. reads the entire line as मृगधर्मप्रदानेन यशसा भुवि राजते
3 A विवर्धते
4 A ०जन्य०
5 A and V. D. सुगन्धीनि

अथ गन्धर्वदैवतधूपदानावर्तः । (२८)

विष्णुः :—

धूपप्रदानेनोर्द्ध्वगतिर्भवति ॥१॥

धूपप्रदानेन धूपोपयुक्तसुरभिद्रव्यदानेनेत्यर्थः । अत्र यजमानोऽर्चिताय ब्राह्मणाय गन्धशास्त्रोक्त-सुगन्धिचूर्णरूपं सुगन्धिवर्तिरूपं यथेच्छं धूपमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यम् ऊर्द्ध्वगतिप्राप्तिकामोऽहमेतं[1] धूपं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा धूपोऽयं गन्धर्वदैवत इत्युक्त्वा यथाशक्ति कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा धूपं स्पृशेत् । [2]ततस्तेन धूपेन ब्राह्मणमुपधूपयेत् ।

ब्रह्मपुराणे :—

सुगन्धागुरुकर्पूरपुष्पधूपान् द्विजोत्तमाः ।
प्रयच्छन्ति द्विजातिभ्यो भक्त्या परमयाश्रिताः ॥२॥
ते सुगन्धाः सुवेशाश्च सुप्रभाः स्रग्विभूषिताः ।
यान्ति धर्मपुरं यानैर्विचित्रैरभ्यलङ्कृताः ॥३॥

[3]द्विजोत्तमा इति सम्बोधनम् । [4][द्विजातिभ्य इति बहुवचनं दातृबहुत्वापेक्षम् । अर्चिताय ब्राह्मणायार्चितं गन्धशास्त्रोक्तं धूपद्रव्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ब्रह्मपुराणोक्त-धूपदानफलप्राप्तिकामोऽहमेतं धूपं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

नन्दिपुराणे :—

धूपदः सुरभिर्नित्यम् ॥४॥

अर्चिताय ब्राह्मणाय गन्धशास्त्रोक्तं धूपद्रव्यमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् नन्दिपुराणोक्त-[5]धूपदानफलप्राप्तिकामोऽहमेतं धूपं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

महाभारते (अनु—५७।३८) :—

---

1 I. O. एतद्धूपं
2 I. O. ततस्तेन धूपद्रव्येण ब्राह्मणं धूपयेत् for the whole sentence
3 A and I. O. द्विजोत्तम
4 A omits the bracketed portion
5 A omits धूप

[1][स्रग्धूपगन्धान्यनुलेपनानि सुगन्धिमाल्यानि च मानवो यः ।
दद्याद्द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च नरेन्द्रलोके ॥५॥]

द्विजेभ्य इति बहुवचनं देयबहुत्वापेक्षम् । गन्धशास्त्रोक्तधूपद्रव्यमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तधूपदानफलप्राप्तिकामोऽहमेतान् धूपान्[2] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[3][विष्णुधर्मोत्तरे (३।३११।२२) :—

स्नानानां सुखवास्नानां[4] धूपानाञ्च प्रदायकाः ।
लोके प्रयान्ति प्रियतां भवन्ति च सुगन्धिनः ॥६॥

अर्चिताय ब्राह्मणाय गन्धशास्त्रोक्तधूपद्रव्याणि अर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । लोकाधिपत्यसहितसुगन्धित्व[5]-प्राप्तिकामोऽहमेतान् धूपान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे धूपदानावर्तः ।

1 A reads the following for the bracketed portion :—
दत्त्वा द्विजेभ्यो धूपञ्च सुरलोके चिरं वसेत्

2 A एतं धूपं

3 I. O. omits bracketed portion

4 A सुखवासना

5 A °सुगन्धि°

अथ गन्धर्वदैवतानुलेपनदानावर्तः । (२९)

[1]विष्णुः :—

[2]अनुलेपनदानात् कीर्त्तिमान् भवति ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितमनुलेपनं[3] दद्यात् । ॐ अद्यामुकसगोत्रायामुः वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं कीर्त्तिप्राप्तिकामोऽहमेतदनुलेपनं ददानि । प्रति ग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अनुलेपनमिदं गन्धर्वदैवतमित्युक्त्वा यथाशाखं कामस्तुति पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रति ग्रहीता स्वस्तीत्युक्त्वा अनुलेपनं स्पृशेत् ।

याज्ञवल्क्यः (१।२११) :—

गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियां शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२॥

अर्चिताय ब्राह्मणायार्चितमनुलेपनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अत्यन्तसुख प्राप्तिकामोऽहमेतदनुलेपनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

महाभारते (अनु—५७।३८) :—

[4]स्रग्धूपगन्धान्यनुलेपनानि स्नानानि माल्यानि च मानवो यः ।

दद्याद्द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च नरेन्द्रलोके ॥३॥

द्विजेभ्य इति बहुवचनं देयबहुत्वापेक्षम् । अर्चिताय ब्राह्मणायार्चितान्यनुलेपनानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तानुलेपनदानफलप्राप्तिकामोऽहमेतान्यनुलेपनानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[5][विष्णुधर्मोत्तरे (३।३११।१४) :—

अनुलेपनदानेन रूपवानभिजायते ।

कायाग्निदीप्तिं प्राकाश्यं गतिञ्चैव तथोत्तमाम् ॥४॥

---

1 A omits विष्णुः

2 A अनुलेपनदानेन कीर्त्तिमान् भवति द्विजाः

3 I. O. चतुःसमादि for अनुलेपनं

4 A सुगन्धधूपान्यनुलेपनानि

5 A omits the bracketed portion

प्राप्नोतीति शेषः। अत्र फलभूयस्त्वादुत्कृष्टानुलेपनदानम्।] अर्च्चिताय ब्राह्मणायार्च्चितमनुलेपनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तानुलेपनदानफलप्राप्तिकामोऽहमेतदनुलेपनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते

श्रीदानसागरे अनुलेपनदानावर्त्तः।

अथ नानादैवतपुष्पदानावर्त्तः । (३०)

विष्णुः :—

पुष्पदानेन श्रीमान् भवति ॥१॥

अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्च्चितानि पुष्पाणि दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [1]श्रीमत्त्वप्राप्तिकामोऽहमेतानि पुष्पाणि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पुष्पाण्येतानि वनस्पतिदैवतानि इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं [2]तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा पुष्पाणि[3] स्पृशेत् ।

याज्ञवल्क्यः (१।२११) :—

गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियां शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२॥

अर्च्चिताय ब्राह्मणायार्च्चितानि माल्यानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अत्यन्तसुखप्राप्तिकामोऽहमेतानि माल्यानि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा माल्यानि विष्णुदैवतानि इत्युक्त्वा[4] यथाशाखं कामस्तुतिं पठेत् । स्वस्त्यादि[5]-स्वीकारान्तं पूर्ववत्[6] ।

ब्रह्मपुराणे :—

ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च ।
हंसयुक्तैर्विमानैस्ते[7] यान्ति धर्मपुरं नराः ॥३॥

अर्च्चिताय ब्राह्मणायार्च्चितानि सुगन्धिपुष्पाणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।

---

1 A श्रीसत्वप्राप्ति०, I. O. श्रीमत्त्वाप्ति०
2 I. O. omits तुभ्यमहं
3 I. O. omits पुष्पाणि
4 I. O. दद्यात् between इत्युक्त्वा and यथाशाखं
5 I. O. omits स्वस्त्यादि
6 A reads the two sentences प्रतिग्रहीता…पूर्ववत् as follows :—स्वस्तिसावित्रीपाठान्ते माल्यानेतानि विष्णुदैवतानि प्रतिग्रहीतृवाक्यं कामस्तुत्यादिस्वीकारान्तं पूर्ववत्
7 A ०विमानैश्च

ब्रह्मपुराणोक्त-सुरभि-पुष्पदानफलप्राप्तिकामोऽहमेतानि सुरभीणि पुष्पाणि[1] ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा :—

सुगन्धागुरुकर्पूरपुष्पधूपान् द्विजोत्तमाः।
प्रयच्छन्ति द्विजातिभ्यो भक्त्या परमयाश्रिताः ॥४॥

द्विजोत्तमा इति सम्बोधनम्।

ते सुगन्धाः सुवेशाश्च सुप्रभाः स्रग्विभूषिताः।
यान्ति धर्म-[पुरं यानैर्विचित्रैरभ्यलङ्कृताः ॥५॥

द्विजातिभ्य इति दातृबहुत्वापेक्षं बहुवचनम्। अर्चिताय ब्राह्मणायार्चितानि पुष्पाणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्म]-[2]पुराणोक्त-सुगन्धादिफल[3]-पुष्पदानफलप्राप्ति-कामोऽहमेतानि पुष्पाणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

वराहपुराणे (२०७।५४ख) :—

फलैस्तु लभते पुत्रं पुष्पैः सौभाग्यमेव च ॥६॥

ब्राह्मणायार्चितायार्चितानि पुष्पाणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्य-प्राप्तिकामोऽहमेतानि पुष्पाणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

धूपदः सुरभिर्नित्यं पुष्पदः सुभगः सदा।
[4]भवते मानवो नित्यं दशजन्मान्यसंशयम् ॥७॥

अर्चिताय ब्राह्मणायार्चितं पुष्पम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नन्दिपुराणोक्त-पुष्पदानफलप्राप्तिकामोऽहमेतत् पुष्पं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु—५७।२६ख) :—

लभते च [5]शिवं स्थानं फलपुष्पप्रदो नरः ॥८॥

ब्राह्मणायार्चितायार्चितानि[6] पुष्पाणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शिवस्थान-प्राप्तिकामोऽहमेतानि पुष्पाणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A सुरभिपुष्पाणि
2 A omits the bracketed portion
3 A सुगन्धित्वादिफलक०
4 A reads the whole line as 'भवति मानवो धान्यो दशजन्मा नासंशयः'
5 A शिवस्थानं
6 A एतानि for अर्चितानि

तथा (अनु—५७।३८) :—

स्रग्धूपगन्धान्यनुलेपनानि स्नानानि माल्यानि च मानवो यः ।

दद्याद्द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च[1] नरेन्द्रलोके ॥९॥

द्विजेभ्य इति बहुवचनं देयबहुत्वापेक्षम् । अर्चितानि [2]माल्यान्यर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-माल्यदानफलप्राप्तिकामोऽहमेतानि [माल्यानि ददानि][3] । स्वस्तिसावित्रीपाठान्ते[4] माल्यान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यं कामस्तुत्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे :—

पुष्पाणाञ्च सिते पक्षे दानं लक्ष्मीकरं स्मृतम्[5] ॥१०॥

यथेच्छमासशुक्लपक्षे ब्राह्मणायार्चिताय पुष्पाण्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । लक्ष्मीप्राप्तिकामोऽहमेतानि पुष्पाणि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे पुष्पदानावर्तः ।

---

1 I. O. ०स्तथातिरूपश्च

2 A omits माल्यानि

3 I. O. omits the bracketed portion

4 I. O. ०पाठान्ते

5 A तथा

अथ बृहस्पतिदैवतवस्त्रदानावर्तः। (३१)

तत्र वस्त्रदानप्रशंसा।

विष्णुधर्मोत्तरे (३।३१३।११ख—१२क, १३) :—

यथा यथा तु वस्त्रस्य भवतीह[1] महार्घता।
यथा यथा शुभ्रता च तथा [2]पुण्यफलं महत् ॥१॥
सर्वदो[3] वस्त्रदः प्रोक्तो यतः सर्वत्र वस्त्रवान्।
[4]पूजामाप्नोति धर्मज्ञास्तद्धि तस्माद्विशिष्यते ॥२॥

तथा (३।३१३।१४-१५) :—

वस्त्रदः सुचिरं कालं भुक्त्वा देवसुखं दिवि।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥३॥
मानुष्यमासाद्य भवत्यरोगः शौचान्वितः सौख्य-[परो विनीतः][5]।
जनाभिरामश्च तथा सुवेशः पूज्यश्च लोके विदुषां सदैव ॥४॥

तथा (३।३१३।२) :—

वस्त्रदाता सुवेशः स्याद्रूपद्रविणसंयुतः।
युक्तो लावण्य-[6]सौभाग्यैर्विरोगश्च तथा द्विजाः ॥५॥

अथ दानम्।

मनुः (४।२३१क) :—

वासोदश्चन्द्रसालोक्यम्।

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं वस्त्रं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं चन्द्रसालोक्यप्राप्तिकामोऽहमेतद्वासो ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं [7]पठित्वा [8]वास इदं बृहस्पतिदैवतम् इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा [9]वस्त्रं दशाग्रे गृहीत्वा परिदध्यात्।

---

1 I. O. भवतीद
2 I. O. प्रश्नफलं
3 I. O. सवंदा
4 I. O. प्रजा०
5 Corrected from V. D. A' ०परोपविनीतः, I. O. ०परोधिनाथः
6 A' ०सौभाग्यश्च द्विजा तथा
7 I. O. पाठान्ते
8 I. O. वार्स for वास इदं
9 A वस्त्रदशां for वस्त्रं दशाग्रे

सम्वर्तः :—

वस्त्रदाता सुवेशः स्यात् ॥६॥

ब्राह्मणायार्च्चिताय वस्त्रमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सुवेशत्वप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु—६८।३२) :—

वाससां सम्प्रदानेन स्वदारनिरतो नरः।
सुवस्त्रश्च सुवेशश्च भवतीत्यनुशुश्रुम ॥७॥

अत्र वाससामिति बहुवचनश्रवणाद् यथेच्छं बहूनि वस्त्राण्यर्च्चितानि अर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-स्वदारनिरतत्वादिफलकवासोदानफलप्राप्तिकामोऽहमेतानि वासांसि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—२३।६८) :—

वैवाहिकानां द्रव्याणां [1]प्रैष्याणाञ्च युधिष्ठिर।
दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिनः ॥८॥

ब्राह्मणायार्च्चिताय वस्त्रत्रयमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतानि वासांसि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

यस्तु वस्त्रं प्रयच्छेत ब्राह्मणाय महायशाः।
स लोकं प्राप्य वैराजं वर्षकोटिं सुखं वसेत् ॥९॥

अर्च्चिताय ब्राह्मणायार्च्चितमुत्कृष्टवस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-वस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

ब्रह्मपुराणे :—

ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च।
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाप्यलङ्कृताः।
धर्मराजपुरं दिव्यं छन्नैः सौवर्णराजतैः ॥१०॥

अर्च्चितं वस्त्रत्रयमर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्मपुराणोक्त-वस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणि ददानि। [2][स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A पुष्पाणाञ्च

2 A omits the bracketed portion

शिवपुराणे :—

यस्तु वस्त्रं प्रयच्छेत सम्वीतं ब्राह्मणाय च ।
स सोमलोकमाप्नोति क्रीडते कालमक्षयम् ॥११॥

सम्वीतं स्वरूपम् ।] ब्राह्मणायार्चिताय यथाशक्ति सम्वीतं[1] वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ॐ सोमलोकगोचराक्षयकालक्रीडाप्राप्तिकामोऽहमेतत् सम्वीतं[2] वस्त्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

वराहपुराणे (२०७।४६ख) :—

वस्त्रप्रदानेन सुरूपता च [3]धनैश्च पुत्रैश्च वृता[4] भवन्ति ॥१२॥

ब्राह्मणायार्चिताय वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वराहपुराणोक्त-वस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[5]अग्निपुराणे :—

द्विजानां योगिनां ये तु [6]शुभवस्त्रप्रदा नराः ।
वस्त्रगन्धयुतः पन्थास्तेषां सजलशीतलाः ॥१३॥

योगिनामध्यात्मविदां शुभवस्त्रप्रदाः शोभनवस्त्राणां [7]दातारः द्विजानां [8]योगिनामिति बहुवचनं दातृबहुत्वापेक्षम् । शोभनं वस्त्रमर्चितं ब्राह्मणायाध्यात्मविदेऽर्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [9]अग्निपुराणोक्त-शुभवस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत ।

तथा :—

नवं सूक्ष्मं सुविपुलं ये प्रयच्छन्ति कम्बलम् ।
शीतार्दितद्विजेन्द्राय [10]तेषामग्निः सुखप्रदः ॥१४॥

शीतार्दिताय विद्यातपःसम्पन्नायार्चितं कम्बलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [11]अग्निपुराणोक्त-कम्बलदानफलप्राप्तिकामोऽहमेतं कम्बलं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A स्वरूपं, I. O. पुरुषं
2 A एतानि वीतं, I. O. एतत् सर्वं तत्
3 Supplied from Varāha P. There is a lacuna here in both I. O. and A
4 Varāha P. भृता
5 I. O. आग्नेयपुराणे
6 A शुचि०
7 A प्रदातारः
8 I. O. omits योगिनाम्
9 A and I. O. आग्नेय०
10 A तेषामाशु शीतार्दितः
11 A and I. O. आग्नेय०

आदित्यपुराणे :—

[1][वह्निवस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते ॥१५॥]

वह्निवस्त्रप्रदानेन वह्निप्रदानेन[2] वस्त्रप्रदानेन वेत्यर्थः। अत्र फलबाहुल्यादुत्कृष्टवस्त्रदानम्। ब्राह्मणायार्चिताय वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्मलोकप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नरसिंहपुराणे :—

द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः।
[3]श्वेतन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥१६॥

अत्र द्विजेभ्य इति [4]बहुवचनं फलभूयस्त्वात्। [5]यथेच्छबहून् [6]ब्राह्मणान् [7]चन्दनादिना सन्तर्प्य तेभ्यो वस्त्राण्यर्चितानि दद्यात्। अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं नरसिंहपुराणोक्तवस्त्रदानफलप्राप्तिकामोऽह-[8]मेतानि वस्त्राणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

वस्त्रं [9]यश्चार्थिने दद्यात् छत्रञ्चापि यदृच्छया।
स भवेद्धनवान् श्रीमान् बृहस्पतिपुरे वसेत् ॥१७॥

अर्चिताय ब्राह्मणायार्चितं वस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [10][नन्दिपुराणोक्तवस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१३।४क) :—

दत्त्वा कार्पासिकं वस्त्रं स्वर्गलोके महीयते ॥१८॥

ब्राह्मणायार्चितायार्चितं वस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्] सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतत् कार्पासिकं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।४ख) :—

दत्त्वा सरोम तदपि फलं दशगुणं लभेत् ॥१६॥

---

1 I. O. omits the bracketed portion
2 A omits प्रदानेन
3 A श्वेतवर्णं लभेत्
4 I. O. बहुवचनात् फलभूयस्त्वाच
5 I. O. omits यथेच्छ
6 I. O. omits it
7 A काञ्चनादिना
8 A omits मेतानि
9 A यथार्थिने
10 A omits the bracketed portion

सरोम कूलपटीमिति यावत् तदपि कार्पासिकमित्यर्थः। ब्राह्मणायार्चिंतायार्चिंतां कूलपटीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-सरोमवस्त्रदानफलप्राप्ति-कामोऽहमेतत् सरोमवस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।५क) :—

आविकं वसनं दत्त्वा [1]भृगुलोकमवाप्नुयात् ॥२०॥

आविकं मेषलोमभवम्। ब्राह्मणायार्चिंताय मेषलोमभवं [2]वस्त्रमर्चिंतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। भृगुलोकप्राप्तिकामोऽहमेतदाविकं वसनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा वस्त्रप्रकरणे (३।३१३।५ख) :—

छागं दत्त्वा चाङ्गिरसं ॥२१॥

लोकमाप्नुयादित्यनु-[3]षज्यते। ब्राह्मणाय [4]अर्चिंताय छागरोमसम्भवं वस्त्रमर्चिंतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आङ्गिरसलोकप्राप्तिकामोऽहमेतच्छागवस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।५ख) :—

क्षौमं दत्त्वा [5]बृहस्पतेः ॥२२॥

लोकमाप्नुयादित्यनुषज्यते। क्षौमं क्षुमाभवं वस्त्रं [6]क्षुमाजनितवस्त्रम्। ब्राह्मणाया-र्चिंताय क्षौममर्चिंतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। बृहस्पतिलोकप्राप्तिकामोऽह-मेतत् क्षौमं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत।

तथा (३।३१३।६क) :—

वसूनां लोकमाप्नोति कुशकौषेयवाससी ॥२३॥

दत्त्वेत्यनुषज्यते। कौषेयं कोषकारतन्तुभवम्। [7]कुशवस्त्रं प्रसिद्धम्। कौषेय-वस्त्रमर्चिंतं ब्राह्मणायार्चिंताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वसुलोकप्राप्तिकामोऽह-

---

1 I. O. and V. D. भृगूणां लोक-माप्नुयात्

2 A omits वस्त्र

3 A ०षज्यते

4 I. O. omits अर्चिताय

5 I. O. बृहस्पति

6 A क्षुमाजनीतवस्त्रं, I. O. क्षुमा-भवीति

7 A कुशवस्त्रप्रसिद्धं, I. O. कुशवस्त्रम-प्रसिद्धं

मेतत् [1]कौषेयवासो ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। कुशवस्त्रदाने एतत् कुशवस्त्रमिति विशेषः।

तथा वस्त्रप्रकरणे (३।३१३।६ख) :—

कृमिजञ्च तथा दत्त्वा सोमलोके महीयते ॥२४॥

कृमिजं [2]पट्टीयसूत्रभवम्। ब्राह्मणायार्चिताय कृमिजं वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-[3]सोमलोकप्राप्तिकामोऽहमेतत् कृमिजं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।७क) :—

अग्निष्टोममवाप्नोति दत्त्वैव मृगलोमिकम् ॥२५॥

मृगलोमनिर्मितं वस्त्रमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अग्निष्टोमफलप्राप्तिकामोऽहमेतन्मृगलोमिकं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।७ख) :—

दत्त्वा वल्कलजं वासो वसूनां लोकमाप्नुयात् ॥२६॥

वल्कलभवं वासोऽर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वसुलोकप्राप्तिकामोऽहमेतद्वल्कलजं वासो[4] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[5][तथा वस्त्रप्रकरणे (३।३१३।१०क) :—

कुसुम्भरक्तं दत्त्वा तु सौभाग्यं महदाप्नुयात् ॥२७॥

ब्राह्मणायार्चिताय सिन्दूरिकावस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महासौभाग्यप्राप्तिकामोऽहमेतत् कुसुम्भरक्तं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

तथा (३।३१३।१०ख) :—

[6]दानात् कुङ्कुमरक्तस्य लावण्यं [7]महदाप्नुयात् ॥२८॥

---

1 A omits कौषेय, I. O. कौषेयवासोसो
2 I. O. पतनी०
3 A omits सोम
4 A एतत् दुकूलसम्भववस्त्रं
5 A omits the bracketed portion
6 I. O. दिनात्
7 I. O. वहदा०

अर्चिताय ब्राह्मणायार्चितं कुङ्कुमरक्तवस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महालावण्यप्राप्तिकामोऽहमेतत् कुङ्कुमरक्तवस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१३।११क) :—

रक्तैरन्यैरनीलैश्च रक्तं दत्त्वा सुखी भवेत् ॥२६॥

अन्यैः कुसुम्भकुङ्कुमेतरैरित्यर्थः। अनीलैर्नीलीरक्तं विनेत्यर्थः। यथा प्रसिद्धशेफालिकादि-रक्तं वस्त्रमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सुखप्राप्ति-कामोऽहमेतदमुक[1]-द्रव्यरक्तं वस्त्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे वस्त्रदानावर्तः।

---

1 I. O. एतत्कु०

अथ विष्णुदैवतयज्ञोपवीतदानावर्तः ।(३२)

आदित्यपुराणे :—

क्षौमजं वापि कार्पासं पट्टसूत्रमथापि वा ।

दद्याद् यज्ञोपवीतं यो न तं हिंसन्ति राक्षसाः ॥१॥

क्षौमजं क्षुमाभवं कार्पासं कार्पासभवं [1]पट्टसूत्रं पट्टसूत्रमयम् । अत्र यजमानो ब्राह्मणायार्चिताय उक्तयज्ञोपवीतानामन्यतमं यज्ञोपवीतमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमादित्यपुराणोक्त-यज्ञोपवीतदानफलप्राप्तिकामोऽहमेतदमुकयज्ञोपवीतं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यज्ञोपवीतमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यज्ञोप-[2][वीतं स्पृशेत् ।

नन्दिपुराणे :—

यज्ञोपवीत]-दानेन सुरेभ्यो ब्राह्मणाय वा ।

भवेद्विप्रश्चतुर्वेदः शुद्धधीर्नात्र संशयः ॥२॥

ब्राह्मणायार्चिताय यज्ञोपवीतमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्तयज्ञोपवीतदानफलप्राप्तिकामोऽहमेतद्यज्ञोपवीतं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे :—

यज्ञोपवीतदानेन वस्त्रदानफलं लभेत् ॥३॥

ब्राह्मणायार्चिताय यज्ञोपवीतमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वस्त्रदानफलप्राप्तिकामोऽहमेतद्यज्ञोपवीतं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे यज्ञोपवीतदानावर्तः ।

---

1 I. O. omits it

2 A omits the bracketed portion

अथाग्निदैवतसुवर्णदानावर्तः । (३३)

तत्र [1]सुवर्णदाने बृहस्पतिः :—

[2]गृहादिके पुण्यफलं भवेन्मूल्यानुसारतः ।

तस्मात् सर्वप्रदानानां हिरण्य-[3]मधिकं भवेत् ॥१॥

यथा सान्तानिकादीनां हेम्ना सम्पद्यते क्रियाः ।

[4]न तथा गृहदानेन हिरण्यमधिकं ततः ॥२॥

[5]अग्नेरपत्यं प्रथितं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।

तेषामनन्तं फलमश्नुवीत यः काञ्चनं गाश्च महीञ्च दद्यात् ॥३॥

[6]दानबृहस्पतिः :—

सुवर्णदानं गोदानं भूमिदानञ्च वासव ।

[7]एतत् प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥४॥

सम्वर्तः :—

सर्वेषामेव दानानामेकजन्मानुगं[8] फलम् ।

हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥५॥

महाभारते (अनु—८४।२७ख-२८क) :—

दशपूर्वान् दश [9]परांस्तथा सन्तारयन्ति ते ।

सुवर्णं ये [10][प्रयच्छन्तीत्येवं मां [11]पितरोऽब्रुवन्] ॥६॥

तथा :—

[पृथिवीनाञ्च दत्त्वेह][12] यच्चान्यदपि किञ्चन ।

[13]विशिष्यते सुवर्णस्य दानं परमकं विभो ॥७॥

---

1 I. O. सुवर्णदानश्रुतिः

2 I. O. गृहादिकं

3 I. O. ०मधिकस्ततः

4 I. O. तथाच

5 I. O. आग्नेयपत्यं

6 A दाने बृहस्पतिः

7 I. O. एतच्च०

8 I. O. ०जन्मानुगं

9 I. O. ०परान्यां०

10 A प्रयच्छन्ति दुरुषैवं पितरो भ्रुवं for the b. p.

11 I. O. पितरो

12 A पृथिवीं गाश्च सुवर्णञ्च for the b. p.

13 I. O. विशिष्यतु

[1]अजरं पावनञ्चैव सुवर्णममरद्युते ।
प्रयच्छद्विजमुख्येभ्यः पावनं ह्येतदुत्तमम् ॥८॥
सुवर्णमेव [2]सर्वासु दक्षिणासु प्रशस्यते ।
सुवर्णं ये प्रयच्छन्ति [3]सर्वदास्ते [4]भवन्त्युत ॥९॥
[5]अग्निर्हि देवताः सर्वाः सुवर्णञ्च [6]तदात्मकम् ।
तस्मात् सुवर्णं ददता दत्ताः स्युः सर्वदेवताः ॥१०॥
सर्वान् कामान् प्रयच्छन्ति [7][ये प्रयच्छन्ति काञ्चनम् ।
इत्येवं भगवानत्रिः] पितामहसुतोऽब्रवीत् । ॥११॥

[8]नन्दिपुराणे :—

तस्मात् सर्वात्मना पात्रे दद्यात् कनकदक्षिणाम्[9] ।
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे ।
दानार्थमेव [तत् सृष्टम् उत्कृष्टं][10]सर्वसाधकम् ॥१२॥

विष्णुधर्मे :—

सुवर्णं ये प्रयच्छन्ति नराः शुद्धेन चेतसा ।
देवतास्ते प्रयच्छन्ति समस्ता इति नः श्रुतम् ॥१३॥

अथ सुवर्णदानपरिभाषा ।

विष्णुधर्मोत्तरे (३।३१०।११) :—

सकृत्कृष्णलदानेन स्वर्गे वर्षं [11]सुखी भवेत् ।
तथा च पञ्चवर्षाणि स्वर्गे [दत्त्वैव माषकम्][12] ॥१४॥

---

1 A अक्षय पावकञ्चैव
2 A सर्वस्यै
3 A सर्वतास्ते
4 A भवत्युत, I. O. भवन्त्युति
5 I. O. अग्निभिर्देवता:
6 I.O. तथात्मकं
7 A omits the bracketed portion
8 Raghu reads the first two lines as from विष्णुपुराणे in S. T. (pp. 346-7) and M. T. (p. 796)
9 Raghu in M. T. and S. T. कनकमुत्तमम्
10 I. O. उत्कृष्टं तत्परं for the b. p.
11 A वर्ष
12 A दत्त्वैव साधकं for the b. p.

[1]नन्दिपुराणे :—

[प्रमादाद्वस्तु[2] [3]यन्नष्टं तावन्मात्रं नियोजयेत् ।

अन्यथा स्तेययुक्तः स्याद्धेम्न्यदत्ते [4]विनाशिनि ॥१५॥

[5]तद्धेम ब्राह्मणायोत्सृष्टं ब्राह्मणसादकृतं यदि चौरादिना ह्रियते, तदा तावदेव पुनरुत्सृज्य देयमित्यर्थः ।

अथानियतसुवर्णदानम् ।

दानञ्चेदं सर्वकामिकम् ।

तथा च यमः :—

रुक्मदः सर्वमाप्नोति ॥१॥

सर्वं यत् किञ्चित् कामयते तदा तत् प्राप्नोतीत्यर्थः । तथा षोडशवाजिके बहुविधानि सुवर्णदानानि श्रूयन्ते । कालिकापुराणेऽपि घटिताघटितसुवर्णदानानि प्रतिपादितानि ।

तथा च सुवर्णमित्यनुवृत्तौ कालिकापुराणे :—

पूतमेतत् परं नित्यं सुराः कार्येषु नित्यशः ।

धारयन्ति यतः सर्वे अमलार्थं × × ॥२॥

अतः पापानि सर्वाणि पात्रेभ्यो विधिपूर्वकम् ।

दत्तं पुनाति काले च देशे च हरसन्निधौ ॥३॥

श्रूयतां येन रामेण विधिना प्राक् तपोधन ।

प्रदत्तं काञ्चनं पूतं × × महात्मना ॥४॥

सर्वं हेममयं यज्ञमिष्ट्वा विप्राः प्रतर्पिताः ।

हेमैराभरणैः पूज्य दत्तं पलशतं तथा ॥५॥

भूय एव तुलान्तेन स्वमारोप्य प्रयत्नतः ।

हेम द्वितीये पार्श्वे तु द्विजातिभ्यो ददौ स्वयम् ॥६॥

---

1 Raghu विष्णुपुराणे in S. T. (pp. 346-7) and विष्णुपुराणम् in M. T. (p. 796)

2 Raghu in M. T. (p. 796) and S. T. (p. 347) प्रमादतस्तु

3 I. O. तं नष्टं

4 I. O. विनाशिनि

5 Supplied from Raghu who quotes the whole sentence. I. O. omits it.

भूयोऽपि तन्मयान्येव पूर्य पात्राणि तेन च ।
स्वभावादिषु तीर्थेषु ब्राह्मणेभ्यो ददौ तदा ॥७॥
गवां चन्द्रसुवर्णानां विप्रं कृत्वा पृथक् पृथक् ।
सहस्रञ्च सहस्रञ्च सवत्सानां स्वरूपिणाम् ॥८॥
रज्ज्वा कम्बलमाक्रम्य पलान्येकादशैव तु ।
एकस्य तु पृथक्त्वेन दत्तं हेम तु तेन वै ॥९॥
कारयित्वा सुपद्मानि जातरूपमयानि च ।
भ्रमता तीर्थलिङ्गानां मूर्द्धि कृत्वानि (?) तेन वै ॥१०॥

जातरूपमयानि सुवर्णरूपमयानि ।

तन्मयाभरणैः स्रज्शतशोऽथ सहस्रशः ।
सम्पूज्य तर्पिता विप्रा भूयस्तेनैव मानद ॥११॥
प×श्चैव पताकाश्च मालाश्चैव विशेषतः ।
रुद्रादीनां नियुक्ताश्च कारयित्वा गृहे गृहे ॥१२॥
उपवीतञ्च यष्टिञ्च मेखला पादुके तथा ।
लेखनीं मसीपात्रञ्च दत्तं विप्रेषु तेन वै ॥१३॥
भानसोपस्करं कृत्स्नमासनं धाम तन्मयम् ।
द्विजेभ्यश्चैव दत्तानि कारयित्वा सहस्रशः ॥१४॥

भानसोपस्करं रसवत्युपयोगि द्रव्यम् ।

ग्रहाणां देवतानाञ्च कृत्वा रूपाणि भूयसः ।
न्यस्तानि विधिवत् पूज्य द्विजानाञ्चैव मन्दिरे ॥१५॥
काञ्चनीं रोदसीं दृष्ट्वा नगोपरि×स्वस्तिकाम् ।
पुण्योषधिवरैर्युक्तां ददौ विप्रेभ्य एव सः ॥१६॥
एवमाद्यैरनेकैश्च प्रकारैर्यत् कृतं पुरा ।
पापापनुत्तये दत्तं पात्रमासाद्य भूयसः ॥१७॥

अत्र यजमानः पुण्यसमये पुण्यदेशे च महेश्वरसन्निधौ वा ब्राह्मणं विद्यातपःसम्प मभ्यर्च्य तस्मै यथेष्टपरिमाणं सुवर्णमर्चितं दद्यात् । ॐ अद्य श्रीमन्महेश्वरसन्निधौ अमुकगोत्र यामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यममुकफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि प्रतिग्रहीता स्वस्तीत्युक्त्वा सुवर्णं स्पृशेत् । घटितदाने तु अमुकफलप्राप्तिकामोऽमुकरूपमि सुवर्णं ददानीति वाक्ये विशेषः । तत्र यदाकारं सुवर्णं दीयते तदाकारस्य या देवता

परिभाषायामेव ज्ञातव्या। यथा सौवर्णवारिपात्रे वरुणो देवता। सुवर्णपादुकायामुत्तानाङ्गिरो देवता। सुवर्णच्छत्रे प्रजापतिर्देवता। एवमन्यदप्यूहनीयम्।][1] प्रतिमाश्च प्रतिष्ठाप्य [द्विजवेश्मसु स्थाप्याः][2]।

नन्दिपुराणे :—

[कृष्णलाः पञ्चमाषास्तु माषैः षोडशभिः स्मृतम्।][3]
सुवर्णमेकं [4]तद्दाता स्वर्गलोकमवाप्नुयात्॥१८॥

यथोक्तपरिमाणं सुवर्णमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

ब्राह्मणस्य विशुद्धस्य सुवर्णं यः प्रयच्छति।
सुवर्णानां शतं तेन दत्तं भवति निश्चयः॥१६॥

सुवर्णं पञ्चरत्तिकमानेन षोडशमाषकाः। सुवर्णानां शतं दत्तमिति [5][सुवर्णशतदानफलं प्राप्नोतीत्यर्थः। जन्मसंस्कारादिशुद्धायार्चिताय ब्राह्मणाय यथोक्तं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।] सुवर्णशतदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा:—

सुवर्णं यः प्रयच्छेत्तु दरिद्राय द्विजातये।
दशानामश्वमेधानां [6]फलं प्राप्नोति मानवः॥२०॥

दरिद्रं ब्राह्मणमभ्यर्च्य तस्मै यथेच्छपरिमाणमर्चितं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अश्वमेध-[7]दशफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

कूर्मपुराणे :—

[8]हिरण्यगोप्रदानेन निरहङ्कारमाप्नुयात॥२१॥

---

1 A reads प्रसाद॰इति वाक्यविशेषः॥ देवताविष्णुरिति। only for the bracketed portion
2 A संस्थाप्या द्विजवेश्मसु for the b. p.
3 A omits the bracketed portion
4 A यद्दानात् दाता स्वर्गमवाप्नुयात्
5 I. O. omits the bracketed portion
6 A प्राप्नोतीति for फलं प्राप्नोति
7 A omits दश॰
8 I. O. सुवर्ण॰

[1]निरहङ्कारः स्वर्गविशेषः। [[2]अत्र फलोत्कर्षाद्बहुसुवर्णदानम्। अर्चिताय ब्राह्मणायार्चितं यथेच्छबहुपरिमाणं [3]हिरण्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। निरहङ्कारप्राप्तिकामोऽहमेतद्धिरण्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।][4]

ब्रह्मपुराणे :—

सुवर्णं राजतं वापि विद्रुमं मौक्तिकं तथा।
ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ॥२२॥

ब्राह्मणायार्चिताय यथेष्टपरिमाणमर्चितं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ब्रह्मपुराणोक्त-सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्

शिवपुराणे महेश्वर-[5]पुरकथनानुवृत्तौ :—

गोसहस्रप्रदातारो भूमिदातार एव च।
ये सुवर्णप्रदातारस्तथा सर्वप्रियम्बदाः ॥२३॥
[6]ते तत्र गत्वा [7]हृष्टास्तु निवसन्ति यथासुखम्।
कल्पायुतसहस्राणां सहस्राणि चतुर्दश ॥२४॥
विचरित्वा पुरवरं पुनः प्राप्य महीतलम्।
जायन्ते श्रेष्ठवर्णेषु सुखैश्च परमैर्युताः ॥२५॥

सुवर्णमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शिवपुराणोक्तमहेश्वरपुरगमनादिकफल[8]-प्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत् फलबाहुल्याद्देयद्रव्यबाहुल्यं ज्ञेयम्।

तथा :—

सुवर्णदानं[9] यो दद्याद् ब्राह्मणेषु विशेषतः।
रूपवान् [10]शीलसम्पन्नो [11]विद्याभागी भवेन्नरः ॥२६॥

ब्राह्मणेभ्योऽर्चितेभ्यो यथेष्टपरिमाणं सुवर्णमर्चितं दद्यात्। ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं रूप-[12]शीलविद्या-

---

1 I. O. निरहङ्कारं मोक्षदं
2 A omits the line अत्र...दानम्
3 I. O. सुवर्णम्
4 I. O. reads the bracketed portion twice
5 A omits पुर
6 I. O. स
7 A तुष्टास्तु
8 I. O. adds सुवर्णदानफल here
9 A omits दानं
10 A शीत॰
11 A विद्याभोगी
12 A ॰शीत॰

प्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। दक्षिणावाक्ये तु सम्प्रदानबहुत्वं विशेषः।

वराहपुराणे (२०७।२६) यम-[1]गृहानुवृत्तौ :—

तिलान् गाश्च हिरण्यञ्च पृथिवीमपि[2] शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥२७॥

यमगृहं न गच्छन्तीत्यर्थः। ब्राह्मणेभ्य इति बहुवचनं दातृबहुत्वापेक्षम्। ब्राह्मणायार्च्चिताय यथेष्टपरिमाणं सुवर्णमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यम-[3]गृहासर्पणकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आदित्यपुराणे :—

सुवर्णं ये प्रयच्छन्ति यथाशक्त्या न संशयः।
जन्मप्रभृति यत् पापं [4]मातृकं पैतृकं तथा ॥२८॥
[5]सुवर्णदानाद्दारिद्र्यं न पश्यन्ति कदाचन।
मणिमुक्ताप्रवालेन वैदूर्य्येण स्वलङ्कृतः ॥२९॥
गन्धर्वैश्चाप्सरोभिश्च स्तूयमानः समन्ततः।
गच्छते रुद्रलोकन्तु विष्णुलोकं तथैव च ॥३०॥

ब्राह्मणायार्च्चिताय सुवर्णमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्त-जन्मप्रभृत्युपार्जित-पापाभावादिफलक-सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। फलबाहुल्याद्विभवानुरूपं[6] बहुसुवर्णं देयं न तु वित्तशाठ्यं कार्यम्।

तथा सुवर्णदानानुवृत्तौ :—

यद्देवमर्चयत्तेन यस्य चैव प्रयच्छति।
तस्य लोके निवसति नित्यञ्चैव ददाति यः ॥३१॥
नित्यन्तु यजते यज्ञै × × कदाचन।
पुत्रपौत्रैः परिवृतः श्रीयुक्तो जायते नरः ॥३२॥

---

1 A ०पुरा०
2 Varāha P. पृथिवीञ्चापि
3 I. O. ०गृहाणुसर्पण०
4 A मातृजं पैतृजं तथा
5 I. O. सुवर्णदाता दारिद्र्यं
6 A ०व (वि ?) सानुरूपं

ब्राह्मणायार्च्चिताय सुवर्णमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्य-पुराणोक्तसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र नित्यमितिपदश्रवणाद् यथेच्छमावृत्तदानम्।

नरसिंहपुराणे :—

[सुवर्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः ॥३३॥

ब्राह्मणायार्च्चिताय सुवर्णमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नरसिंह-पुराणोक्त-सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आग्नेयपुराणे : —][1]

दश पूर्वान् परांश्चैव प्रोवाचेदं बृहस्पतिः।
सुवर्णं ये प्रयच्छन्ति नराः सन्तारयन्ति ते। ३४॥

ब्राह्मणायार्च्चिताय यथेच्छपरिमाणं सुवर्णमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मदीयपूर्वपर[2]-पुरुषदशकसन्तारणकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। फलबाहुल्याद्देयबाहुल्यमत्र युज्यते।

तथा :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥३५॥
यानमश्वमनड्वाहं हेमरूप्यमणीं[3]-स्तिलान्।
ये प्रयच्छन्ति पापेषु निरताः सर्वदा मुने।
न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥३६॥

अत्रोक्तसमयानामन्यतमे ब्राह्मणायार्च्चिताय यथेच्छपरिमाणमर्च्चितं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्तामुकसमयविहितहेमदानफलप्राप्तिकामोऽहमेतद्धेम ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। सर्वदेतिपददर्शनादतिप्रचुरपापक्षयार्थमिदं[4] दानम्।

तथा :—

शृणु राजन् परं दानं सर्वकिल्विषनाशनम्।
यद्दत्त्वा[5] त्रिविधं पापं सद्यो विलयमेति हि ॥३७॥

---

1 I. O. omits the bracketed portion
2 A ०पूर्वापर०
3 I. O. ०रूप्यगणा०
4 A ०प्रचुरतवापेक्षयामिदं
5 A यत् कृत्वा

विविधं वाङ्मनःकायार्जितम् ।

[1]सुवर्णरोमां [2]सौवर्णी [3]प्रत्यत्तान्तु सुशोभनाम् ।
सुवर्णतिलकोपेतां सर्वालङ्कारशोभिताम् ॥३८॥
सुशोभनां स्वरूपाञ्च [4]सर्वालङ्कारभूषिताम् ।
[5][सर्वालङ्कारभूषितां यथाशक्ति सौवर्णग्रैवेयकपट्टिकाघटिकालङ्कृताम् ।
कौशेयपरिधानां तां दिव्यचन्दनभूषिताम् ॥३९॥]
दिव्यपुष्पोपहाराञ्च सर्वधातुरसैर्युताम् ।
सप्तधान्यसमायुक्तां फलपुष्पवतीं तथा ॥४०॥

कौशेयं [6]कोशकारकर्पटः, दिव्यमुत्तमं[7], सर्वधातु-सर्वरस-सप्तधान्यानि[8] परिभाषोक्तानि ग्राह्याणि ।

शतेन कारयेत्तान्तु सुवर्णस्य प्रयत्नतः ।
यथाशक्त्याथ वा कुर्य्याद्वित्तशाठ्यं विवर्जयेत् ॥४१॥

सुवर्णस्य परिमाणविशेषावच्छिन्नस्य हेम्नः ।

अयने विषुवे चैव ग्रहणे शशिसूर्य्ययोः ।
दुःस्वप्नदर्शने चैव जन्मर्क्षे तिथिसंक्षये ॥४२॥
यदा वा जायते वित्तं वित्तं श्रद्धासमन्वितम् ।
तदैव दानकालः स्याद् यतोऽनित्यं हि जीवितम् ॥४३॥
नद्यास्तीर्थे गृहे वापि यत्र वा रमते मनः ।
तत्र संस्थाप्य देवेशमुमया सह शङ्करम् ॥४४॥
ब्रह्माणं सह गायत्र्या श्रीधरञ्च श्रिया सह ।
रत्या सह तथानङ्गं लोकपालन् ग्रहानपि ॥४५॥
[9]एतान् पूज्य विधानेन गन्धपुष्पविलेपनैः ।
तदग्रे कारयेद्धोमं तिलाज्येन विधानतः ॥४६॥

---

1 I. O. सुव for सुवर्ण०
2 I. O. सौवर्णी
3 A प्रत्यत्तन्तु
4 A सुवर्णालङ्कार०
5 I. O. omits the bracketed portion
6 A काशकारपटः: I. O. कोशकारकर्पटः
7 A उत्कृष्टं
8 A सर्वधातुः सर्वरसं सर्वधान्यानि, I. O. सर्वधातुसप्तरसधान्यानि
9 A ताम् प्रपूज्य

[1]सुसम्पूज्य द्विजान् सम्यक् वस्त्रालङ्कारभूषणैः ।
तल्लिङ्गमन्त्रैर्होमश्च कर्त्तव्यो ज्वलितानले ॥४७॥

[2][अलङ्कारभूषणैरित्यलङ्कारेण भूषणैरलङ्करणैरित्यर्थः ।] तल्लिङ्गमन्त्रैः पूजितदेवता-प्रकाशकमन्त्रैः ।

ततस्ताञ्च प्रतिष्ठाप्य देवानाञ्च तिलोपरि ।
[3]लवणाभिमुखीं कृत्वा मन्त्रेणानेन मन्त्रयेत ॥४८॥

लवणाभिमुखी-[4][मग्रस्थापितपात्रस्थलवणाम् । देवानाञ्चेति देवानामग्रत इत्यर्थः ।

रोम × × सर्वोपकरणैस्तथा ।
जगतः संप्रवृत्तासि त्वामतः] प्रार्थये शिवाम् ॥४९॥
वाङ्मनःकायजनितं [5]यत् किञ्चित् मम दुष्कृतम् ।
तत् सर्वं विलयं [6]यातु [7]मामुद्धरात्मसम्भवे ॥५०॥
एवमुच्चार्य्य तां दद्यात् ब्राह्मणाय कुटुम्बिने ।
नाभिभाषेत तां दत्त्वा न × × वलोकयेत् ॥५१॥
न × × दक्षिणाहीना दातव्या [8]नाविधानतः ।
[9]यथा पुनर्गृहीता स्यात् कुर्य्यान्नान्यस्य सत्तम ॥५२॥

यथान्यस्य पुनर्गृहीता न स्यात्तथा कुर्यात् । प्रतिग्रहीता यथा पुनस्तां नान्यस्मै दद्यात्, तथा [10]तमनुनयेदित्यर्थः ।

पुरा दत्तमिदं दानं गौर्य्या सत्या विधानतः ।
रुक्मिण्या च तथान्यैश्च राजभिः सगरादिभिः ॥५३॥
दानस्यास्य प्रभावेण सुखमत्यन्तमाप्नुयुः[11] ।
अपुत्रो लभते पुत्रमधनो लभते धनम् ।
[12]आरोग्यं चैवमाप्नोति परत्र च शुभां गतिम् ॥५४॥

---

1 A स्वयं पूज्य
2 A omits the bracketed portion
3 I. O. लवणादिमुखी, A लवणाभिमुखी
4 A omits the bracketed portion
5 I. O. किञ्चिन्ममस दुष्कृतं
6 A and I. O. यान्तु
7 I. O. द्वानात् वाम्बुसम्भवे
8 A च विधानतः
9 A दत्त्वा पुनर्गृहीत स्यात०
10 A तमत्यर्थं योजयतीत्यर्थः, I. O. तमत्यन्वयेदित्यर्थः
11 A आप्नुयात्
12 I. O. श्रियं दाराम(न ?)वाप्नोति

अयनादीनामन्यतमे समये नदीतीर्थादीनामन्यतमे देशे चोक्तशङ्करादिदेवानिन्द्रादिलोकपालानादित्यादिग्रहान् प्रतिमासु स्थण्डिले वाऽऽवृतैः पङ्क्तिक्रमेण सप्तविंशतिपुञ्जिकाः कृत्वा तासु क्रमेण पूजयेत्। [1]तद् यथा :—

एत एत उमासहितशङ्कर-गायत्रीसहितब्रह्म-श्रीसहितश्रीधर-रतिसहितानङ्ग इत्यावाह्य शङ्करमारोपयामि उमारोपयामि ब्रह्माणमारोपयामि गायत्रीमारोपयामि श्रीधरमारोपयामि श्रीमारोपयामि अनङ्गमारोपयामि रतिमारोपयामि इत्यारोप्य एत एत लोकपाला इत्यावाह्य इन्द्रमारोपयामि अग्निमारोपयामि यममारोपयामि निर्ऋतिमारोपयामि वरुणमारोपयामि वायुमारोपयामि सोममारोपयामि ईशानमारोपयामि अनन्तमारोपयामि ब्रह्माणमारोपयामि इत्यारोप्य एत एत नवग्रह इत्यावाह्य आदित्यमारोपयामि सोममारोपयामि अङ्गारकमारोपयामि बुधमारोपयामि बृहस्पतिमारोपयामि शुक्रमारोपयामि शनैश्चरमारोपयामि राहुमारोपयामि केतुमारोपयामीत्यारोपयेत्। ततः शङ्कराय उमायै ब्रह्मणे गायत्र्यै श्रीधराय श्रियै अनङ्गाय रत्यै इन्द्राय अग्नये यमाय निर्ऋतये वरुणाय वायवे सोमाय ईशानाय अनन्ताय ब्रह्मणे आदित्याय सोमाय अङ्गारकाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे इति प्रत्येकमुच्चार्य एतत् पाद्यं नम इति क्रमादेकैकशः पाद्यं सर्वेभ्यो दद्यात्। तथैव एषोऽर्घ्यो नमः इत्यर्घ्यम् एतदाचमनीयं नम इत्याचमनीयम् एष गन्धो नम इति गन्धम् [एतत् पुष्पं नम इति पुष्पम्][2] एतद्विलेपनं नम इति विलेपनम्[3] एष धूपो नम इति धूपं एष दीपो नम इति दीपम् एतन्नैवेद्यं नम इति नैवेद्यं प्रत्येकं दद्यात्। ततस्त्रीन् ब्राह्मणान् वस्त्रालङ्काराभ्यां श्रद्धातिशयेन सम्पूज्य पूजितदेवतानामग्रतोऽग्निमुपसमाधाय यथाक्रमं पूजितदेवतानां प्रकाशकैः[4] स्वशाखोक्तैर्मन्त्रैः प्रत्येकमेकैकां घृताक्ततिलाहुतिं दद्यात्। शूद्रो ब्राह्मणद्वारा होमं कारयेत्। मन्त्राश्च शङ्करस्य ऋग्वेदे इमा रुद्रायेति[5], यजुर्वेदे मा नस्तोक इति, सामवेदे आ वो राजानमिति, अथर्ववेदे भवो दिवे भव इति। उमायाः ऋग्वेदे मदभ्युत्तेति[6] सादन इति। यजुर्वेदे अम्बे अम्बिके इति। सामवेदे मदभ्युत्तेति सादन इति। अथर्ववेदे य [7]एवं विदुषेदत्त्वेति। ब्रह्मणो वेदचतुष्टयेऽपि ब्रह्म जज्ञानमिति[8]।

---

1 A omits तद् यथा
2 I. O. omits the bracketed portion
3 I. O. चतुःसमं
4 I. O. प्रत्येकैः
5 A तमो रुद्रादिति
6 A सद्भ्यु त्तेति
7 A एनं विदुषे दत्तेति
8 A यजनमिति. I. O. यज्ञान इति

गायत्र्याः ऋग्वेदे यद्[1]गायत्र्ये अधि गायत्रमिति। यजुर्वेदे अयं पुरो-[2]भुवस्तस्येति। सामवेदे [3]युञ्जे वाचं शतपदीमिति। अथर्ववेदे गायत्री च्छन्दसामभ्यचेति[4]। विष्णोः ऋग्वेदे अतो देवा इति। [5]यजुर्वेदसामवेदयोः इदं विष्णुरिति। अथर्ववेदे उरु विष्णा इति। लक्ष्म्याः ऋग्वेदयजुर्वेदयोः मनसः कामम् आ-[6]कूतिमिति। सामवेदे श्रीरसि मयि रमस्वेति। अथर्ववेदे श्रियं धातरिति[7]। कामदेवस्य ऋग्वेदे कामस्तदग्रे समवर्ततेति[8]। यजुर्वेदे कोदादिति[9]। सामवेदे वेद ते नामेति। अथर्ववेदे [10]कामस्तदग्र इति। रत्याः ऋग्वेदे इच्छन्ति त्वा सोम्यास[11] इति। यजुर्वेदे इह रतिरिति। सामवेदे परि प्रिया दिवस्कविरिति[12]। अथर्ववेदे मूर्द्धानं दिवो अरतिमिति[13]। इन्द्रस्य ऋग्वेदयजुर्वेदयोः त्रातारमिन्द्रमिति[14]। सामवेदे त्वामिद्धि हवामह[15] इति। अथर्ववेदे इन्द्रस्य बाहू इति। अग्नेः ऋग्वेदेऽग्निं दूतं वृणीमह इति। यजुर्वेदे त्वन्नो अग्ने तव देवेति। सामवेदेऽग्निं दूतं वृणीमह इति। अथर्ववेदे अग्नेर्मन्व[16] इति। यमस्य ऋग्वेदे असि यम इति। यजुर्वेदे सुगं नुः पन्थामिति। सामवेदे [17]नाके सुपर्णमिति। अथर्ववेदे [18]यमो नो गातुमिति। निरृतेः ऋग्वेदे वेत्था हि निरृतीनामिति। [यजुर्वेदे असुन्वन्तमयजमानमिति। सामवेदे वेत्था हि निरृतीनामिति। अथर्ववेदे अपेत एत्विति। वरुणस्य ऋग्वेदे वरुणं वो रिशादशमिति। यजुर्वेदे त्वा यामीति। सामवेदे घृतवती भुवनानामिति।][19] अथर्ववेदे उदुत्तमं [20]वरुणेतिपाश इति। वायोः ऋग्वेदे [21]वात आ वात्विति। यजुर्वेदे आनो नियुद्भिरिति। साम-

---

1 I. O. ०गायत्रं अधिगायत्रमिति

2 A भवस्तस्ये

3 A पाश्वरावं गने यदीति

4 A कन्दमध्यच्तेति विशेषः for कन्दसामध्यचाति विणोः

5 A यजुर्वेदः कविस्ते इति for यजुर्वेद...(in the middle) उरु विष्ण इति

6 A ०हूतमिति

7 I. O. धातरिति

8 A कामस्तुत्य

9 I. O. दादिति

10 A कामस्तदग्र, I. O. कामस्तदेकाग्रत

11 A omits म्यास

12 A दिवस्करिति, I. O. दिवः कविरिति

13 A मुद्धानन्दं नोवमिति

14 A त्रतारानिन्द्रमिति, I. O. त्रातारमिन्द्रमिति

15 A त्वामिन्विद्धवाव

16 अग्निर्मन्न

17 I. O. नाकेषु यत्तमिति

18 A यायानामान्त इति

19 A omits the bracketed portion

20 A वरुणपाश

21 A वाश्री धन्निति

वेदे [1]वात आ वात्विति । अथर्ववेदे वायोः सवितुरिति । सोमस्य ऋग्वेदे कुविदङ्ग नमसा ये[2] इति । यजुर्वेदे वयं सोमेति[3] । सामवेदे सोमं राजानं वरुणमिति । अथर्ववेदे[4] सोदक्रामत् सा वनस्पतीनिति । [5][ईशानस्य ऋग्वेदे] ईशाना वार्याणामिति । [यजुर्वेदे तमीशानामिति][6] । [7]सामवेदे आत्वा सोमस्येति । अथर्ववेदे तस्मै सर्वेभ्य ईशानस्येति । अनन्तस्य ऋग्वेदे काद्रिका नाम सर्प इति । यजुर्वेदे[8] [नमोऽस्तु सर्पेभ्य इति । सामवेदे यां सन्ध्यां समधत्तेति । अथर्ववेदे अनन्तं विततमिति । ब्राह्मणः ऋग्वेदे ब्रह्मा देवानामिति । यजुर्वेदे] [आ ब्रह्मन्निति । सामाथर्वणोः ब्रह्म जज्ञानमिति । आदित्यस्य ऋग्वेदयजुर्वेदयोः आ कृष्णेनेति । सामवेदे वयमहाँ असीति । अथर्ववेदे आदित्य नावमिति । सोमस्य][9] ऋग्वेदे आ प्यायस्वेति । यजुर्वेदे इमं देवा इति । सामवेदे आ प्यायस्वेति । अथर्ववेदे यद्राजानमिति । अङ्गारकस्य ऋग् यजुःसामसु अग्निर्मूर्द्धेति । अथर्ववेदे त्वया मन्य इति । बुधस्य ऋग्वेदे अग्ने विवस्वदुषस[10] इति । यजुर्वेदे उद् बुध्यस्वेति । सामवेदे अग्ने विवस्वदुषस इति । अथर्ववेदे दर्शोऽसीति[11] । बृहस्पतेः ऋग्वेदे बृहस्पते परि दीयेति । यजुर्वेदे [बृहस्पते अतियदर्य इति । सामवेदे बृहस्पते परि दीयेति । अथर्ववेदे बृहस्पतिर्न इति । शुक्रस्य ऋग्वेदे शुक्रन्ते अन्यदिति । यजुर्वेदे अन्नात् परिस्रुत इति ।][12] सामवेदे शुक्रन्ते अन्यदिति । अथर्ववेदे येनावपदिति[13] । शनैश्चरस्य ऋग् यजुःसामसु शन्नो देवीरिति । [अथर्ववेदे प्राणाय नम इति ।][14] राहोः ऋग्वेदे कया नश्चित्र इति । यजुर्वेदे काण्डात् काण्डादिति । सामवेदे कया नश्चित्र इति । अथर्ववेदे राहू राजानमिति । केतोः वेदचतुष्टयेऽपि केतुं कृण्वन्निति ।

ततो यथोक्तपरिमाणसुवर्णघटितां मेषीमुक्तोपकरणयुतां पूजितदेवाग्रे तिलोपरि स्थापयित्वा लवणाभिमुखीं कृत्वाभ्यर्च्य ॐ [15]व्योमकृन्मसीत्यादि मन्त्रद्वयं पठित्वा अर्चिताय

1 A वाता आवाद्विति
2 I. O. कविदङ्गनमसा यश्च
3 A सोममिति
4 I. O. adds आत्मा सोमस्येति here
5 A omits the bracketed portion
6 A omits the bracketed portion
7 A सोमस्य वेदे
8 I. O. omits the bracketed portion,
9 A omits the bracketed portion
10 I. O. ०सुद्रषस
11 I. O. दर्शोसीति, A दाश्शेसीति
12 A बृहस्पति पद्य द्रुत for the bracketed portion
13 A परावपमिति
14 A omits the bracketed portion
15 I. O. रोमकृम्मांसेत्यादि

कुटुम्बिने ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ॐ आग्नेयपुराणोक्त-सौवर्णोर्णा[1]-प्रदानफलप्राप्तिकामोऽहमेतां सौवर्णां[2] [3]सौवर्णतिलकोपेतां सर्वालङ्कारभूषितां कौशेयवस्त्र-परीधानां दिव्यचन्दनभूषितां दिव्यपुष्पोपहारां सर्वधातु-सर्वरस-सप्तधान्य[4]-नानाफलपुष्पयुतां तिलोपरिस्थापितां लवणाभिमुखीमूर्णायुन्ददानि[5]। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते ऊर्णायु-रयं[6] वरुणदैवतेति[7] वदेत्[8]। कामस्तुत्यादि पूर्ववत्। [पुच्छग्रहणं स्वीकारः।][9] स्वरूप-मेषीदाने तु वाक्ये[10] सौवर्णामिति पदस्थाने प्रत्यक्षामिति पदनिवेशो विशेषः। ततो दाता प्रतिग्रहीतारं वदेदियं मेषी न विक्रेतव्या [न चान्यस्मै दातव्या][11] भवतेति। ततो दाता तां मेषीं सुप्तान्नावलोकयेत् [न चाह्वयेत्][12]। सुवर्णमेषीदानसमानफलत्वाचास्य स्वरूपमेषी-दानस्यालङ्करणं[13] दक्षिणा च यथाशक्ति बहुसुवर्णं[14] कर्त्तव्ये। सुवर्णमेषीदानसमानप्रचुर-विधित्वेन पशुदानावर्ते लिखनयोग्यस्याप्यस्यात्र लिखनं कृतम्।

महाभारते (अनु—८५।१५४) :—

आदित्योदयसम्प्राप्ते विधिमन्त्रपुरस्कृतम्।
ददाति काञ्चनं यो वै दुःस्वप्नं[15] प्रतिहन्ति सः[16] ॥१॥

विधिमन्त्रपुरस्कृतमिति मन्त्रस्तु :—

हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।
इत्येव जातरूपस्त्वं जातदुःस्वप्ननाशनः[17] ॥२॥

सूर्योदयाव्यवहितपूर्वकाले यथेच्छपरिमाणं [18]काञ्चनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दुःस्वप्नदोषप्रशमनकामोऽहमेतत् [19]काञ्चनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A ०सौवर्णमेषी०
2 A सौवर्णां मेषीं
3 A सुवर्णतिलकेनोपेतां
4 A adds सहितां after सप्तधान्य
5 A लवणाभिमुखीं पूर्णां प्रददानि
6 A उर्णायं
7 I. O. वरुणो देवदेति
8 A वदो, I. O. वदत्
9 A omits the bracketed portion
10 I. O. omits it
11 A reads the bracketed portion after सुप्तान्नावलोकयेत् in the next sentence
12 A omits the bracketed portion
13 A ०दानस्य न सङ्कर
14 I. O. वर्णं for सुवर्णं
15 A दुष्कृतं
16 I. O. नः
17 I. O. reads the entire line as दृश्यैव रूपः। जातदुःस्वप्नदर्शन:
18 I. O. सुवर्ण०
19 I. O. सुवर्णं

तथा सुवर्णदानानुवृत्तौ (अनु—८५।१५५क) :—

दद्यात्युदितमात्रे यः तस्य पाप्मा विधूयते ।

[1][सूर्योदयसमये यथेच्छपरिमाणं सुवर्णमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पापविधूननकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—८५।१५५ख) :—]

मध्याह्ने ददते[2] रुक्मं हन्ति पापमनागतम् ।।३।।

मध्याह्नसमये ब्राह्मणायार्चिताय यथेच्छपरिमाणं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अनागतपापक्षयकामोऽहमेतत् रुक्मं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—८५।१५६क—१५६क) :—

ददाति पश्चिमां सन्ध्यां यः सुवर्णं यतव्रतः[3] ।
ब्रह्मवाय्वग्निसोमानां सालोक्यमुपयाति[4] सः ।।४।।
[5]सेन्द्रेषु चैव लोकेषु प्रतिष्ठां विन्दते[6] शुभाम् ।
इह लोके यशः प्राप्य शान्तपाप्मा च मोदते ।।५।।
ततः सम्पाद्यते[7]ऽन्येषु लोकेष्वप्रतिमः सदा ।
अनावृतगति[8]-श्चैव कामचारी भवत्यतः[9] ।।६।।
न च क्षरति तेभ्यश्च यशश्चैवाप्नुयान्महत् ।

यतव्रतोऽकृताहारः कृतचण्डालपाषण्डालापानृतभाषणादिवर्जननियमः । सायमर्चिताय ब्राह्मणाय यथेच्छं[10] सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तपश्चिमसन्ध्याविहित-सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । फलभूयस्त्वादत्र देयसुवर्णबहुत्वं बोद्धव्यम् ।

तथा (अनु—८५।१५६ख) :—

सुवर्णमक्षयं दत्त्वा लोकानाप्नोति पुष्कलान् ।। ७।।

---

1 A omits the bracketed portion
2 I. O. ददतो
3 A प्रयच्छत:
4 I. O. ॰यान्ति
5 A मन्त्रेषु
6 I. O. विन्दतां
7 I. O. सम्पद्यते
8 A ॰मति॰
9 A भवेन्नृप:
10 A यथेच्छपरिमाणं

अक्षयं रूप्यताम्राद्यसंपृक्तम्[1]। अर्चिताय ब्राह्मणायाक्षयं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुष्कललोकप्राप्तिकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

मनुः (४।२३०ख) :—

दीर्घमायुर्हिरण्यदः ॥८॥

अर्चिताय ब्राह्मणाय अर्चितं यथेच्छपरिमाणं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दीर्घायुष्ट्वप्राप्तिकामोऽहमेतद्धिरण्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

सम्वर्तः :—

हिरण्यदो महावृद्धिं दीर्घमायुश्च विन्दति ॥९॥

अर्चिताय ब्राह्मणाय यथेच्छपरिमाणं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महावृद्धिसहितदीर्घायुष्ट्वप्राप्तिकामोऽहमेतद्धिरण्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र [2]फलोत्कर्षादधिकसुवर्णदानम्।

विष्णुधर्मे यममार्गानुवृत्तौ :—

हिरण्यदाः[3] सुखं यान्ति पुरुषाः स्वभ्यलङ्कृताः[4] ॥१०॥

ब्राह्मणायार्चितायार्चितं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [5]स्वलङ्कारधारणपूर्वकयममार्गसुगमनकामोऽहमेतद्धिरण्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

सुवर्णदानं गोदानं पृथिवीदानमेव च।
एतत् प्रयच्छमानो हि सर्वपापैः प्रमुच्यते ॥११॥

ब्राह्मणायार्चिताय सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपापक्षयकामोऽहमेतत् सुवर्णं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा।
एतत् पवित्रं परममेतत् स्वस्त्ययनं महत् ॥१२॥

---

1 A रूप्यते only, I. O. रूपता-माद्यसंपृक्तम्
2 I. O. कालोत्०
3 I. O. हिरण्यद:
4 A स्वभ्यलङ्कृतं, I. O. स्वस्त्यलङ्कृताः
5 A अलङ्करण for स्वलङ्कारधारण

दशपूर्वान् दशपरान् [वंशानाञ्च विशाम्पते][1] ।

अपि पापशतं कृत्वा दत्त्वा विप्रेषु तारयेत् ॥१३॥

ब्राह्मणेभ्योऽर्चितेभ्यो यथेष्टपरिमाणमर्चितं सुवर्णम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्तपुरुषदशक[2]-तारणादि[3]-फलकसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

सुवर्णदः स्वर्गलोके कामानिष्टानुपाश्नुते ।

विरजो देवसम्वीतः[4] परियाति[5] यतस्ततः ॥१४॥

विमानेनार्कवर्णेन भास्वरेण विराजता ।

अप्सरोगणपूर्णेन भास्वता स्वेन तेजसा ॥१५॥

हंससारसयुक्तेन कामगेन नरोत्तमः ।

दिव्यगन्धवहः स्वर्गे परिगच्छेद् यतस्ततः ॥१६॥

ब्राह्मणायार्चिताय यथेच्छपरिमाणं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोक्त[6]-स्वर्गगोचर--सर्वकामाप्त्यादिफलक--सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । फलबाहुल्याद्देयबाहुल्यम् ।

विष्णुधर्मोत्तरे सुवर्णदानानुवृत्तौ (३।३१०।५ख) :—

दत्त्वा कृष्णलमात्रन्तु नरः पापात् प्रमुच्यते ॥१७॥

[7]प्रचुरदानासामर्थ्ये देयमिदं कृष्णलमात्रम्[8] । सुवर्णमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पापक्षयकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

अथ सुवर्णदानानुवृत्तौ (३।३१०।६क) :—

दत्त्वा तु माषकं तस्य पुण्यं फलमुपाश्नुते[9] ॥१८॥

पुण्यं श्रेष्ठम् । ब्राह्मणायार्चिताय पञ्चकृष्णलपरिमितं सुवर्णमाषकमर्चितम् ॐ अद्यादि

1 A नामोनष्ठ विशम्पते for the b. p.
2 A शतक
3 I. O. तारणा for तारणादि
4 I. O. विरजोऽम्बरसम्वीत:
5 I. O. परिपाति
6 I. O. विष्णुधर्मोत्तर
7 I. O. प्रचुर०
8 A' प्रचुरदानासमर्थस्येदं for the entire line
9 Corrected from V. D. I. O. दत्त्वा तु माषकं पुण्यं फलं तस्यमुपाश्नुते, A ०पुण्यफलमाप्नुयात्

तुभ्यमन्तमुक्त्वा दद्यात् । पुण्यफलप्राप्तिकामोऽहमेतत् सुवर्णमाषकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१०।१६ख-१७क) :—

सुवर्णमाषकं दत्त्वा सूर्यस्योदयनं प्रति ।
हुत्वाग्निं सर्वपापेभ्यो मोक्षमाप्नोत्यसंशयम् ॥१६॥

सूर्योदये स्नात्वा यथाविध्यग्निमुपसमाधाय ॐ प्रजापतये स्वाहेत्याज्याहुतिं हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा [1]पञ्चकृष्णलमितं सुवर्णमाषकमर्चिताय ब्राह्मणाय [ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्][2] । सर्वपापविमोचन[3]-प्राप्तिकामोऽहमेतं सुवर्णमाषकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । एवं प्रत्यहं यथेच्छकालावधि कुर्याद् बहुदानानि [4]नित्यदानेनेति श्रुतेः ।

तथा (३।३१०।१८) :—

दिनमध्यगते सूर्ये हुत्वाग्निं यः[5] प्रयच्छति ।
[6]तस्यापि नित्यदानेन [7]महत्फलमुदाहृतम् ॥२०॥

नित्यदानेन प्रतिदिनं दानेन अत्रापिशब्देन[8] माषकमित्यनुषज्यते । [9]होमादिकं पूर्ववत् । दानवाक्ये तु विष्णुधर्मोत्तरोक्त-मध्याह्नविहित-सुवर्णदानफलप्राप्तिकामोऽहमिति विशेषः ।

तथा (३।३१०।१९) :—

[10]सूर्यास्तसमये वह्निं हुत्वा तद्धि प्रयच्छति ।
पुण्यं [11]महान्तमुद्दिष्टं नित्यदानेन वै द्विजाः ॥२१॥

तदिति सुवर्णमाषकं [द्विजा इति सम्बोधनम् । दानवाक्ये तु विष्णुधर्मोत्तरोक्त-सूर्यास्त-समयविहित-सुवर्णमाषक-दानफलप्राप्तिकामोऽहमिति विशेषः ।][12]

---

1 A यथा०
2 I. O. omits the bracketed portion
3 I. O. ०विमोचक०, A ०विमोचक०
4 I. O. उत्तरदानेन
5 A हुताग्नियः
6 A तथा नित्यप्रदानेन
7 A महाफल०
8 I. O. and A अत्रापि
9 I. O. मोक्षादिकं
10 I. O. सूर्यस्यास्तमये हुत्वा वह्निं तद्द प्रयच्छति, V. D.... वह्निं हुत्वा... (the rest as I. O.)
11 V. D. महत् समाप्नोति, A महत् समुद्दिष्टं
12 A omits the bracketed portion but repeats the portion of the last verse from हुत्वा to द्विजाः

तथा (३।३१०।१०) :—

[1]त्रिसन्ध्यं कनकं यस्तु हुत्वा वह्निं प्रयच्छति ।

न लिप्यते स पापेन पद्मपत्रमिवाम्भसा ॥२२॥

त्रिसन्ध्यं पूर्वोक्तविधिना होमं कृत्वार्चिताय ब्राह्मणायार्चितं सुवर्णम् ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात् । याव-[दुत्पन्नपापध्वंस][2]-पूर्वकानागतपापासम्बन्धप्राप्तिकामोऽहमेतत् कनकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१०।१२) :—

यः सुवर्णं[3] सुवर्णस्य ब्राह्मणाय प्रयच्छति ।

निर्दोषस्य स नाके तु मोदत्यब्दशतं नरः ॥२३॥

सुवर्णस्योत्कृष्टवर्णस्य[4] निर्दोषस्य[5] न्यायार्जितस्य हेम्नः पञ्चकृष्णलमानेन षोडशमाषक-परिमाणं सुवर्णमित्यर्थः । ब्राह्मणायार्चिताय[6] उत्कृष्टं[7] सुवर्णमर्चितम् ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात् । अब्दशत-सोत्कर्ष-स्वर्गवासकामोऽहमेतन्निर्दोषं सुवर्णं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

तथा (३।३१०।१३क—१५क) :—

आत्मतुल्यं सुवर्णन्तु[8] यः प्रयच्छति वै द्विजाः ।

सर्वपापविनिर्मुक्तो यथेष्टां गतिमाप्नुयात् ॥२४॥

द्विजा इति सम्बोधनम् ।

ब्रह्मघ्नो वा सुरापो वा स्तेनो वा गुरुतल्पगः ।

सर्वपातकयुक्तोऽपि [9]तेन दानेन मुच्यते ॥२५॥

[10]व्रतानामुत्तमं ह्येतद्दानानामपि चोत्तमम् ॥२६॥

आत्मतुलितं सुवर्णमर्चितमर्चितेभ्यो यथेच्छसंख्यब्राह्मणेभ्यः ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा

---

1 I. O. omits the above verse but repeats the previous one

2 A omits the bracketed portion

3 A omits it

4 A सुवर्णस्यादुष्टवर्णस्य

5 A omits it

6 I. O. अर्चित for अर्चिताय

7 A दुष्टं

8 I. O. सुवर्णस्य

9 A मुच्यते नात्र संशयः

10 A ह only for व्रतानामुत्तमं, V. D. अव्रताना०

दद्यात् । विष्णुधर्मोत्तरोक्तात्मतुलितसुवर्णदानफलप्राप्तिकामोऽहमेतदात्मतुलितं सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । सुवर्णस्य बाहुल्याद्बहुभ्यो लिखितं [न बहुत्वनियमः][1] ।

तथा (३।३१०।२८ख-३०क) :—

दत्त्वा सुवर्णं लोकेषु [2]यथेच्छमथ मोदते ।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥२७॥
देवरामागणाढ्येन कामगेन विहायसा ।
भुक्त्वा दिवि चिरं भोगान् मानुष्ये सुखमाप्नुयात् ॥२८॥

अत्र फलोत्कर्षाद् यथाशक्ति बहुसुवर्णदानम् । ब्राह्मणायार्चिताय यथेच्छपरिमाणं सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-सकललोकगोचराभिमत-मोदादि-फलक-सुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्वल्लालसेनदेवविरचिते
श्रीदानसागरे सुवर्णदानावर्तः ।

1 I. O. नव नियमः for b. p. 2 A यथेष्टं च तु

अथाग्निदैवतरूप्यदानावर्तः । (३४)

मनुः (४।२३०घ) :—

रूप्यदो रूपमुत्तमम् ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणाय यथेच्छपरिमाणं रजतमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमुत्तमरूपप्राप्तिकामोऽहमेतद्रूप्यं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा रूप्यमिदमग्निदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा रजतं स्पृशेत् ।

आग्नेयपुराणे :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च ।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥२॥
यानमश्वमनड्वाहं हेमरूप्यमणींस्तिलान् ।
ये प्रयच्छन्ति पापेषु निरताः सर्वदा मुने ।
न तेषां भैरवः पन्था दत्त्वैषां[1] दानमित्युत ॥३॥

अत्रोक्तसमयानामन्यतमे ब्राह्मणायार्चितायार्चितं [2]यथेष्टपरिमाणं रूप्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्तामुकसमयविहितरूप्यदानफलप्राप्तिकामोऽहमेतद्रूप्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । सर्वदेतिपददर्शनादति-[3]प्रचुरपापक्षयार्थमिदं दानम् ।

नरसिंहपुराणे :—

रूप्यदानेन [4]स्वर्गन्तु निर्मलं लभते नरः ॥४॥

ब्राह्मणायार्चिताय [5]यथेष्टपरिमाणं रजतमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । निर्मल-[6]स्वर्गप्राप्तिकामोऽहमेतद्रूप्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A यत्वेषां
2 A यथेच्छ०
3 A प्रचुरतर०
4 A सुवर्णं
5 A यथेच्छ०
6 A omits स्वर्ग

ब्रह्मपुराणे :—

सुवर्णं रजतं वापि विद्रुमं मौक्तिकं तथा।
ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ॥५॥

ब्राह्मणायार्चिताय [1]यथेष्टपरिमाणमर्चितं रजतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्मपुराणोक्त-रजतदानफलप्राप्तिकामोऽहमेतद्रजतं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे रजतदानावर्तः।

---

1 A यथेष्ट०

अथ विष्णुदैवतालङ्कारदानावर्तः । (३५)

नन्दिपुराणे :—

अलङ्कारन्तु यो दद्याद्विप्रायाथ सुराय वा ।

स गच्छेद्वारुणं लोकं नानाभरणभूषितः ।

जातः पृथिव्यां कालेन भवेद्दीपपतिर्नरः ॥१॥

अत्र यजमानः प्रसिद्धहैमरौप्यमौक्तिकाद्यलङ्करणानामन्यतमं यथेष्टमुपादायार्चितं ब्राह्मणायार्चिताय दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं नन्दिपुराणोक्तालङ्कारदानफलप्राप्तिकामोऽहमेतमलङ्कारं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा अलङ्कारोऽयं विष्णुदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा[1] अलङ्कारं स्पृशेत्।

वामनपुराणे (९५।४४) ब्राह्मणाय दानानुवृत्तौ[2] :—

दासीं दासमलङ्कारमन्नं षड्रससंयुतम्[3] ।

[4]पुरुषोत्तम-[5]प्रीत्यर्थं प्रदेयं सार्वकालिकम् ॥२॥

नियतमासक-[6]दानानन्तरस्याभिधानात् सार्वकालिकमित्यनियतमासदेयम्। प्रसिद्धालङ्काराणामन्यतममर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुरुषोत्तमप्रीतये एतमलङ्कारं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु—५७।३८) :—

[7]स्रग्धूपगन्धान्यनुलेपनानि स्नानानि माल्यानि च मानवो यः ।

दद्याद्द्विजेभ्यः स भवेद्विरोगस्तथातिरूपश्च[8] नरेन्द्रलोके ॥३॥

---

1 I. O. omits सावित्रीं पठित्वा

2 A ब्राह्मणद्दानानुवृत्तौ

3 A मङ्गलद्रव्यसंयुतम् for अन्न ···(in the middle) संयुतम्

4 Corrected from Vāmana P. I. O. and A पुरुषोत्तमस्य॰

5 Vāmana P. ॰तुष्टार्थं

6 I. O. omits दा

7 Both A and I. O. सुगन्धधूपान्यनुलेपनानि. स्रग्धूपगन्धा etc. has been supplied from a previous quotation of the same and from a consideration of the following paragraph, which becomes meaningless without this reading.

8 A ॰तथाभिजातश्च

अत्र माल्यानि पृथगुक्त्वा स्रग्ग्रहणमलङ्करणरूपमुक्तास्रक्प्रतिपादनार्थम्। यथाशक्ति मुक्ता-सुवर्ण-रजतादिस्रजामन्यतमां स्रजमर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तस्रग्दानफलप्राप्तिकामोऽहमेतां स्रजं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१०।१५ख—१६ख):—

[1]रुक्माभरणदानेन सुखी सर्वत्र जायते।
चिरान्नाकपरिभ्रष्टो रूपसौभाग्यसंयुतः।
[2]सतां कुले तु सुस्फीते गुणैः सर्वैर्युतो नरः॥४॥

प्रसिद्धानामलङ्काराणामन्यतममलङ्कारमर्च्चितमर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तरुक्माभरणदानफलप्राप्तिकामोऽहमेतत् रुक्माभरणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे अलङ्कारदानावर्त्तः।

---

1 V. D. रुक्मं दत्त्वा ब्राह्मणाय   2 V. D. तासां

अथ विष्णुदैवतरत्नदानावर्तः । (३६)

यम :—

> राजोपकरणं दत्त्वा रत्नानि विविधानि च ।
> नगरञ्च[1] तथा दत्त्वा राजा भवति भूतले ॥१॥

अत्र यजमानो ब्राह्मणायार्चिताय प्रसिद्धरत्नानि इच्छया[2] नानाजातीयानि यथेष्टसंख्य-रत्नान्यर्चितानि दद्यात् । ॐ [3]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [4]भूतलराज्यप्राप्तिकामोऽहमेतानि रत्नानि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा रत्नानीमानि विष्णुदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा रत्नानि स्पृशेत् ।

आग्नेयपुराणे :—

> पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च ।
> ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥२॥
> यानमश्वमनड्वाहं हेमरूप्यमणींस्तिलान् ।
> ये प्रयच्छन्ति पापेषु निरताः[5] सर्वदा मुने ।
> न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥३॥

अत्रोक्तसमयानामन्यतमे ब्राह्मणायार्चितायार्चितं यथेष्टं[6] मणित्रयम् ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्तामुकसमयविहितमणिदानफलप्राप्तिकामोऽहमेतान् मणीन् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । सर्वदेतिपददर्शनादतिप्रचुरतरपापक्षयार्थमिदं दानम्[7] ।

ब्रह्मपुराणे :—

> सुवर्णं रजतं वापि विद्रुमं मौक्तिकं तथा ।
> ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ॥४॥

---

1 I. O. न परश्च
2 I. O. मिच्छया
3 I. O. अद्यादितुभ्यममुक०
4 A भूराज्य०
5 I. O. निरताः
6 A यथेष्ट
7 A omits दानम्

विद्रुमं प्रवालम्। ब्राह्मणायार्च्चिताय [1]प्रवालमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्मपुराणोक्त-विद्रुमदानफलप्राप्तिकामोऽहमेतं विद्रुमं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्। मुक्तादाने तु वाक्ये ब्रह्मपुराणोक्तमुक्तादानफलप्राप्तिकामोऽहमेतन्मौक्तिक-मिति विशेषः।

विष्णुधर्मोत्तरे (३।३१०।२३क-२६क) :—

रत्नानाञ्च प्रदानेन राजैवेह[2] प्रजायते।
रत्नदानस्य यल्लोकं तद्भुक्त्वा सुचिरं द्विजाः ॥५॥

रत्नानामिति वक्ष्यमाणानां राजैवेह प्रजायत इति वक्ष्यमाणरत्नदानफलेषु[3] प्रत्येक सम्बध्यते। भुक्त्वा यथोक्तलोकान् इह राजा भवतीत्यर्थः।

वज्रदः शक्रलोकन्तु[4] पद्मरागप्रदो रवेः।
मर्त्यो मरकतं दत्त्वा विष्णुलोके महीयते ॥६॥
मुक्ताफलप्रदानेन वारुणं लोकमश्नुते।
वैदूर्य्यस्य प्रदानेन द्वीपानासाद्य[5] मोदते।
रत्नान्यन्यानि दत्त्वैव [राजराजस्य तु][6] द्विजाः ॥७॥

लोकमासाद्येति शेषः। रत्नान्यन्यानीति नील[7]-गोमेद-[8]कदलीगर्भ-पुष्पराग-[9]रूपाणि ब्राह्मणायार्च्चिताय हीरकमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त वज्रदानफलप्राप्तिकामोऽहमेतद्वज्ररत्नं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [10]पद्मरागादि-दानेषु तु विष्णुधर्मोत्तरोक्तामुकरत्नफलप्राप्तिकामोऽहममुकरत्नमिति वाक्ये विशेषः।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [11]रत्नदानावर्तः।

---

1 A omits प्रवालम्
2 A राजोद्दाहं
3 I. O. ॰फलेषु
4 A रजदः शक्रद्रोकण
5 V. D. द्वीपानां सप्त
6 I. O. मुक्तिमायाति वै for the b. p.
7 I. O. omits नील
8 A करवीगर्भ
9 I. O. omits रू
10 A reads पद्मरागदाने and omits तु
11 A नानारत्न॰

अथ विष्णुदैवतगृहदानावर्त्तः[1] । (३७)

तत्र सोपकरणगृहदानानि ।

कालिकापुराणे :—

कारयित्वा [2]तथोद्वाहं श्रोत्रियाणां कुलेषु च ।
[3]वेदविच्छीलवृत्तेषु [4]द्विजेष्वेकादशेष्वथ ॥१॥

[5][समावृत्ताय ब्राह्मणाय] दानेषु निषिद्ध इति वाक्यार्थः ।

ततो गृहाणि रम्याणि कुर्यादेकादशैव तु ।
कारयित्वा तु धान्यैश्च विविधैश्च प्रपूजयेत् ॥२॥

विविधैरिति व्रीहियवमाषमुद्गतिलप्रभृतिभिः ।

[6]दासं गोमहिषांश्चापि[7] शयनासन[8]-पादुकाः ।
भाजनानि विचित्राणि ताम्रमृन्मयकानि[9] च ॥३॥
पात्राणि भोजनार्थं च [10]रुक्म सोपस्करञ्च यत् ।
लोहञ्च कनकञ्चैव वस्त्राणि च विशेषतः ॥४॥

उपस्कर-[11]मुदूखलमुषलादि ।

[12]संपूज्यैतं सुसम्भारं गृहेषु विनियोजयेत् ।
[13]योजयेच्चैव वृत्त्यर्थं वसतो वा शतं शतम् ॥५॥
पृथक् पृथगिमांश्चैव निवर्तनशतार्द्धतः ।
विषयं [14]खर्वटं खेटं ग्रामं ग्रामार्द्धमेव वा ॥६॥
इ × भूमिं योजये × ×
एकादशैव तास्तत्र दम्पत्यो ×
विचिन्त्य परया भक्त्या तद्गृहेषु प्रवेशयेत् ॥७॥

---

1 A omits the heading
2 I. O. ततोद्वाहं
3 I. O. विविधह्रीनवृत्तेषु
4 I. O. सर्वे०
5 I. O. सद्वावृत्तयो ब्राह्मणा
6 I. O. गोमी
7 I. O. गोमहिषीवापि, A गोमहिषाश्चापि
8 A and I. O. ०शन०
9 A ताम्रवक्रमयानि च
10 I. O क्रम
11 A ०उलुखल०
12 A संपूज्यैतं
13 A योजयेषु सवृत्तार्थं शक्तितो वा शतं शतं
14 A कर्वटं, I. O. करट

[1]ग्राहयेदग्निहोत्राणि [2]प्रवेश्यैतान् द्विजोत्तमान् ।
विधिपूर्वं यथान्यायमात्मनः श्रेयसे नरः ॥८॥
अदुष्टजलजानाञ्च विधिरेष [3]निरन्तरः ।
शीलवृत्तैर्विभक्तानां द्विजानां कारयेत् सदा ॥९॥
यश्च प्रेष्यान् द्विजान् मूढो योजयेद्धव्यकव्ययोः ।
न भवेत्तत्फलं तस्य वैदिकीयं श्रुतिर्ध्रुवा ॥१०॥
यज्ञदानव्रताद्यञ्च तीर्थयात्रादिकञ्च यत् ।
यस्त्वेवं कारयेज्जन्तुस्तेन सर्वमनुष्ठितम् ॥११॥
[4]समासाद्यार्कसङ्काशं विमानं रत्नमालिनम् ।
आरुह्य तत्पदं पुण्यं सुरस्त्रीभिरलङ्कृतम् ॥१२॥
[5]विमानैश्चापरैर्दिव्यैः सहस्रैः परिवारितः ।
सर्वलोकगतान् भोगान् भुक्त्वा तस्मिन् प्रपद्यते ॥१३॥
ज्ञात्वा [6]चैव स्वसामर्थ्यमेकं चोद्वाहयेद्द्विजम् ।
तेनाप्याप्नोति तत्स्थानं शिवभक्तो नरो ध्रुवम् ।
[7]स्थानेन स्थानसम्प्राप्तिर्विधिवत्तेन [8]जायते ॥१४॥
मातापितृविहीनन्तु संस्कारोद्वाहनादिभिः ।
यः संस्थापयति तस्येह पुण्यसंख्या न विद्यते ॥१५॥

अत्र वेदवृत्तशीलान्वितेषु कुलेषु [9]एकादशविहितान् ब्राह्मणान् विवाहं कारयित्वा तेषामवस्थानार्थमग्निहोत्रार्थञ्च एकादशसु स्थानेषु प्रतिस्थानं नानाविधविचित्रगृहाणि कारयित्वा एकैकशो निवर्तनशतात्मकां [10]पञ्चाशन्निवर्त्तनावच्छिन्नां वा भूमिकैकैकशो विषय-[11]खर्वट-खेट-ग्राम-[12]ग्रामार्द्धानामन्यतमपरिमाणेनावच्छिन्नां वा[13] भूमिमुपकल्प्यात्रोक्तद्रव्याणि नानाविध-[14]धान्य-

---

1 I. O. omits ग्राहयेदग्नि
2 I. O. प्रवेशितान्
3 I. O. चिन्तनः
4 I. O. स यात्यर्कसमानाभं
5 I. O. विमानैश्चामरैर्दिव्यैः
6 I. O. चैतत्
7 A omits स्थानेन
8 A संजायते
9 I. O. एकादशाविहितान्
10 I. O. पञ्चाशन्निवर्त्तनीवर्त्तनावच्छिन्ना स्वा भूमिम्
11 I. O. कवट, A कर्बट
12 I. O. omits ग्रामार्द्ध
13 I. O. omits वा
14 A ०धान्याद्य०, I. O. omits it

दासीदासगोमहिषीशय्यापीठिका[1]-पादुका[2]-भाजनताम्रकलसताम्रघटी-[3]पित्तलघटीपित्तलदीप-वृक्ष-नानाविधमृन्मयपात्र--भोजनार्थस्थान--मुषलोदूखल[4]--सूर्प--सम्मार्जनी--कुद्दालदात्रकुठार--खनित्र-कर्त्तरी[5]-शर्कराखण्ड-गुड-घृत-तैल-लवणार्द्रक-हिङ्गु-मरीच-धान्याक-सर्षप-हरिद्रा-शुण्ठी-पिप्पली-मुद्ग-माष-मसूर-द्विदलकादि-[6]रन्धनोचित--सामग्रीं शिलापट्टशिला-[7]पुत्रिकादि--गृहवसत्युचित-सामग्रीश्च लोह-कनकानेकविधवस्त्राणि च तेषु गृहेषु स्थापयित्वा [8]तान् सभार्यान् तत्र तत्रानीय यजमानः शुचिः स्नातः[9] तान् ब्राह्मणान् शिवमूर्त्तीन् ध्यात्वा ब्राह्मणीश्च गौरीमूर्त्तीर्ध्यात्वाभ्यर्च्य वस्त्रादिना तेभ्यो ब्राह्मणेभ्यस्तानि गृहाण्यर्चितानि दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकामुक-वेदामुकामुकशाखाध्यायिभ्यो युष्मभ्यमेकादशभ्यो यथासंख्यं कालिकापुराणोक्तैकादशब्राह्मणसम्प्र-दानकगृह-[दानफलप्राप्तिकामोऽहं][10]-मेतान्येकैकशो [11][नानाविध-धान्य]-दासीदास-गो-महिषी-शय्या-पीठिका-पादुका-भाजन-ताम्रकलस-ताम्रघटी--पित्तलघटी[12]-पित्तलदीप-वृक्ष--नानाविधमृन्-मयपात्र-[13]भोजनस्थान-मुषलोदूखल[14]-सूर्प-सम्मार्जनी-कुद्दालदात्रकुठारखनित्रकर्त्तरी-शर्कराखण्ड-गुड-घृततैल-लवणार्द्रक-हिङ्गु-मरीच-धान्याक सर्षप-हरिद्रा-शुण्ठी-पिप्पली-मुद्ग-माष-मसूर-द्विदल-कादिरन्धनोचितसामग्रीं शिलापट्ट-शिलापुत्रिकादि-गृहवसत्युपयोगिद्रव्यसहितानि लौहसुवर्णा-नेकवस्त्रयुतान्येकैकशः पञ्चाशन्निवर्त्तनभूमिसहितानि एकादशगृहाणि ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गृहमेतद्विष्णुदैवतमिति प्रत्येकमुक्त्वा यथाशाखं कामस्तुतिं पठेयुः। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा गृहं प्रविशेयुः। ततस्तान् द्विजान् गृहाणि प्रवेश्य यथाविध्यग्निहोत्राणि ग्राहयेत्। एकस्मै दानत्वे एकं ब्राह्मणं विवाहं कारयित्वा पूर्वलिखितक्रमेण तस्यावस्थानार्थं गृहं कारयित्वा पूर्वोक्तनिवर्त्तनशतादीनामन्यतमपरिमाणां भूमिमुपकल्प्य पूर्वोक्तगृहोपकरणद्रव्याणि तत्र स्थापयित्वा तं सभार्य्यं यथायथं शिवगौरीरूपं ध्यात्वा वस्त्रादिनाभ्यर्च्य तस्मै गृहमर्चितं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं कालिका-

---

1 I. O. ०पीढिका

2 I. O. भाजनताम्बूल for भाजन-ताम्र

3 I. O. पित्तली०

4 I. O. मुषलोदूषखल

5 I. O. कर्त्तनी

6 A omits रन्ध

7 A पुत्रपादि

8 A तत्

9 A स्नातः शुचिः

10 A omits the bracketed portion

11 A नानाविधान्य for the b. p.

12 I. O. पित्तली, A omits it

13 I. O. omits भोजन

14 I. O. मुषलोदूखल, A मुषलोखल

पुराणोक्तासमर्थ[1]-दातृकगृहदान[2]-फलप्राप्तिकामोऽहमेतन्नानाविधगृहवसत्युचितसामग्रीयुतं लोह-सुवर्णानेकवस्त्रसंयुतम्[3] [4]इयत्परिमाणभूमिसहितं गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततस्तमग्निहोत्रं दापयेत्[5]। एवं मातापितृविहीन-कारितोप-[6]नयनोद्वाहाद्यैक-ब्राह्मण-[7][सम्प्रदानपक्षे कालिकापुराणोक्तमातापितृविहीनकारितोपनयनविवाहैकब्राह्मण]-संप्रदान-कगृहदानफलप्राप्तिकाम इत्युपरिलिखितदानवाक्ये विशेषः।

आदित्यपुराणे :—

सर्वैश्च भाण्डैरुपशोभिताङ्गं दद्याद् गृहं ब्राह्मणसुव्रताय।
सर्वांश्च कामान् लभते च शीघ्रं पुत्रांश्च[8] पौत्रांश्च लभते[9] समग्रान् ॥१६॥

सर्वैश्च भाण्डैरिति गृहवसत्युचितोपकरणैरिति[10] गृहैकादशकदाने[11] लिखितैः। सुव्रता-[य शोभनव्रतशालिने][12]। ब्राह्मणाय शोभनव्रतशालिनेऽर्चितायार्चितं गृहवसत्युचितसामग्री-सहितं गृहम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्तगृहदानफलप्राप्तिकामोऽहमेतत् सर्वभाण्डोपशोभिताङ्गं गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

गृहं यस्तु प्रयच्छेत सर्वकामसमृद्धिमत्[13]।
स लोकं ब्रह्मणः प्राप्य सर्वकामैर्हि सेव्यते[14] ॥१७॥

सर्वकामसमृद्धिमदिति[15] गृहस्थोपकरणयावद्गृहवसत्युचितसामग्रीसम्पन्नमित्यर्थः।

वर्षकोटीः स तत्रोष्य चतस्रस्तेन कर्मणा।
गृहमेधी सदा दाता भोगवांश्चैव जायते ॥१८॥

गृहस्थोपकरण[16]-यावद्गृहवसत्युचितसामग्रीसहितं गृहमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्तगृहदानफलप्राप्तिकामोऽहमेतत् सर्वकाम-

---

1 I. O. ०समग्र
2 I. O. ग्रामादान for दान
3 A युतम् for वस्त्रसंयुतम्
4 A ईयत्०
5 A वाहयेत्
6 A ०नयनविवाहैक०
7 I. O. omits the bracketed portion
8 I. O. omits च
9 A लभेत्
10 A ०करण
11 I. O. omits कदाने
12 A omits the bracketed portion
13 A ०समृद्धिमान्
14 A ०र्निषेव्यते
15 A ०समृद्धिमानदिति
16 A ०करणीय०

समृद्धिमद्गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। गृहवसत्युचितसामग्री गृहैकादशक-दाने लिखिता तत [1]एव ज्ञेयाः।

नन्दिपुराणे :—

यश्च वेश्म शुभं दद्यात् सर्वोपकरणान्वितम्।
विप्राय नियमस्थाय स पूतः पातकैर्भवेत् ॥१६॥

शुभमुत्कृष्टं सर्वोपकरणान्वितं[2] गृहैकादशक[3]-दानलिखितगृहवसत्युचितसामग्रीसहितं नियमस्थायोपवासादिव्रतशीलाय गृहवसत्युचितसकलसामग्रीसहितं गृहमुत्कृष्टमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नन्दिपुराणोक्तगृहदानफलप्राप्तिकामोऽहमेतत सर्वोपकरणान्वितं गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

बृहस्पतिः :—

रसान्नोपस्करयुतं गृहं विप्राय योऽर्पयेत्।
तस्य न क्षीयते वंशः स्वर्गं प्राप्नोत्यसंशयम् ॥२०॥

उपस्करः गृहवसत्युचितसामग्री गृहैकादशदाने लिखिता। ब्राह्मणायार्चिताय धान्य-लवणादिरसगृहवसत्युचितसामग्रीसहितं गृहमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। बृहस्पत्युक्त[4]-गृहदानफलप्राप्तिकामोऽहमेतद्गृह[5]-वसत्युचित[6]-सामग्रीधान्यलवणादिरससहितं[7] गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (cf. अनु-५७।३६) :—

वीजैरुपेतं शयनैरुपेतं दद्याद् गृहं यः पुरुषो द्विजाय।
सुखाभिरामं बहुरत्नपूर्णं लभेदधिष्ठानवनं[8] स राजन् ॥२१॥

शयनैरिति उपरिरचितवस्त्रमयशय्यायुक्तखट्वाभिस्तिसृभिः। ब्राह्मणायार्चितायार्चितं धान्यादिबीजशय्यात्रयोपेतं गृहम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तसोप-करणगृहदानफलप्राप्तिकामोऽहमेतद्धा-[न्यमुद्ग-माष-सर्षप-यव-तिल-मसूरसहितं शयनैर्युतं][9] गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A एवानुसन्धेया
2 A सर्वोपकरणं
3 I. O. omits क
4 I. O. बृहस्पत्युचित
5 I. O. omits एतद्गृह
6 A वस्त्युचित
7 A °रससहितं
8 A °रसं
9 A दियुक्तमर्चितमर्चिताय for the b. p.

विष्णुधर्मोत्तरे (३।३०५।२१ख—२३क) :—

धनधान्ययुतं स्फीतं [1]गृहोपकरणैर्युतम् ।
[2]शय्यासनयुतं रम्यं गोजाव्यश्वयुतं[3] तथा ॥२२॥

[स्फीतं बृहत् । गृहोपकरणैर्युतं][4] पूर्वलिखितगृहैकादशदानोक्तगृहोपकरणयुतम् ।

गृहं दत्त्वा द्विजेन्द्राय तावत् स्वर्गमुपाश्नुते ।
यावत् कल्पावसानन्तु कल्पादौ पार्थिवो भवेत् ॥२३॥

द्विजेन्द्राय विद्यातपःसम्पन्नाय ब्राह्मणायार्च्चिताय सुवर्णधान्य[5]-गृहोपकरणशय्यासन-[6]गोजाव्यश्वयुतं महदुत्कृष्टं गृहमर्च्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तसोपकरणगृहदानफलप्राप्तिकामोऽहमेतद्धनधान्ययुतं स्फीतं[7] बहुविधगृहोपकरणसहितं [शय्यासनयुतं [8]गोजाव्यश्वसहितं][9] गृहं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 Corrected from V. D. T. O. and A सर्वो°

2 I. O. and A ऽदयासन°

3 A गोजाव्यंश्वयुतं

4 A omits the bracketed portion

5 A धा for धान्य

6 I. O. गोजादस्य, A गोजाव्यश्वयुतं

7 I O. omits स्फीतं

8 I. O. गोजावश्व°

9 A omits the bracketed portion

अथानुपकरणगृहदानम् ।

मनुः (४।२३०ग) :—

गृहदोऽग्र्याणि वेश्मानि ॥१॥

आप्नोतीति सम्बन्धः ।

[याज्ञवल्क्यः (१।२११) :—

गृहधान्यतोयोपानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियां शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२॥

यम :—

गृहदो नगरं तथा ॥३॥

आप्नोतीति सम्बन्धः ।][1]

सम्वर्तः :—

गृहदाता सुखी प्राज्ञो वितृष्णः सर्ववस्तुषु[2] ॥४॥

ब्राह्मणायार्चिताया[3]-र्चितं गृहम् ॐ अद्यादि तुभ्यमहन्तमुक्त्वा दद्यात् । [4]अग्र्यवेश्मप्राप्ति-कामोऽहमेतद्गृहं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । याज्ञवल्क्योक्तगृहदानफल-प्राप्ति-[कामनायामत्यन्तसुखप्राप्ति][5]-कामोऽहमिति यमोक्तगृहदानफलप्राप्ति-[कामनायां नगरप्राप्ति][6]-कामोऽहमिति सम्वर्तोक्तगृहदानफलप्राप्ति-[कामनायां][7] [सुख-प्राज्ञता-सर्ववस्तुवितृष्णता-प्राप्ति][8] कामोऽहमेतेषामन्यतमपदं दानवाक्ये कामनायां यथायथं निवेशनीयम् ।

महाभारते (अनु—२३।१००) :—

निवेशनानां क्षेत्राणां [9]वसतीनाञ्च भारत ।

दातारः प्रार्थितानाञ्च पुरुषाः स्वर्गगामिनः ॥५॥

---

1 I. O. omits the bracketed portion

2 A सर्ववस्तुत:

3 A omits अर्चिताय

4 A अग्रान for अग्रवेश्म

5, 6 & 7 A omits the bracketed portions

8 A omits it and I. O. reads सम्वर्तोक्तगृहदानफलप्राप्ति which is almost a repetition of the previous phrase

9 A वसतीनां युधिर (युधिष्ठिर?)

वसतीनां गृहाणां, वसतीनामिति[1] बहुवचनं दातृबहुत्वापेक्षम्[2]। ब्राह्मणायार्चिताय गृह[3]मर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतां वसतिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

ब्रह्मपुराणे :—

गृहावसथदातारो गृहैः काञ्चनमण्डितैः।
व्रजन्ति बालार्कनिभैर्धर्मराजगृहं [4]नराः ॥६॥

अर्चिताय ब्राह्मणाय [5]यथेष्टगृहमुपादायार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ब्रह्मपुराणोक्तगृहदानफलप्राप्तिकामोऽहमेतद्गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे :—

ब्राह्मणाय गृहं दत्त्वा वसूनां लोकमाप्नुयात् ॥७॥

ब्राह्मणायार्चिताय [6][गृहमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वसुलोकप्राप्तिकामोऽहमेतद्गृहं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे गृहदानावर्तः।

---

1 A omits it
2 I. O. adds उक्तम्
3 A omits अर्चिताय गृहम्
4 A adds न before नराः
5 A यथेष्ट°
6 A omits the bracketed portion

अथ प्रतिश्रयदानावर्तः । (३८)

यमः :—

दत्त्वा प्रतिश्रयं लोके तथा दत्त्वैव चाभयम् ।

तथा दत्त्वा क्षितिं विप्रे ब्रह्मलोके महीयते ॥१॥

अत्र यजमानो ब्राह्मणादेर्विश्रामार्थं[1] गृहं मनोहरं निर्मायोत्सृज्य दद्यात् । ओत्-ब्रह्मलोकप्राप्तिकामोऽहं विश्रामार्थं[2] प्रतिश्रयमुत्सृजे । ततआरभ्य यथायथमागतान् ...णादीन् विश्रामयेत् ।

महाभारते (अनु—६६।३०ख—३१क) :—

तथा गवार्थे शरणं शीतवर्षसहं शुभम् ।

आसप्तमं तारयति कुलं भरतसत्तम ॥२॥

शरणं गृहम् । उपकल्प्येति विशेषः । शुभं सुदृढं[3] यथोक्तगृहमुत्पाद्य गवां निवासार्थ-...ज्य दद्यात् । ॐ महाभारतोक्त-गोदान-फलप्राप्तिकामोऽहं गवार्थमुत्सृजे इत्युत्सृज्य ...तावारितं विश्रामयेत् ।

विहारावसथोद्यान-कूपाराम-सभाप्रदाः ।

विप्राणाञ्चोपकर्त्तारस्ते नराः स्वर्गगामिनः ॥३॥ (अनु—२३।९६)

विहारावसथोऽग्निहोत्रगृहं सभा[4] सभा[5]-जनगृहं यत्र बहवो जनाः सुखेनोपविश्य कथादि ...त । अग्निहोत्रिणे अग्निहोत्रकरणोचितं गृहमर्चितं दद्यात् । ॐ अद्य महाभारतोक्त-...रावसथदानफलप्राप्तिकामोऽहमग्निहोत्रिणे तुभ्यं विहारावसथं ददानि । नानासत्त्वविश्रा-... सभामुत्सृज्य दद्यात् । ॐ ब्राह्मणमुखनानासत्त्वेभ्यः स्वर्गप्राप्तिकामोऽहमेतां विश्रामार्थं ...त्सृजे । तदादि यथायथं तत्र श्रान्तान् विश्रामयेत्[6] ।

तथा (वन—१९९।२४) :—

पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम् ।

प्रयच्छन्ति तु ये राजन्नोपसर्पन्ति ते यमम् ॥४॥

---

1 & 2 I. O. विश्रमार्थं
3 I. O. सुदृढं शुभं
4 I. O. सता
5 I. O. सभा०
6 I. O. विश्रमयेत्

प्रतिश्रयं निर्माय श्रान्तविश्रामार्थमुत्सृज्य दद्यात्। ॐ ब्राह्मणप्रमुखनानाश्रान्तेभ्यो विश्रामार्थं [1]यमानुपसर्पणरूपफलप्राप्तिकामोऽहमेतं प्रतिश्रयमुत्सृजे। इत्युत्सृज्य [2]यथाकालमागतान् श्रान्तान् [3]विश्रामयेत्।

तथा (अनु—५७।३७ख) :—

प्रतिश्रयाच्छादनसंप्रदाता प्राप्नोति [4]तान्येव न संशयोऽत्र ॥५॥

तान्येवेति प्रतिश्रयाच्छादनान्येव इत्यर्थः। श्रान्तविश्रामार्थं प्रतिश्रयमुत्सृज्य दद्यात्। ॐ ब्राह्मणप्रमुखनानाश्रान्तेभ्यो विश्रामार्थं बहुप्रतिश्रयप्राप्तिकामोऽहमेनं प्रतिश्रयमुत्सृजे। तदादि यथायथमुपस्थितान् श्रान्तान् तत्र [5]विश्रामयेत्।

स्कन्दपुराणे :—

योगिभ्यो ब्रह्मचारिभ्यो ब्राह्मणेभ्यो यतात्मवान्।
यः प्रयच्छेदावसथं सोऽश्वमेधफलं लभेत् ॥६॥

आवसथं विश्रामगृहम्।

आप्तावासं[6] पुण्डरीकं गोसहस्रञ्च विन्दति।
स्मृतिं च परमां[7] लब्ध्वा योगमाप्नोति सुव्रतः ॥७॥

शीतवर्षाद्युपद्रवरहितं दृढं गृहमुत्पाद्य त्रिदण्ड्येकदण्डिभ्योऽवस्थानार्थं सङ्कल्प्य दद्यात्। ॐ स्कन्दपुराणोक्तावसथदानफलप्राप्तिकामोऽहं योगि-ब्रह्मचारि-ब्राह्मणविश्रामार्थमेतमावसथमुत्सृजे। ततआरभ्य यथायथं त्रिदण्डिन एकदण्डिनश्च विश्रामयेत्[8]।

आग्नेयपुराणे :—]

कारयित्वा दृढस्तम्भं [शुभं पक्के][9]-ष्टकामयम्।
प्रतिश्रयं [सुविस्तीर्णं सुभूमिं][10] लक्षणान्वितम् ॥८॥

शुभं शोभनं सुभूमिं[11] [12]परिकल्पितभूमिं लक्षणान्वितं मठलक्षणान्वितम्।

---

1 I. O. यामानुसर्पण
2 I. O. यथकाल०
3 I. O. विश्रमयेत्
4 I. O. चान्येव
5 I. O. विश्रमयेत्
6 I. O. आप्तापासं
7 I. O. परमं
8 I. O. विश्रमयेत्
9 A यर्त for the bracketed portion
10 I. O. सुविस्तीर्णांभूमि for the bracketed portion
11 I. O. भूमिं
12 I. O. परिकल्मितभूमिं

मठं कमठ(?)-[पृष्ठाभं भ्र(?)सितदिगम्बरम् ।][1]
सुधानुलिप्तं गुप्तञ्च सुखशाला[2]-विराजितम् ॥९॥

गुप्तं रक्षितं [3]प्राकारादिवेष्टितमित्यर्थः ।

दद्यादनन्तफलदं शैववैष्णवयोगिनाम् ॥१०॥

यथोक्तं मठं निर्माय शिवध्यानरतेभ्यो ब्राह्मणेभ्योऽथर्ववेदविहितपाशुपतव्रतधारिभ्यो वा विष्णुध्यानरतेभ्यो द्विजेभ्यो[4] भगवद्भ्यो वा उत्सृज्य दद्यात् । ॐ आग्नेयपुराणोक्त-मठ[5]-प्रतिश्रयदानफलप्राप्तिकामो शैवयोगिभ्यो वैष्णवयोगिभ्यो[6] विश्रामार्थमेतं सुखशालान्वितं [मठं प्रतिश्रययुतं ददानि इत्युत्सृजेत्][7] । ततःप्रभृति यथासम्भवमुपस्थिता-[न् शैवयोगिनो वैष्णवयोगिनो वा यथेच्छं][8] मठे विश्रामयेत्[9] ।

[10]वायुपुराणे (२।१८।५६) :—

[प्रतिश्रयन्तु यो][11] दद्यादतिथिभ्यः[12] कृताञ्जलिः ।
[13]देवास्तमुपतिष्ठन्ते दिव्यातिथ्यैः सहस्रशः ॥११॥

वातवर्षादिसहं[14] [15]गृहमुत्पाद्यातिथिभ्यो विश्रामार्थमुत्सृज्य दद्यात् । ॐ [16]वायुपुराणोक्तप्रतिश्रयदानफलप्राप्तिकामोऽहमतिथिभ्यो विश्रामार्थमेतं प्रतिश्रयमुत्सृजे । ततःप्रभृति यथाकालमुपस्थितानतिथीन् कृताञ्जलिरादरेण विश्रामयेत् ।

ब्रह्मपुराणे :—

गृहावसथदातारो गृहैः काञ्चनमण्डितैः ।
व्रजन्ति बालार्कनिभैर्धर्मराजगृहं नराः ॥१२॥

---

1 A omits the bracketed portion
2 A स्खप्राखान्
3 I. O. and A प्रकाराद्ि॰
4 I. O. omits द्विजेभ्यो
5 I. O. मत्
6 I. O. omits this
7 I. O. मठप्रतिश्रयमुत्सृजे इत्युत्सृज्य for the b. p.
8 A शैव योगिनो वा येच्छ for the b. p.
9 I. O. विश्रमयेत्
10 A पद्मपुराणे
11 Vāyu P. प्रतिश्रयं सदा for the b. p.
12 A दद्यादर्थिभ्यश्च
13 Vāyu P. देवास्ते संप्रतीच्छन्ते
14 A निमित्ताय for सहं
15 I. O. omits गृहम्
16 A पद्मपुराणोक्त॰

आवसथो विश्रामार्थं गृहम्[1]। श्रान्तविश्रामोचितं दृढं गृहमुत्पाद्य श्रान्तेभ्य उत्सृज्य दद्यात्। [ॐ ब्रह्मपुराणोक्तावसथदानफलप्राप्तिकामोऽहं श्रान्तविश्रामार्थमेतमावसथमुत्सृजे। ततःप्रभृति तस्मिन् वेश्मनि यथाकालमागतान् श्रान्तान् विश्रामयेत्।][2]

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे प्रतिश्रयदानावर्तः।

---

1 I. O. गृहं twice

2 A ब्रह्मपुराणे only for the bracketed portion

अथ प्रजापतिदव्रतशय्यादानावर्तः । (३९)

[1]विष्णु :—

शय्यादानेन भार्य्याम् ॥१॥

प्राप्नोतीति शेषः[2]। अत्र यजमानो ब्राह्मणायार्चितायार्चितां शय्यां दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं भार्य्याप्राप्तिकामोऽहमेतां शय्यां ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा शय्येयं प्रजापतिदैवतेत्युक्त्वा[3] यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा शय्यां स्पृशेत्।

याज्ञवल्क्यः (१।२११ख) :—

यानं वृक्षं प्रिया[4] शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२॥

ब्राह्मणायार्चितायार्चितां शय्याम् ॐ अद्यादि[5] तुभ्यमन्तमुक्त्वा दद्यात्। अत्यन्तसुखप्राप्तिकामोऽहमेतां शय्यां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु-५७।४०) :—

सुगन्धाचित्रास्तरणोपधानं दद्यान्नरो यः[6] शयनं द्विजाय।

रूपान्वितां[7] रूपवतीं[8] मनोज्ञां भार्य्यामपत्योपचितां लभेत् सः ॥३॥

उपधानं गेण्डुकम्। ब्राह्मणायार्चिताय शय्यां सुगन्धिचित्रास्तरणां सोपधानां [9]खट्वारूपामर्चियाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तशय्यादानफलप्राप्तिकामोऽहमेतत् [10]सास्तरणोपधानं शयनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A reads विष्णु: before the heading of this topic, just above.

2 A प्राप्नोतीत्यर्थः

3 I. O. प्रजापतिदैवतेति पठित्वा

4 A and I. O. प्रिय

5 A प्रतिग्रहीता for ॐ अद्यादि

6 A सुयज्ञ for नरो यः

7 A रूपान्वितां

8 A दक्षवतीं

9 I. O. adds पट्टरूपाम् after खट्वारूपाम्

10 A स्तरणोपधानम्

स्कन्दपुराणे :—

यस्तु शय्यां प्रयच्छेत स्वास्तीर्णां नरसत्तम ।
स हि भार्य्याः प्रिया दिव्या बह्वीर्भर्त्ता[1] समश्नुते[2] ॥४॥

स्वास्तीर्णां खट्वोपरिविस्तृतशोभनरूपाम् । अर्चितां स्वास्तीर्णां शय्यामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्कन्दपुराणोक्त-शय्यादानफलप्राप्तिकामोऽह-मेतां स्वास्तीर्णां शय्यां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

शिवपुराणे :—

शय्याप्रदानं यो दद्याद् ब्राह्मणेभ्यो[3] विशेषतः ।
षष्टिं वर्षसहस्राणि स्वर्गलोके महीयते ।
यदि कालक्षयं गत्वा[4] जायते विपुले कुले ॥५॥

[5]यथेष्टसंख्यब्राह्मणेभ्योऽर्च्चितेभ्यो[6] यथाशक्ति शय्यामर्च्चितां[7] दद्यात् । ॐ अद्या-मुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं शिव-पुराणोक्तशय्यादानफलप्राप्तिकामोऽहमेताः शय्या ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अत्र फलोत्कर्षादुत्कृष्टशय्यादानम् ।

आदित्यपुराणे :—

ये च शय्यां प्रयच्छन्ति देवेषु च गुरुष्विह ।
ज्ञानवृद्धेषु विप्रेषु दत्त्वा नश्यन्ति कण्टकम् ॥६॥

सम्प्रदानबहुत्वं दातृबहुत्वापेक्षम् । गुरवे ब्राह्मणाय [8]बहुश्रुतायार्च्चितायार्च्चितां शय्याम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । कण्टकनाशकामोऽहमेतां शय्यां ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

[9]ब्रह्मपुराणे :—

[10]उपानद्युगलं छत्रं [11]शय्यासनमथापि च ।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥७॥

---

1 A बह्वीभर्त्ता, I. O. बह्वीभर्त्ताः
2 A समाप्नुते
3 I. O. ब्राह्मणेषु
4 A दत्वा
5 A यथेष्ट॰
6 A omits अर्च्चितेभ्यो
7 I. O. शय्या अर्च्चिता
8 A omits बहुश्रुतायार्च्चिताय
9 A omits ब्रह्मपुराणे
10 A पादुका for उपानद्
11 A शय्यां काष्ठं for शय्यासनम्

ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाप्यलङ्कृताः ।

धर्मराजपुरं रम्यं छत्रैः सौवर्णराजतैः ॥८॥

अत्र फलोत्कर्षश्रवणादुत्कृष्टशय्यादानम् । ब्राह्मणायार्चिताया[1]-र्चितां शय्याम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ब्रह्मपुराणोक्त-शय्यादानफलप्राप्तिकामोऽहमेतां शय्यां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३११।२-३) :—

दत्त्वा द्विजाय शयनं स्वास्तीर्णं सोत्तरच्छदम् ।

कुले महति [सम्भूतां रूपद्रविणसंयुताम्][2] ॥९॥

तथा पत्नवतीं[3] भार्य्यां प्राप्नोति वशगां[4] तथा ।

अनेनैव तु दानेन भार्य्या पतिमवाप्नुयात् ॥१०॥

[5]पत्नवतीं कुटुम्बिनीम् । भार्या पतिमिति[6] महाकुलत्वादियुक्तं पतिमित्युन्नेयम् । शय्यां सुपरिष्कृतामुपरि[7]-वस्त्राच्छादितामर्चिता[8] मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-स्वास्तीर्णशय्यादानफलप्राप्तिकामोऽह-[मेतत् सोत्तरच्छदं शयनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३११।२५ख) :—

शय्याप्रदानं लोकेषु तथा स्थानकरं परम् ॥११॥

ब्राह्मणायार्चिताय यथाशक्त्युपकल्पितां शय्यामर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तानुपकरणशय्यादानफलप्राप्तिकामोऽह][9]-मेतां शय्यां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे शय्यादानावर्तः ।

---

1 I. O. omits अर्चिताय

2 Corrected from V. D. I. O. रूपभूतो रूपद्रविणसंयुतम् and A सम्भूतां रूपद्रविणसम्पदा for the b. p.

3 A दत्तवतीं

4 Corrected from V. D. A मवशां and I. O. च समां

5 A दत्तवतीं

6 I. O. पति for पतिमिति

7 I. O. सुपरिष्कृता परि, A उप-ष्कृतामुपरि

8 A omits अर्चिताम्

9 A omits the bracketed portion

अथ विष्णुदैवतेन्धनदानावर्तः[1] । (४०)

विष्णुः :—

इन्धनप्रदानेन दीप्ताग्निर्भवति संग्रामे च जयमाप्नोति ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितमिन्धनं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णूक्तेन्धनदानफलप्राप्तिकामोऽहमेतदिन्धनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा इदमिन्धनं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । [2]प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा[3] इन्धनं स्पृशेत् ।

महाभारते ब्राह्मणायेन्धनदानानुवृत्तौ (अनु—६५।१४ख-१६क) :—

प्रतापनार्थं राजेन्द्र व्रतवद्भ्यः[4] सदा नरः ।

सिध्यन्त्यर्थाः सदा तस्य कार्य्याणि विविधानि च ॥२॥

उपर्युपरि शत्रूणां वपुषा दीप्यते च सः ।

भगवांश्चास्य सुप्रीतो[5] वह्निर्भवति नित्यशः ॥३॥

[6]शीतार्त्तानां [7]व्रतकृच्छ्रब्राह्मणानां प्रतापनार्थं काष्ठान्युत्सृज्य दद्यात् । ॐ महाभारतोक्तप्रतापनार्थकाष्ठदानफलप्राप्तिकामोऽहं [8]व्रतपरब्राह्मणेभ्यः प्रतापनार्थं काष्ठमुत्सृजे । [9][ततः काष्ठानि दद्यात् । तत्कार्य्योण्यानुवृत्त्या[10] सदेतिपददर्शनात् ।

आग्नेयपुराणे :—

य इन्धनानि काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।

सर्वार्थास्तस्य सिध्यन्ति तेजस्वी चाभिजायते ॥४॥

इन्धनानि[11] काष्ठविशेषणं वह्निप्रज्वालनोपयोगीनि काष्ठानीत्यर्थः । अर्चितेभ्यो ब्राह्मणेभ्योऽर्चितानि काष्ठानि दद्यात् । ॐ] अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यो

---

1 A omits this heading, I. O. ...दैवत इन्धन...

2 A प्रतिग्रहीता स्वस्तीत्युक्त्वा इन्धनं ददानि before this

3 A omits सावित्रीं पठित्वा

4 I. O. व्रतवद्भ्यः

5 I. O. सुप्रीतो

6 I, O. शीतार्त्तानां

7 A व्रतकृच्छ्र°, I. O. कृच्छ्र°

8 I. O. व्रतवद्ब्राह्मणेभ्यः

9 A reads the following only for the bracketed portion viz. ततः काष्ठान्याहृत्य दद्यात्

10 I. O. °वृत्यात्

11 I. O. इन्धनादीनि

[ऽमुकामुकदेवशर्मभ्यो][1] युष्मभ्यमाग्नेयपुराणोक्तकाष्ठदानफलप्राप्तिकामोऽहमेतानि काष्ठानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। उत्सृज्य वा क्रमशो दद्यात्।

मार्कण्डेयपुराणे (१०।५७क) यममार्गगमनानुवृत्तौ :—

शीतं [2]जयन्तीन्धनदाः ॥५॥

अर्चिताय ब्राह्मणायार्चितमिन्धनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मार्कण्डेयपुराणोक्तेन्धनदानफलप्राप्तिकामोऽहमेतदिन्धनं ददानि। [3]स्वस्त्यादिस्वीकारान्तं पूर्ववत्। सङ्कल्प्य वा क्रमशो दद्यात्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे इन्धनदानावर्तः।

---

1 A omits the bracketed portion

2 Mārkaṇḍeya P. जयन्ति धनदाः

3 A reads this sentence before शीतं जयन्तीन्धनदाः (V. 5)

[1]अथ विष्णुदैवतदीपदानावर्त्तः। (४१)

तत्र दीपदानस्तुतिः।

महाभारते (cf. अनु—१३०।२६ख) :—

प्रदीपस्य प्रदानेन श्रूयतां गुणविस्तरः।
तमोऽन्धकारे नियतं[2] दीपदो न प्रणश्यति[3] ॥१॥
प्रभाश्चास्य[4] प्रयच्छन्ति सोमभास्करपावकाः[5]।
देवताश्चानुमन्यन्ते विमलाः सर्वतो दिशः ॥२॥
द्योतते च यथादित्यः स्वर्गलोकगतो[6] नरः।
तस्माद्दीपः प्रदातव्यः पानीयञ्च विशेषतः ॥३॥
यस्मादूर्द्ध्वगमेतत्तु तमसश्चैव भेषजम्।
तस्मादूर्द्ध्वगतिर्दाता[7] भवत्यत्रेति निश्चयः ॥४॥
देवास्तेजस्विनो यस्मात् प्रभावन्तः प्रकाशकाः।
तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते ॥५॥
आलोकदानाच्चक्षुष्मान्[8] प्रभायुक्तो भवेन्नरः।
तान् दत्त्वा नोपहिंसेत न हरेन्नोपनाशयेत्[9] ॥६॥
दीपहर्त्ता भवेदन्धस्तमोगतिरसुप्रभः।
दीपप्रदः स्वर्गलोके दीपमालेव[10] राजते ॥७॥

ब्रह्मपुराणे :—

दीपदा [11]यान्ति यानैस्तु दीपयन्तो दिशो दश।
आदित्यसदृशैर्यानैर्दीप्यमाना[12] यथाग्नयः ॥८॥

---

1 A omits this heading
2 A तमोन्धकारनियतां
3 A दीपदा न प्रपश्यति
4 A प्रभावश्मे
5 A ०पावगाः
6 I. O. स्वर्गलोकागतो, A प्रेतलोकगतो
7 A ०गतिलाभ
8 I. O. ०द्दानाचक्षुष्मान्
9 A ०नोपनाशयेत्, I. O. ०नोपवासयेत्
10 A दीपदामेव
11 I. O. यान्तु पारेच
12 A ०दीर्पमाना

वराहपुराणे (almost the same as २०७।५२ख-५३क) :—

[1]दीपप्रदानेन द्युतिं लभन्ते घृतेन तेजः सुकुमारताञ्च[2] ।
प्राणद्युतिं[3] स्निग्धताञ्चापि तैलै-[4]र्द्रव्यैर्नानारसतृप्तताञ्च ॥९॥

नन्दिपुराणे :—

याम्यं तमोमयं घोरं [5]वनं दुर्गं महाभयम् ।
[6]व्रजन्ति ते च सुखिनो ये केचिद्दीपदायिनः ॥१०॥

अथ दीपदानपरिभाषा ।

महाभारते :—

हविषा प्रथमः कल्पो द्वितीयश्चौषधी × ।
वसामेदोऽस्थि-[7]निर्यासैर्न कार्य्यः पुष्टिमिच्छता[8] ॥११॥

विष्णुधर्मोत्तरे :—

घृतेन दीपा दातव्या तैलेर्वा यदुनन्दन ।
वसामज्जादिभिर्देया न तु दीपाः कथञ्चन ॥१२॥
[9]दत्त्वा दीपं न कर्तव्यं तेन कर्म विजानता ।
निर्वापणञ्च दीपस्य हिंसनञ्च विगर्हितम् ॥१३॥
यः कुर्यात्तानि[10] कर्माणि स्यादसौ पुष्पितेक्षणः ।
दीपहर्त्ता भवेदन्धः काणो निर्वापको[11] भवेत् ।
दीपस्य दानात् परं दानं न भूतं न भविष्यति ॥१४॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

भूदीपाश्चान्न[12]-वस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकस्वर्ण-[धुर्यान् दत्त्वा स्वर्गे][13] महीयते ॥१५॥

---

1 I. O. दीपप्रदाने दुर्गतिं लभते
2 I. O. स्वर्गमावभाञ्च
3 I. O. स्निग्धताञ्च
4 I. O. ०र्द्रव्य०
5 A वनदुर्गं for वनं दुर्गं
6 I. O. व्रजन्ते तेन
7 A नजार्वै for निर्यासै
8 I. O. ०मिच्छतः
9 I. O. नत्वा
10 I. O. कुर्यात्तेन. A कुर्यात्तन
11 I. O. निर्दीपको
12 I. O. ०श्चान्न०
13 I. O. धूपान् स्वर्गलोके for the bracketed portion

[1]इदं ब्राह्मणमात्रदेयभूम्यादिसमभिव्याहारात् ब्राह्मणाय [2]दीपदानम्। अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं दीपं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्ष-[3]स्वर्गप्राप्तिकामोऽहमेतं दीपं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [दीपोऽयं विष्णुदैवत इत्युक्त्वा][4] यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा दीपं स्पृशेत्।

शिवपुराणे :—

दीपप्रदानं[5] यो दद्याद् दैवते ब्राह्मणेषु च[6]।
तेन दीपप्रदानेन [7]अक्षय्यां गतिमाप्नुयात् ॥१६॥

ब्राह्मणेष्विति बहुवचनं प्रयोगबहुत्वापेक्षया। अर्चिताय [8]ब्राह्मणायार्चितं दीपम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [9]अक्षय्यगतिप्राप्तिकामोऽहमेतं दीपं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

दीपं ददाति यो मर्त्यः सुरब्राह्मणवेश्मनि[10]।
स [11]दिव्येन तु [12]यानेन महाद्युति[13]-प्रभासिना[14]।
[15]गच्छति स्वर्गमण्डलं वसेत्तत्र समाः शतम् ॥१७॥

[16]गृहीतोदपूर्णताम्रपात्र उदङ्मुखो दीपदानं सङ्कल्प्य ब्राह्मणवेश्मसु [17]यथेच्छकालावधि दद्यात्। ॐ नन्दिपुराणोक्त-[18]ब्राह्मणवेश्म-दीपदानफलप्राप्तिकामोऽहं ब्राह्मणवेश्मसु दीपं दास्ये[19]। [20][अथ फलभूयस्त्वाद् यथेष्ट]-चिरकालदीपदानम्।

---

1 A ततः
2 A omits दीप
3 A फल०
4 A omits the bracketed portion
5 A दीपं प्रासाद
6 A वा
7 I. O. अन्यथां
8 A omits ब्राह्मणाय
9 I. O. अन्यथ०
10 A देवब्राह्मणवेश्मनि, I. O. सुरब्राह्मणवेश्मनां
11 I. O. दिव्येन
12 I. O. यानेन, A जालेन
13 I. O. महाप्रभ
14 A प्रभासिना
15 I. O. गच्छति
16 A reads तत before गृहीतो०
17 A यथेच्छया
18 A adds इह before ब्राह्मण०
19 A ददानि
20 A श्रुतिस्मृतिसंभूयवचने for the bracketed portion

शाम्बपुराणे :—

दीपं ददाति[1] यो नित्यं देवतायतनेषु च ।

चतुष्पथेषु रथ्यासु रूपवान् [2]सुभगो भवेत् ॥१८॥

चतुष्पथेषु दीपदानं पूर्ववत् सङ्कल्पयेत् । ॐ शाम्बपुराणोक्तदीपदानफलप्राप्तिकामोऽहं चतुष्पथेषु दीपं दास्ये । ततो यथेष्टचिरकालावधि दद्यात् । रथ्यासु दीपदाने रथ्यास्विति [3]दानवाक्ये विशेषः । फलभूय-[स्त्वार्थिनोक्तदेशे[4]-ष्वेकदैव दीपा देयाः । [5]अत्र च वाक्येऽमुकामुक-[6]देवतायतनेषु चतुष्पथेषु[7] रथ्यासु च दीपं दास्य इति विशेषः ।

महाभारते (cf. अनु-५७।२२) :—

[8]दीपालोकप्रदानेन चक्षुष्मान् [9]भवते नरः ।

तस्माद्दीपाः प्रदातव्याः [10]सायं वै गृहमेधिभिः ।

[11]दिव्यं चक्षुरवाप्नोति [12]प्रेत्य दीपस्य दायकः ॥१९॥

शुचौ स्थाने [13]सायं यथेष्ट-[14]बहुसंख्यान् दीपान् यथेष्टचिरकालावधि सङ्कल्प्य दद्यात् । ॐ महाभारतोक्त-सायं-दीपदानफलप्राप्तिकामोऽहं साय-[15]मेतान् दीपान् दास्ये ।

विष्णुधर्मोत्तरे :—

दीपदान-[16][न्तु कर्तव्यं विप्र]-वेश्मसु पण्डितैः ॥२०॥

एतद्दीपदानं[17] मोक्षफलम् । अन्यत्र दीपदानेन महत्फलमवाप्नुयादित्यनन्तर[18]-श्रुतेः । महत्फलं मोक्षः । अन्यत्रेति देवगृह-[19]व्यतिरिक्ते दीपदानस्थान इत्यर्थः । दीपदानं सङ्कल्प्य जन्मसंस्कारविद्यासम्पन्नब्राह्मणगृहेषु चिरं दद्यात् । ॐ विष्णुधर्मोत्तरोक्तविप्रगृहदीपदान-फलप्राप्तिकामोऽहं विप्रगृहेषु दीपान् [20]दास्ये ।

---

1 A ददामि
2 A सुखभगो
3 A and I. O. लिखितदानवाक्ये
4 A स्त्वाविव राष्ट्रायतने चतुष्पथादि for the bracketed portion
5 A तत्र for अत्र च
6 I. O. देवायतनेषु
7 A चतुष्पथ
8 A यस्माद्दीपप्रदानेन
9 A भवति
10 A सायाह्ने for सायं वै
11 A दिव्यचक्षुमवाप्नोति
12 A प्रत्य
13 A omits सायं
14 A चिरकाल for बहु
15 A एतं दीपं
16 I. O. स्थान इत्यर्थः for the bracketed portion
17 A °दानस्य
18 A उत्तरत्र for अनन्तर
19 I. O. °व्यतिरिक्तान् दीप for °व्यतिरिक्ते
20 A दद्यात्

तथा :—

गिरिशृङ्गे प्रदातव्या नदीनां [1]पुलिनेषु च ।
वृक्षमूलेषु गोष्ठेषु [2]कान्तारगहनेषु च ।
दीपदानेन सर्वत्र महत् फलमुपाश्नुते ॥२१॥
[3]यावन्त्यक्षिनिमेषाणि दीपः प्रज्वलते नृप ।
तावन्त्येव स राजेन्द्र वर्षाणि दिवि मोदते ॥२२॥
दीपदानेन राजेन्द्र चक्षुष्मानिह जायते ।
रूपसौभाग्ययुक्तश्च धनधान्यसमन्वितः ॥२३॥

[4]गिरिशृङ्गादिषु पूर्वोक्तेषु दीपदानं पूर्ववत् सङ्कल्पयेत्[5]। ॐ [6]विष्णुधर्मोत्तरोक्त-गिरिशृङ्गदीपदानफलप्राप्तिकामोऽहं गिरिशृङ्गे दीपं दास्ये इति सङ्कल्प्य गिरिशृङ्गे यथेष्टकालावधि दीपं दद्यात्। एवं नदीपुलिनदीपदानफलप्राप्तिकामोऽहं [7][नदीपुलिन इति। वृक्षमूलदीपदानफलप्राप्तिकामोऽहं] वृक्षमूल इति। गोष्ठदीपदान-[8]फलप्राप्तिकामोऽहं गोष्ठ इति। कान्तारदीपदानफलप्राप्तिकामोऽहं कान्तार इति। वनदीपदानफलप्राप्तिकामोऽहं[9][वन इति लिखितवाक्ये विशेषः। अत्र फलभूयस्त्वार्थिनोक्तदेशेषु एकदैव दीपा देयाः। तत्र दानवाक्यम्। ॐ विष्णुधर्मोत्तरोक्त-महत्फलजनकत्वोपलक्षितदीपदानफलप्राप्तिकामोऽहं] गिरिशृङ्ग-नदीपुलिन-वृक्षमूल-गोष्ठ-कान्तारवनेषु दीपान् दास्ये इति सङ्कल्प्य उक्तस्थानेषु दीपान् दद्यात्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे दीपदानावर्तः।

---

1 A अनिलेषु च
2 A कान्तारे गहनेषु
3 I. O. यावन्नाक्षि०
4 A गिरिशृङ्गानिषु
5 A omits सङ्कल्पयेत्
6 I. O. विष्णुधर्मोक्त
7 A omits the bracketed portion
8 A omits फल
9 A omits the bracketed portion

अथ सरस्वतीदैवतपुराणदानावर्तः। (४२)

मत्स्यपुराणे (५३।३-४) :—

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा[1] स्मृतम्।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥१॥
[पुराणमेकमेवासी-[2]त्तस्मिन् कल्पान्तरे सदा।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥२॥

[3]तथा (५३।११-५६) —

[4]तदर्थोऽत्र चतुर्लक्षैः संक्षेपेण प्रदर्शितः।][5]
पुराणानि दशाष्टौ च [6]साम्प्रतं तदिहोच्यते ॥३॥
नामतस्तानि वक्ष्यामि[7] शृणुध्वमृषिसत्तमाः।
ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये।
ब्राह्मं [8]तद्दशसाहस्रं पुराणं परिकीर्त्यते ॥४॥
लिखित्वा तच्च[9] यो दद्याज्जलधेनुसमन्वितम्।
वैशाखे पौर्णमास्यां स ब्रह्मलोके महीयते ॥५॥
एतदेव यदा पद्ममभूद्धिरण्मयं जगत्।
[10]तद्वृत्तान्ताश्रयन्तद्वत् [11]पाद्ममित्युच्यते बुधैः ॥६॥
[12]पाद्मं तत् पञ्चपञ्चाशत् सहस्राणीह पठ्यते।
तत्पुराणञ्च यो [13]दद्यात् सुवर्णकमलान्वितम्।
ज्यैष्ठे मासि तिलैर्युक्तं सोऽश्वमेधफलं लभेत् ॥७॥

---

1 A ब्रह्माण
2 M. P. ०तदा कल्पान्तरेऽनघ
3 A omits तथा
4 A reads this line as तदर्थो च चतुर्लक्षौ संक्षेपात्र प्रदर्शित:
5 A repeats the bracketed portion
6 A संप्रतं
7 A वक्षामि
8 M. P. त्रिदश०
9 I. O. तत्र
10 A तत्तथान्ताश्रयं तद्वत्
11 A पद्म०
12 A पद्मं
13 I. O. दत्वा

अत्र पौर्णमासीप्रकरणात् [1]ज्यैष्ठपौर्णमासी प्राह्या ।

[2]वराहकल्पवृत्तान्तमधिकृत्य पराशरः ।
[3]यान् प्राह धर्मानखिलांस्तद्युक्तं वैष्णवं विदुः ॥८॥
[4]तदाषाढे तु यो दद्याद् घृतधेनुसमन्वितम् ।
पौर्णमास्यां [5]हि पूतात्मा स पदं याति [6]वारुणम् ॥९॥
त्रयोविंशतिसाहस्रं तत्-[7]पुराणं विदुर्बुधाः ।
श्वेतकल्पप्रसङ्गेन [8]धर्मान् वायुरिहाब्रवीत् ॥१०॥
यत्र तद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम् ।
[9]चतुर्विंशत्सहस्राणि पुराणं तदिहोच्यते ॥११॥
[10]श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम् ।
यो दद्याद्-धि[11]-संयुक्तं ब्राह्मणाय कुटुम्बिने ।
शिवलोके [12]स शान्तात्मा कल्पमेकं वसेन्नरः ॥१२॥
[13]यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं[14] [15]तद्भागवतमुच्यते ॥१३॥
[16][सारस्वतस्य कल्पस्य मध्ये [17]ये स्युर्नरोत्तमाः ।
तद्वृत्तान्तोद्भवं लोके तद्भागवत-[18]मुच्यते ॥१४॥]

---

1 A जैष्ठमासी जैष्ठमासीकपौर्णमासी
2 A वराहकल्पानुवृत्तो अधिकृत्य and M. P. वाराह०
3 A यत्तं ह
4 A तदामाषा
5 A विपूतात्मा
6 A वारुणम्
7 M. P. ०प्रमाणं
8 Corrected from M. P. A धर्मात्मापूर्वितात्रवीत् and I. O. धर्मार्थायु०
9 A चतुर्विंशत्वाह भादिपुराणं
10 A श्रावण्यां
11 M. P. वृष० and A गाव० for दधि
12 A समन्ताहा and M. P. स पूतात्मा
13 I. O. यत्राधिक्ष गायत्री
14 A यत्र for पेतं
15 I. O. तद्भागवत उच्यते
16 A omits the bracketed portion
17 I. O. येषु नरामरा:
18 I. O. उ for मु

लिखित्वा [1]तच्च यो दद्याद्धेम-[2]शृङ्गसमन्वितम् ।
पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम् ।
अष्टादशसहस्राणि पुराणं [3]तत् प्रकीर्त्तितम्[4] ॥१५॥
यत्राह नारदो धर्मान् [5]वृहत्कल्पा-[6]श्रयांस्त्विह ।
[7]पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते ॥१६॥
[8]आश्विने पञ्चदश्यान्तु यो दद्याद्धेनुसंयुतम् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥१७॥
[9]यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणा ।
[10][व्याख्याता वै मुनिप्रश्ने मुनिभिर्धर्मचारिभिः ॥१८॥
मार्कण्डेयेन कथितं तत् सर्वं विस्तरेण तु ।]
पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते ॥१९॥
[11]प्रतिलिख्य तु यो दद्यात् सौवर्ण-[12]करिसंयुतम् ।
कार्त्तिक्यां पुण्डरीकस्य [13]यज्ञस्य फलभाग् भवेत् ॥२०॥
[14]यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च ।
वशिष्ठा-[15]याग्निना प्रोक्तमाग्नेयं तत् प्रचक्षते ॥२१॥
लेखयित्वा च यो दद्या-[16]द्धेमपद्मसमन्वितम् ।
[17]मार्गशीर्ष्यां विधानेन तिलधेनुयुतं तथा ।
तच्च षोडशसाहस्रं सर्व-[18]क्रतुफलप्रदम् ॥२२॥

---

1 I. O. तत्र
2 I. O. ०सिंह०
3 I. O. तं
4 M. P. प्रचक्षते
5 A वृहतकन्याश्रयन्तिह
6 M. P, ०श्रयाभि च
7 A पञ्चविंशत्याह मुनिर्नारदीयं तदुच्यते
8 A तहिने, I. O. तद्दोये
9 I. O. repeats पञ्चविंशत्...तदुच्यते of V. 16 before this
10 A omits the bracketed portion, I. O. reads the first line of the b. p. as व्याख्यानं जैमिनिप्रश्ने पक्षिभिर्धर्मचारिभिः
11 Corrected from M. P. I. O. परिलिखन्तु यो दद्या, A परिलिख्य etc.
12 Corrected from M. P. A कवि०, I. O. कमि०
13 A सकल
14 M. P. यत्तदीशानकं कल्पं, I. O. and A यत् दीशानकल्पस्य
15 A omits या
16 A हेमहय च चतुर्मुखम्
17 Corrected from M. P. A मार्गशीर्षं, I. O. मार्गशीर्षी
18 A धर्म for क्रतु

यत्राधिकृत्य [1]माहात्म्यमादित्यस्य चतुर्मुखः ।
अघोरकल्पवृत्तान्तप्रसङ्गेन [2]जगत्स्थितिम् ॥२३॥
मनवे कथयामास भूतग्रामस्य लक्षणम् ।
चतुर्दशसहस्राणि तथा [3]पञ्चशतानि च ।
[4]भविष्यच्चरितप्रायं भविष्यं तदिहोच्यते ॥२४॥
तत् पौषे मासि यो दद्यात् पौर्णमास्यां विमत्सरः[5] ।
[6]गुडकुम्भसमायुक्तमग्निष्टोमफलं लभेत् ॥२५॥
[7]रथान्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च ।
[8]सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम् ॥२६॥
यत्र ब्रह्मवराहस्य [9]चरितं [10]वर्ण्यते मुहुः ।
तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ॥२७॥
पुराणं ब्रह्मवैवर्त्तं दद्याद् यो माघमासि तु[11] ।
पौर्णमास्यां [12]सभवनं ब्रह्मलोके महीयते ॥२८॥

[सभवनं गृहसहितम् ।][13]

यत्राग्निलिङ्ग[14]-मध्यस्थः प्राह देवो महेश्वरः ।
धर्मार्थकाम-[15]मोक्षार्थानाग्नेयमधिकृत्य च ।
[16][कल्पान्ते लैङ्गमित्युक्तं[17] पुराणं ब्रह्मणा स्वयम् ॥२९॥

---

1 A माहात्म्यैमादित्यस्य
2 A जगत्स्थितिं
3 A द्वय०
4 M. P. भविष्यचरित० I. O. भविष्य-च्चमित०
5 Corrected from M. P. I. O. and A विशेषत:
6 I. O. गुड०
7 I. O. रायन्तरस्य, M. P. रथन्तरस्य
8 Corrected from M.P. A नाम यदाह and I. O. सावर्णिर्नाराय-णायाह
9 I. O. रचितं, M. P. चोद्दन्तं
10 M. P. वर्णितं
11 A and M. P. च
12 A स भगवान्, M. P. शुभद्दिने
13 A omits the bracketed portion
14 I. O. सिद्धं for लिङ्ग
15 A मोक्षाणां for मोक्षार्थान्
16 I. O. omits the bracketed portion
17 Corrected from M. P. A कल्पं तल्लिङ्गमुदार्य्य

तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ।
तिलधेनुसमायुक्तं स याति शिव [1]सात्मताम् ॥३०॥
महावराहस्य [2]पुनर्माहात्म्यमधिकृत्य च ।]
विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते ॥३१॥
मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तमाः ।
[3]चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ॥३२॥
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ।
पौर्णमास्यां [4]मघौ दद्याद् ब्राह्मणाय कुटुम्बिने ।
वराहस्य प्रसादेन पदमाप्नोति वैष्णवम् ॥३३॥
यत्र माहेश्वरं धर्ममधिकृत्य च षण्मुखः[5] ।
[6]कल्पे [7][तत्-[8]पुरुषे वृत्ते चरितैरुपशोभितम् ॥३४॥
स्कान्दं नाम पुराणन्तु [9]ह्येकाशीतिर्निगद्यते ।
सहस्राणि शतञ्चैकमिति[यत्नेन पठ्यते][10] ।३५॥
परिलिख्य च यो दद्याद्धेमशूलसमन्वितम् ।
शैवं पदमवाप्नोति मीने चोपागते[11] रवौ ॥३६॥

अत्रैकस्मिन् वाक्ये पौर्णमास्यां मघाविति माससहितपौर्णमासीश्रवणादन्यत्र च मीने चोपागते रवाविति तिथिविशेषाश्रवणात् अन्योन्यापेक्षया चैत्रपौर्णमास्यामेव दानद्वयम् ।

त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ।
त्रिवर्गमभ्यधाद् यत्र[12] वामनं परिकीर्त्यते[13] ॥३७॥
पुराणं दशसाहस्रं [14]कौर्मकल्पानुगं शिवम् ।
यः शरद्विषुवे दद्याद्वैष्णवं यात्यसौ पदम् ॥३८॥

---

1 M. P. ०साम्यताम्
2 Corrected from M. P. A पुरा for पुनर्
3 A चतुर्विंशं
4 Corrected from M P. A च यो and I. O. तु यो
5 Corrected from M. P. A सन्मुखः, I. O. षड् मुखः
6 A कल्प
7 A omits the bracketed portion
8 M. P. ०पुरुषं वृत्तं
9 Corrected from M. P. I. O. देकाशीति०
10 M. P. मर्त्येषु गद्यते for the b. p.
11 Corrected from M. P. I. O. वोपगते
12 M. P. ०धात्तथ
13 M. P. परिकीर्तितम्
14 M. P. कूर्म०

यत्र धर्मार्थकामानां मोक्षस्य च रसातले ।
माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥३९॥
[1]इन्द्रद्युम्नप्रसङ्गेन ऋषीणां [2]शक्रसन्निधौ ।
[3]अष्टादशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ॥४०॥
यो दद्यादयने [4]कौर्मं हेमकूर्मसमन्वितम् ।
गोसहस्रप्रदानस्य[5] स फलं प्राप्नुयान्नरः ॥४१॥
श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः ।
मत्स्य-[6]रूपी च मनवे नरसिंहोपवर्णनम् ॥४२॥
अधिकृत्याब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः[7] ।
तन्मात्स्यमिति जानीध्वं सहस्राणि [8]त्रयोदश ॥४३॥
विषुवे हेममत्स्येन धेन्वा चैव समन्वितम् ।
यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला ॥४४॥
यदा च गारुडे कल्पे [9]विश्वाण्डाद् गरुडोद्भवम् ।
अधिकृत्याब्रवीत् [10]कृष्णो गारुडं तदिहोच्यते ।
[11][तदष्टादशकं चैव] सहस्राणीह पठ्यते ॥४५॥
[12][सौवर्णहंसमिथुनसंयुक्तं विषुवे नराः ।
यो ददाति पुमान् सिद्धिमाप्नोति शिवसम्मितः ॥४६॥]

शिवसम्मितः शिवतुल्यरूपः । अतएव सिद्धिमणिमाद्यष्टैश्वर्यम् ।

ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत् पुनः ।
तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ॥४७॥

---

1 Corrected from M. P. I. O. इन्द्रस्य सु॰
2 Corrected from M. P. I. O. शत्रु
3 Corrected from M. P. I. O. सप्तं
4 M. P. कूर्मं
5 Corrected from M. P. I. O. ॰प्रदानेन
6 M. P. ॰रूपेण for रूपी च
7 Corrected from M. P. I. O. सुमिवताः
8 M. P. चतुर्दश
9 Corrected from M. P. I. O. विश्वाण्ड
10 Corrected from M. P. I. O. कृष्णं
11 Corrected from M. P. I. O. reads the b. p. as तदष्टादश चैकच
12 M. P. reads the b. p. as सौवर्णहंससंयुक्तं यो ददाति पुमा-निह । स सिद्धिं लभते मुख्यां शिवलोके च संस्थितिम् ॥

भविष्याणाञ्च कल्पानां [1]श्रूयते यत्र विस्तरः ।
तद्ब्रह्माण्डपुराणन्तु ब्रह्मणा समुदाहृतम् ॥४८॥
यो [2]दद्यात्तु व्यतीपाते [3]पीतोर्णायुगसंयुतम् ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ॥४६॥

अत्राष्टादशपुराणानि लेखयित्वा यजमानो वैशाखपौर्णमास्यां शुचिं पुराणपाठशक्तं द्धालुं कुटुम्बिनं ब्राह्मणमभ्यर्च्य तस्मै पुराणोक्तजलधेनुसहितं ब्रह्मपुराणमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षब्रह्मलोकप्राप्ति- ामोऽहमेतज्जलधेनुसहितं ब्रह्मपुराणं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा ाणमिदं सरस्वतीदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैत- नप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा पुराणं ृह्णीत । एवमपरपुराणसप्तदशकदानेष्वपि दक्षिणादानं [4]सरस्वतीदेवतपुराणस्पर्शनं ीकरणञ्चोन्नेयम् । एवं ज्यैष्ठपौर्णमास्यां सौवर्णकमलतिलचुप्यडिकासहितपद्मपुराणदान- ाक्ये अश्वमेधफलप्राप्तिकामोऽहमेतत् सुवर्णकमलतिलसहितं पद्मपुराणं ददानीति विशेषः । आषाढपौर्णमास्यां मत्स्यपुराणोक्तघृतधेनुसहित-विष्णुपुराण-[6]दानवाक्ये पूतात्मतापूर्वकवारुण- दप्राप्तिकामोऽहमेतद्घृतधेनुसहितं विष्णुपुराणं ददानीति विशेषः । श्रावणपौर्णमास्यां धिपूर्णपात्रमत्स्यपुराणोक्तगुडधेनुसहितवायुपुराण-[7]दानवाक्ये शान्तात्मकत्वपूर्वकैककल्प- ावपुरवासकामोऽहमेतद्दधिगुडसहितं वायुपुराणं ददानीति विशेषः । भाद्रपौर्णमास्यां वर्णश्रृङ्गयुक्तभागवतपुराण-[8]दानवाक्ये परमपदप्राप्तिकामोऽहमेतत् सौवर्णश्रृङ्गसहितं ागवतपुराणं ददानीति विशेषः । आश्विनपौर्णमास्यां सुवर्णश्रृङ्गाद्यलङ्कृतस्वरूपधेनुसहित- ारदीयपुराण-[9]दानवाक्ये पुनरा]-वृत्तिदुर्लभ-परमसिद्धिप्राप्तिकामोऽहमेतत् सुवर्णश्रृङ्गाद्यल- ृतधेनुसहितं नारदीयपुराणं ददानीनि विशेषः । कार्तिकपौर्णमास्यां सौवर्णहस्तिसहित- ार्कण्डेयपुराणदानवाक्ये पुण्डरीकयज्ञफलप्राप्तिकामोऽहमेतत् सौवर्णहस्तिसहितं मार्कण्डेय- ुराणं ददानीति विशेषः । मार्गशीर्षपौर्णमास्यां मत्स्यपुराणोक्तसौवर्णपद्म[10]-तिलधेनु-

---

1 Corrected from M. P. I. O. स्तूयते
2 M. P. दद्यात्तद्
3 Corrected from M. P. I. O. पत्रोर्णां०
4 I. O. सरस्वतीदैवतच पुराणस्पर्शनच स्वीकरणमुन्नेयम्
5 I. O. आषाढे०
6 I. O. दाने
7 I. O. दाने
8 I. O. दाने
9 I. O. दाने
10 I. O. सौवर्णपद्ममत्स्यपुराणोक्त०, A omits सौवर्णपद्म

सहिताग्नेयपुराणदान[1]-वाक्ये सर्वक्रतु[2]-फलप्राप्तिकामोऽहमेतत् सौवर्णपद्मतिलधेनुसहितमाग्नेय-पुराणं ददानीति विशेषः। पौषपौर्णमास्यां गुडकुम्भसहितभविष्यपुराण[3]-दान[4]-वाक्ये अग्नि-ष्टोमफलप्राप्तिकामोऽहमेतद्गुडकुम्भसहितं भविष्यपुराणं ददानीति विशेषः। माघपौर्णमास्यां गृहसहितब्रह्मवैवर्त्तपुराणदान[5]-वाक्ये सोत्कर्षब्रह्मलोकप्राप्तिकामोऽहमेतत् सभवनं ब्रह्म-वैवर्त्तपुराणं ददानीति विशेषः। फाल्गुनपौर्णमास्यां मत्स्यपुराणोक्ततिलधेनुसहितलिङ्ग-पुराण[6] दान[7]-वाक्ये शिवसात्मताप्राप्तिकामोऽहमेतत्तिलधेनुसहितं लिङ्गपुराणं ददानीति विशेषः। चैत्रपौर्णमास्यां [8]मत्स्यपुराणोक्तसौवर्णगरुडतिलधेनुसहित-[9]वराहपुराणदान[10]-वाक्ये [11]वैष्णवपदप्राप्तिकामोऽहमेतत् सौवर्णगरुडतिलधेनुसहितं वराहपुराणं ददानीति विशेषः। तथा [12]तस्मिन् दिने सौवर्ण-[13]शूलसहितस्कन्दपुराण-[14]दानवाक्ये शैवपदप्राप्तिकामोऽहमेतत् सौवर्ण-[15]शूलसहितं स्कन्दपुराणं ददानीति विशेषः। शरद्विषुवे केवलवामनपुराण-[16]दान-वाक्ये वैष्णवपदप्राप्तिकामोऽहमेतद्वामनपुराणं ददानीति विशेषः। [17]उत्तरायणे सौवर्णकूर्म-सहितकूर्मपुराणदानवाक्ये गोसहस्रप्रदानफलप्राप्तिकामोऽहमेतत् सौवर्णकूर्मसहितं कूर्मपुराणं ददानीति विशेषः। वसन्तविषुवे सौवर्णमत्स्यसुवर्णशृङ्गाद्यलङ्कृतधेनुसहितमत्स्यपुराण[18]-दानवाक्ये अखिलपृथिवीदानफलप्राप्तिकामोऽहमेतत् सौवर्णमत्स्यसुवर्णशृङ्गाद्यलङ्कृतधेनुसहितं मत्स्यपुराणं ददानीति विशेषः। तथा वसन्तविषुव [19]एव सौवर्णहंसमिथुनसहित-[20]गरुडपुराणदानवाक्ये शिवसालोक्यपूर्वकसिद्धिप्राप्तिकामोऽहमेतत् सौवर्णहंसमिथुनसहितं [21]गरुडपुराणं ददानीति विशेषः। व्यतीपाते [22]धौतकौशेयवस्त्र[23]-युगयुतब्रह्माण्डपुराण[24]-दानवाक्ये राजसूयसहस्रफल-प्राप्तिकामोऽहमेतत [25]पीतोर्णायुगसहितं ब्रह्माण्डपुराणं ददानीति विशेषः।

---

1 I. O. द्दाने
2 A omits क्रतु
3 A ॰पुराणोक्तपुराण॰
4 I. O. द्दाने
5 I. O. द्दाने
6 A ॰पुराणोक्त॰
7 I. O. द्दाने
8 A omits मत्स्य, I. O. सौवर्ण-गरुडमत्स्यपुराणोक्त॰
9 A omits वराह
10 I. O. द्दाने
11 A विष्णु॰
12 A अस्मिन्नेव
13 I. O. ॰मूल॰
14 I. O. द्दाने
15 I. O. ॰मूल॰
16 I. O. द्दाने
17 A omits उत्तरायणे
18 A ॰पुराणोक्त॰
19 I. O. एतत्
20 I. O. गारुड॰
21 I. O. गारुडपुराणं
22 A धौत twice
23 I. O. ॰वस्
24 A ॰पुराणे
25 I. O. कौशेयवस्त्रयुग॰

कूर्मपुराणे (२।४६।१२२, १२४-१२६) :—

एतत् पुराणं [1]परमं भाषितं[2] कूर्मरूपिणा ।
साक्षाद्देवाति[3]-देवेन विष्णुना विश्वयोनिना ॥५०॥
लिखित्वा चैव यो दद्याद् वैशाखे [4]मासि सुव्रतः[5] ।
विप्राय वेदविदुषे[6] तस्य पुण्यं निबोधत ॥५१॥
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ।
भुक्त्वा तु विपुलान् [भोगान् स्वर्गे][7] दिव्यान् सुशोभनान् ॥५२॥
ततः स्वर्गात् परिभ्रष्टो विप्राणां जायते कुले ।
पूर्वसंस्कारमाहात्म्या[8]-द्ब्रह्मविद्यामवाप्नुयात् ॥५३॥

कूर्मपुराणं यथाशक्ति लेखयित्वार्चितं वैशाखाभिमततिथौ ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । कूर्मपुराणोक्त-कूर्मपुराणदानफलप्राप्तिकामोऽहमेतत् कूर्मपुराणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे पुराणदानावर्तः ।

---

1 K. P. सकलं
2 A भावितं
3 K. P. षि for ति
4 K. P. कार्त्तिकेऽपि वा for मासि सुव्रतः
5 I. O. तत्व्रतः
6 A विदुषे only
7 K. P. मर्त्यो भोगान् for the b. p.
8 A ० माहात्म्ये

अथ ब्रह्मदैवतविद्यादानावर्तः । (४३)

तत्र विद्यादानप्रशंसा ।

मनुः (४।२३३) :—

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।

[1]वार्यन्न-[2]गोमहीवास-[3]स्तिलकाञ्चनसर्पिषाम् ॥१॥

याज्ञवल्क्यः (१।२१२) :—

सर्वदानमयं[4] ब्रह्म प्रदानेभ्योऽधिकन्ततः[5] ।

[6]तं ददत् समवाप्नोति ब्रह्मलोकमविच्युतः[7] ॥२॥

यम :—

य इमां पृथिवीं दद्यात सर्वरत्नोपशोभिताम् ।

दद्याच्छास्त्रञ्च विप्राणां [8]तच्च दानञ्च च ततसमम् ॥३॥

आदित्यपुराणे :—

त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।

सर्वकामदुघा धेनुर्गावः पृथ्वी सरस्वती ॥४॥

विष्णुधर्मोत्तरे (३।३०३।१-४) :—

विद्या कामदुघा धेनुर्विद्या चक्षुरनुत्तमम् ।

[9][विद्यादानात् परं दानं न भूतं न भविष्यति ॥५॥

विद्यावान् सर्वकामानां भाजनं पुरुषो भवेत् ।

तस्माद्विद्यां हि ददता किं न दत्तं भवेदिह ॥६॥

पराध्यापनतः क्लेशं पुरुषस्तु यदश्नुते ।

तपस्तत् परमं तस्य ब्रह्मलोकं परं स्मृतम् ॥७॥

दानानामुत्तमं ह्येतत्तपसश्च तथोत्तमम् ।]

विद्यादानं महाभागाः[10] सर्वकामफलप्रदम् ॥८॥

---

1 I, O. पवित्र
2 I. O. गो
3 A स्तथाकाञ्चनसर्पिषो
4 A सर्वदानाश्रयं
5 A ०धिकन्तु तत्
6 A ऊर्द्ध्वलोकमवाप्नोति
7 A ०विच्युतं
8 I. O. तद्दानाभि
9 A omits the bracketed portion
10 A भद्राभाषग:

अथ विद्यादानस्वरूपं तत्फलञ्च ।

नन्दिपुराणे :—

शास्त्रे यस्माज्जगत् सर्वं संश्रितञ्च शुभाशुभम् ।
तस्माच्छास्त्रं प्रयत्नेन दातव्यं पुण्यकर्मणा ॥१॥
विद्याश्चतुर्दश प्रोक्ताः क्रमेण तु यथास्थिति[1] ।
षडङ्गाश्चतुरो वेदा धर्मशास्त्रं पुरातनम् ॥२॥

पुरातनं पुराणम् ।

मीमांसातर्कमपि च एता विद्यास्तु कीर्त्तिताः ।
[2]आसामेवान्तरोत्पन्नाः परा विद्याः सहस्रशः ॥३॥
आयुर्वेदः [3]शस्त्रवेदो धनुर्वेदः प्रकीर्त्तितः ।
सर्वोत्तमा [4]चात्मविद्या संसारभयनाशिनी ॥४॥
[5]सर्वदुःखान्तकरणी [6]सर्वपापविनाशिनी ।
एता विद्याः समाख्याता बहुभेदोपभेदजाः ॥५॥
कला विद्या तथा [7]वार्त्ता शिल्पविद्या तथापरा ।
[8]सर्वा एव महाभागाः [9][सर्वाः सर्वार्थसाधिकाः ॥६॥
स्थिताश्च तारतम्येन] विशिष्टफलसाधिकाः ।
आत्मविद्या प्रधाना तु तथायुर्वेदसंहिता[10] ॥७॥
धर्माधर्मप्रणयिनी कला शिल्पानुसाधिका[11] ।
[12]सैषा विद्या च वितता एता विद्या महाफलाः ॥८॥
[13]ययैको जीवति प्राणी कयापि [14]किल कुत्रचित् ।
अप्रधानापि सा विद्या कुलानां शतमुद्धरेत् ॥९॥

1 A and I. O. यथास्थितिः
2 A अस्मात् सर्वान्तरोत्पन्नाः
3 I. O. सत्यवेदो, A शस्त्रवेदो
4 I. O. चात्मविद्या
5 A सर्वदुःखान्तःकरणी
6 A ०प्रणाशिनी
7 I. O. वाच्याः
8 A सर्वत्रैव
9 A omits the bracketed portion
10 A ०संज्ञिका
11 I. O. ०गाधिका
12 A यस्य
13 I. O. ययैको
14 I. O. कत

यापि [1]साप्यवरोधत्वाद्विद्या वै यत्र कुत्रचित् ।
प्रापयत्यत्त्रयाल्लोँकान् विधिना [2]वाविधानतः ॥१०॥

[3][विधिना वाविधानतः] वक्ष्यमाणविधिना [4]विधानमन्तरेणैव दद्यादित्यर्थः ।

[5]शिल्पविद्यां नरो दत्त्वा याति वै ब्रह्मणोऽन्तिकम् ।
[6]कलाविद्यां नरो दत्त्वा वैष्णवं लोकमाप्नुयात् ।
[7]कल्पमेकं न सन्देहः स्वर्गभोगसमन्वितः ॥११॥
[8]शस्यविद्यां नरो दत्त्वा तृप्तिमान् कामसंयुतः ।
प्रजापतिपुरं गच्छेत् तारयन्नरकात् पितॄन् ॥१२॥
आयुर्वेदं नरो दत्त्वा लोकानाप्नोति निर्मलान् ।
[9]अश्विन्योर्दिव्यकामाढ्यं [10]मन्वन्तरशतं नरः ॥१३॥
तर्कविद्यां नरो दत्त्वा वारुणं लोकमाप्नुयात् ।
मीमांसान्तु बुधो दत्त्वा शास्त्रमिन्द्रपुरे[11]वसेत् ॥१४॥
धर्मशास्त्रं नरो दत्त्वा स्वर्गलोके महीयते ।
दशमन्वन्तरान् मर्त्यस्तारयेन्नरकात् पितॄन् ॥१५॥
[12]वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्या-[न्तु यो दद्यात्][13] तस्य संख्या न विद्यते ॥१६॥
[14]पुण्यश्चागदितं सम्यगपि वर्षशतायुतैः ।
एतावच्छक्यते वक्तुं यत् [15]कल्पायुतमुत्तमम् ।
सत्यलोके वसेन्मर्त्यो [16]यत्र ब्रह्म वसेत् प्रभुः ॥१७॥
अप्येवं [17]निरुजीकृत्य जन्तुं यादृशतादृशम् ।
आयुर्वेदप्रसादेन किं न दत्तं भवेद्भुवि ॥१८॥

---

1 A साप्यवरोधस्य
2 A omits वा
3 A इति for the bracketed portion
4 A विधानमन्तरेणैव वा
5 I. O. शिल्पे for शिल्प
6 A reads कलाविद्यां नरो दत्त्वा याति वै ब्रह्मणोऽन्तिकं before this line
7 I. O. कालमेकं
8 A यस्य विद्यां, I. O. सस्य०
9 I. O. अश्विनोर्दिव्यकामाद्यं, A अश्विन्योर्दिव्यकामाढ्यं
10 I. O. दिव्यं मन्वन्तरं
11 I. O. ०पुरी
12 I. O. वेदविद्यां
13 I. O. न्तपोविद्या for the b. p.
14 A पुण्यश्चागपितं
15 A कल्पान्तमनुत्तमं
16 A विष्णुर्यत्र
17 A नीरजीकृत्य

[1]शस्यवेदप्रसादेन सम्पन्ना यस्य[2] शालयः ।
किं नाम न कृतं [3]तत्र पुण्यं भवति शाश्वतम् ॥१६॥
मीमांसाशास्त्रमाहात्म्याद्बुद्ध्वा वै वेदनिर्णयम् ।
किं नाम न शुभं [4]दत्तं यज्ञकर्मप्रवर्तनात् ॥२०॥
आत्मविद्या च पौराणी धर्मशास्त्रात्मिका च या ।
एता विद्यास्तिस्रो मुख्याः सर्वदानक्रियाफलैः ॥२१॥
[5][धर्मशास्त्रं नरो बुद्ध्वा यत्किञ्चिद्धर्ममाश्रयेत् ।
तस्य धर्मं दशगुणं धर्मशास्त्रप्रदस्य वै ॥२२॥
पुराणाख्यानविद्वांसः पितृदेवार्चने रताः[6] ।]
लोकान् [7]सर्वान् कामपूर्णान् यान्ति सर्वशुभोदयान्[8] ॥२३॥
पुराणविद्यादातारस्त्वनन्तफलभागिनः ।
आत्मविद्याप्रदातारो नरा धर्मसमाश्रयाः ।
न पुनर्योनिनिरयं प्रविशन्ति दुरत्ययम् ॥२४॥
उत्तीर्णाः सर्वपापेभ्यः [9]सपुत्रपशुबान्धवाः ।
मुच्यन्ते निरयैर्घोरैर-[10]संख्यैर्यातनात्मकैः ॥२५॥

तथा :—

श्लोकं प्रहेलिकां [11]गाथामन्यद्वापि [12]सुभाषितम् ।
दत्त्वा प्रीतिकरं याति [13]लोकमप्सरसां शुभम् ॥२६॥
यदेतत् पुण्यमाख्यातं विद्यादानस्य साम्प्रतम् ।
देशकालविधिश्रद्धा-[14]पात्रयोगात्तथा बुधः ।
प्राप्नोति कोटिगुणितं फलं विद्याप्रदानतः ॥२७॥
यत्तु पुण्यपरो मर्त्यो जिगीषुः कीर्तिसाधकः ।
स विधानेन वै विद्यां दद्याद् विविधकामदाम् ॥२८॥

---

1 I. O. सस्य०, A सम्यक०
2 I. O. पश्य
3 A तत्र
4 I. O. दात्तं
5 A omits the bracketed portion
6 I. O. रत:
7 A सर्व्वांस्तमान पूर्णान्
8 I. O. सर्वशुभोदय:
9 A नरा: सपशुबान्धवा:
10 I. O. ०संख्यै: पातमात्मकै:
11 I. O. शाखा०
12 I. O. सुभाषितां
13 A लोकमसानिनं
14 A ०मात्र०

एवं विद्याप्रदानं वै सर्वकामगुणाधिकम् ।
[1]यत्तत् पात्रे तु संत्यक्तं रहस्यञ्चैव तदुत्तमम् ॥२९॥
उद्दिश्य देवतां दातुं प्रधानां यत्र [2]कुत्रचित् ।
तस्य समाप्तपुण्यस्य केन पुण्यं निरूप्यते ॥३०॥

उद्दिश्य देवतां देवताप्रीतय इत्यर्थः ।

गुरुमाराध्य यत्नेन विद्याव्याख्यानपारगम् ।
[शक्त्या भक्त्या प्रणामेन][3] धनैः सर्वगुणैस्तथा ॥३१॥

अथ गुरुप्रशंसा ।

यथा घटप्रतिच्छन्ना [4]रत्नराजमहाप्रभाः ।
अकिञ्चित्करतां [5]प्राप्तास्तथा विद्याश्चतुर्दश ॥१॥
विना तु गुरुणा [6]सम्यग्बोधनेन विपश्चिता ।
नैव विद्याफलप्राप्तिर्गुरुं तस्मात् प्रपूजयेत् ॥२॥
स्रग्वासोभूषणैर्नित्यं यथा देवं पिनाकिनम् ।
यो गुरुं पूजयेन्नित्यं स्थितं वा प्रस्थितञ्च वा ॥३॥
तत्प्रसादेन यस्मात् स प्राप्नुयात् सर्वसम्पदः ।
तस्माद् गुरुं प्रयत्नेन महादेववदर्चयेत् ॥४॥
भक्त्या प्रीत्या प्रयत्नेन श्रद्धया च सदैव हि ।
एष माता पिता ह्येष एष एव च बान्धवः ॥५॥
एष चिन्तामणिः स्फीत एष एव च मे सुहृत् ।
एवं श्रद्धापरो नित्यं गुरुमाराधयेद्बुधः ।
अज्ञानदुःखशमनं [7]नरकोद्धरणं तथा ॥६॥
कुतो माता पिता वापि बान्धवो वा महागुणः ।
तादृगभ्युदयं कुर्याद् यत् कुर्याच्च गुरुर्महान् ॥७॥
कोऽन्यो ज्ञानेन [8]दुःखौघादुद्धरेद्बहुबन्धनात् ।
सम्यक् शास्त्रार्थबोद्धारं महादेववदर्चयेत् ॥८॥

---

1 I. O. यतेत् पात्रं तु संत्यक्तं
2 I. O. कुत्रचि
3 A सद्यो तत् प्राप्यमानेन for the b. p.
4 A बहुराजमहाप्रभुः
5 A प्राप्त०
6 A सम्यकगोधिकेन विपश्चितः
7 A नरकोद्धारणं
8 A दुःखौघादुद्धरेदुर्गबन्धनात्, I. O. दुःखेभ्योदुद्धरेद्बहुबन्धनात्

[1]वस्तुमात्रेण यो ज्ञानं शास्त्ररूपमुपन्यसेत् ।
स तावच्छिववत्[2] पूज्यो भक्त्या[3] भवति पापहृः ॥९॥
यः शास्त्रमविविक्तार्थं[4] विशेषार्थं प्रबोधयेत् ।
[5]पदवाक्यार्थबोधेन सम्यक् शास्त्रप्रवर्तनात् ॥१०॥
[6]पूर्वोत्तरार्थसङ्गत्या समुदायार्थनिश्चयः ।
[7]सुशास्त्राभिमता वाचः सम्यग् यो वेत्ति तत्त्वतः[8] ॥११॥
स तु साक्षान्महाबुद्धिर्भगवानिव शङ्करः ।
तं भजेत् सर्वभावेन भक्तियोगेन सर्वदा ॥१२॥
आदित्येन विना [9]यावज्जगदन्धं विभाव्यते ।
गुरुवाक्यैर्विना [10]सर्वं तथैव हि तमोमयम् ॥१३॥
तस्माद् यथा महादेवं [तद्वदेव गुरुं सदा ।][11]
यः पश्यति स पुरुषः [12]सर्वधर्मानवाप्नुयात् ॥१४।

अथ विद्यादानपात्राणि ।

विद्या च मुख्यं दानानां [13]गुरुतोऽस्य विधिं बुधः ।
श्रुत्वा विधेयं विधिवच्छ्रद्धया भावितात्मना ॥१॥
सत्पात्रेभ्यः [14]स्तुतां दद्याद् [15]विशेषाद् गुणशालिषु ।
उपयोज्यश्च [16]यद् यस्य तत्तस्य प्रतिपादयेत् ॥२॥
सुरालयेषु सिद्धेषु यथा-[17]विभवविस्तरैः ।
दातव्यास्तु प्रयत्नेन [18]सदा पुण्यफलार्थिभिः ॥३॥

---

1 A वट मात्रेण
2 A भावच्छिवरत
3 A भक्तो
4 A ०विविक्तानां
5 I. O. तद्वाक्याद्गुरोधेन
6 I. O. पूर्वोत्तरार्थसङ्गम्य, A पूर्वोत्तरगुणसंगत्या
7 A सुशास्त्रविहिताश्चैवारं, I. O. स्वशास्त्रा०
8 I. O. तत्त्वत:
9 A यतजगदन्धं
10 A सर्व्वतंथैव हि तमामयं, I. O. ०तमोमयं
11 I. O. गुरुं यदा for the bracketed portion
12 I. O. adds सर्वकामान् after सर्वधर्मान्
13 A गुरु तस्य
14 I. O. स्तुतं विद्या
15 I. O. विशेषा
16 I. O. यद्यस्य
17 I. O. ०विस्तरविस्तरैः
18 A महापुण्यफलार्थिनः

अथ पुस्तकलिखनारम्भः ।

शुभे नक्षत्रदिवसे [1]शुभे चापि[2] दिनग्रहे ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्दनान् ॥४॥

अथ सरयन्त्रविधिः ।

पूर्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
विद्याधरं प्रकुर्वीत हेमरूप्यमयं शुभम् ॥५॥

विद्याधरं सरयन्त्रम् ।

नागदन्तमयं वापि सारदारुमयं तथा ।
मनोज्ञमगुरु रम्यं शुक्लपत्रप्रयोगजम् ॥६॥
[3]सङ्कोचयन्त्रसंयुक्तं [4]विकाशनसमन्वितम् ।
[5]पत्रविद्याविनिहतां कुर्य्यात् पुस्तकसंस्थिताम् ॥७॥

अथ पत्रसञ्चयविधिः ।

कुर्य्यात्तु पुस्तकं यत्र लेख्याद्द्विगुण-[6]विस्तृतम् ।
[7]सुशुक्लं लघु रम्यञ्च कृष्णमेचकितं तथा ॥८॥

पुस्तकं पत्रसञ्चयं [8][लेख्याल्लिखनीयस्थानाद्द्विगुणविस्तृतं[9]] सुशुक्लं सुमर्दितं कृष्णमेचकितं मसीनिर्मितसमयज्ञादिलिखनानुगुण-[श्यामरेखम् ।

अथवा][10] रक्तवर्णाभं मेचकानं कृतं शुभम् ।
कार्पाससूत्रग्रथितं नानागन्धादिवासितम् ॥९॥

रक्तवर्णाभमिति कृतकृष्णलोहितरेखं नानागन्धादिवासितं नानाधूपधूपितम् ।

---

1 I. O. शुभवादि
2 Raghu reads in Div. T. (p. (588) रात्रि but चापि in Dik. T. (p. 650) and reads in the above two pages the following in the second line of V. 5:—निरोधो ह्रस्वयाञ्चोश्च मसीपत्रविधारणो
3 I. O. सङ्कोपत्रसंयुक्तं
4 I. O. विकासनसमन्वितम्, A विकाशेन समन्वितम्
5 A यत्र विद्या च विहितं
6 I. O. and A ०विस्तृतं
7 A सुश्लक्ष्णञ्च (सुशुक्लञ्च ?) सुरम्यञ्च
8 I. O. लेख्यादादृश्यनात् द्विगुणविस्तृतं बहुतरं for the bracketed portion
9 A प्रस्तारयुतं for विस्तृतम्
10 I. O. श्यामरेखा सुखवा for the b. p.

अथ मसीनिर्माणम् ।

मसीभिश्चाप्यनेकाभिश्चतुर्वर्णाभिरेव च ।
दृढस्तम्भन[1]-युक्ताभिर्मेचकैश्चाप्यनेकशः ॥१०॥

[मसीभिश्चाप्यनेकाभिः प्रचुरभागकज्जलाभिः][2] चतुर्वर्णाभिः पीतरक्तहरितकृष्णवर्णद्रव्य-रसमयीभिः[3] दृढस्तम्भन[4]-युक्ताभिर्भद्र[5]-गन्धरसादिसहिताभिः । मेचकैश्चाप्यनेकश इति [6]पीत × × नानाद्रव्ययुक्ताभिः ।

अथ लेखनीयष्टिकानिर्माणम् ।

लेखनीभिश्च दिव्याभि[7]-र्हेमचित्ताभिरेव च ।
बहिश्च वर्णं कुर्वीत पुस्तकस्य मनोरमम् ॥११॥
पीतरक्तकषायैर्वा सुनिबन्धं सुचित्रितम् ।
रम्यं लघु सुविस्तीर्णं निर्ग्रन्थि ग्रन्थिसंयुतम् ॥१२॥

बहिश्च पुस्तकस्य काष्ठपट्टिकादिकं पीतरक्तकषायैर्वेति पीतरक्तैः कषायैर्वा वर्णं[8] कुर्य्यादिति सम्बन्धः । निर्ग्रन्थि ग्रन्थिशून्यदारुमयं ग्रन्थिसंयुतं सूत्रग्रन्थिसहितम्[9] ।

अथादर्शपुस्तकारोपणम्

विद्याधरे ततो यन्त्रे[10] संस्थितं पूर्वपुस्तकम् ।
गृहे मनोरमे गुप्ते सुधालेपितभित्तिके ॥१३॥

पूर्वपुस्तकमादर्शं कृत्वेति शेषः[11] ।

नानारागा[12]-ङ्कुरोपेते [13]सुरवृन्दमनोरमे ।
धूपामोदमनोज्ञे तु वितानकपरिष्कृते ॥१४॥

नानारागा[14]-ङ्कुरः नाना-[15]तरुपुष्पपल्लवः ।

---

1 A स्तम्भन for स्तम्भन
2 I. O. omits the bracketed portion
3 I. O. ०मयाभिः
4 A स्तन for स्तम्भन
5 A omits भद्र
6 A पीतघानधामीयादिनानाद्रव्य-युक्ताभिः, I. O. प्रचुरभागकज्जलाभिः
7 A लेखनीतम द्रव्याभि०
8 I. O. omits वर्णं
9 A omits it
10 I. O. पात्रे
11 A विशेषः
12 I. O. ०रामा०
13 A प्रबविल्वमनोरमे
14 I. O. ०रामा०
15 I. O. ०गुरु०

अथ लेखकस्यालङ्कारादिदानपूर्वकलिखनारम्भः ।

लेखको बुद्धिमान् [1]स्नातः शुक्लपुष्पाम्बरो[2]-ज्ज्वलः ।
सुवर्णयुक्त[3]-केयूरमुद्रिकाशोभिताङ्गुलिः ॥१५॥
सुसमृद्धे[4] मसीभाण्डे लेखनीशस्त्रसंयुते ।
[5]प्रारभेत् तूर्य्यघोषेण पूज्य देवान् पितॄंस्तथा ॥१६॥

शस्त्रसंयुते नखरञ्जनीकर्त्तरीसहिते प्रारभेत् लेखकः प्रारभेदित्यर्थः ।

[6]ब्राह्मणान् स्वस्ति वाच्यादौ शास्त्रं सञ्चारयेद्बुधः ।
[7]श्लोकपञ्चकमादौ तु दशकं वापि लेखयेत् ॥१७॥

अयमर्थः—बुधो यजमानो देवान् पितॄंश्च[8] सम्पूज्य पत्नसञ्चये शास्त्रं लेखयेदिति ।

ततो नक्षत्रयोगेन द्वितीयेऽहनि तल्लिखेत् ।
तादृशेनैव विधिना पुण्याहैः शुभसंयुतैः ॥१८॥
ततः समाप्ते शास्त्रे तु[9] पुनः पुण्याहसंयुतम् ।
[10]कुर्य्यात्तदहरग्र्यैश्च [11]पानभोजनवस्तुभिः ॥१९॥

अथ शोधनविधिः ।

उभयश्चापि तल्लेख्यं मसी (?) कुर्य्याच्च वाचयेत् ।
[ऊनाधिकैश्च संयुक्तं वर्णैर्मात्रादिभिस्तथा ॥२०॥
अनुस्वारविसर्गैश्च युक्तायुक्तैर्विचारयेत् ।
शास्त्राप्रतिक्रियायुक्तया पुनरुक्तया च शोधयेत् ॥२१॥][12]
जनार्थोक्तया[13] प्रसङ्गस्य शब्दयोग्यतया तथा ।
[14]सूत्रान्तरानुरोधेन प्रश्नोत्तरविवेकतः ॥२२॥
असूत्रत्वाच्च शास्त्रस्य समुदायानु-[15]रोधतः ।
प्रक्रान्त-[16]सूचनोद्देशैर्गदितैश्चोदितैरपि ॥२३॥

---

1 A सुत:
2 A ०सुरो०
3 A omits युक्त
4 I. O. सुसमिद्ध
5 I. O. प्रारम्भे
6 A ब्राह्मणो
7 I. O. लोक०
8 A पितृन्
9 I. O. omits तु
10 A कुर्य्यादहरहं श्र छ
11 A पानभोजनस्तुभिः
12 A omits the bracketed portion
13 A जनार्थोक्ता
14 I. O. सूत्रान्तरार्थबोधेन
15 I. O. ०बोधत:
16 A ०रचनो०

[1]बह्वर्थानाञ्च शब्दानां [2]योग्यमर्थं परीक्ष्य तु ।
सर्वशास्त्राविरोधेन[3] [कारकार्थैरविप्लुतैः ।
क्वचिच्च शब्दं चर्य्येव (?)][4]प्रकृतार्थं निरूपयेत् ॥२४॥
[छन्दसा वापि बुध्येत वृत्तसंयोगमीप्सितम्][5] ।
एवं विद्यात्तु मेधावी शास्त्रं सत्कृत्य कृत्स्नशः ॥२५॥

अथ देवायतननिवेदनविधिः ।

प्रदद्याद्विभवैर्दिव्यैः पुरायतनवेश्मसु ।
व्यक्तदेशलिपिन्यासं मुख्यं [6]नापरमुच्यते ॥१॥
[7]आरोग्ययानरत्नाढ्ये शुभवस्त्रपरिष्कृते ।
घण्टाचामरशोभाढ्ये रत्नदण्डातपत्रिणि ॥२॥
गजवाजिरथस्थं वा महाशोभासमन्वितम् ।
पुरतो गीतनृत्येन नानावाद्यरवेण च ।
मङ्गलैर्वेदघोषैश्च देवाय विनिवेदयेत् ॥३॥
नानाधूपोपहारैश्च सम्पूज्य तु दिवौकसः ।
दत्त्वा तु पुस्तकं तत्र पितॄणां धर्ममुद्दिशेत् ।
बान्धवानाञ्च हृद्यानामनन्तफलमिच्छताम् ॥४॥

पितॄणां धर्ममुद्दिशेदित्यादेः पितॄन् [8]बान्धवानुद्दिश्य दद्यादिति सम्बन्धः[9] ।

ततो [10]दद्याद्विधानेन तां विद्यां शिवमन्दिरे ।
ततश्च दक्षयेद्विप्रान् शिवभक्तांश्च मानवान् ॥५॥
[11][दक्षयेत् कृतनिवेदनप्रतिष्ठार्थं दक्षिणादिभिः] पूजयेत् ।

---

1 I. O. बह्वार्थानाञ्च
2 I. O. योग्यासन्नं
3 I. O. सर्व्वशास्त्रावबोधेन
4 A omits the bracketed portion
5 A छन्दसा रूपिकक्वेतु वृत्ते संयोगमाद्रितं for the b. p.
6 A' नगर०
7 A आरोमाने तद्दाढ्ये
8 I. O. बान्धवान्नोद्दिश्य
9 A' adds अभ्यस्ता...विशारदः of V. 10 below after this
10 A दत्त्वा for दद्याद्
11 A दक्षयेत् विद्याप्रतिष्ठार्थं दक्षिभिः for the b. p.

यथाशक्ति च कर्त्तव्या [1][उत्सवा विष्णुवेश्मनि] ।
राज्ञा तु नगरे[2] कार्य्या ग्रामे ग्रामाधिपैस्तथा ॥६॥
गृहे गृहस्थैः कर्त्तव्यमुत्सवं बन्धुभिः सह[3] ।
स्नातैर्भुक्तैः समालब्धैः स्रग्विभिः सुसमाहितैः ॥७॥

अथ श्रोतृपाठक[4]-गुरुगुणसहितव्याख्यानविधिः ।

प्रीतियुक्तैस्ततः[5] श्रव्यं शास्त्रं [6]श्रद्धासमन्वितैः ।
वाचकं दत्तयेत्तत्र यथाविभववित्ततः ।
गुरुञ्च शक्त्या मतिमान् यथाशक्ति त्वमायया ॥८॥

दत्तयेद्वस्त्रादिभिरर्चयेदित्यर्थः ।

ततः पुष्पैश्च धूपैश्च श्रावकं संप्रपूजयेत् ।
वाचको ब्राह्मणः प्राज्ञः श्रुतशास्त्रो महामनाः[7] ॥९॥

श्रावकं पाठकं पाठसमये पुष्पधूपादिभिरभ्यर्चयेदिति सम्बन्धः ।

अभ्यस्ताक्षरविन्यासो [8]वृत्तशास्त्रविशारदः ।
सूत्रार्थवित् प्रगल्भश्च विनीतो मेधया युतः ।
[9]नीतिज्ञो वाक्पटुः [10]श्रव्यस्वरो × × भाषकः ॥१०॥
गुरुश्च धर्मवान् प्राज्ञः श्रुतशास्त्रो विमत्सरः ।
विप्रः प्रकृतितः शुद्धः शुचिः स्मितमुखः सुधीः[11] ॥११॥
[सुव्रतो व्रतशास्त्रज्ञः सर्वशास्त्रविशारदः ।
अभ्यस्तशास्त्रसन्देहः प्रकृतार्थप्रवर्तकः ।
[12]सश्रद्धः सुकृतव्याख्यः पौर्वपर्यार्थवित् सुधीः ॥१२॥][13]
अध्याय-[14]सर्गविच्छेदविभक्तयर्थप्रयोजकः ।

---

1 I. O. ततुसेवा: स्वेषु वेश्मसु
2 A नगठये
3 A सदा
4 A श्रावक for श्रोतृपाठक
5 A श्रेष्ठं
6 A श्रुत्वा समन्वित:
7 I. O. महामद्दा:
8 A विदृष्शास्त्र०
9 A गीतिज्ञो
10 A श्राव्यसुरो
11 A सदा
12 A नाश्रद्धमकृतव्याख्यां
13 I. O. omits the bracketed portion
14 A शब्द for सर्ग

शास्त्रार्थ-[1]पदविद्धीमान् पदश्लोकार्थबोधकः ॥१३॥
समुदायप्रकीर्णार्थमुख्यशास्त्रानुसञ्जकः[2] ।
अनन्तरश्च हृद्वस्तु व्यपदिश्यार्थबोधकः ॥१४॥

अनन्तरमनुक्तं हृद्वस्तु परस्याशयस्थं[3] किमपि विवक्षितमित्यर्थः ।

प्रक्रान्तादिषु शास्त्रार्थविभागपरिनिष्ठितः ।
कथाभिधान-[गूढार्थभङ्गेन च विबोधकः][4] ॥१५॥
श्रद्धेयश्च गतालस्यः श्रौतचिन्तावबोधकः ।
संस्कृतैः संस्कृतां[5] विद्यां प्राकृतैः प्राकृतामपि ॥१६॥
आलापमात्रै[6]-र्व्याख्यानैर्यश्च शिष्यान् [7]प्रबोधयेत् ।
देशाभिधानविन्यासैर्बोधयेच्चापि[8] यो गुरुः ॥१७॥
स गुरुः स पिता माता[9] स तु चिन्तामणिः स्मृतः ।
स शास्त्रोपायमाख्याय नरकेभ्यः समुद्धरेत् ॥१८॥
कस्तेन सदृशो लोके [बान्धवो भुवि][10] विद्यते ।
यस्य वाग्रश्मिवृन्देन [11]हृदयान्नश्यते तमः ।
महासंसाररजनीभवं सोऽर्को[12] महाद्युतिः ॥१९॥
नोद्विजेत्तस्य पारुष्ये[13] न च वैलोम्यमिच्छतः ।
न चास्य व्याधिदुःखेषु मलानां वाप्रियो[14] भवेत् ॥२०॥
[प्रसादयेच्च कुपितं][15] दुःखमग्न[16] समुद्धरेत् ।

---

1 I. O. ०पर०
2 A ०शास्त्रानुसंज्ञकः, I.O. ०शास्त्राश्र-सञ्जकः
3 I. O. परस्याशयस्थं, A परस्या-शयनस्थं
4 A भूमन्वभङ्गेषु स्वनिरोधकः for the bracketed portion
5 I. O. संस्कृतां
6 A शास्त्र for मात्रैर्
7 A सुबोधयेत्, I. O. प्रबोधकान्
8 A ०च्चापि
9 I. O. स गुरुः माता पिता, A य गुरुमपि कामन्ता
10 I. O. बान्धवोऽसु न for the bracketed portion
11 I. O. हृदयं पश्यते, A हृदयान्नश्यते
12 A लोके
13 A रूपस्य
14 A गोयो
15 A कस्तेन सदृशे लोके for the bracketed portion
16 I. O. दुःखसुग्धं

रोगेभ्यश्चापि यत्नेन[1] [परित्यागेन चोद्धरेत्][2] ॥२१॥

अथ व्याख्यायां विधिनिषेधविधिः[3] ।

[4]एवं व्याख्यां शुभां श्रुत्वा[5] गुरुवक्त्रान्नरोत्तमः ।
विधेयं चिन्तयेद् यत्नात्[6] परत्र हितकारणम्[7] ॥१॥
शृणुयात् श्रद्धया[8] युक्तः प्रणतोऽभिमुखो[9] गुरोः ।
[10]अनन्यसंकथाक्षेपी निष्प्रमादो ह्यतन्द्रितः ॥२॥
[11]सूत्रे च संशये जाते पृच्छेद्वाक्य[12]-मुदीरयेत् ।
[13][गुरुणा चोक्तमेकान्ते] श्रद्धावान् वाक्यमाश्रयेत् ॥३॥
न पुरो गुरुवाक्यानि गुरूक्तं परिपालयेत् ।
भिषजां वचनं कार्य्यं गुरूणाञ्च महात्मनाम् ॥४॥

गुरुवाक्यानीत्यत्र हन्यादिति शेषः ।

न तत्कृतं स्वयं कुर्यात्त समिद्धानलार्चिषः[14] ।
अप्रस्तुतकथाक्षेपं यः कुर्य्यादग्रतो गुरोः ।
स ब्रह्महत्यामाप्नोति गुरुवाक्येषु निश्चयः ।।५॥
[यः श्रुत्वा अन्यतः][15] शास्त्रं संस्कारं प्राप्य वा शुभम् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ॥६॥
विस्मरेच्चाथ वा मौग्ध्याद् योऽपि शास्त्रमनुत्तमम् ।
स याति नरकं घोरमक्षयं भीमदर्शनम् ॥७॥
यस्तु बुद्ध्वा नरः शास्त्रं[16] किञ्चित् कुर्य्याच्छुभाशुभम् ।
भवेच्छतगुणं तद्वै विज्ञानेभ्यो नरस्य[17] च ॥८॥

---

1 A यत्तेन
2 A परित्यागमतोद्धरेत् for the bracketed portion
3 A विशेषनिषेधः
4 A तुरं
5 I. O. कृत्वा
6 A यत्नत्
7 A हितकारकम्
8 I. O. यत्नया
9 A अभिमुख
10 A अन्योन्य॰
11 I. O. सूत्रस्य, सूद्रायां
12 A अर्थम् for वाक्यम्
13 A गुरुर्नेठ्याचारतरान्ते for the bracketed portion
14 I. O. समिद्धानलाचिषः, A समृद्धानवर्चिषः
15 A यत्र श्रुत्वान्यतः for the bracketed portion
16 A शास्त्रां
17 I. O. रयस्य

अथ पाठक्रमः ।

एवं विधानतो [वाच्यं पाठकेन विपश्चिता][1] ।
तपःशमात्मकं स्वर्गधर्मादि[2]-फलसाधनम् ।
शनैर्विविच्य[3] तद्वाच्यमध्यात्मादि च यद्भवेत् ॥९॥

तपःशमात्मकं ग्रन्थमध्यात्मप्रतिपादकञ्च शनैर्विविच्य[4] पठेत् ।

क्रुद्धोक्तं युद्धसंक्षोभं त्वरायुक्तेन वाचयेत् ।
सरागं ललितैर्वाक्यै[5]-र्वाचयेद्धृदयङ्गमैः ।
नानाचिन्तार्थ[6]-रूपेण ललितेन [च वाचयेत्][7] ॥१०॥

सरागं शृङ्गारग्रन्थम् ।

सर्गाध्यायसमाप्त्यैव[8] कथापर्यन्तमेव च[9] ।
[10]प्रशस्तशब्दसंयोगे[11] कुर्यादिति विरामणम् ॥११॥

विरामणं पाठसमाप्तिः ।

समाप्ते वचनेऽभीष्टं कुर्यादेव विचक्षणः ।
अवधार्य जगच्छान्तिमन्ते[12] शान्त्युदकं सृजेत् ॥१२॥

शान्त्युदकं [13]शान्त्यर्थमुदकम् ।

सुश्रुतं [14]सुव्रतं ब्रूयादस्तु व्याख्या तु[15] नित्यदा ।
लोकः प्रवर्त्ततां धर्मे राजा चास्तु[16] सदा जयी[17] ॥१३॥
धर्मवान् धर्मसम्पन्नो गुरुश्चास्तु निरामयः ।
इति प्रोच्य यथायातं[18] गन्तव्यञ्च विभावितैः ॥१४॥

अथ चिन्ताविधिः ।

शिष्टैः परस्परं शास्त्रं चिन्तनीयं विचक्षणैः ।
कथावस्तुप्रसङ्गेन नानाव्याख्यानभावनैः ॥१५॥

---

1 A वाक्यं वाचकेन परिस्थिता
2 I. O. सर्गस्वर्गादि०
3 I. O. ०विरोध्य
4 I. O. ०विपच्य
5 A वक्त्रैर् for वाक्यैर्
6 A वृत्तान्तु for चिन्तार्थ
7 A तथाच्चर्चयेत
8 A ०समाप्तौ च
9 A वा
10 I. O. वायुशस्त for प्रशस्त
11 A ०संयोगात्
12 I. O. मत्तं for अन्ते, A omits it
13 I. O. शान्तामुदकं, A शान्त्यमुदकं
14 A सुव्रतं
15 I. O. त
16 I. O. वस्तु
17 I. O. जपी
18 I. O. यथाजातं

युक्तिभिश्च स्मरेद्व्याख्यां चिह्नैश्चापि स्वयं कृतैः ।
एवं दिने दिने व्याख्यां शृणुयान्नियतो नरः ॥१६॥

अथ शास्त्रव्याख्यासमाप्तिकृत्यम् ।

समस्तशास्त्रश्रवणेन पुंसः[1] श्रद्धाप्रधानं भवतीह चेतः[2] ।
रागश्च [3]शास्त्राच्छ्रममभ्युपैति दोषाश्च नाशं [4]निखिलेन यान्ति ॥१७॥
[5]यथाकथञ्चिच्छृणुयान्न शास्त्रमश्रद्धया वर्जितधर्मसन्धः[6] ।
ततः समाप्तावथ शास्त्रमार्गकथोदये[7] चापि विनीतबुद्धिः ॥१८॥
शक्त्यार्चयेद्-[8][वाचकमग्र एव गुरुञ्च][9]भक्त्या पितृवन्निकामम् ॥१९॥
एष [विद्याप्रदानस्य प्रधानो][10]विधिरुच्यते ।

अथ ब्राह्मणाय दानम् ।

अनेनैव विधानेन ब्राह्मणे शीलशालिनि ।
प्रबोधयति [11]धीयुक्ते विधिज्ञे[12] वेदवादिनि ।
प्रबोधयति व्याख्यातरि[13] ।
विन्यस्येत शुभं शास्त्रं महाभोगजिगीषया ॥२०॥

अनेनैव विधानेनेति यथा देवाय निवेदने विधिरुक्तस्तथैव ब्राह्मणायापि[14] गृहं नीत्वा विद्यां[15] दद्यादित्यर्थः ।

अथ शास्त्रानुष्ठानम्[16] ।

धनैर्वा विपुलैर्वस्त्रै-[17]र्गुरुं कृत्वा सुतर्पितम् ।
अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः ॥२१॥

---

1 I. O. युक्तः
2 I. O. भवद्दीयचेतः
3 A शास्त्राश्रममन्यपैति, I. O. शास्त्राच्छतमभ्युपैति
4 A निखिला पुनन्ति
5 I. O. कथा
6 A °संघं
7 A °कावादये
8 I. O. शक्त्याग्न्वयेद
9 A वाचकमभादेवं आकथ for the b. p.
10 I. O. विद्याप्रधानस्य प्रदाने for the b. p.
11 I. O. वायुक्त
12 A विविक्ते
13 A व्याख्यातानि
14 I. O. ब्राह्मणापि
15 A omits विद्यां
16 I. O. शास्त्रानुष्ठानं
17 A °गुरुः कृत्वा शुभार्पितं

एतेन यथाप्रसिद्ध-[1]शास्त्रानुष्ठानमुक्तम् । [तथा च शास्त्रदान][2]सङ्कल्पयेत् ।

अथ विद्यादानफलम् ।

एवं विद्याप्रदानन्तु सर्वदानोत्तमं स्मृतम् ।
सर्वदा सर्वदानानां [3]नरकोत्प्लवमुत्तमम् ॥१॥
अनेन विधिना दत्त्वा विद्यां [4]धर्मपरो नरः ।
फलं दशाश्वमेधानां शतस्य सुकृतस्य च ॥२॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत्फलं लभते मर्त्यो विद्यादानेन भाग्यवान्[5] ॥३॥
[सर्वशस्यसुसम्पूर्णां सर्वरत्नोपशोभिताम् ।
ब्राह्मणेभ्यो महीं दत्त्वा ग्रहणे चन्द्रसूर्ययोः ।
यत् फलं लभते मर्त्यो विद्यादानेन तत्फलम्][6] ॥४॥
यावदक्षरसंख्यानं विद्यते शास्त्रशंसने ।
तावद्वर्षसहस्राणि स्वर्गे विद्याप्रदो वसेत्[7] ॥५॥
यावन्त्यः पङ्क्तयस्तत्र पुस्तकेऽक्षरसंश्रिताः ।
तावतो नरकात् [8]कुल्यानुद्धृत्य नयते दिवम् ॥६॥
यावच्च पत्रसंख्यानं पुस्तके विद्यते शुभम् ।
[9]तावद्युगसहस्राणि सकुलो[10] मोदते दिवि ॥७॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत्सर्वं नश्यते तस्य विद्यादानेन देहिनः ॥८॥
स जातो मनुजो लोके स धन्यः स तु बुद्धिमान् ।
यो [11]विद्यादानसम्पर्कप्रसक्तः पुरुषोत्तमः ॥९॥

---

1 I. O. ०ष्ठानाशु०, A ०मन्त्राशु०
2 I. O. तद्दा च सत्रदानं, A तथा च मन्त्रदानं
3 I. O. नरकात्०
4 A पुण्यपरो
5 A केवलं
6 A omits the bracketed portion
7 A भवेत्
8 A वंस्यानुद्दृष्टा
9 A तावद्वर्ष०
10 A सकुले, I. O. स्वकुलो
11 A विद्यादानत: सम्यक्प्रसक्त:

यथाविभवतो दत्त्वा विद्यां शाठ्यविवर्जितः ।
याति पुण्यमयान्[1] लोकानक्षयान् [2]भोगभूषितान् ॥१०॥
[3]येऽपि एवं मसीपात्रलेखनी-[4]सम्पुटादिकम् ।
[5]दद्युः शास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम् ।
यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो महाश्रियः[6] ॥११॥
इति विद्याप्रदानस्य महाभाग्यं प्रकीर्तितम ।
श्रुत्वैतत पातकैर्मुच्येन्नियतं[7] सप्तजन्मजैः ॥१२॥

अत्र वेदाश्चत्वारस्तदङ्गानि च शिक्षाकल्पनिरुक्तच्छन्दोज्योतिषव्याकरणानि धर्मशास्त्रं [8]मन्वादिस्मृतिसंहितारूपम् । पुराणानि [9]ब्रह्मादीनि कर्मब्रह्मात्मिका च मीमांसा न्यायश्चेति चतुर्दशविद्याः। उपविद्याश्च कृषिविद्या-शिल्पविद्या-[10]कलाविद्याप्रमुखविद्या यथायथमुन्नेयाः । तदासां विद्यानां मध्याद् यथेष्टं[11] विद्यामुक्त-[विधायतनं नीत्वा स्वेष्टदेवाय][12] निवेदयेत् । तद्यथा—यजमानः शुभनक्षत्रयुक्तं दिनमनुसन्धाय गृहं सुदृढं [13]सुस्तम्भं सुधालिप्तभित्तिकं निःसन्धि घटयित्वा तत्र यथेच्छदेवताप्रतिमां स्थापयित्वा लेखयित्वा वा नानापुष्प-[14]नानातरुपल्लवालङ्कृतं [15]सुधूपावासितम् [उपरिविततचन्द्रातपं च][16] तद्गृहं कृत्वा तत्र महेश्वरं ब्रह्माणं जनार्दनञ्च प्रतिमासु स्थण्डिले वा [17]आवाहनपूर्वकं सम्पूज्य यथाविधि वृद्धिश्राद्धं कृत्वा यथेष्टसंख्यान् ब्राह्मणानभ्यर्च्यास्मिन् विद्या[18]-लिखनारम्भे पुण्याहं भवन्तो ब्रुवन्त्विति वदेत् । पुण्याहमिति तैस्त्रिः प्रत्येकमुक्ते स्वस्ति भवन्तो ब्रुवन्त्विति वदेत् । [19][स्वस्तीति तैस्त्रिः प्रत्येकमुक्ते ऋद्धिं भवन्तो ब्रुवन्त्विति वदेत्]। ते च ऋद्ध्यतामिति प्रत्येकं विब्रूयुः । ततो नागरलिपिज्ञं तदसम्भवे लिप्यन्तरज्ञमपि वा स्नातं लेखकं यथाशक्ति हैम-

---

1 A पुण्यसमा
2 A तोय०
3 A येसपरं
4 I. O. ०संपद्दादिकं
5 I. O. दद्य:
6 I. O. महाधिप:
7 I. O. निरयं
8 I. O. सन्वादिस्मृति०
9 A ब्राह्म्यादीनि
10 A' omits कलाविद्या
11 A यथेच्छ
12 A विधिना यत्नान्नीत्वा अष्टदेवाय देवान्तराय वा for the bracketed portion
13 I. O. सुप्तं
14 A omits नाना
15 I. O. सुधूपाधिवासितं
16 A उपरितमन्द्रातपां for the bracketed portion
17 A मन्त्रावाहनपूर्वकम्
18 A अस्मिन्नित्यादि for अस्मिन् विद्या
19 I. O. omits the bracketed portion

[रा]ङ्गुरीयक[1]-शुक्लवस्त्रमाल्यादिभिरर्चयेत् । लेखकस्तु शुक्लमाल्याम्बरधरो[2]ऽलङ्कृतः प्राङ्मुखो [यथो]क्तं [3]सरयन्त्रमारोप्य तत्र लेख्यं शास्त्रं यथोक्तं पत्रसञ्चयञ्च स्थापयित्वोक्तविधिना मसीं कृत्वा पूर्णभाण्डे यथोक्तलेखन्या मसीमादाय तूर्य्यघोषपूर्वकं लेखनीयशास्त्रस्यादौ पञ्चदश वा [श्लो]कान् लिखेत् । ततोऽपरस्मिन्नपि दिने शुभवेलायां पूर्ववत् पुण्याहवाचनतूर्य्यघोषपूर्वकं [लिख]येत् । एवञ्च क्रमेण शास्त्रं लेखयित्वा लिखनसमाप्तिदिने पुण्याहादिवाचनं ब्राह्मण[भोज]नादिकञ्च कुर्यात्[4] । ततो यथोक्तक्रमेण [5]शोधयित्वा [6]शलाकाडोरपट्टिकादिना पुस्तकरूपं [कृत्वा] वस्त्रेणाच्छाद्य शक्तितश्चतुर्दोलं दोलायानं[7] गजमश्वं रथं वा [8]श्वेतवस्त्रादिशोभितं [9]कुटरत्नालङ्कृतं घण्टाचामरपताकाद्यन्वितं विधृत-[10]यथाशक्त्युपात्तरत्नमय-[11]दण्डातपत्रमुप[कल्]प्य तत्र लिखितं पुस्तकमारोप्य नृत्यगीतवाद्यमङ्गलघोषवेदध्वनिभिर्देवायतनं नयेत् । तत्र [तत्र] तं देवं सम्पूज्य तदग्रतः पुस्तकं स्थापयित्वा देवाय निवेदयेत् । [13]तद् यथा—ॐ अद्य [अमुक]येऽहनि श्रीमदमुकभट्टारकाय मत्पितृ-[14]गत-नन्दिपुराणोक्तामुकविद्यादानफलप्राप्तिकामोऽह[म्] [लोक]द्विद्याध्ययनसिद्ध्यर्थमेतां विद्यां ददानि । ततः शिवभक्तेभ्यो देवान्तरभक्तेभ्यश्च यथेच्छ[मपि] यब्राह्मणेभ्योऽभीष्टसंख्यं सुवर्णं दद्यात् । तद् यथा—कृतैतद्दानप्रतिष्ठार्थं [15]युष्मभ्यमहं [ब्राह्म]णाणामेतत् काञ्चनं ददानि । स्वस्तीति ब्राह्मणा ब्रूयुः । बान्धवोद्देशदाने तु मत्पितृपद[स्था]ने अमुक-[16]सद्बन्धुपदनिवेशो विशेषः । [17]स्वोद्देशेन दाने तु [18]मत्पितृपदं [19]सद्बन्धुपदञ्च [विहाय] निवेदन-[20]वाक्येनैव प्रयोज्यम् । ततो यथाशक्ति यथोक्तं वाचकमुपाध्यायञ्च सुवर्णादिभिः [परि]तोष्य गुरुवाचकयोर्निर्वाहाय वृत्तिमुपकल्प्य तदा तस्मिन्नायतने श्रोतॄन् पुराणानि शास्त्राणि श्रावयेदध्यापयेच्च । पाठसमये पाठकं पुष्पधूपाभ्यां पूजयेत् । शास्त्रनिवेदनदिने यथायथं [राजा]त्यादयो यथाशक्ति पौरपरितोषणहट्टरथ्यादिशोभागीतनृत्यवाद्यादीन्नगरादिषु कारयेयुः । [तत]ः श्रोतारो यथोक्तक्रमेण[21] श्रवणं कुर्युः । [22]चिन्तयेदनुदिनं पाठसमाप्तौ च[23] पाठको

---

1 A and I. O. अङ्गुलीयक
2 A माल्याबम्बरो
3 I. O. सरपत्र०, A भित्रयन्त्र०
4 A कुर्युः
5 A लेखयित्वा
6 I. O. शलाडोरपट्टिकादिना
7 A चतुर्दोलकं दोलायां
8 A श्वेतवस्त्रादि०, I. O. श्वेतवस्त्रादि०
9 A बहुरत्नशोभितं
10 A omits यथा
11 I. O. ०दण्डातपत्रमुपकल्प्य, A दण्डात्पत्रमुपकल्प्य
12 I. O. omits च
13 I. O. omits तद् यथा
14 A ०गतनन्दिपुराणोक्ता०
15 A तुभ्यमहं
16 A सम्बन्ध for सद्बन्धु
17 A स्वदेय
18 I. O. पितृपदं, A मपितृपदं
19 A तद्बन्धुपदञ्च
20 I. O. omits वाक्येनैव
21 I. O. यथोक्तजनेन
22 A चिन्तयेद् यत्र अनुदिनं
23 I. O. omits च

यथोक्तं [1]जगच्छान्त्यादयवधारणं कुर्य्यात्। [2]शास्त्रपरिसमाप्तौ च श्रोतारोऽपि [3]वाचकपूजा-पूर्वकं गुरुमर्चयेयुः। अध्यापकत्वादिगुणयुक्तब्राह्मणाय दाने तु पूर्वोक्तक्रमेणैव[4] यथोक्त-ब्राह्मणगृहं नीत्वा तं ब्राह्मणमभ्यर्च्य तस्मै दद्यात्। तत्र दानवाक्ये श्रीमदमुकभट्टारकायेति स्थाने[5] अमुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमिति देवतानिवेदन-[6]दान-वाक्याद्विशेषः। प्रतिग्रहीता च स्वस्तीत्युक्त्वा सावित्रीं पठित्वा विद्येयं ब्रह्मदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। [7][ततो दक्षिणादानम्।] [8]ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। ब्राह्मणः स्वस्तीत्युक्त्वा पुस्तकं[9] स्पृशेत्। ब्राह्मणेभ्यश्च देवतानिवेदनवत् दक्षिणादानम्। ततः पूर्ववद् गुर्वादि-परितोषणवृत्त्युपकल्पनपूर्वकं तद्ब्राह्मणगृह एव [10]यथेच्छकालमध्यापनादि कारयेत्। [11]सत्र-दाने च यथाशक्तीष्टकादिना गृहं निर्माय यथाशक्ति बहुभिर्वस्त्रकाञ्चनादिभिरुपाध्यायम-भ्यर्च्य[12] [13]यथेच्छकालमभीष्टविद्याध्यापनं सङ्कल्पयेत्। तद् यथा—ॐ नन्दिपुराणोक्ता-मुकविद्यादानफलप्राप्तिकामोऽहमेतदमुकविद्याध्यापनं कारयिष्ये[14]। ततो [15]वृत्त्युपकल्पन-मुत्सवादिकरणञ्च पूर्ववत्। विद्यादानशक्तस्तु तत्तद्विद्यालिखनोचित-मसीपात्र-लेखनी-नख-रञ्जनीपुस्तकवाहनाय[16] संपुटादिकं नन्दिपुराणोक्तफलसिद्धिकामनया[17] तत्तद्विद्याभियुक्तेभ्यो यथा-शक्ति दद्यात्। एतच्च विद्यादानं यथोक्तपुस्तकलिखनादि[18]-क्रमव्यतिरेकेणापि यथाकथञ्चित् पुस्तकमुपादायाविधिनैव कुर्य्यात् पूर्वत्राविधानत इति श्रुतेः। विष्णुधर्मोत्तरेऽप्येतदुक्तम्।

तथा च विष्णुधर्मोत्तरम् (३।३०३।५-७):—

वेददानादवाप्नोति सर्वयज्ञफलं नरः।
उपवेदप्रदानेन[19] गन्धर्वैः सह मोदते ॥१॥

---

1 I. O. गजच्छन्त्याद्यवधारणं
2 A शास्त्रसमाप्तौ
3 I. O. श्रोतारो
4 A पूर्वोक्तक्रमेण च
5 A omits स्थाने
6 A वाक्ये for दानवाक्याद्
7 A reads the bracketed portion after दक्षिणादानम्, two lines below.
8 I. O. omits ॐ
9 A omits पुस्तकं
10 A यथाकाल०
11 I. O. सत्रदाने, A संप्रदाने
12 I. O. ०रुपाध्यायदभ्यर्च्य
13 A यथेच्छ०
14 A कारिष्ये
15 I. O. मृत्युपकल्पनमुत्सवादिकरणञ्च
16 I. O. वह्निर्मोतयत्न for वाहनाय
17 I. O. ०सिद्धिमभिधाय
18 I. O. ०लिखनादि०
19 I. O. ०प्रधानेन

[1]वेदाङ्गानां [2]प्रदानेन शक्रलोकमवाप्नुयात् ।
धर्मशास्त्रप्रदानेन धर्मेण सह मोदते ॥२॥
[3]सिद्धान्तानां प्रदानेन मोक्षमाप्नोत्यसंशयम् ।
[4]शास्त्राणि दत्त्वा चान्यानि[5] नरो [6]लोके महीयते ॥३॥

सिद्धान्ताश्च योगियाज्ञवल्क्येनोक्ताः । तथा च योगियाज्ञवल्क्यः :—

हैरण्यगर्भैः [7]कपिलैरपान्तरतमैस्तथा ।
सनत्कुमार-[8][ब्रह्मिष्ठैस्तथा पाशुपतैरपि] ।
[9]पञ्चरात्रैः सदोन्मुक्तैः सिद्धान्तैरत्न सप्तभिः ॥४॥ (२।६५क-६८क)

विद्यां यथेच्छं पुरुषस्य दत्त्वा
मन्त्रं शुभं [10][वाप्यथ वापि] शिल्पम् ।
[11]शिल्पस्य भाण्डं यदि वा द्विजेन्द्राः
प्राप्नोति [12]लोकान् मनसस्त्वभीष्टान् ॥५॥ (=वि, ध. ३।३०३।१५)

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्वल्लालसेनदेवविरचिते
श्रीदानसागरे विद्यादानावर्तः ।

---

1 A प्रसङ्गेन
2 I. O. प्रधानेन
3 A विद्यान्तानां
4 I. O. घस्त्राणि
5 A नाना
6 V. D. नाके
7 A कापिलैरयान्तितवतयैस्तथा
8 A ब्रह्माद्यैस्तथा पाशुपतैरपि for the bracketed portion
9 A पञ्चरात्रैर्महोद्युक्तैः, Yogi-yāj. पाञ्चरात्रैः सदोद्युक्तैः
10 A वापि तथैव for the bracketed portion
11 I. O. मन्त्रस्य
12 A लोक मनसस्त्वभीष्टाम

अथ विष्णुदैवतकल्पदानावर्तः । (४४)

मत्स्यपुराणे (२६०।२-८, ६ख-१२, १८-१६) :—

कल्पानुकीर्त्तनं वक्ष्ये [1]सर्वपापप्रणाशनम् ।
यस्यानुकीर्तनादेव[2] वेदपुण्येन युज्यते ॥१॥

वेदपुण्येन वेदपाठपुण्येन ।

प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः ।
[3]वामदेवस्तृतीयस्तु ततो [4]राथन्तरः स्मृतः ॥२॥
रौरवः पञ्चमः प्रोक्तः [5]षष्ठः [6]प्राण इति स्मृतः ।
सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥३॥
सद्योऽथ नवमः [7]कल्प ईशानो दशमः स्मृतः ।
[8]तम एकादशः[9] प्रोक्तस्तथा सारस्वतोऽपरः ॥४॥
त्रयोदश उदानस्तु गारुडोऽथ[10] चतुर्दशः ।
कौर्मः [11]पञ्चदशो ज्ञेयः[12] [13]पौर्णमास्यामजायत ॥५॥
षोडशो नारसिंहस्तु [14]वामनस्तु ततोऽपरः[15] ।
आग्नेयोऽष्टादशः प्रोक्तः सोमकल्प-[16]स्ततः स्मृतः ॥६॥

1 M. P. महापातकनाशनं
2 A यस्यानुकीर्त्तनं वेद
3 Corrected from M. P. A वामदेव्यस्तृतीथंस्तु, I. O. वाम-देवास्तृतीयस्तु
4 Corrected from M. P. A रथन्तरं, I. O. वाथन्तर.
5 Both I. O. and A षष्ठप्राण for षष्ठः प्राण
6 M. P. देव
7 M. P. प्रोक्त
8 Corrected from M. P. I. O. ध्यान, A ०यग्न
9 A एकादश
10 A गारुडस्तु
11 M. P. पञ्चदशः प्रोक्तः
12 A राजन
13 Corrected from M. P. Both I. O. and A पौर्णमासी प्रजापतेः
14 M. P. समानस्तु
15 A ततः परः
16 M. P. ०स्तथापरः

मानवो विंशतिः प्रोक्तस्तत् पुमानिति चापरः ।
वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथापरः[1] ॥७॥
पञ्चविंश [स्ततो घोरो][2] वाराहस्तु ततोऽपरः ॥८॥
सप्तविंशोऽथ वैराजो[3] गौरीकल्पस्तथापरः ।
माहेश्वरस्ततः[4] प्रोक्तस्त्रिपुरं [5]यत्र घातितम् ॥९॥
पितृकल्पस्तथा-[6][न्ते तु या कुहू]र्ब्रह्मणः [7]पुरा ।
इत्येवं ब्रह्मणो मासः[8] सर्वपापप्रणाशनः[9] ॥१०॥
[10]आदावेव हि माहात्म्यं यस्मिन् [11]यस्य विधीयते ।
तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥११॥
यस्तु[12] दद्यादिमान् कृत्वा [13]हेमान् [14]पर्वणि पर्वणि ।
ब्रह्मविष्णुपुरे [15]कल्पं मुनिभिः पूज्यते दिवि ॥१२॥
सर्वपापक्षयकरं कल्पदानं यतो भवेत् ।
मुनिरूपांस्ततः कृत्वा दद्यात् कल्पान् विचक्षणः ॥१३॥

अत्र प्रथमं त्रिशतं कल्पान् सौवर्णमुनिप्रतिमारूपान् द्विजान् दक्षिणे अक्षसूत्रधरान् वामे कमण्डलुधरान् कृत्वा पौर्णमास्यमावास्याष्टमीद्वयचतुर्दशीद्वयरविसंक्रमणेषु क्रमेणैकैक-

---

1 M. P. adds the following after this:—चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञकः, which portion was presumably wanting in the MS. of M. P., utilised by Ballāla Sena, as is evident from the last three lines of the accompanying prose comment on the next page.

2 Corrected from M. P. I. O. तिनो घोरे and A' तिमर्चिषो for the b. p.

3 Corrected from M. P. I. O. सप्तविंशस्ततो राजा and A सप्त... तो राजन्

4 M. P. ०स्तु स

5 I. O. पत्र

6 Corrected from M. P. Both I. O. and A' न्यम्तु मानवद for the b. p.

7 Corrected from M. P. I. O, and A' स्मृत:

8 A मार्ग:

9 A प्रणशनः M. P. सर्वपातकनाशनः

10 A आचारेण

11 I. O. पश्य

12 A यस्य

13 I. O. हेमान्

14 A' सुनींश्च

15 M. P. वास

शोऽभ्यर्च्य यजमानः शुचिर्ब्राह्मणायार्चिताय दद्यात्। तद् यथा—ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्त-कल्प-दानफलप्राप्तिकामोऽहमेतं सुवर्णघटितं श्वेतकल्पं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कल्पोऽयं विष्णुदैवत इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा कल्पं स्पृशेत्। एवं नीललोहितादिकल्पदानवाक्ये श्वेतकल्पपदस्थाने यथायथममुककल्पमिति विशेषः। वैकुण्ठश्चापरस्तद्वदिति वैकुण्ठनामैवापरोऽपरनामैव वेति [1]विनिगमनायां प्रमाणाभावात दानवाक्ये [2]वैकुण्ठानन्तरं [3]त्रयोविंशं कल्पं ददानीति विशेषः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे कल्पदानावर्तः।

1 A निगमा
2 A वैकुण्ठनामान्तर
3 I. O. त्रयोविंशत्

अथ प्रजापतिदैवत- प्रैष्यदानावर्तः। (४५)

महाभारते (अनु—२३।६८) :—

वैवाहिकानां द्रव्याणां [2]प्रैष्याणाञ्च युधिष्ठिर।

दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिनः ॥१॥

[3]प्रैष्याणामिति विशेषानुपादानाद्दासीदासमिथुनानामुपादानम्। [4]प्रैष्याणामिति बहुत्वं दातृबहुत्वापेक्षया। अत्र यजमानो ब्राह्मणायार्चिताय दासमर्चितं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुक[5]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं स्वर्गप्राप्तिकामोऽहमेतं दासं[6] ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दासोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा दासं[7] हृदये स्पृशेत्। [8]दासीदासमिथुनदानवाक्ययोस्तु एतां दासीमेतद्दासमिथुनमिति विशेषः[9]।

स्कन्दपुराणे :—

रथमश्वं गजं [दासीं कन्यां गृहं][10]-मथापि च।

भूमिञ्च यः प्रयच्छेत[11] स राजा भुवि जायते ॥२॥

ब्राह्मणायार्चिताय दासीमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [12]भूमिराज्यप्राप्तिकामोऽहमेतां दासीं ददानि। स्वस्त्यादिस्त्रीकारान्तं पूर्ववत्। दासदाने तु एतं दासमिति विशेषः।

आग्नेयपुराणे :—

एतद्विचार्य हृदये दासीं दद्याद्द्विजातये।

स्थिरनक्षत्रसंयुक्ते [13]सोमे सौम्यग्रहान्विते ॥३॥

स्थिरनक्षत्रसंयुक्ते [रोहिण्यार्द्रयोरन्यतमनक्षत्रयुक्तेसोमे चन्द्रे][14] सौम्यग्रहान्विते × ×।

1, 2, 3 and 4 A प्रैष्य०, प्रष्याणाञ्च, प्रेष्याणामिति and प्रेष्याणामिति

5 A' omits वेदामुक

6 A' omits दासं

7 A omits दासं

8 A दासीदासदानयोस्तु वाक्यं

9 I. O. शेषः

10 A दासं दासीं कन्या for the bracketed portion

11 A' प्रयच्छेच

12 A omits भूमि

13 I. O. सोम

14 I. O. रोहिण्युत्तरस्यामन्यतमनक्षत्रस्थे for the b. p.

[1]दानकालं प्रशंसन्ति सन्तः पर्वणि वा पुनः ।
अलङ्कृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ॥४॥
इयं दासी मया तुभ्यं श्रीवत्स[2] प्रतिपादिता ।
सदा कर्मकरी [3][योज्या यथेच्छं] भद्रमस्तु ते ॥५॥
दत्त्वा क्षमापयेत् पश्चात् [4]ब्राह्मणं वस्त्रकाञ्चनैः ।
अनुगत्वा तु सीमायां विसर्जयेत्[5] द्विजं ततः ॥६॥

सीमायां गृहसीमायां गृहद्वार इत्यर्थः ।

एवं दत्त्वा महाराज कृतकृत्यो भवेत् पुमान् ।
इहलोके परे चैव सप्तजन्मान्यखण्डितः ॥७॥

उक्तानामन्यतमे समये वस्त्रैर्भूषणैश्चालङ्कृतां दासीमर्चितामर्चिताय ब्राह्मणाय इयं दासी [6]मयेति मन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त[7]-नियतसमयविहित-दासीदानफलप्राप्तिकामोऽहमेतां वस्त्रैर्भूषणैरलङ्कृतां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । ततो यजमानो ब्राह्मणं पुनर्वस्त्रैः काञ्चनैश्चाभ्यर्च्य क्षमस्वेत्युक्त्वा [8]सीमामनुगम्य विसर्जयेत् ।

[9][वामनपुराणे (९५।४०) ब्राह्मणाय दानानुवृत्तौ :—

दासीं दासमलङ्कार-[मन्नं षड्रस][10]-संयुतम् ।
[11]पुरुषोत्तमप्रीत्यर्थं प्रदेयं[12] सर्वकालिकम् ॥८॥

ब्राह्मणायार्चिताय दासीमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुरुषोत्तमप्रीतय एतां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।]

तथा :—

गृहकर्मकरीं दद्यात्तरुणीं रूपशालिनीम्[13] ।
बहुद्रव्योपसंयुक्तां ग्रामवेश्मसमन्वितां ॥९॥

---

1 A reads the entire line as शुभाशुभाविभेदेन कालं प्रशंसन्ति सन्तः पर्वणिव पुरा
2 Both I. O. and A श्रीवत्सं
3 A तोष्या यथेष्टं for the b. p.
4 I. O. ब्राह्मणौवस्त्रकाञ्चनैः
5 I. O. वर्जयेत
6 A ममेति
7 I. O. आग्नेयपुराणो
8 A सीमान्तमनु०
9 A reads the bracketed portion between पूर्ववत् and दास दाने, two lines above आग्नेय, पुराणो on the previous page
10 A omits the bracketed portion
11 I. O. and A पुरुषोत्तमस्य प्रीत्यर्थं Vāmana P. पुरुषोत्तमतुष्टयर्थं
12 A देयं
13 A omits रूपशालिनीम्

[1]बहुद्रव्योपसंयुक्तां [2]पानीयपात्र शय्यामुषलोदूखल-वस्त्रालङ्कार-रन्धनसामग्री[3]-गृहवासोचितद्रव्यसहितामित्यर्थः ।

दासीं समीक्ष्य बहुशो गृहकर्मदक्षां यो ब्राह्मणाय कुलशीलवते ददाति ।

विद्याधराधिपतिभिः[4] प्रतिपूजितोऽसौ मर्त्यैः प्रयाति [5]सपुरैः सह मर्त्यलोकम् ॥१०॥

ब्राह्मणाय कुलशीलवतेऽर्चिताय उत्कृष्टां गृहवासोचितद्रव्यसहितां गृहयुतां ग्रामसहितां दासीमर्चिताम् ॐ अद्यादि[6] तुभ्यमहं सम्प्रददे इति मन्त्रमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-ग्रामादियुक्त-दासीदानफलप्राप्तिकामोऽहमेनां बहुद्रव्योपसंयुक्तां ग्रामवेश्मसमन्वितां दासीं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३१२।२ख) :—

दासं कर्मकरं दत्त्वा गोसवस्य फलं लभेत् ।

अर्चिताय ब्राह्मणाय कर्मकरणक्षमं दासमर्चितम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इति मन्त्रमुक्त्वा दद्यात् । गोसवफलप्राप्तिकामोऽहमेतं दासं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा दासदानानुवृत्तौ (३।३१२।३क) :—

स याति शक्रसालोक्यं[7] यस्तु योग्यं[8] प्रयच्छति ॥११॥

[9]योग्यं कर्मकुशलम् । अर्चिताय ब्राह्मणाय [10]कर्मकुशलं दासमर्चितम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इति मन्त्रमुक्त्वा दद्यात् । [11]शक्रसालोक्यप्राप्तिकामोऽहमेतं दासं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

तथा (३।३१२।३ख-४क):—

यस्तु कर्मकरीं दासीं ब्राह्मणाय प्रयच्छति ।

लोकास्तु सुलभास्तस्य वसूनां समुदाहृताः ॥१२॥

ब्राह्मणायार्चिताय कर्मकरणक्षमां दासीमर्चिताम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इति मन्त्रमुक्त्वा दद्यात् । [वसुलोकप्राप्तिकामोऽहमेनां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][12]

---

1 I. O. यज्ञद्रव्योपसंयुक्ता
2 A पानीयपात्रं पतिशय्यासलोदूखल॰
3 I. O. ॰सामग्रिकादि॰
4 I. O. विद्याधराधिपतिभिः
5 A सरिरैः मर्त्यलोके
6 A omits अद्यादि
7 A स जाति सक्रसायुज्यं
8 I. O. and V. D. योधं
9 I. O. योधं युद्धकुशलं
10 I. O. युद्धकुशलं
11 A शक्रसायुज्यप्राप्तिकामो॰
12 A omits the bracketed portion

तथा (३।३ १२।४ख-५क) :—

[[1]तरुणीं रूपसम्पन्नां दासीं यस्तु प्रयच्छति ।
[2](सोऽप्सरोभिर्मुदा युक्तः क्रीड़ते नन्दने) वने ॥१३॥][3]

ब्राह्मणायार्च्चिताय तरुणीं रूपसम्पन्नां[4] दासीमर्च्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्म्मोत्तरोक्त-तरुणीदासीदानफलप्राप्तिकामोऽहमेतां दासीं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

इति महाराजाधिराजनिःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [5]प्रैष्यदानावर्तः ।

1 A तरुणी
2 A अप्सरोपियदापुत्र क्रीड़ते नवने for the bracketed portion
3 A reads the bracketed portion just before यस्तु कर्मकरीं दासीं, six lines above
4 A रूपवतीं
5 A प्रेस्य०

अथ प्रजापतिदैवतशस्य[1]-दानावर्तः । (४६)

मनुः (४।२३२) :—

धान्यदः शाश्वतं सौख्यम् ॥१॥

आप्नोतीति सम्बन्धः । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं यथेच्छसंख्यं धान्यं त् । ॐ अद्यामुकगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं शाश्वत-प्राप्तिकामोऽहमेतद्धान्यं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा मिदं प्रजापतिदैवतमित्युक्त्वा[यथाशाखं कामस्तुति[2](पठेत् । ततः ॐ) अद्य कृतैतद्दान-ार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा][3]धान्यमुष्टि यान ।

महाभारते (अनु—२३।१०१) :—

रसानामथ बीजानां धान्यानां [4]वा युधिष्ठिर ।

स्वयमुत्पाद्य[5]दातारः पुरुषाः स्वर्गगामिनः ॥२॥

बीजानां शाककुष्माण्डादिबीजानां कलमादीनां स्वयमुत्पाद्य [6]कृष्यादिना अर्चिताय णायार्चितानि यथोक्तबीजानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गप्राप्तिकामोऽह-ने बीजानि ददानि । स्वस्त्यादिश्लोकारान्तं पूर्ववत् । एवं धान्यदाने[धान्यं ोति][7] वाक्ये विशेषः ।

तथा :—

धान्यं[8]श्रमेणार्जितवित्तसञ्चितं [9]विप्रे सुशीले प्रतियच्छते यः ।

वसुन्धरा तस्य भवेत् [10]सुतुष्टा धारा वसूनां प्रतिमुञ्चतीति ॥३॥

श्रमेणार्जितवित्तसञ्चितं स्वयं वाणिज्यादिलब्धधनेन क्रीतम् । अर्चिताय ब्राह्मणायार्चितं

---

1 A ०सम्य०

2 A पठित्वा for the bracketed portion

3 I. O. omits the bracketed portion

4 A च युधिष्ठिर:

5 A तेतार:

6 A ते कृष्यादिना

7 A धान्यदानीति for the bracketed portion

8 A क्रमे०

9 A विप्रेषु शालि

10 A सुतुष्टावथो

यथोक्तधान्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-श्रमार्जित-वित्तसञ्चित-धान्यदानफल[1]-प्राप्तिकामोऽहमेतद्धान्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

[2]ओषधीर्यः प्रयच्छेत धान्यानि विविधानि च।
स [3]सर्वकामसंयुक्तः सोमलोकं समश्नुते ॥४॥
तत्र वर्षसहस्राणि सप्त स्थित्वा[4] पुनर्नरः।
[5]इह सर्वधनोपेतो [6]भोगवानभिजायते ॥५॥

ओषधयो [7]ग्राह्याः परिभाषोक्ताः। धान्यानि विविधानि कलमादीनि। अर्चिताय [8]ब्राह्मणायार्चिता यथेच्छमोषधीः ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्तौषधी-दानफलप्राप्तिकामोऽहमेना ओषधीर्ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। धान्यदाने[9] तु वाक्ये[10] ओषधीपदस्थाने धान्यपदनिवेशो विशेषः।

विष्णुधर्मोत्तरे (३।३१४।१) :—

धान्यानामुत्तमं दानं कथितं द्विजपुङ्गवाः[11]।
धान्येभ्योऽपि परं धान्यं रक्तशालिः प्रकीर्तितः ॥६॥

द्विजपुङ्गवा[12] इति सम्बोधनम्।

रक्तशालिं नरो दत्त्वा सूर्यलोके महीयते। (३।३१४।२क)

[13]अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं रक्तशालिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-सूर्यलोकप्राप्तिकामोऽहमेतं रक्तशालिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१४।२ख) :—

दत्त्वा तथा सुगन्धांश्च गन्धर्वैः सह मोदते ॥७॥

अत्र धान्यप्रकरणात् सुगन्धानिति सुगन्धिशालयो बोद्धव्याः। अर्चिताय ब्राह्मणाया-र्चितान् यथेच्छसंख्यान् गन्धशालीन्[14] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-गन्धर्वलोकप्राप्तिकामोऽहमेतान् गन्धशालीन् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. omits फल
2 A ओषधिर्यस्य यच्छेत
3 I. O. सर्वकालसंयुक्त:
4 A स्थित्वा गत्वा for सप्त स्थित्वा
5 A तत्
6 A भोगवान्निति जायते
7 I. O. शुक्लाद्या:
8 A ब्राह्मणार्चिता
9 I. O. धान्यधाने
10 A वाक्यं
11 A द्विजपुङ्गव:
12 A द्विजपुङ्गव
13 A omits अर्चिताय ब्राह्मणाय
14 I. O. गन्धशीलान्

तथा (३।३१४।३क) :—

कलमानां प्रदानेन सोमलोके महीयते ।

अर्चिताय ब्राह्मणायार्चितान्[1] कलमान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्ष-
[सो]मलोकप्राप्तिकामोऽहमेतान् कलमान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[2]महाशालेः प्रदानेन [3]वसूनां लोकमाप्नुयात् ॥८॥ (३।३१४।३ख)

महाशालिः स्वनामप्रसिद्धः । अर्चिताय ब्राह्मणायार्चितं महाशालिधान्यं यथेच्छ-
[परि]माणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतं [4]महाशालि-
[धा]न्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।४क) :—

काष्ठशालिं नरो दत्त्वा अलकायां प्रमोदते ।

काष्ठशालिर्गन्धहीनशालिः । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं काष्ठशालिम्
[ॐ] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5]अलकावस्थानपूर्वकप्रमोदप्राप्तिकामोऽहमेतं काष्ठशालिं
[दद]ानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।४ख) :—

व्रीहीणामाढ्यमानानां[6] दानात् स्वर्गमवाप्नुयात् ॥६॥

[व्रीहीणां षष्टिकेतर][7]-शरत्पक्वधान्यानाम् [8]आढ्यमानानां [9]बहुपरिमाणानाम् । अर्चिताय
[ब्रा]ह्मणायार्चितं यथेच्छपरिमाण[10] व्रीहिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [11]स्वर्ग-
[कामो]ऽहमेतान् व्रीहीन् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।५क) :—

यवप्रदानेन नरः [12]शक्रलोके महीयते ।

अर्चिताय [13]ब्राह्मणायार्चितं यथेच्छपरिमाणं [14]यवम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा
[दद्य]ात् । सोत्कर्षशक्रलोकप्राप्तिकामोऽहमेतं यवं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A omits अर्चितान
2 A महाशालि प्रदानेन
3 A वसुलोकमवाप्नुयात्
4 A महाशालि
5 A अलंकारान for अलकावस्थान
6 I. O. व्रीहीनामाद्यमानानां
7 A व्रीहिर्शालि ॐ अद्यादित्तानां for the b. p.
8 I. O. आद्यमानानां
9 A उद्धपरिमाणानाम्
10 Both I. O. and A यथेच्छबहु-परिमाणां
11 A स्वर्गलोक for स्वर्ग
12 I. O. स्वर्गलोके
13 A omits ब्राह्मणाय
14 A omits यवम्

तथा (३।३१४।५ख) :—

तथा गोधूमदानेन वसूनां लोकमाप्नुयात् ॥१०॥

अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं गोधूमम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतं गोधूमं[1] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।६क) :—

प्रियो भवति लोकस्य प्रियङ्गुं यः प्रयच्छति ।

[2]प्रियङ्गु कामनीति प्रसिद्धा । अर्चिताय ब्राह्मणायार्चितां यथेच्छपरिमाणां प्रियङ्गुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । लोकप्रियत्वप्राप्तिकामोऽहमेतां प्रियङ्गुं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[तथा (३।३१४।६ख) :—

ददाति यस्तु श्यामाकं तस्य प्रार्थन्ति देवताः ॥११॥

अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं श्यामाकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । देवताप्रातिप्राप्ति[3]-कामोऽहमेतच्छ्यामाकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][4]

तथा (३।३१४।७) :—

अन्येषां शूकधान्यानां प्रदाननिरतो नरः ।

स्वर्गलोकमवाप्नोति नात्र कार्य्या विचारणा ॥१२॥

अन्येषां शूकधान्यानामिति पूर्वोक्त-[5]शूकसहित-रक्तशालि-गन्धशालि-[6]काष्ठशालि-यव-गोधूमेभ्य इतरेषां प्रकृष्टशूकयुक्तानां नीवारादीनां [7]ते च लोकत एवानुसन्धेयाः । अर्चिताय ब्राह्मणायार्चितं[8] यथेच्छपरिमाणं शूकधान्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गलोक-प्राप्तिकामोऽहमेतच्छूकधान्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।८ क) :—

[9][मुद्गदः शक्रलोकन्तु ।

लभत इति सम्बन्धः । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं मुद्गम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । शक्रलोकप्राप्तिकामोऽहमेतं मुद्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 A एतद्गोधूमं for एतं गोधूमं
2 A प्रियङ्गुकामिनी प्रसिद्धा
3 A omits प्राप्ति
4 A reads the bracketed portion twice
5 A ०शक्र०
6 A omits काष्ठशालि
7 A तेन
8 A omits अर्चितं
9 A reads the following for the bracketed portion :— माषदः शक्रलोकन्तु लभतेति सम्बन्धः

तथा (३।३१४।८ क) :—

यमलोकन्तु माषदः ॥१३॥

[1]लभत इति सम्बन्धः ।] अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं माषम ॐ
ग्रादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-माषदानफलप्राप्तिकामोऽहमेतं माषं
दानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।६क) :—

षष्टिकानां प्रदानेन लोकं नैर्ऋतकं [2]लभेत् ।

षष्टिकाः [3]साठिया इति प्रसिद्धाः । अर्चिताय ब्राह्मणायार्चितान् यथेच्छपरिमाणान्
ष्टिकान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नैर्ऋतलोकप्राप्तिकामोऽहमेतान् षष्टिकान्
दानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।६ख) :—

[4]सचीणचणके दत्त्वा लोकं वारुणमाप्नुयात् ॥१४॥

[5]सचीणः कलायः । अर्चिताय ब्राह्मणायार्चितं[6] यथेच्छपरिमाणं कलायम् ॐ अद्यादि
भ्यमन्तमुक्त्वा दद्यात । वारुणलोकप्राप्तिकामोऽहमेतं [7]सचीणं ददानि । स्वस्त्यादिस्वीकारान्तं
र्ववत् । चणकदाने तु एतं चणकमिति [8]वाक्ये विशेषः ।

तथा (३।३१४।१०क) :—

वायव्यञ्च मसूराणि राजमाषाणि धानदम् ।

[9]दत्त्वाप्नुयादिति सम्बन्धः । वायव्यं वायुलोकं धानदं धनदलोकम् । अर्चिताय
ह्मणायार्चितं यथेच्छपरिमाणं मसूरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वायव्यलोक-
प्तिकामोऽहमेतान् मसूरान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । राजमाषदाने तु
ानदलोकप्राप्तिकामोऽहमेतानि [10]राजमाषाणीति वाक्ये विशेषः ।

तथा (३।३१४।१० ख) :—

अन्येषां [11]शिम्बिधान्यानां दानात् स्वर्गमवाप्नुयात्[12] ॥१५॥

---

1 I. O. लभतेति
2 A भवेत्
3 A शाठेया: इति प्रसिद्ध:
4 A षष्ठीनचनके
5 A शठीन:
6 A omits अर्चितं
7 A सठीनं
8 A वाक्यविशेष:
9 A दातास्नुयादिति
10 A राजमाषाणि वाक्यविशेष:
11 A शिम्बधान्यानां, I. O. शिम्बिका-धान्यानां
12 I. O. स्वर्गमाप्नुयात्

अन्येषामिति [विष्णुधर्मोत्तरोक्त-मुद्ग]-[1]माष-तिल-कलाय-चणक मसूर-राजमाषेभ्यो व्यतिरिक्तानां सर्षपादीनाम् । ते च लोकत एव प्रसिद्धाः । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं शिम्बिधान्यम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्युक्त्वा दद्यात् । [2]स्वर्गप्राप्तिकामोऽहमेतानि [3]शिम्बिधान्यानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे शस्यदानावर्तः ।

---

1 A विष्णुधर्मोत्तर for the bracketed portion

2 A स्वर्गलोक for स्वर्ग

3 A सिध्यसिम्बि for शिम्बि

अथ प्रजापतिदैवततिलदानावर्तः । (४७)

तत्र तिलदानप्रशंसा ।

महाभारते (अनु-६६।१०-११) :—

महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिला[1] विभो[2] ॥१॥
पौष्टिका रूपदाश्चैव तथा पापविनाशनाः ।
तस्मात् सर्वप्रदानेभ्यस्तिलदानं विशिष्यते ॥२॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

[3]भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकस्वर्णधूर्यान् दत्त्वा स्वर्गे महीयते ॥३॥

अथ यजमानोऽर्चिताय ब्राह्मणायार्चितान् यथेच्छपरिमाणान् तिलान् [4]दद्यात् । ॐ ...ामुकसगोत्रायामुकवेदामुक[5]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षस्वर्गप्राप्तिकामोऽह- ...ांस्तिलान् ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा तिला एते प्रजापतिदैवता ...ुक्त्वा यथाशाखं कामस्तुतिं पठेत् । [तत ॐ अद्य][6] कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं ...ाणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा तिलमुष्टिं गृह्णीयात् ।

यमः :—

तिलप्रदः प्रजामिष्टां पुरुषः खलु विन्दति ।
माघे मासि विशेषेण[शुक्ले कृष्णे][7]विशेषतः ॥४॥

[यत्र कुत्रापि][8]दिनेऽर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा... ...त् । अभिमतप्रजाप्राप्ति[9]-कामोऽहमेतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. तिलां
2 A प्रभो
3 I. O. भूदीपश्चान्न०, A भूदीप वस्त्रान्नस्तिलसर्पिषु प्रतिश्रयान्
4 I. O. omits दद्यात्
5 A omits वेदामुक
6 A तत्र for the bracketed portion
7 I. O. तत्र मिश्रे for the bracketed portion
8 I. O. अत्र छाया for the bracketed portion
9 A प्राप्ति and I. O. प्रजा for प्रजाप्राप्ति

एषामेव माघे मासि शुक्लपक्षतिथौ दाने फलविशेषः। [1]तत्कृष्णपक्षतिथौ च ततोऽपि विशेषः। तत्र माघे मासि तिलदाने यथोक्तमाघमास[2]-विहिततिलदानफलप्राप्तिकामोऽहमिति वाक्ये विशेषः। [3]कृष्णपक्षतिलदाने तु [4]माघमासिककृष्णपक्षविहिततिलदानफलप्राप्ति-कामोऽहमिति वाक्ये विशेषः।

[5]तथा :—

सर्वपातकसंघातः कामतो वाप्यकामतः।
शुद्धिं तस्य प्रवक्ष्यामि[6] [स्वर्गसाधनमेव च ॥५॥
शुक्लैः कृष्णैः समैः स्निग्धैर्द्वात्रिंशदङ्गुलोच्छ्रितः।
राशिस्तिलैः समे देशे कर्तव्यः पुरुषायतः ॥६॥

समैरिति तुल्यभागैः शुक्लैः कृष्णैस्तिलैर्मिलितैरित्यर्थः। स्निग्धैर्मनोहरैः पुरुषायतः [7]सम्प्रदातृपुरुषायतः।

प्रतिमाष्टाङ्गुलो दातुः सौवर्णा विभवे सति।
क्षौद्रेण पयसा दध्ना घृतेनापूरयेद् घटान् ॥७॥

प्रतिमा दातृप्रसृति[8]-रूपा दातुः सन्निहितत्वात् विभवे सतीति श्रवणादशक्तावन्येनापि तैजसेन प्रतिमा कार्य्या।

यथाविभवविस्तारं ब्राह्मणे श्रोत्रियार्थिनि।
दद्यान्माघेऽथ वैशाखे विषुवे चोत्तरायणे।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥८॥

माघवैशाखयोरभीष्टदिने [9]विषुवोत्तरायणयोर्वान्यतरस्मिन् दिने यजमानः सुपरिमाणायतं द्वात्रिंशदङ्गुलोच्छ्रितं मधुदुग्धदधिघृतपूर्णघटचतुष्टयसहितमुपरिविन्यस्त-सौवर्णाष्टाङ्गुलात्म[10]-कृतिप्रतिमं पानीयशकटसमीकृतभूभागे समभागमिलित-शुक्लकृष्णतिलराशिमर्चितं कृत्वा अर्चिताय ब्राह्मणायार्थिने विद्यातपःशालिने ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यमोक्त-द्वात्रिंशदङ्गुलोच्छ्रित-तिलराशिदानफलप्राप्तिकामोऽहमेतं द्वात्रिंशदङ्गुलोच्छ्रितं पुरुषायत-

---

1 A omits तत्
2 A omits माघमास
3 I. O. तत्तुमिश्र for कृष्णपक्ष
4 A माघे मासि for माघमासिक
5 A reads तत्र माघे मासि before तथा
6 A omits the bracketed portion
7 I. O. सम्प्रदातृ०
8 I. O. ०प्रकृति०
9 I. O. विषवे चोत्तरायणयोर्वा०
10 I. O. ०त्मात्मा०

रिविन्यस्ताष्टाङ्गुलसुवर्णप्रतिमं क्षौद्रपयोदधिघृतपूर्णघटचतुष्टयसहितं तिलराशिं ददानि।
त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते :—

श्रूयतां वायवो धर्मः सरहस्यो महाफलः।
इमं कलियुगं प्राप्य मानवानां सुखावहम् ॥९॥
कल्यमुत्थाय यो मर्त्यः स्नातः शुक्लेन वाससा।
तिलपात्रं प्रयच्छेत ब्राह्मणेभ्यः समाहितः ॥१०॥
तिलपात्रे फलं प्राह भगवान् पाकशासनः।
गोप्रदानञ्च यः कुर्य्याद्भूमिदानञ्च शाश्वतम् ॥११॥
अग्निष्टोमञ्च यो यज्ञं यजेत बहुदक्षिणम्।
तिलपात्रं सहैतेन समं मन्यन्ति देवताः ॥१२॥

शुक्लेन वाससा तिलपात्रमाच्छाद्येत्यर्थः। ब्राह्मणेभ्य इति प्रयोगबहुत्वापेक्षम्।
श्च प्रत्यहमिदं दातव्यम्। एवञ्च चिरामुष्मस्य (?) विष्टरफलत्वमुपपन्नं कल्यमुत्थायेत्यपि
हकर्तव्यत्वार्थमुक्तं न तु प्रातःकाल एव कर्तव्यत्वार्थम्। अर्चिताय ब्राह्मणायार्चितं शुक्लवस्त्रा-
दितं तिलपूर्णपात्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात। महाभारतोक्ततिलपात्रदानफल-
कामोऽहमेतत् शुक्लवस्त्राच्छादितं तिलपात्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[1]ब्रह्मपुराणे :—

ये तिलांस्तिलधेनुञ्च घृतधेनुमथापि वा।
विप्रेभ्यः श्रोत्रियेभ्यश्च ददाति श्रद्धयान्विताः ॥१३॥
सोममण्डलसङ्काशैर्यानैस्ते यान्ति निर्मलैः।
गन्धर्वैरुपगायन्तः पुरं वैवस्वतस्य च ॥१४॥

विप्रेभ्य इति बहुवचनं दातृबहुत्वापेक्षया। अर्चिताय विद्यासंस्कारशालिने ब्राह्मणाया-
ान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यमगृहानुसर्पणकामोऽहमेतान्
ान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आग्नेयपुराणे :—

पुण्ये वा जन्मनक्षत्रे अयने विषुवेषु च।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये।
यानमश्वमनड्वाहं हैमरूप्यमणींस्तिलान् ॥१५॥

---

1 I. O. ब्राह्मपुराणे

ये प्रयच्छन्ति पापेषु निरताः सर्वदा मुने ।
न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥१६॥

उक्तदिनानामन्यतमेऽर्चिताय] ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-नियतसमयविहित-तिलदान-फलप्राप्तिकामोऽहमेतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

तिला नित्यं प्रदातव्या यथाशक्ति द्विजातये[1] ।
नित्यदानात् सर्वकामा[2] भवन्ति स्वर्णसंयुताः ॥१७॥

अर्चिताय ब्राह्मणाय यथेच्छपरिमाणकाञ्चन-[3]युक्तानर्चितान् तिलान् प्रत्यहं[4] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अमुककामोऽहमेतान् स्वर्णसंयुतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

[5][विष्णुधर्मोत्तरे[6] :—

लवणस्य प्रदातारस्तिलानां सर्पिषान्तथा ।
ओजस्विनोऽभिजायन्ते भोगिनश्चिरजीविनः ॥१८॥

अर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त[7]-तिलदानफलप्राप्तिकामोऽहमेतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।]

विष्णुधर्मोत्तरे[8] (३।३१४।८ख) :—

यथेच्छं[9] लोकमाप्नोति [10]तथा विप्रास्तिलप्रदः ॥१९॥

विप्रा इति सम्बोधनम् । अर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अमुक-[11]देवलोकप्राप्तिकामोऽहमेतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे तिलदानावर्तः ।

1 I. O. द्विजर्षभ
2 A सर्वकामान्
3 I. O. ०युक्तामर्चितान्
4 A omits प्रत्यहं
5 A reads the bracketed portion just above the colophon of this section
6 I. O. विष्णुधर्मे
7 I. O. विष्णुधर्मोक्त०
8 I. O. विष्णुधर्मे
9 A and V. D. यथेष्ट
10 A यथा
11 I. O. omits देव

अथ वनस्पतिदैवतारामदानावर्तः। (४८)

नन्दिपुराणे :—

क्रीडारामन्तु यो दद्यादुद्यानं[1] पुष्पसङ्कुलम्[2]।
सकल्पतरुखण्डेषु[3] महेन्द्रोद्यानवेश्मसु।
विनोद्यतेऽप्सरोवृन्दैर्वसेच्चात्र युगं बुधः ॥१॥

अत्र यजमानः क्रीडोचितवापी[4] गृहादिसहितं [पुष्पितं वकुलचम्पकादिपादपोपेत][5]-मुद्यान-चैत[6]-मर्चिताय ब्राह्मणाय दद्यात। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुक-शर्मणे तुभ्यं नन्दिपुराणोक्तोद्यानदानफलप्राप्तिकामोऽहमेतत् क्रीडारामोद्यानं ददानि। तग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उद्यानमिदं वनस्पतिदैवतमित्युक्त्वा यथाशाखं मस्तुतिं पठेत्। [तत ॐ अद्य][7] कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[8] काञ्चनं ानि। प्रतिगृहीता स्वस्तीत्युक्त्वा यथेच्छं वृक्षमूलानि स्पृशेत।

महाभारते[9] (अनु—२३।६६) :—

विहारावसथोद्यान-[कूपारामसभाप्रदाः][10]।
विप्राणाञ्चोपकर्तारः[11] पुरुषाः[12] स्वर्गगामिनः ॥२॥

उद्यानं सर्वजनोपभोग्यं नानाजातीयतरु[13]-वनम्। आरामो ग्रामसमोपस्थसजातीयतरु-म्। उद्यानमारामं वा कारयित्वा सकलसत्त्वेभ्य[14] उत्सृज्य दद्यात। ॐ[15] स्वर्गप्राप्ति-ोऽहं नानासत्त्वेभ्यो यथासम्भवफल-[पुष्पाद्युपभोगार्थं][16]-मेतदुद्यानमुत्सृजे। तत ॐ । कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत काञ्चनं ददानीति कस्मैचिद्[17]ब्राह्मणाय क्षिणादानम्। एवमारामदाने एतमाराममिति [18]वाक्ये विशेषः।

---

1 A सग्टह
2 A पुष्पसङ्कुलं
3 A ०सत्वेभ्य
4 A omits वापी
5 A वकुलचम्पकादिसपुष्पकल्पतरुपादप for the bracketed portion
6 A omits अर्चितम्
7 A ॐ for the b. p.
8 A एतत् for इदं
9 A omits महाभारते
10 I. O. सकूपारामसम्पदा: for the bracketed portion
11 I. O. विप्राणाश्चैव कर्त्तार:
12 A पुरुषै:
13 A omits तरु
14 A सत्त्वा
15 A omits ॐ
16 A पुष्पोपयोग्य for the bracketed portion
17 A एकस्मै after कस्मैचिद
18 A वाक्यविशेष:

विष्णुधर्मोत्तरे यममार्गानुवृत्तौ :—

आराम-[दानात् संयान्ति][1]तथैव द्रुमरोपकाः ।

शीतलेन तु मार्गेण फलपुष्पवता सुखम् ॥३॥

यथाशक्त्यारामनुपकल्प्यार्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त[2]-केवलारामदानफलप्राप्तिकामोऽहमेतमारामं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

तथा :—

[3]आराममथ सोद्यानं नन्दने क्रीड़ते वने ॥४॥

दत्त्वेति [4]शेषः । अर्चिताय ब्राह्मणायार्चितमाराममुद्यानञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दनवनक्रीड़ा[5]-प्राप्तिकामोऽहमेतं[6] [7]सोद्यानमारामं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्वल्लालसेनदेवविरचिते श्रीदानसागरे आरामदानावर्त्तः ।

---

1 I. O. द्वाराम यन्ति for the bracketed portion

3 A विष्णुधर्मोक्त

4 A आलाराममथ

4 A विशेष:

5 A नन्दनक्रीड़ावन०

6 A एतत् for एतं

7 I. O. सोद्यामारामं

अथ वनस्पतिदैवतवृक्षदानावर्तः । (४९)

महाभारते (अनु—५७।३६) :—

[1]पुष्पोपगं वाथ फलोपगं वा यः पादपं स्पर्शयते द्विजाय ।
[2][स स्त्रीसमृद्धं]बहुरत्नपूर्णं लभत्ययत्नोपगतं[3] गृहं वै ॥१॥

पुष्पोपगं पुष्पप्रदं[4] फलोपगं फलप्रदम् । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं पुष्पोपगं वृक्षं दद्यात् । ॐ [5]अद्यामुकसगोत्रायामुकवेदामुक[6]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं महाभारतोक्त-पुष्पोपगपादपदानफलप्राप्तिकामोऽहमेतं पादपं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पादपोऽयं वनस्पतिदैवत[7] इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [8][वृक्षं मूलदेशे] स्पृशेत । [9]फलोपगवृक्षदाने तु [10]वाक्ये पुष्पोपगपद[11]-स्थाने फलोपगपद[12]-[निवेशो विशेषः][13] ।

आदित्यपुराणे :—

स्कन्धेन [14]तारयेद् यस्तु [15]तृषार्तानां जलप्रदः ।
[16]पक्वान् ददाति [17]केदारान् [18]सफलांश्चैव पादपान् ॥२॥
षष्टि[19] कोटिसहस्राणि अर्बुदानाञ्च वै [20]तथा ।
क्रीडन्ति [21]ते श्वेतपुरे एतदुक्तं द्विजोत्तम[22] ॥३॥

---

1 A reads the entire line as follows :—पुष्पोपगन्वाथ फलोपगन्यय: पादपस्पर्शयते द्विजाय
2 A स स्त्रोसमृद्धं, M. bh. सश्रोकमृद्धं
3 Corrected from M. bh. A नभत्यपस्यावनतं, I. O. नभत्ययत्तोयलभं
4 I. O. पुष्पदं
5 A अद्यादि अमुकगोत्रायामुक०
6 A omits वेदामुक
7 I. O. ०दैवतम्
8 A वृक्षमूलदेश for the bracketed portion
9 A फलोपगवृक्षदाने
10 A वाक्येषु
11 I. O. omits पद
12 I. O. omits पद
13 A निवेश: for the bracketed portion
14 A भारयेद्
15 I. O. तृषात्तानां
16 A पक्वान
17 A केदानान
18 A सफला चैव
19 A षष्टि
20 A त्रयं
21 A omits ते
22 I. O. द्विजोत्तमः

अर्च्चिताय ब्राह्मणायार्च्चितान्[1] यथेच्छसंख्यान् [2]सफलपादपान् ॐ अद्यादि तुभ्य मुक्त्वा दद्यात्। आदित्यपुराणोक्त-पादपदानफलप्राप्तिकामोऽहमेतान् पादपान् दद स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

नन्दिपुराणे :—

फलवृक्षन्तु[3] यो दद्याद् धर्ममुद्दिश्य मानवः।
स सर्वकामतृप्तात्मा गच्छेद्वरुणमन्दिरम्।
[4][वसेच्च तत्र] पुरुषो युगं कामफलान्वितः ॥४॥

अर्च्चिताय भगवते धर्मायार्च्चितं फलसहितं[5] वृक्षमाम्रादीना[6]-मन्यतमं दद्यात्। अद्य नन्दिपुराणोक्त-वृक्षदानफलप्राप्तिकामोऽहं भगवते धर्मायैतं फलवृक्षं ददानि। ॐ [7]अद्य कृतैतद्दानप्रतिष्ठार्थं धर्मायाहं दक्षिणामेतत्[8] काञ्चनं ददानि।

विष्णुधर्मोत्तरे (३।२६७।११क) :—

आम्राक्षोड[9]-प्रदानेन [10]सर्वान् कामानवाप्नुयात्।

अक्षोडः[11] स्वनामप्रसिद्धः। [12][आम्राक्षोडेत्यत्र द्वन्द्वनिर्देशो यद्यप्युभयोः] क्रियासम्ब मात्रेणैव उपपद्यते [13]तथाप्याम्रस्योत्तरत्रापि श्रवणादत्र च [14]फलभूयस्त्वान्मिलितयोरेव दा अर्च्चिताय [15]ब्राह्मणायार्च्चितावाम्राक्षोडवृक्षौ [16]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अ प्राप्तिकामोऽहमेतावाम्राक्षोडौ[17] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

[18][तथा (३।२६७।१०ख) :—

दत्त्वा पालीवताम्रौ तु तृप्तिमाप्नोत्यनुत्तमाम् ॥५॥

पालीवतः पारेवत इति प्रसिद्धः। अर्च्चिताय ब्राह्मणायार्च्चितं पालीवतवृक्षम् अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अत्र तु तृप्तिकामोऽहमेतं पालीवतं ददानि। स्वस्त्य स्वीकारान्तं पूर्व्ववत्। आम्रवृक्षदाने तु वाक्ये पालीवतपदस्थाने आम्रपदनिवेशो विशेषः

1 A यथेष्टसंख्यान्
2 A[1] फलपादपान
3 I. O. फलवृक्षन्तु
4 A omits the bracketed portion
5 A omits फलसहितं
6 A[1] आम्रमादीनाम् for आम्रादीनाम्
7 A omits अद्य
8 A omits एतत्
9 I. O. आम्राक्षोड॰
10 A सर्वं
11 I. O. आक्षोदः
12 A आक्षोडेत्यत्र निर्देशो यद्यु for the bracketed portio
13 A तथाप्यस्योत्तरत्रापि
14 A फलभूतङ for फलभूयस्त्वान्
15 A ब्राह्मणायार्चितौ आक्षोडवृक्षं
16 I. O. omits ॐ
17 A ॰क्षोडौ
18 A omits the bracketed p tion

तथा [1]वृक्षदानप्रकरणे (३।२९७।९ख) :—

[2]नागरङ्गदानाद्भवति [3]नरो रूपसमन्वितः ।

अर्चिताय ब्राह्मणायार्चितं नागरङ्गं वृक्षम्[4] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5][उत्कृष्टरूपप्राप्तिकामोऽहमेतं नागरङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।२९७।१०क) :—

बीजपूरकदानेन सौभाग्यं महदाप्नुयात् ॥६॥

अर्चिताय ब्राह्मणायार्चितं बीजपूरकं वृक्षम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।] महासौभाग्यप्राप्तिकामोऽहमेतं बीजपूरकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

पुष्पदं फलदं वृक्षं दत्त्वा विप्राय भक्तितः ।

स्वर्गलोकपरिभ्रष्टो [6]नगराधिपतिर्भवेत् ॥७॥

पुष्पदं नागकेशरादिकं फलदं [7]कण्टकिफलादिकम् । अर्चिताय ब्राह्मणायार्चितं पुष्पदं वृक्षम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-पुष्पदवृक्ष[8]-दानफल-प्राप्तिकामोऽहमेतं वृक्षं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । फलदवृक्षदाने तु वाक्ये पुष्पद[9]-पदस्थाने फलदपदनिवेशो विशेषः ।

तथा (३।२९७।७ख-८क) :—

चम्पकं मल्लिकाजाती-[10][श्रेष्ठाः पुष्पाकरा मताः] ।

[11]अन्येभ्योऽधिकमाप्नोति दत्त्वैतान्नात्र संशयः ॥८॥

अर्चिताय ब्राह्मणायार्चितं चम्पकतरुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णु-धर्मोत्तरोक्त-चम्पकतरुदानफलप्राप्तिकामोऽहमेतं चम्पकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

---

1 I. O. omits वृक्ष

2 A नाना०

3 A नाना

4 A वृक्षान्तरं

5 A omits the bracketed portion but reads instead महासौभाग्यमाप्नोति बीजपूरस्य दानतः which is a paraphrase of the line viz. बीज...प्नुयात्, quoted within this bracketed portion

6 I. O. नागराधिपति०

7 A नाति for कण्टकि

8 I. O. omits वृक्ष

9 I. O. पुष्प for पुष्पद

10 A श्रेष्ठ पुष्पकला मता for the b. p.

11 A अन्येभ्योऽप्यधिकश्चैव

मल्लिकाजातीदानयोर्वाक्ये तु चम्पकपदस्थाने यथायथं मल्लिकापदनिवेशो जातीपदनिवेशश्च[1] विशेषः ।

तथा :—

गुल्मं [2]पुष्पप्रदं यस्तु [3]लतावासं प्रयच्छति ।
विमाने नन्दने सोऽथ क्रीडत्यप्सरसां गणैः ॥६॥

गुल्मोऽभिमुक्तादिः[4] लता नवमल्लिकादिः[5] । अर्च्चिताय ब्राह्मणायार्च्चितं पुष्पितं गुल्मम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तगुल्मदानफलप्राप्तिकामोऽहमेतं गुल्मं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् । एवं पुष्पितनवमल्लिकादि[6]-दाने लतादानफलप्राप्तिकामोऽहमेतां[7] लतामिति वाक्ये विशेषः ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे वृक्षदानावर्त्तः ।

---

1 A ०निवेशो
2 A पुष्पं ददे
3 A लतां वास
4 I. O. गुल्मोतिमुक्तादि
5 I. O. नवमालिकादिः
6 I. O. ०मालिकादि०
7 I. O. एतं

अथ विष्णुदैवतसम्भारदानावर्तः। (५०)

यमः :—

यस्तु सम्भृत्य सम्भारं ब्राह्मणेभ्यः प्रयच्छति।

तस्य पुण्यकृतो[1] लोका न तस्य [2]प्रभवाम्यहम् ॥१॥

सम्भारो विवाहोपनयन-[3]यज्ञाद्युपकरणसामग्री। ब्राह्मणेभ्य इति बहुवचनं जात्यपेक्षत्वादविवक्षितम्[4]। अत एकस्मै द्वाभ्यां बहुभ्यो वा दानम्। अत्र यजमानोऽर्चिताय [5]ब्राह्मणायार्चितं यमोक्तसम्भारं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [6]यमोक्तसम्भारदानफलप्राप्तिकामोऽहमेतं सम्भारं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा सम्भारोऽयं विष्णुदैवत[7] इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। [ततः ॐ][8] अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सम्भारं[9] स्पृशेत्। द्वाभ्यां सम्भारद्वयदाने बहुभ्यो वा बहुसम्भारदाने [10]देयसम्प्रदानयोर्द्विवचनं बहुवचनमूहनीयम्।

महाभारते (अनु—२३।६८):—

वैवाहिकानां द्रव्याणां प्रैष्याणाञ्च[11] युधिष्ठिर।

दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिनः ॥२॥

अर्चिताय ब्राह्मणायार्चितं विवाहोपकरणद्रव्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतानि वैवाहिकानि द्रव्याणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—५७।३३) :—

नैवेशिकं [12]सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय।

स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः[13] कुरुषूत्तरेषु[14] ॥३॥

---

1 A पुण्यकृता
2 A प्रववाम्यहं
3 A यज्ञव्यय॰ for यज्ञाद्युप॰
4 A जात्यपेक्षयाद्विवक्षितं, I. O. जात्यपेक्षत्वाद्विवक्षितं
5 A omits ब्राह्मणाय
6 A यथोक्त
7 A and I. O. विष्णुदैवतं
8 A omits the bracketed portion
9 I. O. सम्भारं
10 I. O. देयसम्भारयोर्द्विवचनबहुवचनमूहनीयं, A देयसंप्रदानयोर्द्विवचनबहुवचन चोदाहरणीये
11 A पुष्पाणाञ्च
12 I. O. सर्वगुणोपन्नं
13 A लोकाश्च
14 A गुरुषूत्तरेषु

नैवेशिकं विवाहादिक्रियासिद्ध्यचित[1]-मुपकरणम् । अर्चिताय विद्यातपःशीलशालिने ब्राह्मणाय तदभिमतविवाहयज्ञाद्युचितोपकरणं यथाशक्त्युपकल्प्यार्चितम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात् । [2]उत्तरकुरुलोकप्राप्तिकामोऽहमेतन्नैवेशिकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३१६।२०ख-२१क) :—

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारकम्[3] ।
यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत ॥४॥

तत्क्रियासिद्धिकारकम् [4]तदुपयोग्यद्रव्यम् । आदिशब्देन [5]यज्ञोपनयनप्रतिष्ठाग्रहणम् । अर्चिताय ब्राह्मणाया[6]-र्चितामुक्तामन्यतमां[7] सामग्रीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अश्वमेधफलप्राप्तिकामोऽहमेताममुकक्रियोचितसामग्रीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे सम्भारदानावर्तः ।

---

1 A °चित° for °सिद्ध्यचित°
2 A उत्तरगुरुलोक°
3 A तत्क्रियाकारकं
4 I. O. omits this
5 A यज्ञायतन° for यज्ञोपनयन°
6 A omits अर्चिताय ब्राह्मणाय
7 I. O. अन्यतरां

अथ तानादैवतपशुदानावर्तः । (५१)

विष्णुधर्मोत्तरे (३।३०६।५६ख—६०क)—

अजामलङ्कृतां दत्त्वा वह्निलोके महीयते ।

तमेव लोकमाप्नोति दत्त्वाजं[1] विधिवन्नरः ॥१॥

तमेव लोकं वह्निलोकं[2] विधिवदलङ्कारादिना । अत्र यजमानोऽर्चिताय ब्राह्मणाय छागीं सौवर्णतिलकादिभिरलङ्कृत्यार्चितां[3] दद्यात् । ॐ [4]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षवह्निलोकप्राप्तिकामोऽहमेतामलङ्कृतां छागीं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [5]छागीयमग्निदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[6] काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा छागीं कर्णे स्पृशेत्[7] । [एवमलङ्कृतछागदान[8]-वाक्ये एतमलङ्कृतं][9] छागमिति विशेषः ।

तथा (३।३०६।६१ख—६२क):—

[10]वारुणं लोकमाप्नोति दत्त्वा वस्तं[11] नरोत्तमः[12] ।

अविप्रदाता च तथा तदेव फलमश्नुते ॥२॥

[13]वस्तं छागं तदेव फलं [14]वारुणलोकप्राप्तिरूपमित्यर्थः । अर्चिताय ब्राह्मणायार्चितं वस्तम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [15]वारुणलोकप्राप्तिकामोऽहमेतं [16]वस्तं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अविदाने तु वाक्ये [17]वस्तपदस्थाने अविपद-[18][निवेशो विशेषः] । स्वस्तिसावित्रीपाठानन्तरम् अविरयं वरुणदैवत इति प्रतिग्रहीतृवाक्यम्[19] । [20][कामस्तुत्यादि पूर्ववत् ।] पुच्छग्रहणञ्च स्वीकारः ।

---

1 A दत्त्वाथो
2 A omits this
3 A अलङ्कृतां for अलङ्कृत्यार्चितां
4 A omits अद्य
5 I. O. छागीमग्नि०
6 A एतत् for इदं
7 A गृह्णीयात्
8 I. O. ०दाने०
9 A एवंमलङ्कृत for the bracketed portion
10 I. O. वरुणं
11 A छाग
12 I. O. नरोत्तम:
13 A omits it
14 A and I. O. वरुण०
15 A and I. O. वरुण०
16 A वस्त्रं
17 A वस्त्र०
18 A निवेश: for the bracketed portion
19 A प्रतिग्रहं गृहीतृवाक्यं
20 A and I. O. पूर्ववत् कामस्तुत्यादि

तथा (३।३०६।६२ख) :—

आरण्यपशुदानेन वायुलोके महीयते ॥३॥

आरण्यपशवो हरिणशशकादयः। अर्चिताय ब्राह्मणाय हरिणादीनामन्यतम[1]-मर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षवायुलोकप्राप्तिकामोऽहमेतमारण्यकपशुं ददानि। [2]स्वस्तिसावित्रीपाठानन्तरम् आरण्यपशुरयं वायुदैवत इति प्रतिग्रहीतृवाक्यम्[3]। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणञ्च स्वीकारः।

तथा (३।३१२।५ख-६क) :—

[उष्ट्रं वा गर्दभं वापि][4] खरं वा यः प्रयच्छति।
अलकां स समासाद्य[5] यक्षेन्द्रैः [6]सह मोदते ॥४॥

खरोऽश्वतरः। अर्चिताय ब्राह्मणायार्चितमुष्ट्रम्[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तोष्ट्र[8]-दानफलप्राप्तिकामोऽहमेतमुष्ट्रं[9] ददानि। स्वस्तिसावित्रीपाठानन्तरम् [10]उष्ट्रोऽयं निर्ऋतिदैवत इति प्रतिग्रहीतृवाक्यम्[11]। कामस्तुत्यादि पूर्ववत्। [उष्ट्रस्यारोहणं स्वीकारः। एवं गर्दभदानवाक्ये तु विष्णुधर्मोत्तरोक्तगर्दभदानफलप्राप्तिकामोऽहमेतं गर्दभमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं गर्दभोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम्[12]। कर्णग्रहणं स्वीकारः।][13] अश्वतरदानवाक्ये हि विष्णुधर्मोत्तरोक्तखरदानफलप्राप्तिकामोऽहमेतं खरमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं खरोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम्[14]। कामस्तुत्यादि पूर्ववत्। कर्णग्रहणं स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे पशुदानावर्तः।

---

1 I. O. अन्यं
2 A स्वस्त्यादिस्वीकारान्तं पूर्ववत्
3 I. O. प्रतिग्रहीतृवाच्यं
4 A स्वर्गमार्गगर्दभस्वपि for the bracketed portion
5 A समभासाद्य
6 A गृह
7 A खरं for उष्टम्
8 A खड्ग for उष्ट्
9 A खड्गं for उष्टं
10 A खड्गोऽयं
11, 12 and 14 I. O. ०वाच्यम्
13 A omits the bracketed portion

अथ प्रजापतिदैवत-कृष्णाजिन-दानव्रतः। (५२)

मत्स्यपुराणे (२०६।१।२१क, २२ख-३०) :—

कृष्णाजिनप्रदानस्य [1]विधिं कालं ममानघ।

ब्राह्मणांश्च [2]समाचक्ष्व [तत्र मे संशयो महान्]ₓ[3] ॥

मत्स्य उवाच :—

वैशाखी पौर्णमासी च[4] ग्रहणं[5] शशिसूर्ययोः।

पौर्णमासी [6]तथा माघी[7] [आषाढी[8] कार्त्तिकी तथा ॥२॥

[9]उत्तरायणे द्वादश्यां][10] तस्यां दत्तं महाफलम्[11]।

आहिताग्निर्द्विजो यस्तु[12] यद्देयं[13] तस्य पार्थिव ॥३॥

[14]तथा येन विधानेन तन्मे निगदतः शृणु।

गोमयेनोपलिप्ते तु शुचौ देशे नराधिप।

आदावेव समास्तीर्य शोभनं [15]वस्त्रमाविकम् ॥४॥

गोमयोपलेपादेव [16]शुचित्वप्राप्ते पुनः [17]शुचाविति पदं गोमयोपलेपे[18] कृते पुनः केश कीटादिवारणार्थम्।

ततः सशृङ्गं[19] सखुरमास्तरेत्[20] कृष्णमार्गकम्[21]।

[22]कर्तव्यं रुक्मशृङ्गन्तद्[23] रुक्मदन्तं[24] तथैव च ॥५॥

---

1 M. P. विधिकालौ

2 M. P. तथाचक्ष्व

3 A यथा मे तत्र संशयः महान् for the bracketed portion

4 A तु

5 M. P. ग्रहणे

6 M. P. तु या

7 I. O. and M. P. माघे

8 I. O. आषाढे, M. P. ह्याषाढी

9 M. P. उत्तरायणद्वादशीवा

10 A omits the bracketed portion

11 I. O. महाबलं

12 A यश

13 I. O. तद्देयं

14 A and M. P. यथा

15 Corrected from M. P. A मन्त्रमाविकं, I. O. परममाविकम्

16 A शुचित्त

17 A शुभाविति, I. O. शुचावेति

18 I. O. गोमयोपलेपेति

19 A शृङ्गं

20 A सखुरान्तरेत्

21 Corrected from M. P. I. O. and A ०मार्गकम्

22 A कर्त्तव्यवाक्यं शृङ्गन्तु

23 Corrected from M. P. I. O. and A तु for तद्

24 M. P. रौप्यदन्तं

रुक्मदन्तं [1]सौवर्णदन्तपङ्क्तिद्वययुतमित्यर्थः ।

[[2]लाङ्गूले विद्रुमञ्चैव नेत्रयोर्मौक्तिकं न्यसेत् ।

[3]तिलैरात्मसमं कृत्वा वाससाच्छादयेद्बुधः][4] ॥६॥

आत्मसमं कृत्वा सर्वतः कृष्णाजिनाच्छादकं तिलं दत्त्वेत्यर्थः[5] ।

[6]सुवर्णनाभं तत् कुर्यादलङ्कुर्याद्विशेषतः ।

[7]रत्नैर्गन्धैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ॥७॥

[8]रत्नैः परिभाषोक्तनवरत्नत्रयेण । [9]गन्धैः प्रसिद्धचन्दनादिभिः ।

कांस्यपात्राणि चत्वारि [10]तेषां दद्याद् यथाक्रमम् ।

मृन्मयेषु च पात्रेषु पूर्वादिषु [11]क्रमेण तु ॥८॥

[12]घृतं क्षीरं दधि क्षौद्रमेवं [13]दद्याद् यथाविधि ।

चम्पकस्य तथा शाखामव्रणं कुम्भमेव च ॥९॥

बाह्योपस्थानकं कृत्वा शुभचित्तो[14] निवेशयेत् ।

[15]जीर्णवस्त्रेण पीतेन सर्वाङ्गाणि च मार्जयेत् ॥१०॥

तच्च चम्पकशाखान्वितस्य कुम्भस्य [16]बहिःस्थापनं पीतवाससा दानोत्तर-[17]स्नानानन्तरमङ्ग-मार्जनञ्च यजमानेन कर्तव्यम्, तस्यैव [18]सुकृतत्वात् ।

धातुमयानि पात्राणि पादेष्वस्य प्रदापयेत् ।

यानि काम्यानि[19] पापानि मया [20]लोभात् कृतानि तु[21] ॥११॥

---

1 A सौवर्णशृङ्गं खुरञ्चेत्यर्थः

2 I. O. लाङ्गूलो

3 A तिलैरात्मसमं

4 M. P. reads the b. p. as लाङ्गूलं मौक्तिकैर्युक्तं तिलरुक्मं तथैव च । तिलैश्च विहितं कृत्वा वाससाच्छादयेच्छुचिः ॥

5 A दद्यात्

6 A स्वर्णनाभिं ततः कुर्याद्विशेषतः for the entire line

7 A वस्त्रैर्गन्धै०

8 A वस्त्रैः परिभाषोक्तैर्नवद्रसुच्यते

9 A यथाशक्त्यैर्गन्धैः

10 M. P. तेषु

11 A क्रमान्वयतः, M. P. यथाक्रमम्

12 A reads घृतं after दधि

13 Corrected from M. P. I. O. and A कुर्याद्

14 M. P. शुभचित्ता

15 M. P. सूक्ष्म०

16 A रहितस्थापनम्

17 A स्थापनान्तरमङ्गमार्जनञ्च

18 I. O. प्रकृतत्वात्

19 M. P. कानि च

20 I. O. लोकात्

21 M. P. वै

लौहपात्रप्रदानेन [प्रणश्यन्तु ममाशु वै][1] ।
तिलपूर्णन्तु तत् कृत्वा वामपादे निवेशयेत् ॥१२॥
यानि [पापान्यकामानि कर्मोत्थानि कृतानि तु][2] ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥१३॥
मधुपूर्णन्तु तत् कृत्वा पादे वै दक्षिणे न्यसेत् ।
परापवादपैशुन्याद्[3] [4]वृथा मांसस्य भक्षणात् ।
[5]तत्रोत्थितञ्च [6]पापं मे ताम्रपात्रात् प्रणश्यतु ॥१४॥
[7][कन्याया दूषणञ्चैव] परदारप्रधर्षणम्[8] ।
रूप्यपात्रप्रदानाद्धि क्षिप्रं नाशं प्रयातु मे ।
[9][ऊर्द्ध्वपादे त्विमे कार्ये ताम्रस्य रजतस्य च] ॥१५॥

[10]ऊर्द्ध्वपादयग्रपादे तयोश्च वामक्रमेणैव[11] पात्रारोपणम् पश्चात् पादयोस्तथाश्रुतेः ।

जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना[12] ।
सुवर्णपात्रदानात्तु [नाशयाशु जनार्दन][13] ॥१६॥
हेममुक्ताविद्रुमञ्च दाडिमं वीजपूरकम् ।
[14]प्रशस्ते पात्रश्रवणे [15]खुरैः शृङ्गाटकानि च ॥१७॥

अत्राग्रपादद्वयस्थ-[16]पात्रद्वयस्यानुपदिष्टस्थानक-सौवर्णपात्रस्य श्रवणे इति कर्णस्थानद्वयेति पञ्चानामाधारतया-[17]वगतेराधारद्रव्याणामन्येषां वा श्रुतेर्हेममुक्तादीनां[18] पञ्चानां तत्रा-

---

1 A क्षिप्रं नश्यन्तु तानि मे for the bracketed portion
2 M. P. reads the b. p. as कानि च पापानि कर्णोत्थानि कृतानि च
3 A परापवादपैसुन्या
4 Corrected from M. P. I O. पृष्ठमांसस्य, A प्रोष्ठमासंसस्य
5 I. O. ततोत्थितञ्च
5 A पापञ्च
7 I. O. कन्यागवाश्चैव तथा and M. P. कन्यानृताश्वाश्चैव for the b. p.
8 A परदारप्रसेवनं, M. P. परदाराभिमर्षणात्
9 I. O. omits the bracketed portion, A ऊर्द्ध्वपादौ त्विमौ कार्यौ०, M. P. ऊर्द्ध्वपादे त्विमे कार्ये०
10 I. O. and A ऊर्द्ध्वपादावग्रपादौ
11 A वामक्रमेणैव, I. O. रामक्रमणैव
12 A कुबुद्धिना
13 A नाशयेदाशु जनार्द्दन: for the bracketed portion
14 I. O. and A प्रशस्तपात्रश्रवणे, M. P. प्रशस्तपात्रे श्रवणे
15 M. P. खुरे
16 I. O. पाद for पात्र
17 A ०रगतेराधारद्रव्याणामन्ये षाञ्च
18 A ०हेमुमुक्तादीना

धेयत्वं [1]यथासंख्यमुन्नेयम्। [2]पात्रस्य श्रवणे इति पात्रश्रवणे अनिर्दिष्टस्थानस्य[3] सौवर्णपात्रस्य मध्यस्थान एव निवेशः। 'सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वज' इति पुनः सुवर्ण-[4]नाभिकत्वश्रुतेः। एवञ्च 'सुवर्णनाभं तत् कुर्यादि'त्युपरिग्रन्थेन[5] मध्ये सुवर्णपात्रं [6]स्थाप्यमिति सिद्धम्। अनेन च पात्रं सौवर्णं मध्ये [7]स्थाप्यमिति [8]द्विधा सुवर्णनाभिकत्वम्। खुरैः श्रृङ्गाटकानि [9]सिङ्घान इति प्रसिद्धानि फलानि[10] खुरेषु देयानीत्यर्थः।

एवं कृत्वा यथोक्तेन सर्वशाकफलानि च।
तत्प्रतिग्रह-[विद्विद्वाना][11]-हिताग्निर्द्विजोत्तमः ॥१८॥

एवं कृत्वेति खुरेष्वेव नानाजातीयशाकानि फलानि च नानाजातीयानि देयानीत्यर्थः।

[12]स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या [13]चाप्यलङ्कृतः।
प्रतिग्रहश्च तस्योक्तः पुच्छदेशे महीपते ॥१९॥
सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वजः।
अनेन विधिना [14]दत्त्वा [यथावत् कृष्णमार्गकम्][15] ॥२०॥
न [16]स्पृश्यः स द्विजो राजंश्चितियूप-[समो हि सः][17]।
[18][दाने च] श्राद्धकाले च दूरतः परिवर्जयेत् ॥२१॥
स्वगृहात् प्रेष्य[19] तं विप्रं मण्डले[20] स्नानमाचरेत्।
पूर्णकुम्भेन राजेन्द्र [शाखया चम्पकस्य च][21] ॥२२॥

---

1 I. O. समुन्नेयं
2 I. O. and A पात्रश्च
3 A adds च after this
4 A नाभिकत्व श्रुतेः
5 A एवञ्च सुवर्णनाभिं कुर्य्यादित्युपरिग्रन्थे
6 A संस्थाप्य०
7 I. O. स्थापनमिति
8 A द्विरासुवर्णनाभिकद्वयं
9 A सिंघ
10 I. O. adds योज्यानि here
11 Corrected from M. P. I. O. विद्विद्वामा and A नार्थाय मा for the bracketed portion
12 Corrected from M. P. A स्नातो वस्त्रयुगाच्छन्न and I. O. प्रवेतवस्त्रयुगच्छन्नः
13 A वाप्यलङ्कृतः
14 Corrected from M. P. I. O. and A दद्याद्
15 A भक्तमुमान्वम for the bracketed portion
16 M. P. स्पृश्योऽसौ
17 A समा हि ता for the bracketed portion
18 M. P. तं दाने for the b, p.
19 Corrected from M. P. I. O. and A प्रेष्य
20 I. O. and A मण्डपे, M. P. मङ्गल
21 A शाखाया यस्य कस्य च for the b. p.

[1]कृत्वाचार्यश्च कलसं मन्त्रेणानेन मूर्द्धनि ।
आप्यायतां समुद्रस्य [2]द्वयोर्जप्यास्तु षोडश ॥२३॥

[आप्यायतामित्येकः समुद्रस्य त्वेति][3] पञ्चदश । एवं षोडश भवन्ति[4] ।

[5][आहते वाससी वीत आचान्तः शुचितामियात्]
[6]तद्वस्त्रसहितं कुम्भं नीत्वा [7]क्षेप्यं चतुष्पथे ॥२४॥
[8]कृतेनानेन या तुष्टिर्न शक्याब्दशतैरपि ।
[9][वक्तुं हि] नृपतिश्रेष्ठ तथाप्युद्देशतः शृणु ॥२५॥
समग्रभूमिदानस्य फलं प्राप्नोत्यसंशयम् ।
सर्वांश्च[10] लोकान् जयति[11] [कामचारी विहङ्गवत्][12] ॥२६॥
आभूतसंप्लवं यावत् स्वर्गं प्राप्नोत्यसंशयम् ।
न पितुः पुत्रमरणं वियोगो[13] भार्यया सह ।
धनदेशपरित्यागं [नैव चेहाप्नुयात्][14] क्वचित् ॥२७॥

अत्र यजमान उक्तानां समयानामिच्छयान्यतमे स्नातः शुचि-[र्गोमयोपलिप्ते अ][15]-पनीत-
कशकीटादौ भूमिभागे स्वरूपं यथाशक्ति कम्बलमास्तीर्य तत्र सखुरं सशृङ्गं[16] कृष्णाजिनमास्तीर्य
[17]सौवर्णदन्तपङ्क्तिद्वयं विद्रुमलाङ्गूलं मुक्तानेत्रयुगं मध्यस्थानार्पितसुवर्णं कृत्वा सर्वतस्तिलै-
राच्छाद्य वाससाच्छादयेत् । ततः पूर्वस्यां दिशि घृतपूर्णं कांस्यपात्रं [मृन्मयञ्च पात्रं][18]
दक्षिणस्यां क्षीरपूर्णं [19]तत्पात्रयुगं पश्चिमायां दधिपूर्णं तत्पात्रद्वयम् उत्तरस्यां मधुपूर्णं

---

1 Corrected from M. P. A कृत्वा चावोर्घ, I. O. कृत्वा वाचार्य
2 A द्वाभ्वां जप्यास्तु
3 A आप्यायतामिति एकाग्रकसमुद्रस्य द्वावकायेति and I. O. आप्यायतामित्येकसमुद्रस्य वाचकयेति for the b. p.
4 I. O. तरन्ति
5 Supplied from M. P. I. O. and A omit it
6 A तद्वत् वस्त्रसहितं
7 Corrected from M. P. A क्षेप्तुमचतुष्टये, I. O. चतुष्पथे only
8 Corrected from M. P. I. O. and A क्षेपे for कृते॰
9 Corrected from M. P. I. O. and A वक्ष for the b. p.
10 A सर्व्वांश्च
11 I. O. यजति
12 A कामतारीद्द्रुमः for the b. p.
13 I. O. वियोगं
14 A नैवात्र प्राप्नुयात् for the bracketed portion
15 A गोमयोपलिप्ताः for the bracketed portion
16 A शृङ्गं
17 A सौवर्णशृङ्गं पङ्क्तिद्वयं
18 A omits the bracketed portion
19 A तत्पात्रद्वयं

तत्पात्रद्वयम् एवमष्टौ पात्राण्यारोप्य ॐ यानि काम्यानीति मन्त्रेण[1] तिलपूर्णं लोहपात्रं पश्चात् [2]वामपाद आरोपयेत्। [ॐ यानि पापान्यकामानीति][3] मन्त्रेण मधुपूर्णं कांस्यपात्रं पश्चाद्दक्षिणपाद आरोपयेत्। ॐ [परापवादेत्यादि][4]-मन्त्रेणोत्कृष्टसुवर्णसहितं ताम्रपात्रमग्रपाद[5] आरोपयेत्। ॐ [कन्याया दूषणमित्यादि][6]-मन्त्रेण उत्कृष्टमुक्तासहितं रौप्यपात्रमग्रदक्षिणपाद आरोपयेत्। ॐ [7]जन्म जन्म सहस्रेष्विति मन्त्रेणोत्कृष्टविद्रुमसहितं सौवर्णपात्रं मध्यस्थान आरोपयेत्। वामकर्णस्थाने [चोत्कृष्टदाडिमफलं दक्षिणकर्णस्थाने][8] चोत्कृष्टं वीजपूरफलमारोपयेत्। खुरचतुष्टयं शृङ्गाटक-सर्वशाक[9]-सर्वफलयुतं कृत्वा ततः कृष्णाजिनं परिभाषोक्त-[नवरत्नगणमध्यादिच्छया यैः][10] कैश्चित्त्रिभिर्यथाशक्ति[11][रत्नैश्चन्दनादिगन्धैश्चालङ्कुर्यात्। एवं कृष्णाजिनमारोप्य चम्पकशाखासहितजलपूर्णकुम्भ-दानानन्तरं स्नानार्थं गात्रमार्जनार्थञ्च जीर्णवस्त्रं दानस्थानबहिः स्थापयित्वा ब्राह्मणमग्निहोत्रिणं गन्धमाल्यादिभिरभ्यर्च्य वस्त्रयुगेनाच्छाद्य] [12]हेमाङ्गुरीयकादिभिरलङ्कृत्य कृष्णाजिन-[पुच्छदेश उपविश्योक्त][13]-संस्थानं कृष्णाजिनमर्चितं तस्मै दद्यात्। ॐ[14] अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्त-कृष्णाजिन-दानफलप्राप्तिकामोऽहमेतत् कम्बलस्थं रुक्मशृङ्गं रुक्मदन्तं[15] [16]प्रवालभूषितलाङ्गूलं मुक्तानेत्रं तिलपूर्णं सर्वतो वस्त्राच्छादितं सुवर्णनाभिकं [17]रत्नगन्धालङ्कृतं [घृतदुग्धदधिमधुपूर्णकांस्यपात्रचतुष्टयसहितं][18] घृतदुग्धदधिमधुपूर्णमृन्मयपात्र-चतुष्टययुतं तिलपूर्ण-लोहपात्र-मधुपूर्णकांस्यपात्र-हेमसहितताम्रपात्र--मुक्तासहितरूप्यपात्र--प्रवालसहितसुवर्णपात्र[19]--दाडिमफलवीजपूरफलशृङ्गाटक-सर्वशाक[20]-

---

1 A omits मन्त्रेण
2 I. O. वामपादमारोपयेत्, A वामपादे प्ररोपयेत्
3 A यानि पापान्यनेकानि इति for the bracketed portion
4 I. O. पराय वेत्यादि for the bracketed portion
5 A ताम्रपात्रञ्च वामपादे
6 A कांश्चं शुतमित्यादि and I. O. कन्यामृतमित्यादि for the b. p.
7 A जन्मसहस्रेष्विति
8 I. O, omits the bracketed portion
9 A शृङ्गाटकं सर्व्वशाखं
10 A नरवक्तं पदेः for the bracketed portion
11 A omits the bracketed portion
12 I. O. होमाङ्गुलीयष्टिकादिभिरलङ्कृत्य, A हेमाङ्गुरीयकादीभिरलङ्कृत्य
13 I. O. पुच्छदेशे उपवेश्योक्त and A पुच्छदेश उपविश्योक्तं for the bracketed portion
14 A omits ॐ
15 I. O. omits रुक्मदन्तं
16 I. O. प्रवालभूतिलाङ्गूलं
17 A मन्वगन्धालङ्कृतं
18 A omits the bracketed portion
19 A omits पात्र
20 A •सर्व्वशाख•

सर्वफलान्वितं कृष्णाजिनं ददानि। प्रीयतां वृषभध्वजः। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कृष्णाजिनमिदं प्रजापतिदैवतमित्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत्। तत अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा कृष्णाजिनं पुच्छे गृह्णीयात्। ततस्तं ब्राह्मणं विसृज्य मण्डलं कृत्वा पूर्वस्थापितजलकुम्भेन चम्पकशाखान्तरितमुखेन स्नात्वा जीर्णपीतवस्त्रेणाङ्गानि मार्जयित्वाऽऽहते[1] वाससी परिधायाचम्याङ्गमार्जनवस्त्रसहितं कुम्भं चतुष्पथे क्षेपयेत्। अथवा [2]वेदविदं ब्राह्मणमाहूय तद्द्वारा[3] ॐ आप्यायेतामिति मन्त्रेण [4]समुद्रस्य त्वेति मन्त्रैश्चाभिमन्त्र्य चम्पक-[5]शाखोद्धृतजलेन [6]शिरःस्नानं कुर्यात्। अङ्गमार्जनादिकं समानम्।

आग्नेयपुराणे :—

[7]ग्रहणे अयने चैव संक्रान्तौ [8]विषुवद्द्वये।
युगादिषु युगान्तेषु द्वादश्यां नियतः शुचिः ॥१॥
समुपोष्य समभ्यर्च्य केशवं कल्मषापहम्।
द्वादश्यान्तु चतुर्दश्यां कृष्णायां नियतः शुचिः ॥२॥

अत्र कृष्णायामिति [विशेषणं द्वादश्यान्त्वित्यत्रापि सम्बन्धः][9] [द्वादश्यां पुनःकीर्तनात्][10]। एवञ्च द्वादशीचतुर्दश्यौ कृष्णे एव ग्राह्ये।

संलिप्य गोमयेनाथ चतुर्हस्तप्रमाणतः।
वस्त्राणि [प्रस्तरे भूम्यामजिनं][11] तत्र विन्यसेत् ॥३॥
कृष्णतिलैस्तु संछन्नं[12] कृत्वा तत्रोपरि न्यसेत्।
मधुसर्पिर्युतं[13] पात्रं हैमं चौडुम्बरं तथा ॥४॥

औडुम्बरं ताम्रमयम्।

सुवर्णं प्रक्षिपेत्तत्र [14][पलं वा त्रिपलं] शतम्।
शक्तितो दानमेवं हि भक्तिरेवात्र कारणम् ॥५॥

---

1 A धौते for आहते
2 I. O. वेदज्ञाब्राह्मण॰
3 A तद्द्वारा
4 A समुद्रस्येति
5 A ॰शाखाकृतजलेन
6 I. O. शिरः स्ना
7 A omits ग्रहणे
8 A विषुवे पर्वसन्धिने
9 I. O. विशेषणार्थं for the bracketed portion
10 A omits the bracketed portion
11 A प्रस्तरे कृष्णमजिनं for the bracketed portion
12 I. O. संछन्नं, A संच्छन्न
13 A मधुसर्पिर्युतं
14 I. O. फलं वा त्रिफलं for the bracketed portion

संछाद्य [1]तच्छुभैर्वस्त्रैः पात्रं यज्ञोपवीतिनम् ।
कलसाष्टौ तथा दिक्षु सवस्त्राः पात्रसंयुताः ॥६॥
तान् स्थाप्याहवनं कृत्वा विधिवत् पूज्य केशवम् ।
कृष्णाजिनं समभ्यर्च्य ब्राह्मणायोपपादयेत् ॥७॥

आहवनमाहुतिं कृत्वा होमं कृत्वेत्यर्थः ।

[2]कृष्णोऽसि कर्मणा कृष्ण कृष्णाजिनमतस्तिलैः[3] ।
[4][कृष्णैर्युतं प्रतीच्छस्व कृष्णः] संप्रीयतामिति ॥८॥
एवं दत्त्वा द्विजेभ्यस्तु [5]पश्चाद्दद्यात् सुदक्षिणाम् ।
तिलाहारो [6]भवेत्तत्र ब्राह्मणान् भोजयेत्ततः ॥९॥

द्विजेभ्य इति बहुवचनं [7]जात्याख्यायामेकस्मिन्नेव । एवञ्च प्रतिग्रहीतृब्राह्मणाय व यथाशक्ति बहुदक्षिणादानम् । तिलाहारो भवेद् ब्राह्मणान् भोजयेदिति च ब्राह्मणान् भोजयित्वा [8]स्वयं तिलाहारो भवेदिति बोद्धव्यम् ।

एतं कृष्णाजिनं दत्त्वा नरो विगतकल्मषः ।
पितामहान् समुद्धृत्य स्वर्गं याति न संशयः ॥१०॥
तत्र भोगांश्चिरं भुक्त्वा पितृ-[9]पितामहैर्वृतः ।
स नरोऽस्य प्रभावाद्धि याति विष्णोः परं पदम् ॥११॥

उक्तसमयानामन्यतमस्य पूर्वतरदिने यजमानः कृतनित्यो घटिकाधिकप्रहरत्रये[10] हविष्यं भुक्त्वाचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याचम्य प्राङ्मुख उदङ्मुखो[11] वा कृताञ्जलिः ॐ सूर्यः सोमो यमः[12] कालः [महाभूतानि पञ्च च इति][13] आग्नेयपुराणोक्त-सोपवासकृष्णाजिनदानकर्म मया कर्तव्यमित्युक्त्वा गृहीतोदपूर्णताम्रपात्र[14] उदङ्मुखः सङ्कल्पयेत् । [ॐ उपोष्य][15] परदिने

---

1 I. O. तच्छतैर्वस्त्रैः, A तच्छुभैर्वस्त्रैः
2 I. O. कृष्णो
3 A कृष्णाजिनं शुभैस्तिलैः
4 A कृष्णैः प्रतीच्छ श्रीकृष्ण for the bracketed portion
5 A पश्चाद्दद्यात् दक्षिणां
6 A भवेत्तत्र
7 A जात्यापेक्षया एकस्मिन्नेव
8 A omits स्वय
9 I. O. ०पैतामहैर्वृतः
10 A घटिकाधिकप्रहरत्रये, I. O. घटिकाधिकप्रहरत्रयये
11 A omits उदङ्मुखो
12 I. O. omits यमः
13 I. O. पञ्चमहाभूतानि for the bracketed portion
14 A गृहीतोदकपूर्णताम्र
15 I. O. omits the bracketed portion

आग्नेयपुराणोक्त-तिलाहार-रूपोदीच्या[1]-ङ्गसहित-सोपवासकृष्णाजिन-दानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा [2]परदिने उपोष्यापरदिने प्रातः स्नात्वा गोमयोपलिप्तभूमौ वस्त्रत्रयञ्च[3] चतुर्हस्त-प्रमाणमास्तीर्य तत्रोपरि [4][कृष्णमृगाजिनं तिलाच्छादितं] स्थापयित्वा तदुपरि [5]हैमं ताम्रं वा पात्रं शक्तित आरोप्य मधुघृतपूर्णं कृत्वा तत्र सुवर्णस्य [6]पलं पलत्रयं पलशतं वा शक्तितो निक्षिप्य[7] [ततपात्रमुत्कृष्ट][8]-वस्त्रैराच्छाद्य यज्ञोपवीतिनं[9] कृत्वा पूर्वादिदिक्क्रमेणाष्टौ कलसान् शरावपिहितमुखान् सवस्त्रानारोपयेत्। ततो ब्राह्मणः [10]स्वशाखोक्तक्रमेणाग्निमुप-समाधाय[11] ॐ [केशवाय स्वाहेत्याद्यैर्हुत्वा][12] शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ॐ केशवाय नम इति यथाविधि वासुदेवप्रतिमां[13] सम्पूज्य कृष्णाजिनमर्चयित्वा अर्चिताय ब्राह्मणाय ॐ कृष्णोऽसीत्यादि[14] पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेय-पुराणोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतद्वस्त्रत्रयोपरिस्थापित-[15][कृष्णतिलसंछन्नं] मधु-घृतपूर्ण-[हैमपात्र-तन्निहित][16]-काञ्चन-शुभवस्त्राच्छन्नयज्ञोपवीत्यमुकपात्रसहितं [17]पात्रपिहितमुखं सवस्त्रकुम्भाष्टकयुतमर्चितं कृष्णाजिनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततः [18]प्राज्ञेभ्यो [19]ब्राह्मणेभ्यो भोजनं दत्त्वा स्वयं तिलाहारो भवेत्।

कालिकापुराणे :—

> [20]येऽपि रुक्मादिपात्रेषु हुत्वा वह्निं [21]ददन्ति वै।
> तिलद्रोणसमायुक्तं [22]वस्त्रयुगाभिवेष्टितम् ॥१॥

---

1 A and I. O. ०द्दिव्या०

2 A omits परद्दिने

3 A वस्त्रत्रयं

4 A कृष्णाजिनमाच्छादितं for the bracketed portion

5 A हैमं

6 A omits पलं

7 A omits निक्षिप्य

8 A वितततपात्रमुत्कृष्ट for the bracketed portion

9 A यज्ञोपवीति, I. O. यज्ञोपवीतं

10 A सुखाध्यायी०

11 I. O. उपसमाधाय

12 A केशवायेति स्वाहेत्याद्यं हुत्वा for the bracketed portion

13 A ०प्रतिमासं

14 I. O. कृष्णोसीति

15 A omits the bracketed portion

16 A पत्रस्थितं for the bracketed portion

17 A सुखं

18 I. O. ऋत्विग्भ्यो

19 A ब्राह्मणे

20 A योपिहैमादि०

21 A ददाति

22 A वस्त्रयुग्मेन वेष्टितं

पलार्द्धमथवाऽदुष्टं[1] विभवाद्धेमसंयुतम् ।

[3]सूक्ष्मयुग्मेन वस्त्रेण अनेनाच्छादयेद्द्विजाः[3] ॥२॥

[4][पलार्द्धमथवाऽदुष्टमिति]पलं सुवर्णचतुष्टयं [5][तदर्द्धं वा अर्द्धष्टकाय(?)]कृष्णाजिनार्द्धभागे देयं[6] विभवात् । विभवशून्यस्तु हेमसंयुतमित्यल्प-[7]स्वर्णसंयोगमयं मध्ये कुर्यादिति श्लोकार्थः ।

[सोदकञ्चापरं रुक्मं][8] सतिलं [9]न्यस्य तत्करे ।

ततः कृष्णाजिनं दद्यात्तिलद्रोणान्वितञ्च यत् ।

दत्त्वा च भोजयेत्तत्र नत्वा[10] चैव विसर्जयेत ॥३॥

दत्त्वा च भोजयेदिति तमेव ब्राह्मणं[11] भोजयेत् । [पश्चात् प्रणम्य][12] विसर्जयेत् ।

अयने विषुवे चैव ग्रहणे शशिसूर्ययोः ।

युगादौ ये प्रयच्छन्ति [विधिना ये तु वै][13] द्विजे ॥४॥

तेऽपि तत्पद[14]-मासाद्य दशांशं [ब्रह्म आयुषः][15] ।

क्रीडन्ते विविधैर्भोगैः कलारूपगुणान्विताः[16] ॥५॥

अनेनैव विधानेन दशद्रोणप्रदायकः ।

आब्रह्माण्डभवं कालं मोदते स पुरोत्तमे ॥६॥

उक्तसमयानामन्यतमे कृष्णाजिनं तिलद्रोणाच्छादितमुक्तोपकरणसहितं कृत्वा यथाशक्ति सुवर्णरूप्यताम्राणामन्यतमे पात्रे अग्निं यथाविध्युपसमाधाय ॐ प्रजापतये स्वाहेत्याहुतिं दत्त्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणायार्चिताय [17]सूक्ष्मवस्त्रयुगाच्छादिताय करे तिलोदक-सहितमग्रे[18] काञ्चनमन्यद्दत्त्वा[19] कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।

---

1 A °संस्तं
2 A युग्म°
3 A °द्विजं
4 A पलार्द्धार्द्धमथाद्दसुमिति for the bracketed portion
5 A तदर्द्धंस्वार्द्धंसन्थाकार्थं for the bracketed portion
6 I. O. देय
7 I. O. °मिति
8 A सोदकं वासकं वा for the bracketed portion
9 A न्यस्य
10 I. O. लब्ध्वा
11 A omits ब्राह्मणं
12 A नत्वा तमेव for the bracketed portion
13 A विधिनाभिन वा for the bracketed portion
14 A सम for पद
15 A संब्रह्माय: पुरा for the bracketed portion
16 A °गुणान्विते:
17 A युग्म°
18 A omits अग्र
19 A काञ्चनमान्यं दत्त्वा

[कालिकापुराणोक्ततिलद्रोणाच्छादित-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतत्तिलद्रोणाच्छादितं स्वयुगाभिवेष्टितं मध्यस्थनष्टकाञ्चनं कृष्णा]-जिनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततस्तं ब्राह्मणं भोजयित्वा प्रणम्य विसर्जयेत्। अनेनैव विधानेन तिलद्रोणदशकाच्छादित-[कृष्णाजिनदानमपि। तत्र दानवाक्ये कालिकापुराणोक्ततिलद्रोणदशकाच्छादितकृष्णाजिनदानफलप्राप्तिकामोऽमेतद्दशद्रोणाच्छादितमिति] विशेषः। [अन्यत् सर्वं तु तुल्यम्][3]।

स्कन्दपुराणे :—

कृष्णाजिनन्तु यो दद्याद्व्रतिने ब्रह्मचारिणे।
पृथिवीफलमाप्नोति योगश्चास्य प्रवर्त्तते ॥७॥
ससमुद्रगुहा तेन[4] सशैलवनकानना।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥८॥

व्रतस्थाय ब्रह्मचारिणेऽर्चिताय कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतत कृष्णाजिनं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत। [5]एतत् फलबाहुल्याद्बहुदक्षिणम्।

[6]पुलस्त्यः :—

अथातः कृष्णाजिनदानविधिं वक्ष्यामः। कार्त्तिक्यां पौर्णमास्यां वैशाख्यां वा चन्द्र-सूर्यग्रहे[7] विषुव अयनयोर्वा कृष्णमृगाजिनं सखुरं सशृङ्गमव्रणं मनोहरं[8] हिरण्यशृङ्गं[9] रूप्यखुरं मुक्तालाङ्गूलभूषितं[10] बहिर्लोमं प्रागग्रीवं स्यात्। गोमयोपलिप्तायां भुवि कुतपं[11] विस्तीर्य[12] तस्मिन्नाविकं वस्त्रं प्रसारयेत्। तस्मिन्नजिनं हिरण्यनाभं कृत्वा [13]तिलैराच्छाद्य तद्रूपं कृत्वा वस्त्रयुगेन तिलान् प्रच्छादयेत्। चतसृषु दिक्षु चत्वारि पात्राणि ताम्ररौप्यसौवर्णानि शक्तितः[14] पूर्वस्यां दिशि [क्षीरपूर्णं दक्षिणस्यां दिशि][15]दधिपूर्णं पश्चिमायां[16] दिशि[17]

---

1 A omits the bracketed portion and reads भोजयेत्त...... ग्रहणे of p. 528 again here with the word ब्राह्मणान् prefixed to it.

2 I. O. omits the bracketed portion

3 I. O. omits the bracketed portion

4 I. O. omits तेन

5 A तत् फलबाहुल्याद्बहुदक्षिणां

6 A omits पुलस्त्यः

7 A चन्द्रसूर्ययो ग्रहण

8 I. O. नद्दरं

9 A omits this

10 A भूमिदत्तं मांसं for भूषितं

11 A कर्णं

12 A प्रस्तीर्य

13 A तिलेनाच्छाद्य:

14 I. O. यथाशक्तितः

15 A omits the bracketed portion

16 I. O. पश्चिमस्यां

17 A omits it

घृतपूर्णम् उत्तरस्यां दिशि क्षौद्रपूर्णं निदध्यात्[1] । [पश्चिमभागेषु समिद्धमग्निं कृत्वा परिसमूह्य पर्य्युक्ष्य परोस्तीर्य भागाग्रैर्दर्भैर्महाव्याहृतिभिस्तिलान् घृताक्तान् जुहुयात्][2] । तत आहिताग्नये[3] ब्राह्मणाय [4]सर्वाङ्गसम्पूर्णाय संयुगाय विदुषे वस्त्रयुगप्रच्छन्नायालङ्कृताय दद्यात [सर्वगुणविशिष्टं कृष्णाजिनं ददानीति । नाभिं स्पृशन् कृष्णाजिनं प्रतिगृह्णीयात् प्रतिवाचयिता][5] ।

[अत्र यमगीतागाथा भवति][6] ।

[7][गोभूहिरण्यसंयुक्तं मार्गमेकं] ददाति यः ।
सर्वदुष्कृतकर्मापि सायुज्यं[8] ब्रह्मणो व्रजेत्[9] ॥६॥

उक्तसमयानामिच्छयान्यतमे यजमानः शुचिर्यथोक्तं कृष्णाजिनं भूमिञ्च यथेच्छोत्पत्तियोग्यामुपकल्प्य कृष्णाजिनपश्चिमदेशे उक्तविधिना अग्निमुपसमाधाय ॐ भूर्भुवः स्वाहेति घृताक्तांस्तिलान्[10] यथेष्टसंख्यान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणमुक्तरूपं वस्त्रयुगाच्छादितमलङ्कृतं पुच्छदेशे कृष्णाजि-[नमाधार][11]-कम्बल उपवेश्यार्चिताय तस्मै कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुलस्त्योक्तकृष्णाजिनदानफलप्राप्तिकामोऽहमेतत् कम्बलोपरि प्रसारितं हिरण्यशृङ्गं रूप्यखुरं मुक्तालाङ्गूलभूषितं हिरण्यनाभं तिलप्रच्छादितं वस्त्रप्रच्छादित[12]-क्षीरदधिघृतक्षौद्रपूर्णमुकपात्रचतुष्टययुतं [13]गृष्टिचतुष्टयसहितमुप[14]-[कल्पित-समुत्पत्तियोग्यभूमिकं][15] सर्वगुणविशिष्टं कृष्णाजिनं[16] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । नाभिस्पर्शः स्वीकारः । कुतपं [17]विस्तीर्येति कुतपः कुशः[18] । तद्रूपं कृत्वेति [यथा कृष्णाजिनसन्निवेश][19]-स्तथा तिलैराच्छादनं कृत्वेत्यर्थः । चतसृषु दिक्षु

---

1 A दद्यात्
2 I. O. omits the bracketed portion
3 A ततस्त्वाहिताग्न
4 A सर्वाङ्गसंपूर्णान्नाय and omits संयुगाय
5 A omits the bracketed portion
6 A यत्र यमैर्गीतो गाथा भवन्ति for the bracketed portion
7 A अस्नेहिरण्यसंयुक्तामार्डमेकं for the bracketed portion
8 I. O. सायोज्यं
9 I. O. वदेत्
10 I. O. कृताक्तान्
11 A नावाध for the bracketed portion
12 A omits this word
13 A सृष्टि०
14 A युग for सुप
15 I. O. कल्पिते यदुत्पत्तियोग्यभूमेकं for the bracketed portion
16 A कृष्णाजितं
17 I. O. प्रस्तार्य्येति, A प्रस्तीर्य्येति
18 A कश
19 A यथा कृष्णाजिनं तस्य सन्निवेश for the bracketed portion

त्वारि पात्राणि ताम्ररौप्यसुवर्णानीत्यत्र द्रव्यत्रयेण चतसृणां दिशां चतुर्णां क्षीरादीनां यथा-ख्यसम्बन्धासम्भवात् ताम्ररूप्यसुवर्णानामन्यतमद्रव्यपात्रचतुष्टयस्य ग्रहणम्। अतएव शक्तित इति मुनिराह। गृष्टीर्निदध्यादिति गृष्टिरेकवारप्रसूता गौः। अत्र यमगाथायाः तस्त्येनैकवाक्यतयोक्तत्वाद्भूमिसहितस्य दानम्[2]।

विष्णुधर्मोत्तरे :—

वैशाखी पौर्णमासी च ग्रहणे शशिसूर्ययोः।
पौर्णमासी तथा माघी तस्य दाने महाफला[3] ॥१॥
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप।
आदावेव समास्तीर्य शोभनं वस्त्रमाविकम् ॥२॥
ततः सशृङ्गं सखुरमास्तरेत् कृष्णमार्गणम्।
कर्तव्यं रुक्मशृङ्गं तद्रूप्यपादं तथैव च ॥३॥
लाङ्गूलं मुक्तिसंयुक्तं [4]तिलच्छन्नं तथैव च।
तिलैः [5]सुशिखरं कृत्वा वाससाच्छादयेद्बुधः ॥४॥

[6]सुशिखरं कृत्वेत्याच्छादकतिल-[7]राश्यग्रभागं शोभनं कृत्वेत्यर्थः।

[8]सुवर्णनाभं तत् कुर्यादलङ्कुर्याद्विशेषतः।
[9]रत्नैर्गन्धैर्यथाशक्त्या[10] तस्य दिक्षु च विन्यसेत् ॥५॥

[11]रत्नैः परिभाषोक्त-[12]रत्नमध्ये यैः कैश्चित्त्रिभिः[13]। गन्धैः प्रसिद्धचन्दनादिभिः। अत्र-ग्रीदिति सम्बन्धः।

कांस्यपात्राणि चत्वारि तेषां दद्याद्यथाक्रमम्।
[14]घृतक्षीरं दधिक्षौद्रमेवं दत्त्वा यथाविधि ॥६॥

यथाक्रममिति पूर्वादिक्रमेण।

---

1 I. O. यथाशक्तित
2 A omits दानम्
3 I. O. महाफलं
4 A तिलकान्नं
5 A सखिरं, I. O. सशिखरं
6 I. O. सशिखरं
7 I. O. ॰राश्यग्रभागं, A कृत्वेच्छान-कराश्यग्रभागं
8 A reads the entire line as सुवर्णनाभः ततः कुर्याद्विशेषः
9 A वर्णै॰
10 I. O. ॰यथा तस्य
11 A वर्णैः
12 A ॰वर्णमध्ये
13 A कश्चित्त्रिभिः
14 I. O. घृतं क्षौद्रं

तत्प्रतिग्राहयेद्विद्वानाहिताग्नि' द्विजोत्तमम्[1] ।
[2]श्वेतवस्त्रयुगच्छन्नं स्वशक्त्या [3]वाप्यलङ्कृतम् ॥७॥
प्रतिग्रहस्ततश्चोक्तः पुच्छदेशे महीपते ।
अनेन विधिना दत्त्वा यथावत् कृष्णमार्गणम् ॥८॥
समग्रभूमिदानस्य फलमाप्नोत्यसंशयम् ।
सर्वांश्च लोकांश्चरति कामयानस्य जीवितम् ॥९॥

कामयानस्य [4]जीवितमिच्छतो [5]भोगार्थिन इत्यर्थः ।

[6]एतत्तु सर्वमाख्यात[7] मार्गमाप्नोत्यसंशयम् ।
[8]कृष्णेप्सितं कृष्णमृगस्य चर्म दत्त्वा द्विजेन्द्राय समाहितात्मा[9] ।
यथोक्तमेतन्मरणं न शोचेत् प्राप्नोत्यभीष्टान् मनसः स लोकान् ॥१०॥

[उक्तसमयानामन्यतमे स्वेच्छया][10] भगवद्वासुदेवाग्रतो गोमयोपलिप्तापनीतकेशकोटादिभूमौ शोभनं कम्वलमास्तीर्य तत्तोपरि [11]कृष्णमृगाजिन-[मुक्तरूप][12]-मुक्तोपकरणमर्चितं ब्राह्मणायाग्निहोत्रिणे स्नाताय [13]वस्त्रयुगाच्छादिताय यथाशक्त्यलङ्कृतायार्चिताय [14]कृष्णाजिनपुच्छस्थाय[15] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतदाविकवस्त्रोपरिप्रसारितं रुक्मशृङ्गं रूप्यपादं[16] मुक्तायुक्तलाङ्गूलं[17] तिलराशिसंच्छन्नं[18] वस्त्राच्छादितं सुवर्णनाभं [19]रत्नगन्धालङ्कृतं घृतक्षीरदधिमधुपूर्ण-[20]ताम्रकांस्यपात्रचतुष्टययुतं कृष्णाजिनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराज-निःशङ्क-शङ्कर-श्रीमद्वल्लालसेनदेवविरचिते श्रीदानसागरे
कृष्णाजिनदानावर्तः ।

---

1 A reads the following additional line after this, viz. जीवितं कामयानस्य जीविताग्निद्विजोत्तमं
2 A स्नातं वस्त्रयुगाच्छन्नं
3 I. O. याप्यलङ्कृतं
4 A वितमिच्छतो
5 A भागार्थिन, I. O. भोगा
6 A एतत्ते
7 I. O. सर्व्वमाख्यात
8 I. O. कृष्णेप्सितं
9 A समाहितधी
10 A उक्तसमयानामिच्छयान्यतमे for the bracketed portion
11 A omits कृष्ण
12 A omits the bracketed portion
13 A वस्त्राच्छादिताय
14 A कृष्णाज
15 I. O. ०मुपस्थाय
16 A रूप्यदानं
17 A मुक्तालाङ्गुलं
18 A तिलराशिच्छन्नं
19 A वस्तुगन्धालङ्कृतं
20 A omits ताम्र

अथ प्रजापतिदैवतच्छत्रदानावर्तः । (५३)

तत्र छत्रदानप्रशंसा ।

महाभारते (अनु—९६।१४-१७) :—

सूर्य्य उवाच ।

महर्षे शिरसस्त्राणं [1]छत्रमातपवारणम् ।
प्रतिगृह्णीष्व पद्भ्याञ्च त्राणार्थञ्चर्मपादुके ॥१॥
अद्यप्रभृति चैवैतल्लोके [2]संप्रचरिष्यति ।
पुण्यदानेषु सर्वेषु [3]परमं कृत्यमेव च ॥२॥

भीष्म उवाच ।

छत्रोपानहमेतत्[4] सूर्य्येणैव प्रवर्तितम् ।
पुण्यमेतदभिख्यातं[5] त्रिषु लोकेषु भारत ॥३॥
[6]तस्मात् प्रयच्छ विप्रेषु छत्रोपानहमेव च ।
[7]धर्मस्ते सुमहद्भावी [8]न मेऽत्रास्ति विचारणा ॥४॥

अथ दानम् ।

याज्ञवल्क्यः (१।२११) :—

[9]गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥५॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं छत्रं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदा-
[शा]खाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्त[10]-सुखप्राप्तिकामोऽहमेतच्छत्रं ददानि । प्रति-
[गृह्य] स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रमिदं प्रजापतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं

---

1 A छत्रं मभ्यमि वारयां
2 I. O. ससुचरिष्यति, A सं-प्रचरिष्यति
3 A परमाक्षय्यमेव च
4 A ०मेतत्त
5 A ०तिख्यातं
6 A reads the entire line as तस्माद्दद्यं च विप्रस्य छत्रोपानहमुत्तमं
7 A धर्मस्तेषु महद्भावी
8 A नाममत्रास्ति
9 A गृहधान्यतयोपान०
10 A omits अत्यन्त

पठेत्। [1]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा छत्रं[2] गृह्णीयात्।

महाभारते[3] :—

न तं त्यजन्ति पशवः संग्रामे च [4]जयत्यपि।
पुत्रान् प्रियश्च लभते [5]यश्छत्रं संप्रयच्छति।
न च क्षुद्व्याधिं लभते यज्ञभागमथाश्नुते ॥६॥

अर्चिताय ब्राह्मणायार्चितं छत्रम् [ॐ अद्यादि तुभ्यमन्तमुक्त्वा][6] दद्यात्। महाभारतोक्तानेककालस्थायि[7]-पशुशालित्व-[8]जयत्व--[9]जनकत्वोपलक्षितच्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [अत्र च फलभूयस्त्वेनोत्कृष्टच्छत्रदानम्।][10]

[11]तथा (अनु—६६।१८-१९) :—

छत्रं हि भरतश्रेष्ठ यः प्रदद्याद्द्विजातये।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमश्नुते ॥७॥

[12]शतशलाकं [शतशलाकानिर्मितं वातिच्छत्रमिति][13] प्रसिद्धम्।

स शक्रलोके वसति पूज्यमानो द्विजातिभिः।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ॥८॥

अर्चिताय ब्राह्मणायार्चितं [14]शतशलाकम् [शुक्लं छत्रम्][15] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त--शतशलाक-च्छत्रदान--[16]फलप्राप्तिकामोऽहमेतच्छतशलाक[17]-च्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A omits तत
2 I. O. छत्रदाने
3 I. O. महाभारते twice
4 A यजत्यपि
5 A यश्चत्रं, I. O. यश्छत्रं
6 A दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यमहमुक्त्वा for the bracketed portion
7 I. O. ०स्थापि०
8 I. O. omits जयत्व
9 A omits जनकत्व
10 I. O. omits the bracketed portion
11 A यथा
12 A omits it
13 I. O. शतशलाकनिर्मितं इति for the bracketed portion
14 A शलाकं
15 I. O. omits the bracketed portion
16 A omits फल
17 I. O. omits च्छतशलाक, A reads तशलाक

तथा (अनु—१३०।३३ख) :—

· [2]छत्रदाने सुखच्छायां लभते परलोकगः ॥६॥

ार्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। परलोकसुख-प्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

था :—

निदाघकाले वर्षे वा [3]यश्छत्रं संप्रयच्छति।

नास्य [4]कश्चिन्मनोदाहः कदाचिदपि जायते।

कृच्छ्रात् स विषमाच्चैव [5]क्षिप्रं मोक्षमवाप्नुयात् ॥१०॥

ोष्मे वर्षासु वाऽर्चिताय ब्राह्मणायार्चितमुत्कृष्टं दृढं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा। महाभारतोक्त-[6]वर्षानिदाघकालविहित-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। दिस्वीकारान्तं पूर्ववत्।

वराहपुराणे (२०६।१४ख-१५क) चित्रगुप्तवाक्ये :—

[उपानहौ[7] महच्छत्रं][8] जलभाजनमेव[9] च।

असकृद् येन दत्तानि [10]तस्मै पूजां प्रयच्छथ ॥११॥

ासकृदित्यावृत्त्या दानख्यापनार्थम्। अर्चिताय ब्राह्मणायार्चितं बृहच्छत्रम् ॐ अद्यादि न्तमुक्त्वा दद्यात्। वराहपुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। दिस्वीकारान्तं पूर्ववत्।

A omits it
A छत्रदानात्
I. O. यच्छत्रं, A यस्तत्रं
A कान्तं मनोदाहः
A क्षौमं
A सर्व for वर्षा
Varāha P. च छत्रं च

8 A उपानहमहं छत्रं for the bracketed portion
9 Corrected from Varāha P. I. O. and A जलं भोजनमेव
10 Corrected from Varāha P. I. O. and A तस्मिन्

आग्नेयपुराणे :—

घर्मवर्षा-[1]तपत्राणं छत्रं दद्याद्द्विजातये ।
सर्वव्याधिविनिर्मुक्तः श्रियं [2]पुत्रांश्च विन्दति ॥१२॥

घर्मवर्षातपत्राणमिति ग्रीष्म-वर्षा-[शरत्सु तदु][3]-पद्रवस्य[4] [5]वारकमित्यर्थः ।

विमानेन च दिव्येन किङ्किणीजालमालिना ।
महेन्द्रभवनं याति सेव्यमानोऽप्सरोगणैः ॥१३॥

अर्चिताय ब्राह्मणायार्चितं[6] वर्षातपवारणक्षमं[7] छत्रम् ॐ[8] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

[9]ब्रह्मपुराणे :—

[10]उपानद्युगलं छत्रं शय्यासनमथापि वा[11] ।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥१४॥
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाभ्यलङ्कृताः ।
धर्मराजपुरं दिव्यं[12] छत्रैः सौवर्णराजतैः ॥१५॥

अर्चिताय ब्राह्मणायार्चितं छत्रम्[13] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [14]ब्रह्म-पुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

नन्दिपुराणे :—

आतपत्रन्तु यो दद्याद्ब्राह्मणाय तपस्विने ।
स कल्पवृक्षच्छायासु[15] विश्रान्तो गच्छते सुखम् ।
[16][दूर्वावनैः ससलिलैर्दिव्यैः] पुष्पमनोरमैः ॥१६॥

---

1 A ०तपत्राणं
2 A पूर्वंच
3 A तपोभवो for the bracketed portion
4 I. O. ०द्रवस्य
5 A वाकमित्यर्थः
6 A omits अर्चितं
7 I. O. omits क्षमं
8 A omits ॐ
9 I. O. ब्राह्मपुराणे
10 A उपनद्युगलं
11 A च
12 A omits it
13 A omits it
14 I. O. ब्राह्मपुराणोक्त
15 A ०च्छायायां
16 A दुर्वादान: ससलिलो दिव्यै for the bracketed portion

ग्विने [1]व्रतोपवासशीलाय अर्चिताय ब्राह्मणाय[2] अर्चितं छत्रम् ॐ अद्यादि तुभ्यमन्त-
द्यात् । नन्दिपुराणोक्त-तपस्विब्राह्मण-सम्प्रदानकातपत्रदानफलप्राप्तिकामोऽहमेतदातपत्रं
। स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

था :—

वस्त्रं यश्चार्थिने दद्याच्छत्रं वापि यदृच्छया ।

स भवेद्धनवान् श्रीमान् बृहस्पतिपुरे वसेत् ॥१७॥

दृच्छया [4]स्वच्छन्दतया व्रतशीलादिविशेषमनपेक्ष्यार्थिने ब्राह्मणायेत्यर्थः । अर्चिताय
य छत्रार्थिने[5]ऽर्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्त-
च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

आदित्यपुराणे :—

छत्रं ये तु प्रयच्छन्ति [विप्राय गुरवे गृहम्][6] ।

न तेषां पतते घोरम् अग्निवर्षं सुदारुणम् ॥१८॥

र्चिताय ब्राह्मणाय गुरवे वा छत्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।
पुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

शाम्बपुराणे :—

छत्रं द्विजाय यो दद्यात् स प्रेत्य सुखमेधते[7] ॥१९॥

र्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । शाम्बपुराणोक्त-
फलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३११।५-६क) :—

छत्रं शतशलाकन्तु दत्त्वैवातपवारणम् ।

सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ।

याम्यं मार्गं[8] तता[9] याति सुखेन द्विजसत्तमाः ॥२०॥

र्चिताय ब्राह्मणायार्चितम् [आतपवारणोचितवस्त्रमय][10]-शतशलाकच्छत्रम् ॐ अद्यादि

I. O. व्रतोपवासशीलाय, A' व्रतो-वासशीलाय

I. O. तपःशालिने after ब्राह्मणाय

I. O. यदृच्छय

A च्छन्दतया

A' छत्रार्थिने ब्राह्मणाय

6 I. O. गुरुष्वपि सुरेषु च for the bracketed portion

7 A सुखमोदते

8 A उत्कृष्ट before छत्र

9 V. D. तथा

10 A आतपोनिवारणोचितं for the b. p.

तुभ्यमन्तमुत्सृज्य दद्यात्। विष्णुधर्मोत्तरोक्त-शतशलाक-[1]च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।४):—

वितानकप्रदानेन सर्वपापैः प्रमुच्यते।
छत्रदश्च तथा विप्रा नात्र कार्या विचारणा ॥२१॥

अर्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुत्सृज्य दद्यात्। सर्वपाप-प्रमोचकत्व[2]-प्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे छत्रदानावर्तः।

---

1 A omits च्छत्र

2 I. O. सवपापप्रमोचक, A ०प्रशमन

अथोत्तानाङ्गिरोदैवतोपानद्दानावर्तः । (५४)

याज्ञवल्क्यः (१।२११) :—

[1]गृहधान्याभयो-[2]पानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥१॥

त्र यजमानोऽर्चिताय ब्राह्मणायार्चितउपानहौ दद्यात् । ॐ [3]अद्यामुकसगोत्रायामुक-
ुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्त[5]-सुखप्राप्तिकामोऽहमेते उपानहौ ददानि ।
ोता[6] स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उपानहावेते उत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं
तिं पठेत् । ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[7] काञ्चनं ददानि ।
ोता स्वस्तीत्युक्त्वा उपानहावारोहेत[8] ।

विष्णुः :—

उपानत्प्रदानेनाश्वतरीयुत[9]-रथम् ॥२॥

प्नोतीति शेषः । अर्चिताय ब्राह्मणायार्चितउपानहौ[10] ॐ अद्यादि तुभ्यमन्त-
दद्यात् । अश्वतरीयुतरथप्राप्तिकामोऽहमेतउपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं
।

बृहस्पतिः :—

असिपत्रवनं मार्गं क्षुरधारा[11]-समन्वितम् ।

तीक्ष्णातपञ्च तरति छत्रोपानत्प्रदो नरः ॥३॥

छत्रोपानत्प्रद इत्यत्र द्वन्द्वनिर्देशो यद्यप्युभयोः क्रियासम्बन्धमात्रेणैवोपपद्यते, तथापि
तपजन्यक्लेशस्य [12]छत्रोपानद्युगाभ्यामेव वारयितुं शक्यत्वात् सहितयोरेव दानम् ।
ाय ब्राह्मणायार्चितं छत्रमुपानद्युगञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । बृहस्पत्युक्त-

---

1 A गृहधान्यन्नु यो
2 I. O. ०पन०
3 A अद्यादि अमुक०
4 A दाय for वेदा
5 A अन्तमुक्त्वा दद्यात् for अत्यन्त
6 A इति गृहीता
7 A दक्षिणामि
8 A उपानहावारोहयेत
9 A omits युत
10 I. O. ०उपानहे, A ०चितायवोपानहौ
11 A ०धार०
12 A छत्रोपानहौ युगलदानेन

छत्रोपानद्दानफलप्राप्तिकामोऽहमेतच्छत्रोपानहौ ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रोपानहावेते प्रजापत्युत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। छत्रस्य दण्डग्रहणमुपानहारोपणञ्च स्वीकारः[1]।

महाभारते (अनु—९६।२०-२१) :—

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ।
स्नातकाय महाबाहो संश्रिताय द्विजातये ॥४॥

स्नातकाय गुरुकुलान्निवृत्ताय। संश्रितायोपस्थिताय।

सोऽपि लोकानवाप्नोति दैवतैरपि पूजितान्।
गोलोके च मुदा युक्तो वसति प्रेत्य मानद ॥५॥

अर्चिताय यथोक्तरूपाय ब्राह्मणायार्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-दह्यमान-सम्प्रदानकोपानद्दान-फलप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (Cf. अनु—९६।३ख) :—

यानं [2]रथोपानह्-सम्प्रदानात् ॥६॥

प्राप्नोतीति शेषः। अर्चिताय ब्राह्मणायार्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यानप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नरसिंहपुराणे :—

छत्रोपानद्दाता(?) च स्वर्गं यात्युपशोभनम् ॥७॥

अर्चिताय ब्राह्मणायार्चितं छत्रमुपानद्युगञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। उपशोभनाख्यस्वर्गप्राप्तिकामोऽहमेतच्छत्रोपानहौ ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रोपानहावेते प्रजापत्युत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। दक्षिणा पूर्ववत्। छत्रस्य दण्डग्रहणमुपानहोरारोहणञ्च स्वीकारः[3]।

वराहपुराणे (२०६।१४ख-१५क) चित्रगुप्तवाक्ये :—

उपानहौ महच्छत्रं[4] जलभाजनमेव[5] च।
असकृद् येन दत्तानि तस्मै[6] पूजां प्रयच्छथ ॥८॥

---

1 Supplied to complete the sense. I. O, and A omit it.

2 I. O. रथोपानह

3 Supplied. I. O. and A omit it.

4 Varāha P. च छत्रं च

5 Corrected from Varāha P. I. O. and A जलं भोजनमेव

6 Corrected from Varāha P. I. O. and A तस्मिन्

अर्चिताय ब्राह्मणायार्चितमुपानद्युगलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वराह-पुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । असकृदिति पदश्रवणा-[1]देतद्दानमावृत्त्या देयम् ।

[2]ब्रह्मपुराणे :—

उपानद्युगलं छत्रं शय्यासनमथापि वा ।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥९॥
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाभ्यलङ्कृताः ।
धर्मराजपुरं दिव्यं छत्रैः सौवर्णराजतैः ॥१०॥

[3]ब्रह्मपुराण एव दारुमयपादुकादानस्य भेदेनोपादानादत्र चर्मोपानद्दानमपेक्षितम् । अर्चिताय ब्राह्मणायार्चितमुपानद्युगलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [4]ब्रह्मपुराणोक्त-चर्मोपानद्युगलदानफलप्राप्तिकामोऽहमेतच्चर्मोपानद्युगलं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

काष्ठपादुका[5]-यानानि पीठका[6]-न्यासनानि च ।
यैर्दत्तानि द्विजातिभ्यस्तेऽध्वानं यान्ति वै सुखम् ॥११॥
सुवर्णमणिपीठेषु पादौ कृत्वोत्तमेषु च ॥
ते प्रयान्ति विमानैस्तु अप्सरोगणमण्डितैः ॥१२॥

द्विजातिभ्य इति बहुवचनं दातृबहुत्वापेक्षम् । अर्चिताय ब्राह्मणायार्चितं काष्ठघटित-पादुकायुगम्[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [8]ब्रह्मपुराणोक्त-काष्ठमयपादुकादानफल-प्राप्तिकामोऽहमेतत् काष्ठपादुकायुगं[9] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

आग्नेयपुराणे :—

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य [10]मनसो दाहः कदाचिदपि जायते ॥१३॥

---

1 I. O. ०मेत०
2 I. O. ब्राह्मपुराणे
3 I. O. ब्राह्मपुराणे
4 I. O. ब्राह्मपुराणोक्त०
5 I. O. पादुक
6 I. O. पीठक
7 A काष्ठघटिकापादुकायुगम्
8 I. O. ब्राह्मपुराणोक्त०
9 I. O. काष्ठद्वयपादुकायुगं
10 A मानसो

[1]रथश्चाश्वतरीयुक्तं तस्य हेममयं शुभम् ।
उपतिष्ठति [2]विप्रर्षे सर्वरत्नविभूषितम् ॥१४॥

दह्यमानाय [3]सन्तप्तभूमिभ्रमणजातचरणदाहाय । अर्च्चिताय ब्राह्मणाय उक्तरूपाया-[4]र्च्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात । आग्नेयपुराणोक्तोपानद्दानफलप्राप्ति-कामोऽहमेते उपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[नन्दिपुराणे :—
उपानहौ च यो दद्याद्ब्राह्मणाय प्रवासिने[5] ।
सगजैस्तु रथैर्याति याम्ये पथि महासुखम् ॥१५॥

अर्च्चिताय ब्राह्मणाय प्रवासिनेऽर्च्चिते उपानहौ ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात । नन्दि-पुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत ।][6]

आदित्यपुराणेः—
अश्वं वा यदि वा युग्मं[7] शोभने वाथ पादुके ।
ददते याचमानेभ्यो ब्राह्मणेभ्यः सुसंयुताः ॥१६॥

ब्राह्मणेभ्य इति बहुवचनं दातृबहुत्वापेक्षम् ।

तेषां दिव्यानि यानानि [8]रथा ध्वजपताकिनः ।
दुष्टः पन्था न चैवेह भविष्यति कथञ्चन ॥१७॥

अर्च्चितायार्थिने[9] [10]ब्राह्मणायार्च्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्तपादुकादानफलप्राप्तिकामोऽहमेते पादुके[11] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

शाम्बपुराणे :—
उपानहौ च यो दद्याच्छ्लक्ष्णे[12] [13]स्नेहसमन्विते ।
गोलोके स मुदा युक्तो वसति प्रेत्य मानवः[14] ॥१८॥

---

1 A यानश्चाश्वतरैर्युक्तं
2 I. O. विप्रश्च
3 I. O. सतप्त०, A विप्राय भूमिभ्रमण-जातचरणजातदाहाय
4 A ०र्चितायमुपानद्युग:
5 I. O. तपस्विने
6 A omits the bracketed portion
7 A योग्यं
8 A रथध्वज०
9 A अर्चिताय तपस्विने
10 A ब्राह्मणायार्चितायमुपानद्युगं
11 A पादुका
12 A दद्यात श्लक्ष्ण
13 A स्नेहसमन्विते
14 I. O. मानवैः

अर्चिताय ब्राह्मणायार्चितं तैलाभिषिक्तं[1] श्लक्ष्णमुपानद्युगलम्[2] ॐ अद्यादि तुभ्यमहमुत्सृजे दद्यात्। [3]शाम्बपुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते[4] उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३११।६ख—७) :—

उपानहौ तथा दत्त्वा श्लक्ष्णे स्नेहसमन्विते[5]।

रथमश्वतरीयुक्तं त्रिदिवे प्रतिपद्यते।

सर्वपापविनिर्मुक्तो याम्यं[6] मार्गं सुखं व्रजेत् ॥१६॥

अर्चिताय ब्राह्मणायार्चितं सुकुमारं घृतनवनीताद्यनुलिप्तं [7]चर्मपादुकायुगलम् ॐ अद्यादि तुभ्यमहमुत्सृजे दद्यात्। विष्णुधर्मोत्तरोक्त-सर्वसौख्योपानद्दान[8]-फलप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते [श्रीदानसागरे उपानद्दानावर्तः][9]।

---

1 A तैलाद्ययुक्तं
2 A ०युगं
3 I. O. नास्ति०
4 A ०मेतत्
5 A ०समन्वित:
6 I. O. and V. D. याम्यमार्गं
7 A चर्म०
8 I. O. omits दान
9 A श्रीदानं देयं for the bracketed portion

[1][अथ नानादैवतयानदानावर्तः । (५५)

आग्नेयपुराणे :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च ।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥१॥
यानमश्वमनड्वाहं हेमं रूप्यं मणींस्तिलान् ।
ये प्रयच्छन्ति पापेषु निरताः सर्वदा मुने ।
न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥२॥

पापेषु निरताः सर्वदेति वचनादतिप्रचुरपापक्षयार्थमिदं देयम् । उक्तदिनानामन्यतमेऽर्चिताय ब्राह्मणाय प्रसिद्धानामन्यतममर्चितं यानं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-यान-दानफलप्राप्तिकामोऽहमेतद्यानं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यानमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा यानमारोहेत ।

आदित्यपुराणे :—

तीर्थे तडागकूपादिनौकासेतुप्रदाश्च ये ।]
स्कन्धेन तारयेद् यस्तु तृषार्तानां[2] जलप्रदः ॥३॥
षष्टिकोटिसहस्राणि [3]अब्दानाञ्च वै त्रयम् ।
क्रीडन्ति ते श्वेतपुरे एतदुक्तं[4] द्विजोत्तम ॥४॥

[अत्र सोपकरणां][5] नौकामुपकल्प्य[6] [7]नानासत्त्वेभ्यो जलदुर्ग[8]-सन्तरणायोत्सृज्य दद्यात् । ॐ [9]आदित्यपुराणोक्त-नौकादान[10]-फलप्राप्तिकामोऽहं नानासत्त्वेभ्यो[11] जलदुर्ग[12]-सन्तरणाय नौकां दास्ये ।

---

1 A omits the bracketed portion
2 A तृषार्त्तां ना
3 A अब्ददानञ्च
4 A एतदुक्त
5 A काष्ठायाश्चैर् for the bracketed portion
6 A ०कल्प
7 I. O. नानां for नाना
8 A ०दुर्ग
9 I. O. अद्यादित्य०
10 I. O. नौकादत्त
11 A नानासत्वे
12 A जलदुर्ग

[तथा :—

अश्वं वा यदि वा युग्मं शोभने वाथ पादुके ।
[ददते याचमानेभ्यो][1] ब्राह्मणेभ्यः सुसंयताः[2] ॥५॥
तेषां दिव्यानि यानानि रथा ध्वजपताकिनः ।
दुष्टः पन्था न चैवेह भविष्यति कदाचन ॥६॥

ब्राह्मणेभ्य इति बहुवचनं दातृबहुत्वापेक्षम् । [रथो गोयानम्][3] । [4]अलोकरूपमर्चितं यानमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्त-युग्मदान-फलप्राप्तिकामोऽहमेतद्युग्मं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][5]

नन्दिपुराणे :—

[योऽश्वं गजं रथञ्चापि][6] ब्राह्मणे प्रतिपादयेत् ।
स शक्रस्य वसेल्लोके[7] यथा शक्रो युगान् दश ।
प्राप्यान्ते[8] [चाथ मानुष्यं][9] राजा भवति ऋद्धिमान्[10] ॥७॥

अर्चिताय ब्राह्मणायार्चितं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्त-रथदानफलप्राप्तिकामोऽहमेतं रथं ददानि । स्वस्तिसावित्रीपाठान्ते[11] रथोऽयं प्रजापति-दैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादिकं पूर्ववत् । इशाग्रहणं स्वीकारः ।

विष्णुधर्मोत्तरे (३।३०६।३५-३६क) :—

गोभिश्चतुर्भिः संयुक्तं रथं दत्त्वा द्विजातये ।
धान्यैर्वस्त्रैर्युतं शक्त्या शक्रलोकं व्रजन्ति ते ।
मानुष्यमासाद्य तथा भवन्ति वसुधाधिपाः ॥८॥

अर्चिताय ब्राह्मणायार्चितं यथाशक्ति धान्यवस्त्रसहितं वृषभचतुष्टययुक्तं रथम् ॐ

---

1 A ददाति यः प्रदानभ्वा for the bracketed portion
2 A सुसंयतः
3 A रथद्योयानं for the bracketed portion
4 A reads यद्लोक० and adds the following line just above it, स्वर्ग प्रत्येमृतभावयचाच्छाबायाना-परिच्छिन्नः
5 I. O. omits the bracketed portion
6 I. O. योऽश्वराजं रथश्चापि for the bracketed portion
7 A वसेल्लोके
8 I. O. प्राप्यान्ते
9 A मानुषं लोकं tor the b. p.
10 A निश्चितं
11 A पाठानन्तरं

अद्यादि तुभ्यमन्तमुक्ता दद्यात्। विष्णुधर्मोत्तरोक्तगोचतुष्टययुक्त-रथदानफलप्राप्ति-[कामोऽ][1]-हमे-[तं धान्य][2]-वस्त्रसहितं गोचतुष्टययुक्तं रथं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।१०ख-११क) :—

चतुर्भि-[3]स्तुरगैर्युक्तं सर्वोपकरणैर्युतम्।

रथं द्विजातये दत्त्वा[4] राजसूयफलं लभेत ॥९॥

अर्चिताय ब्राह्मणायार्चितं प्रसिद्धपताकाध्वजेशायुगरज्वादि[5]-रथोपकरणसहितमश्वचतुष्टय-युक्तं रथम् ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात्। राजसूयफलप्राप्तिकामोऽहमेतं तुरगचतुष्टय-युक्तं सर्वोपकरणयुतं रथं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।१४-१५) :—

चतुर्भिः कुञ्जरैर्युक्तं रथं दत्त्वा द्विजातये।

समग्रभूमिदानस्य फलं प्राप्नोत्यसंशयम् ॥१०॥

भूमिः [सशैला सवना][6] सतोया दत्ता हि लोके भवतीह तेन।

इष्टांश्च लोकान् पुरुषः प्रयाति [7]सम्पूज्यमानस्त्रिदशैर्महात्मा[8] ॥११॥

अर्चिताय ब्राह्मणायार्चितं कुञ्जरचतुष्टययुक्तं रथम् ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात्। विष्णुधर्मोत्तरोक्त-रथदानफलप्राप्तिकामोऽहमेतं कुञ्जरचतुष्टययुक्तं रथं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (३।३०६।३६ख-३७क) :—

शकटस्य प्रदानन्तु विना गोभिर्महाफलम्।

विशेषेण [9]महाभागास्तस्य गोभिर्युतस्य च ॥१२॥

गोभिर्युतस्येति बहुवचनाद्वृषचतुष्टययुक्तस्येत्यर्थः। अर्चिताय ब्राह्मणायार्चितं [10]गो-रहितं शकटम् ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात्। विष्णुधर्मोत्तरोक्त-स्वरूपशकटदानफल-प्राप्तिकामोऽहमेतं शकटं[11] ददानि। स्वस्तिसावित्रीपाठानन्तरं शकटोऽयमुत्तानाङ्गिरोदैवत

---

1 A omits the bracketed portion
2 A तथान्यं for the bracketed portion
3 A omits स्तु
4 A द्विजाय दत्त्वा च
5 A युगन्धरादि०
6 A सशैलवनवना for the bracketed portion
7 I. O. सपूज्यमान०
8 A. ०महात्मभिः
9 A महाभाग तस्य
10 I. O. गोविहितं, A गोरहित
11 A एतच्छकटं

इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । गोचतुष्टययुक्तशकटदाने तु विष्णुधर्मोत्त-रोक्त-गोयुक्तशकटदान-[1]फलप्राप्तिकामोऽहमेतं गोचतुष्टययुक्तं शकटमिति दानवाक्ये विशेषः ।

तथा (३।३०६।३७ख) :—

सशस्यं शकटं दत्त्वा नाकलोके महीयते ॥१३॥

अर्चिताय ब्राह्मणायार्चितं धान्यादिशस्यसहितं शकटम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षनाकलोकप्राप्तिकामोऽहमेतं[2] सशस्यं शकटं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१२।१) :—

नृवाह्यं पुरुषो यस्तु द्विजे सम्यक् प्रयच्छति ।
अश्वमेधफलं तस्य कथितं द्विजसत्तमाः ॥१४॥

द्विजसत्तमा इति सम्बोधनम् । नृवाह्यं दोलां सम्यगित्युपधानादिसहितामित्यर्थः । अर्चिताय ब्राह्मणायार्चितामुक्तरूपां दोलाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अश्वमेध-फलप्राप्तिकामोऽहमेतत् [सोपधानं नृवाह्यं][3] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत्[4] ।

तथा (३।३३१२।२क) :—

शिविकायाः प्रदानेन वह्निष्टोमफलं तथा ॥१५॥

कथितमिति सम्बन्धः । शिविका चतुर्दोलकम् । अर्चिताय ब्राह्मणायार्चितां शिवि-काम्[5] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [6]वह्निष्टोमफलप्राप्तिकामोऽहमेतां शिविकां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे यानदानावर्तः ।

1 A omits फल
2 I. O. ०मेतत्
3 A नृवाह्यमुपधानादिसहितं for the bracketed portion
4 A adds शकटदानमिति वत् after this
5 A अर्चितमुक्तरूपां for अर्चितां शिविकाम्
6 A अग्नि०

अथ प्रजापतिदैवतगजदानावर्तः । (५६)

नन्दिपुराणे :—

योऽश्वं गजं रथं वापि [1]ब्राह्मणे प्रतिपादयेत् ।
[स शक्रस्य वसेल्लोके][2] यथा शक्रो[3] युगान् दश ।
[4]प्राप्यान्ते चाथ मानुष्यं[5] राजा भवति ऋद्धिमान्[6] ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं गजं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुक शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं नन्दिपुराणोक्त-गजदानफलप्राप्तिकामोऽहमेतं गजं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गजोऽयं प्रजापतिदैवत इत्युक्त्वा यथ शाखं कामस्तुतिं पठेत । तत ॐ अद्य[7]कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेत काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा गजमारोहेत्[8] ।

विष्णुधर्मोत्तरे (३।३१२।१३) :—

सुवर्णकम्बु[9] मातङ्गं दत्त्वा विप्राय वै द्विजाः ।
राजसूयाश्वमेधाभ्यां फलं विन्दत्यसंशयम् ॥२॥

[द्विजा इति सम्बोधनम् ।][10] स्वर्णमयकम्बुसहितं[11] गजमर्चितं[12]-मर्चिताय [13]ब्राह्मणा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [विष्णुधर्मोत्तरोक्त-सुवर्णकम्बु-मातङ्गदानफलप्राप्तिकामोऽह मेतं सुवर्णकम्बुं मातङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१२।१२) :—

कुञ्जरस्य प्रदानेन मनुष्यः स्वर्गविच्युतः ।
राजा भवति लोकेऽस्मिन् यशोविक्रमसंयुतः ॥३॥

---

1 A ब्राह्मणेभ्यः प्रद्दापयेत्
2 A शक्रलोके वर्तते स for the bracketed portion
3 I. O. यथाशक्ति
4 A संप्राप्य चाव, I. O. प्राप्यान्ते चाथ
5 I. O. मन्विठयं
6 A साङ्गमान
7 A omits अद्य
8 A ०रोहयेत्
9 A ०कक्षं
10 A omits the bracketed portion
11 A ०कक्षासहितं
12 A omits अर्चितम्
13 A adds जन्मसंस्कारविद्या before ब्राह्मणाय

ब्राह्मणायार्चितायार्चितं कुञ्जरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।][1] विष्णुधर्मोत्तरोक्त-[2]स्वल्पकुञ्जरदानफलप्राप्तिकामोऽहमेतं कुञ्जरं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।११ख) :—

प्रदाय करिणीं[3] [4]सम्यगेतदेव फलं लभेत ॥४॥

[5]एतदेव फलमिति पूर्वोक्तं राजसूयफलम्।

तद् यथा (३।३१२।१०ख-११क) :—

चतुर्भिस्तुरगैर्युक्तं सर्वोपकरणैर्युतम्।

[6]रथं द्विजातये दत्त्वा राजसूयफलं लभेत ॥५॥

[7]सम्यग् विधिना प्रदायेति पृष्ठास्तीर्णपटी-कम्बल-घण्टा-[8]कम्बूपकरणसहितां दत्त्वेत्यर्थः। तदेवं करिणीमुक्तरूपामर्चिता[9]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। राजसूयफल[10]-प्राप्तिकामोऽहमेतामलङ्कृतां करिणीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे गजदानावर्तः।

---

1 A omits the bracketed portion
2 A सुरूप०
3 I. O. करिणां
4 I. O. सम्यमेतदेव
5 A तदेव
6 A कथं
7 I. O. सम्यं
8 A कन्नामुपकरण०
9 A omits अर्चिताम्
10 A फ for फल

अथ यमदैवताश्वदानावर्तः । (५७)

मनुः (४।२३१) :—

अश्विसालोक्यमश्वदः ॥१॥

[1]प्राप्नोतीत्यनुषज्यते । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितमश्वं दद्यात् । अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमश्विसालोक्यप्राप्तिकामोऽह मश्वं ददानि । [2]अत्र प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वाऽश्वोऽयं यमदैवत इत यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[3] क ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वाऽश्वं [4]कर्णे गृह्णीयात् ।

याज्ञवल्क्यः (१।२१०) :—

भूदीपाश्वान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकस्वर्णरूप्यान्[5] दत्त्वा स्वर्गे महीयते ॥२॥

अर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षग प्राप्तिकामोऽहमेतमश्वं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

महाभारते :—

यावन्ति [6]रोमाणि हये भवन्तीह [7]नरेश्वर ।
तावतो वाजिदा[8] लोकान् प्राप्नुवन्ति महीपते ॥३॥

लोकान् देवलोकान् । अत्र [9]फलोत्कर्षादुत्कृष्टाश्वदानम् । [10]तदत्रार्चितमुत्कृ मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-वाजिदानफल कामोऽहमेतं वाजिनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

स्कन्दपुराणे :—

[रथमश्वं गजं दासीं][11] कन्यां गृहमथापि वा ।
भूमिञ्च यः प्रयच्छेत्तु[12] स राजा भुवि जायते ॥४॥

---

1 A प्राप्नोत्यनुसज्यते, I. O. आम्नातीत्यनुयुज्यते
2 A omits अत्र
3 A एतत् for इदं
4 A omits कर्णे
5 A नैवेसिकनंसद्यानद्दान, Yāj. ०धुर्य्यान्
6 A हयरोमाणि
7 A नरेश्वरा:
8 I. O. वाजिनो
9 A फलोत्कर्षंप्रतिवत्कृष्टाश्वदानं
10 A omits तद
11 I. O. रथमश्वराजं दासीं वा the bracketed portion
12 A प्रयच्छेत

अर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। भूमिराज्य-प्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

अश्वं [यस्तु प्रयच्छेत][1] हेमचित्रं सुलक्षणम्।
स तेन कर्मणा [देवि गान्धर्वं][2] लोकमश्नुते ॥५॥

अर्चिताय ब्राह्मणायार्चितं[3] सौवर्णाभरणभूषितं शोभनलक्षणयुक्त[4]-मश्वमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात। गान्धर्वलोकप्राप्तिकामोऽहमेतं हेमचित्रमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आदित्यपुराणे :—

अश्वं वा यदि वा युग्मं[5] शोभने [6]चाथ पादुके।
ददाति [यो वसेत् स्वर्गे][7] ब्राह्मणेभ्यः सुसंयतः[8] ॥६॥
तेषां दिव्यानि यानानि [9]रथा ध्वजपताकिनः।
दुष्टः पन्था न चैवेह भविष्यति कथञ्चन ॥७॥

ब्राह्मणेभ्य इति बहुवचनमश्वादिदेयबहुत्वापेक्षम् [10]एकस्याश्वस्य बहुभ्यो दानप्रतिषेधात्। सुसंयतोऽनृतभाषण-पतित-[11][चाण्डालादिभाषण]-वर्जितः। तदत्रोक्तरूपो यजमानोऽर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्ताश्वदानफल-प्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत्।
स शक्रस्य वसेल्लोके यथा शक्रो युगान् दश।
प्राप्यान्ते चाथ मानुष्यं [12]राजते धरणीतले ॥८॥

अर्चिताय ब्राह्मणायार्चितं यथाशक्त्युत्कृष्टमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।

---

1 I. O. यस्य प्रयच्छेत् for the bracketed portion
2 A देवि गान्धर्व्वं and I. O. देवो गान्धर्वं for the bracketed portion
3 A omits अर्चितं
4 A omits युक्त
5 A अश्वं
6 A वाथ
7 I. O. यत्प्रदानं वै for the bracketed portion
8 I. O. सुसंयताः
9 A रथ
10 A एकस्य only
11 I. O. चाण्डालाप for the bracketed portion
12 A रजेते धरणितले, I. O. राजा भवति ऋद्धिमान्

नन्दिपुराणोक्ताश्वदानफलप्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आग्नेयपुराणे :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥९॥
[1]यानमश्वमनड्वाहं हेमरूप्यमणींस्तिलान्।
ये प्रयच्छन्ति [2]पापेषु निरताः सर्वदा मुने।
न तेषां भैरवः पन्था दत्त्वैषां [3]दानमित्युत ॥१०॥

पापेषु निरताः सर्वदेत्यभिधानात् [4]बहुतरपापक्षयार्थमिदं [5]देयम्। तथा च गौतमेनाश्वस्य [6]पापनिष्क्रयणद्रव्यत्वमुक्तम्। उक्तसमयानामन्यतमेऽर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्ताश्वदानफलप्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१२।६ख-८क) :—

दानानामुत्तमं दानं प्रदानं तुरगस्य तु[7]।
[8]वडवायाः प्रदानञ्च तथा बहुफलं स्मृतम् ॥११॥
तुरगं ये प्रयच्छन्ति सूर्यलोकं व्रजन्ति ते।
यावन्ति [9]तस्य रोमाणि तावद्वर्षशतानि च ॥१२॥

[10][विष्णुधर्मोत्तर एव] शुक्लतुरङ्गदाने फलविशेष-[11]श्रवणादयं शुक्लेतरस्तुरङ्गः। अर्चिताय ब्राह्मणायार्चितं शुक्लेतरमश्वम्[12] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तानलङ्कृत-[13]श्वेतेतरतुरगदानफलप्राप्तिकामोऽहमेतं तुरङ्गमं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [14][वडवादानवाक्ये तु विष्णुधर्मोत्तरोक्त]-वडवादानफलप्राप्तिकामोऽह-[15][मेतां वडवामिति विशेषः]। [स्वस्त्यादिस्वीकारान्तं पूर्ववत्।][16]

---

1 A यानमश्वं गार्चं व
2 A पापेभ्यो
3 A दानमिच्छता
4 A बहुतरपापानां पापक्षयार्थमिदं
5 A omits देयम्
6 I. O. पापनिःक्रमेपनद्रव्यमुक्तं
7 A च
8 A उत्तरायाः
9 A यस्य
10 A विष्णुधर्मोत्तर विष्णुधर्मोत्तरोक्त for the bracketed portion
11 I. O. श्रवणादेयं
12 A शुक्लेतरवर्णमश्वम
13 A श्वेत for श्वेतेतर
14 A omits the bracketed portion
15 I. O. मेतं तुरगं ददानि for the bracketed portion
16 A omits the bracketed portion

[1][तथा (३।३१२।८ख-९क) :—

शुक्लं तुरङ्गमं दत्त्वा फलं दशगुणं भवेत् ।
गौर्यथा कपिला श्रेष्ठा तथैव तुरगः स तु ॥१३॥

दशगुणं शुक्लेतरप्रदानफलं प्राप्नोतीत्यर्थः । अर्चिताय ब्राह्मणायार्चितं शुक्लमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-शुक्लतुरङ्गदानफलप्राप्तिकामोऽहमेतं तुरङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

तथा (३।३१२।९ख-१०क) :—

तुरङ्गमं सपर्याणं सालङ्कारं प्रयच्छतः ।
पुण्डरीकफलं प्रोक्तं नात्र कार्या विचारणा ॥१४॥

अर्चिताय ब्राह्मणाय घण्टिका-[चामरशंख][2]-मालिकासुवर्ण-[3]रचित-ग्रैवेयकतिलकान्वितं पर्याणादिना सज्जीकृतमर्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुण्डरीकफलप्राप्तिकामोऽहमेतं सपर्याणं सालङ्कारं तुरङ्गमं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे अश्वदानावर्तः ।

1 I. O. omits the bracketed portion

2 A चामरसंख्या for the bracketed porion

3 I. O. ०खचित०

अथ [1]यमदैवतमहिषदानावर्तः। (५८)

आग्नेयपुराणे :—

[2]महिषीदानमाहात्म्यं कथयामि नृपोत्तम।
पुण्यं पवित्रमायुष्यं सर्वकामफलप्रदम्॥१॥
सूर्यचन्द्रग्रहे पुण्ये कार्त्तिक्यामयने तथा।
शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रान्तिवासरे॥२॥
यदा वा[3] जीवितं वित्तं चित्तञ्च कुरुनन्दन।
तदैव[4] देया महिषी संसारभयभीरुणा[5]॥३॥
[6]सुपयोधरा सुश्रृङ्गी सुखुरा सुकटिस्तथा।
प्रथमा तरुणी धेनुः सुशीला दोषवर्जिता॥४॥

प्रथमा तरुणी धेनुः प्रथमप्रसूता धेनुरित्यर्थः। दोषवर्जिताऽव्यङ्गा।

सुवर्णश्रृङ्गतिलका घण्टाभरणभूषिता।
रक्तवस्त्रावृता[7] देया ताम्रदोहनकान्विता॥५॥

सुवर्णश्रृङ्गतिलकेति[8] [9]सुवर्णश्रृङ्गी सुवर्णतिलका चेत्यर्थः। [10]घण्टाभरणभूषितेति घण्टया सौवर्णग्रैवेयकाभरणेन [11]च भूषितेत्यर्थः।

पिण्याकपिटकोपेता सहिरण्या च शक्तितः।
सप्तधान्ययुता [12]देया ब्राह्मणे वेदपारगे॥६॥

पिण्याकपिटकोपेता [13]तिलखलीपूर्णपिटकयुता। सप्तधान्यानि परिभाषोक्तानि।

पुराणपाठके तद्वत् सकुटुम्बे [14]सुखिदति।
सहिरण्यां सवस्त्राञ्च [15]पुण्येऽह्नि विधिपूर्वकम्॥७॥

---

1 A अथयमदैवतमहीषदानावर्तः
2 I. O. महिष०
3 A च
4 A तदेव
5 A संसारभयमोचनी
6 A स्वपयोधारा
7 A रक्तवस्त्रवृता
8 A सुवर्णश्रृङ्गतिलक इति
9 A omits सुवर्णश्रृङ्गी
10 A घण्टाभूषितेति
11 I.O. न च
12 A शेता
13 I. O. तिलखलीपूस्तकण्डोलयुता
14 I. O. सुखीदति, A सुदीदति
15 A पुण्याह

सहिरण्यां सवस्त्रामिति पुनरभिधानं[1] वेदपारगव्यतिरेकेण सकुटुम्बदरिद्रपुराण-[2]पाठक-ब्राह्मणदानपक्षेऽपि हिरण्यवस्त्रयोरवश्य-[3]देयत्वार्थम् ।

दद्यान्मन्त्रेण राजेन्द्र पुराणविहितेन च ।
इन्द्रादिलोकपालानां [या राजन् [4]महिषी शुभा] ।
[5]तस्या दानं महाराज सास्तु मे सर्वकामदा ॥८॥
धर्मराजस्य [6][साहाय्ये यस्य पुत्रः प्रतिष्ठितः] ।
महिषासुरस्य जननी या सास्तु वरदा मम ॥९॥
दद्यात् सुदक्षिणां[7] तत्र ब्राह्मणाय पयस्विनीम् ।
प्रतिग्रहः स्मृतस्तस्याः पुच्छदेशे स्वयम्भुवा ॥१०॥

सुदक्षिणां[8] बहुदक्षिणाम् ।

एवं दत्त्वा विधानेन ब्राह्मणस्य गृहं नयेत् ।
क्षमापयेत्ततो विप्रं येन सन्तुष्टिमेयिवान् ॥११॥
अनेन विधिना दत्त्वा महिषीं[9] द्विजपुङ्गवे ।
सर्वकामानवाप्नोति इह लोके परत्र च ॥१२॥
[या स्त्री ददाति महिषीं सा राजमहिषी भवेत् ।][10]
यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत् ।
धनाधिपो भवेद्वैश्यः शूद्रः सर्वार्थसंयुतः[11] ॥१३॥
तस्मान्नरेण दातव्या महिषी विभवे सति ।
पितॄणां तारणार्थाय आत्मनः शुभमिच्छता ॥१४॥
[12]दशधेनुसमां राजन् महिषीं नारदोऽब्रवीत् ।
विंशत्समां तथा व्यासः सर्वदानोत्तमां कविः ॥१५॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
दत्त्वाश्विननवम्यान्तु समुपोष्य जगत्पते ।

---

1 A पुनरभिधानात्
2 A पठनकारक०
3 A देयत्वं
4 A यावाजन्म मह्रीतले for the b. p.
5 A तस्य
6 A देवस्य महिषी या प्रतिष्ठिता for the bracketed portion
7 and 8 I. O. प्रदक्षिणां
9 I. O. महिषां
10 I. O. omits the bracketed portion and A adds the following meaningless line after this, viz. तस्मै सह सुखं लिभे इहलोके परत्र च
11 A सर्वार्थसम्मतः
12 A दशवत्सममा

[1]दत्ताः सत्कृत्य विप्रेभ्यो महिष्यः सर्वकामदाः ॥१६॥
महिषीदानमाहात्म्यं यः शृणोति सदा नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥१७॥

दुग्धाधिकान्तु महिषीं नवमेघवर्णां [2]संपुष्टपुलकवतीं [3]जघनाभिरामाम् ।
दत्त्वा सुवर्णतिलकां द्विजपुङ्गवाय लोकद्वयं विजयतीह किमत्र चित्रम् ॥१८॥

अतोक्तसमयानामन्यतमे यजमानो मन्त्रब्राह्मणयोरध्येतारं[4] ब्राह्मणं सकुटुम्बं [5]दरिद्रं [6]पुराणस्य पाठकं वा ब्राह्मणं वस्त्र-[7]गन्धादिभिरभ्यर्च्य [8]तस्मै यथोक्तरूपामुक्तालङ्कारोपकरणयुतां महिषीमर्च्चिताम् इन्द्रादीत्युक्तमन्त्रद्वयं पठित्वा दद्यात् । ॐ [9]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-नियतकालिक-महिषीदानफलप्राप्तिकामोऽहमेतां सुवर्णशृङ्गीं सुवर्णतिलकां घण्टाभरणभूषितां [10]रक्तवस्त्रावृतां ताम्रदोहनकान्वितां पिण्याकपिटकोपेतां सकाञ्चनां सप्तधान्ययुतां पुलकवतीं महिषीं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [11]महिषीयं यमदैवतेत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा महिषीं पुच्छे गृह्णीयात् । आश्विनशुक्लनवम्यान्तु [12]नवमीपूर्वतरदिने प्रातः कृतनित्यो घटिकाधिक-[13]प्रहरत्रये हविष्यं भुक्त्वाऽऽचम्य शुचौ देश [14]उपविश्य पादौ प्रक्षाल्याचम्य[15] प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः ॐ सूर्यः सोमः यमः कालः पञ्च महाभूतानि [16]आग्नेयपुराणोक्तसोपवासमहिषीदानकर्म मया कर्तव्यमित्युक्त्वा उदङ्मुखो[17] गृहीतजलपूर्णताम्रपात्रः सङ्कल्पं कुर्यात् । [ॐ श्व][18]उपोष्यापरदिने [आग्नेयपुराणोक्त-महिषीदानकर्माहं करिष्ये । ततो नियमेन सुप्त्वा अपरदिने कृतनित्य उपोष्यापरदिने][19] नवम्यां कृतनित्यो

---

1 A दत्वा
2 I. O. संपुष्टपुलकवतीं, A संपुष्ट-पुलकवतीं
3 I. O. जघनाभिरामं, A जघनाभी-रामां
4 I. O. ०वध्येतारं०, A adds तारं after this
5 I. O. दारिद्रं
6 A पुराणपाठकं
7 I. O. ०गन्धाभिरभ्यर्च्य
8 A omits तस्मै
9 A omits अद्य
10 A रक्तावस्त्रावृतां
11 I. O. महिषीं
12 A नमीपूर्वतरदिने
13 A ०प्रहरत्रये
14 I. O. उपवेश्य
15 A प्रक्षाल्य
16 I. O. आग्नेयपुराणोक्तं सोपवासं महिषीदानकर्म
17 A adds वा after this
18 A श्व for the bracketed portion
19 I. O. omits the b. p.

महिषीं पूर्ववद्दद्यात्। दानवाक्ये आग्नेयपुराणोक्ताश्विननवमीविहितमहिषदानफलप्राप्तिकामो-ऽहमिति विशेषः।

विष्णुधर्मोत्तरे (३।३०६।६०ख) :—

वारुणं लोकमाप्नोति दत्त्वा च महिषीं [1]ततः ॥१६॥

[2]एतदनलङ्कृतमहिषीदानमग्रे ऽलङ्कृतमहिषीदानश्रुतेः। अर्चिताय ब्राह्मणायार्चितां महिषीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वारुणलोकप्राप्तिकामोऽहमेतां महिषीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०६।५६क) :—

अलङ्कृतान्तु तां दत्त्वा गोदानफलमाप्नुयात् ॥२०॥

तां महिषीमलङ्कृतां यथाशक्ति हेमतिलकादिभिः। अर्चिताय ब्राह्मणायार्चितामलङ्कृतां महिषीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गोदानफलप्राप्तिकामोऽहमेतामलङ्कृतां[3] महिषीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०६।६१क) :—

महिषस्य प्रदानेन [4]याम्ये लोके महीयते ॥२१॥

ब्राह्मणायार्चिताय [5]महिषमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोतकर्ष-याम्यलोकप्राप्तिकामोऽहमेतं महिषं[6] ददानि। स्वस्त्यादिस्वीकारान्तं[7] पूर्ववत्।

इति महाराजाधिराज-निःशङ्क शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे महिषदानावर्तः।

---

1 V. D. नरः
2 A एतदलङ्कृत०
3 A omits अलङ्कृतां
4 A याम्यलोके
5 A महिषीमर्चितं
6 A महिषीं
7 A ०स्वीकान्तं

अथारोग्यदानावर्तः । (५९)

नन्दिपुराणे :—

धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः ।
अतस्त्वारोग्यदानेन नरो भवति सर्वदः[1] ॥१॥
आरोग्यशालां कुर्वीत [2]महौषधिपरिच्छदाम् ।
[3]विदग्धवैद्यसंयुक्तां [4]भृत्यावसथसंयुताम् ॥२॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः ।
औषधिमूलतत्त्वज्ञः[5] समुद्धरणकालवित् ॥३॥
[6][समुद्धरणकालवित्]औषधोत्पादन[7]-समयज्ञः ।
[8]रसवीर्यविपाकज्ञः [9]शालिमानौषधिगणे ।
योगिवद्देहिनां देहं यो [10]धिया प्रविशेद्बुधः ॥४॥
[11]धातुपथ्याशयज्ञश्च निदानविदतन्द्रितः[12] ।
व्याधीनां [13]पूर्वलिङ्गज्ञस्तदुत्तरविधानवित्[14] ॥५॥
देशकालविधानज्ञश्चिकित्सा-[15]शयवित्तथा ।
अष्टाङ्गायुर्वेदवेत्ता मुष्टियोगविधानवित् ॥६॥
एवंविधः [16]शुभो वैद्यो भवेद् यत्नाभियोजितः ।
आरोग्यशालामेवन्तु कुर्याद् यो धर्मसंश्रयः[17] ।

---

1 I. O. सर्व्वतः
2 A महौषधपरिच्छदाम्
3 I. O. विदग्ध०
4 I. O. वृत्तावसथ०
5 I. O. औषधीमूलतत्त्वज्ञः, A औषधीमूलपथ्यज्ञः
6 A adds समुद्धरणं after the bracketed portion
7 A औषधोत्पाटन०
8 A बल for रस
9 A शालिमामांसौषधीगणे
10 A वद् प्रविशेद् बुधः
11 A धातुपथ्यामयज्ञश्च
12 I. O. ०तन्द्रितः
13 I. O. सर्व्व for पूर्व
14 A ०विधानविधावित्
15 A ०मयवित्तथा
16 A शुभे
17 A धर्मसंश्रयः

[1]स पुमान् धार्मिको लोके स कृतार्थः स बुद्धिमान् ॥७॥
सम्यगारोग्यशालायामौषधैः स्नेहपावनैः[2] ।
व्याधितं निरुजीकृत्य अप्येकं[3] करुणायुतः ॥८॥
प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतः ।
[4]आत्मवित्तानुसारेण दरिद्रः [5]फलभाग् भवेत ॥९॥
दरिद्रस्य कुतः शाला आरोग्याय भिषक् तथा ।
अपि मूलेन केनापि मर्दनाद्यैरथापि वा ।
स्वस्थीकृत्य[6] लभेन्मर्त्यः पूर्वोक्तं लोकमक्षयम् ॥१०॥
[वातपित्तकफानाञ्च चयापचयभेदिनाम् ।][7]
यस्तु [8]स्वल्पाभ्युपायेन मोक्षयेद् व्याधिपीड़ितान् ।
सोऽपि याति शुभान् लोकानवाप्यान् यज्ञयाजिभिः ॥११॥

अत्र यजमानो यथाशक्ति इष्टकादिरचितां शालामौषधपावनादिशालाञ्च तदुपकरणताम्र-कटाह-कलसादिपात्र-परिच्छद- नानाविधव्याधि-शान्त्युचितौषधगण--यथोक्तलक्षणवैद्यनानाविध-[9]परिचारकयुतां विश्रामगृहसहितामारोग्यायोपकल्प्य[10] ब्राह्मणप्रमुखनानासत्त्वव्याधिशान्त्यर्थ-मुत्सृज्य दद्यात्। तद् यथा—नन्दिपुराणोक्तारोग्यशालादानफलप्राप्तिकामोऽहं[11] ब्राह्मण-प्रमुखानानासत्त्वेभ्यो व्याधिप्रतीकारार्थमेतां महौषधिपरिच्छदां नियुक्तवैद्यां भृत्यावसथसंयुक्ता-मारोग्यशालामुत्सृजे। ततस्तन्निर्वाहाय[12] धनं ताम्रपट्टादिलिखितां[13] वा भूमिं दद्यात्। आरोग्यशालाकरणासमर्थस्तु स्वल्पौषधदानमात्र[14]-मङ्गमर्दनादिभिश्च रोगिस्वस्थीकरणानुष्ठनमात्रं कुर्यात्।

तथा च सम्वर्तः :—

औषधस्नेहमाहारं रोगिणां रोगशान्तये ।
[ददानो रोगरहितः][15] सुखी दीर्घायुरेव[16] च ॥१२॥

---

1 A स्वश्रेयान
2 A स्नेहपारगैः
3 A अप्येक
4 I. O. आढ्या०
5 A फलवान्
6 I. O. स्वस्थीकृते
7 A reads the bracketed portion as वातपित्तकफान्यानां च या.पचयतेदिनाम्
8 A स्वप्राभ्युपायेन
9 I. O. ०परिवारयुतां
10 A ०आरोग्यशालामुपकल्प
11 I. O. adds एतं after this
12 A reads ततस्त्निवाह and omits धनं
13 I. O. ०लिखितां
14 A मात्रदान for दानमात्र
15 A ददानो रोगविवर्जितः for the b. p.
16 A दीर्घायुरेव

तथा च महाभारते :—

[1]अकल्पप्रतिचर्या च अङ्गसंवाहनादि[2] च ।

अत्रैकैकं नृपश्रेष्ठ गोशताद्व्यतिरिच्यते ॥१३॥

[3]अकल्पो रोगी ।

तथा स्कन्दपुराणे :—

व्याधितं यस्तु विप्रर्षे [दीनं मूढ][4]-मचेतनम् ।

उद्धरेच्च यथाशक्त्या स मुच्येद्ब्रह्महत्यया ॥१४॥

तथा च नन्दिपुराणे :—

अञ्जनं यो नरो दद्याद्दृग्णां व्याधिनिवृत्तये ।

विप्राय सुमना याति [सूर्यलोकं महाद्युतिम्][5] ॥१५॥

ततासौ युगसृष्ट्यन्ते[6] तुष्टो[7] जयति[8] भूतले ।

[9]अरोगनयनो दिव्यो [10]भवते सुभगो नरः ॥१६॥

तथा विष्णुधर्मोत्तरे (३।३०२।२६, ३।३११।१३क) :—

[11]व्याधितस्यौषधं दत्त्वा प्राणदानफलं लभेत् ।

[12][रोगार्तं परिचर्याथ प्राणदानफलं लभेत्] ॥१७॥

[13]तथौषधप्रदानेन रोगनाशमुपाश्नुते ॥१८॥

[14]तदेवं यथालाभं रोगिपरिचर्या तदङ्गमर्दनादिकम् । [15]चक्षूरोगिब्राह्मणेभ्यश्च यथालाभमञ्जनदानम् । रोगिभ्यश्च यथायथमौषधतैलघृतादिदानमाहारदानं[16] [17][प्रत्यासन्नमृत्युव्याधिविद्यातपःसम्पन्नब्राह्मणस्य च] यथाशक्ति प्रतीकारकरणञ्चानुष्ठानमात्मम् । तत्तत्फलार्थी यथेष्टकालं यथालाभं[18] कुर्यात् ।

1 I. O. अकल्य०

2 I. O. अङ्गसम्बाहनादि, A अङ्ग० सम्वहनानि

3 I. O. अकल्यो

4 I. O. दीनमूल for the bracketed portion

5 I. O. सूर्यलोके महामति: for the bracketed portion

6 I. O. युगसृष्ट्यन्ते, A युगषष्ट्यन्ते

7 A तृप्तो

8 I. O. जायति

9 A आरोगोनयनो

10 A भवति

11 A व्याधितस्यौषधं

12 I. O. omits the bracketed portion

13 I. O. तथैवौषधदानेन

14 A तदेव च

15 A चक्षू only, I. O. चक्षुरोगि०

16 A वदानं for दानं

17 I. O. प्रत्यासन्नमृत्युव्याधितविद्यातपः सम्पन्नब्राह्मणस्य च and A प्रत्यासन्न-व्याधिता--विद्यातपः-सम्पन्न--ब्राह्मणस्य for the bracketed portion

18 A यथाकिञ्चित

विष्णुधर्मोत्तरे (३।३१६।२१ख) :—

आतुरेभ्यो धनं दत्त्वा दानं बहुफलं भवेत् ॥१६॥

[1]रोगिप्रतीकारार्थं [2]धनमुत्सृज्य दद्यात्। [3]ॐ विष्णुधर्मोत्तरोक्तातुर[4]-प्रतीकारार्थं धनदानफलप्राप्तिकामोऽहमातुरेभ्यो दातुं[5] धनमेतदुत्सृजे[6]। ततो यथेच्छ[7]-कालं यथाशक्ति रोगिभ्यो धनं दद्यात्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे आरोग्यदानावर्तः।

1 A गोरिप्र० for रोगि०
2 A धनमुत्सृजेत्। दद्यात
3 A omits ॐ
4 A omits आतुर
5 A omits दातुं
6 A ०सृजेत्
7 A यथेष्ट०

[1]अथाभयदानावर्तः । (६०)

विष्णुः :—

सर्वदानाधिकमभयप्रदानं[2] [तत्प्रदानेनाभीष्टं लोकमाप्नोति][3] ॥१॥

सम्बर्तः :—

भूताभयप्रदानेन सर्वकामानवाप्नुयात् ।

दीर्घमायुश्च लभते सदा च सुसुखी[4] भवेत् ॥२॥

[5]मनुः (४।२३२) :—

[6]ऐश्वर्यमभयप्रदः ॥३॥

याज्ञवल्क्यः (१।२११) :—

गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं[7] सुखी भवेत् ॥४॥

यमः :—

दत्त्वा [8]प्रतिश्रयं लोके तथा दत्त्वैव चाभयम् ।

तथा दत्त्वा क्षितिं [9]विप्रे ब्रह्मलोके महीयते ॥५॥

महाभारते :—

[10]लोभाद्द्वेषाद्भयाद्वापि यस्त्यजेच्छरणागतम् ।

ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥६॥

प्राणिनं वध्यमानं हि यः शक्तः समुपेक्षते[11] ।

स याति नरकं घोरमिदमाहुर्मनीषिणः ॥७॥

चतुःसागरपर्यन्तां यो दद्यात् पृथिवीमिमाम् ।

सत्त्वेभ्यो ह्यभयं दत्ते[12] तयोरभयदोऽधिकः[13] ॥८॥

---

1 A omits it

2 A reads दानं for प्रदानं and सर्व......दानं twice

3 A तत्प्रदानेनाभीष्टलोकप्राप्नोतीत्यर्थः

4 I. O. सुखिनो

5 A omits it

6 I. O. तनुयं for ऐश्वय

7 A दत्त्वा चैवं

8 A परिश्रम, I. O. प्रतिभयं

9 A लोके

10 A लोभान्मोहाद्० I. O. लोभाद्द्वेषाद्०

11 A समुपेक्ष्यते

12 A दत्त्वा

13 A धराभयप्रदोधिकः

रामायणे (V. 93. 11 and 13, N. W.) :—

विनष्टः[1] पश्यतो यस्य रक्षितुः शरणागतः ।
आदाय सुकृतं तस्मात् सर्वं गच्छत्यरक्षितः ॥९॥
सुपर्याप्तविसृष्टस्य[2] नाश्वमेधस्य तत्फलम् ।
यत्फलं [3]जातसन्त्रासे रक्षिते शरणागते ॥१०॥

नन्दिपुराणे :—

महतां सूक्ष्मदेहानां[4] तथा च व्याधितात्मनाम् ।
[हिंस्राणां सौम्यमूर्त्तीणां][5] सर्वथा ह्यभवत् फलम् ॥११॥
वरमेकस्य सत्त्वस्य जीविताभयदक्षिणा ।
न तु विप्रसहस्रस्य गोसहस्रं सदक्षिणम्[6] ॥१२॥

तथा :—

अभयं पुरुषो[7] दत्त्वा [8]रक्षामन्विष्य देहिनः ।
[9]प्रयाति शक्रसालोक्यं [10]निश्चयात्मा नरोत्तमः ॥१३॥
न दानं तादृशं लोके विद्यते ह्यपरं भुवि ।
यादृशं ह्यभयं दानं सर्वभूतेषु गीयते ॥१४॥
न तपोभिर्महाघोरै-[र्न यज्ञैर्बहुदक्षिणैः][11] ।
प्राप्यन्ते गतयो दिव्या यथाभयभृतव्रतैः ॥१५॥

तथा :—

आत्मानं [दुःखितं दृष्ट्वा][12] तृणमात्रे चलत्यपि ।
मृत्युतश्च भयं घोरमभयं दानमाश्रयेत् ॥१६॥
तस्मादभयमेवादौ दद्याद् भूतेषु[13] सर्वदा ।
परलोकगतावास्तामभयेन[14] शुभोदयः ।
इहैव प्राप्यते सर्वमभयेन विपश्चितैः ॥१७॥

---

1 I. O. विनंचुः
2 A सपर्य्याापरिहृष्टस्य
3 A यातसन्त्रासे
4 A महता सूक्ष्मवेदानां
5 A विश्वासोस्य मुहूर्त्तानां for the bracketed portion
6 A सदक्षिणां
7 I. O. वपुषो
8 A रक्षां मानुष्यदेहिनः
9 I. O. स याति
10 A विश्वपात् स
11 A यंज्ञैर्बहुसुदक्षिणैः for the bracketed portion
12 A हि स्थितं मत्वा
13 I. O. ह्रत्तेषु
14 I. O. ०नभयेन

तथा :—

यस्मादभ्युदयावाप्तिर्यस्माद्धर्मस्य[1] साधनम् ।
आश्रयेत् सर्वभूतानां दानं तदभयस्य तु ॥१८॥
सम्बाध्य तु पथि श्रान्तं[2] भीतं संरक्ष्य मानवम् ।
धर्मस्य पुरमायाति सर्वकामगुणोज्ज्वलम् ॥१६॥

नरसिंहपुराणे :—

निर्मलं [3]स्वर्गमाप्नोति तथा[4] भूतहिते रतः ॥२०॥

वराहपुराणे (२०६।१३-१४क) :—

भूतानुकम्पको[5] [6]ह्येष क्रियतामस्य चार्चनम् ।
वर्षाणामयुतं [7]चाद्धं [8]दिवि [9]तिष्ठेत [10]देववत् ।
[11][जायते च ततः] पश्चान्मानुषः सर्वपूजितः[12] ॥२१॥

तथा :—

अभयस्य प्रदानेन [13]सर्वकामानवाप्नुयात् ॥२२॥

विष्णुधर्मोत्तरे (३।३०२।६-१६, २१-२८) :—

अभयस्य प्रदानेन नरः स्यात् सर्वकामदः ।
अश्वमेधफलं तस्य यो रक्षेच्छरणागतम् ॥२३॥
शरणागतन्तु संत्यज्य नृशंसः पुरुषाधमः ।
बहून्यब्दसहस्राणि नरकं प्रतिपद्यते ॥२४॥
[14][नरकाच्च तथा मुक्त]-स्तिर्यग्योनिषु जायते ।
तत्रापि च तथाप्नोति [15]वधं बन्धाननेकशः ॥२५॥
[16]दैवान्मानुष्यमासाद्य चण्डालत्वमवाप्नुयात् ।
व्याधिबन्धवधैर्घोरैस्तत्रापि च स [17]युज्यते ॥२६॥

---

1 I. O. ०धर्म्मोऽस्य, A व्रमस्तथेस्य
2 I. O. श्राद्धं
3 A लोक०
4 A सर्व्व
5 I. O. भूतानुकर्म्मको
6 A ह्येतत्
7 A वार्य, Varāha P. चार्य
8 Varāha P. तत्र
9 I. O. and Varāha P. तिष्ठत
10 Corrected from Varāha P. A वैरितः, I. O. वेदवित्
11 A यायते च ततु: and Varāha P. जायते तु ततः for the bracketed portion
12 Varāha P. पश्चात् सर्वमानुषपूजितः
13 A सर्व्वान कामानराप्नुयात्
14 A नरकाच्छत मुक्ता for the bracketed portion
15 A and V. D. वध
16 A दैवान्मानुषसङ्ग च
17 A मुच्यते

परित्राणन्तु यः कुर्याद् भीतस्य शरणैषिणः ।
स एकः पुरुषो लोके सर्वधर्मभृतां वरः ॥२७॥
वधभीतस्य यः कुर्यात् परित्राणं नरोत्तमः ।
शक्रलोकः स्मृतस्तस्य यावदिन्द्राश्चतुर्दश ॥२८॥
तमःप्रवेशभीतस्य परित्राणेन मानवः ।
ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥२९॥
वधादपि परं पापं [1]चक्षुषा तु वियोजनम् ।
पार्थिवेन न तत् कार्यं कदाचिदपि कस्यचित्[2] ॥३०॥
तमःप्रवेशनं कृत्वा परेषां पुरुषाधमः ।
[3][अन्धत्वं ध्रुवमाप्नोति कल्पशेषमिति श्रुतिः] ।
अपि कल्पसहस्राणि तमसा न वियुज्यते[4] ॥३१॥
अङ्गच्छेदनभीतस्य कृत्वा त्राणमनिन्दिताः[5] ।
रुद्रलोकमवाप्नोति कल्पशेषमिति श्रुतिः ।
[6][कल्पादिसर्गे भवति ज्ञानयुक्तो] नरस्ततः ॥३२॥
कृत्वा बन्धनभीतस्य परित्राणं नरोत्तमः ।
सर्वबन्धविनिर्मुक्तो भृगूणां लोकमश्नुते ॥३३॥
विवासनाच्च भीतस्य कृत्वा त्राणं तथा नरः ।
सर्वदुःखविनिर्मुक्तः साध्यानां लोकमाप्नुयात् ॥३४॥
ताडनाद् यस्तु भीतस्य[7] परित्राणं समाचरेत् ।
[8][सर्वदुःखविनिर्मुक्तः साध्यानां लोकमाप्नुयात्[9] ॥३५॥
धनापहारभीतस्य त्राणं कृत्वा नरोत्तमः ।
[10]दानपुण्यमवाप्नोति लोकं धानदमेव च ॥३६॥

---

1 Corrected from V. D. I. O. रक्षप्राप्तवियोजनं, A रक्षयात्तविजाजनं

2 A कस्य च

3 A गन्धर्वं ध्रुवमाप्नोति यत्र यत्राभिजायते for the bracketed portion

4 A विपद्यते

5 A °निन्दित:

6 A कल्पादिसत-कृतवातथा for the bracketed portion

7 A भीतस्तु

8 A omits the bracketed portion

9 I. O. reads the present line and the preceding one twice

10 The present line and the following one are not found in V. D.

अवमानाच्च भीतस्य त्राणं कृत्वा नरोत्तमः ।
स्वर्गलोकमवाप्नोति पूजां देवगणात्तथा ॥३७॥
नरः कृतपरित्राणः पुण्यं किञ्चिद् यदाचरेत् ।]
[1]भागी तस्य [2]परित्राता नरः पुण्यस्य कर्मणः ॥३८॥
पशूनाञ्च मृगाणाञ्च पक्षिणाञ्च तथा द्विजाः ।
तृणद्रुमलतानाञ्च त्राणाद्भवति नाकभाक् ॥३९॥
बधकस्य गतं हस्ते [पशुं क्रीत्वा][3] नरोत्तमः ।
नाकलोकमवाप्नोति सुखी सर्वत्र जायते ॥४०॥
यावन्ति [4]पशुरोमाणि तावद्वर्षाणि मानवः ।
स्वर्गलोकमवाप्नोति यस्य त्राणं[5] करोत्यसौ ॥४१॥
अपि कीटपतङ्गस्य त्राणात् स्वर्गमुपाश्नुते[6] ।
बहून्यब्दसहस्राणि नात्र कार्या विचारणा ॥४२॥
चौरग्रस्तं [7][नृपग्रस्तं रिपुग्रस्तं] विमोक्षयेत् ।
[8]व्यालग्रस्तं तथा विप्राः सोऽश्वमेधफलं लभेत् ॥४३॥
विषमे तु तथा दुर्गे [9]सलिले वा हुताशने ।
निमग्नं यः परित्रायेत् सोऽश्वमेधफलं लभेत् ॥४४॥

सुव्यक्त एवायं ग्रन्थः । [10]सर्वथाऽविहितप्राणिवधो न कर्तव्यः । परेभ्यो वध-वन्धन-ताडन-[11]विवासनाङ्गच्छेदन-[12]धनापहारावमानादिभीताः प्रथमं [13]वाचा [14]समाश्वस्य यथाशक्ति

---

1 I. O. भावी
2 A त्राता
3 I. O. गच्छं क्रत्वा for the b. p.
4 A पशुलोमानि
5 I. O. त्राणौ
6 A स्वर्गमुपस्थितं
7 A नृपगच्छं विप्रग्रस्तं for the bracketed portion
8 I. O. व्यालग्रस्तं
9 A सलि
10 A सर्व्वथाविहित:, I. O. सर्व्वथा-विहित०
11 A विवासाङ्गच्छेदन
12 A धनापहारवादिभीता
13 A वा
14 I. O. समाश्वास्य

[1]तत्तदुल्कापद्भ्यो रक्षणीयाः। [2]पशुपक्ष्यादयश्च वधहस्तगताः क्रीत्वा मोचनीयाः। तस्मान्नेदं दानमनुष्ठानमात्रम्[3]। ततश्च सर्वदैवत्यमभयं महाभ्युदयहेतुरिति[4] बुद्धिस्थीकृत्याभयं दातव्यम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरेऽभयदानावर्तः।

---

1 I. O. तत्तद्दुर्गापद्भ्यो
2 I. O. and A पशुपक्ष्यादयश्च
3 A ०दानं मनुष्याणां मात्रमिदं
4 A ०हस्ताविति

[1][अथ वारदानावर्तः। (६१)

यमः :—]

आदित्यवारे विप्राय सहिरण्यं सदैव तु।

यः [2]प्रयच्छत्यपूपन्तु तस्य तुष्यति वै [3]यमः ॥१॥

अत्र यजमानो ब्राह्मणायार्चिताय[4] सुवर्णसहितमपूपमर्चितं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं यमोक्तापूपदानफलप्राप्तिकामोऽहमेतं [5]सहिरण्यमपूपं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वाऽपूपोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वाऽपूपं स्पृशेत्। अत्र सदेति पदश्रवणाद् यथेच्छमावृत्त्या[6] दानम्।

विष्णुधर्मोत्तरे व्याधिनाशकदानानुवृत्तौ :—

[7]शरीररोगनाशाय सततं [8]सूर्यवासरे।

गुडाज्यलवणोपेतं सहिरण्यं द्विजातये ॥२॥

दद्यादपूपं [9][धर्मेण प्रीणयेच्च] दिवाकरम्।

आरोग्यमेतेनाप्नोति कामं वा [10]मनसेप्सितम् ॥३॥

ब्राह्मणायार्चिताय गुडघृतलवणसुवर्णसहितमपूपमर्चितम ॐ अद्यादि तुभ्यमन्त[11]-मुक्त्वा दद्यात्। अमुककामोऽहमेतं गुडाज्यलवणहिरण्य[12]-सहितमपूपं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अत्र सततमिति श्रवणाद् यथेच्छमावृत्त्या दानम्।

तथा (३।३१७।१६) :—

लवणाज्यगुडोपेतमपूपं सूर्यवासरे।

सहिरण्यं नरो दत्त्वा न रोगैस्त्वभिभूयते[13] ॥४॥

---

1 A omits the bracketed portion, I. O. तथा for अथ
2 I. O. प्रयच्छेत्यपूपन्तु
3 I. O. यम:
4 A अर्चिताय ब्राह्मणाय
5 A हिरण्यं
6 A ०वृत्य, I. O. ०वृत्तौ
7 I. O. शारीरारोगस्तु नाशाय
8 A सूर्यवत्सरे
9 A धर्मञ्च प्रणमेच for the bracketed portion
10 I. O. मनसे प्सितं
11 I. O. मन्त twice
12 I. O. omits हिरण्य
13 A रोगैरभिभूयते

सूर्यवारे ब्राह्मणायार्चिताय [1]लवणाज्यगुडसुवर्णयुक्तमपूपमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। रोगानभिभवप्राप्तिकामोऽहमेतं लवणाज्यगुडहिरण्यसहितमपूपं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[2]तथा (३।३१८।१७क) :—

एवंविधं चेन्दुदिने दत्त्वा सौभाग्यमाप्नुयात् ॥५॥

एवंविधं पूर्वोक्तमपूपम्। अत्र दानवाक्ये सौभाग्यप्राप्तिकामोऽहमिति विशेषः। अपरं समानम्।

तथा :—

सर्वतो दिवसे चान्द्रे स्नानमभ्यङ्गपूर्वकम्।
यः प्रयच्छति विप्राय सोऽपि रोगैर्विमुच्यते ॥६॥

विद्यातपःशालिने ब्राह्मणायार्चि-[तायाभ्यङ्गार्थं तैलं स्नानार्थं माषचूर्णादिकं चार्चितम्][3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। रोगविमुक्तिकामोऽहमेतदभ्यङ्गसहितं स्नानं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते[4] स्नानमिदं विष्णुदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। अत्र सर्वत[5] इति पदश्रवणाद् यथेच्छमावृत्त्या[6] दानम्।

तथा (३।३१८।१७ख) :—

[7]काष्ठदानाद् भौमदिने शत्रुनाशमवाप्नुयात् ॥७॥

अत्र शत्रुनाशप्राप्तिकामोऽहमेतानि काष्ठानीति दानवाक्ये काष्ठानीमानि विष्णुदैवतानीति प्रतिग्रहीतृवचने च[8] विशेषः। सर्वमपरं तुल्यम्।

तथा (३।३१८।१८क) :—

बौधे क्रीडनकानाञ्च दानं बाले प्रशस्यते ॥८॥

क्रीडनकानां बालक्रीडोचितकन्दुकादीनाम्। अत्र बहुभ्यो दानम्। दानवाक्ये ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं बुधवारविहित-क्रीडनकदानफलप्राप्तिकामोऽहमेतानि क्रीडनकानि प्रतिग्रहीतृवचने क्रीडनकान्येतानि विष्णुदैवतानि दक्षिणावाक्ये च सम्प्रदानबहुत्वं विशेषः। अपरं तुल्यम्[9]।

---

1 I.O. लवणाद्यघृत and A लवणगुडघृतं for लवणाज्यगुड
2 A omits तथा
3 A तमभ्यङ्गतैलस्नानं माषपूर्णादिकं चर्चितं for the bracketed portion
4 A स्वस्तीत्युक्त्वा सावित्रीपाठानन्तरं
5 I. O. सर्वत्र
6 I. O. and A °वृत्त
7 A काष्ठदानात, I. O. काष्ठदाना
8 A omits च
9 A प्रथमदानसमानं

तथा (३।३१७।१८ख) :—

जीवाह्नि वस्त्रदानेन परां पुष्टिमुपाश्नुते[1] ॥९॥

अत्र दानवाक्ये परमपुष्टिप्राप्तिकामोऽहमेतद्वस्त्रं प्रतिग्रहीतृवाक्ये वस्त्रमिदं बृहस्पतिदैवतमिति वस्त्रस्य दशाग्रहणपूर्वकं परिधानं स्वीकरणमिति विशेषः। [2]अपरं प्रथमदानतुल्यम्।

तथा (३।३१७।१९क) :—

सर्वत्र रतिमाप्नोति [3]शुक्रे दत्त्वा रतिं स्त्रियः[4] ॥१०॥

रतिं स्त्रियः[5] इति स्त्रीरत्युचितसुगन्धिताम्बूलवस्त्रादि। अत्र दानवाक्ये सर्वतोरतिप्राप्तिकामोऽहमेतानि रत्युचितद्रव्याणि [प्रतिग्रहीतृवाक्ये च रत्युचितद्रव्याणि][6] एतानि विष्णुदैवतानि इति विशेषः। अपरं प्रथमदानवत्।

तथा (३।३१७।१९ख) :—

अभ्यङ्गं[7] सौरिदिवसे दत्त्वा जीवितमाप्नुयात् ॥११॥

अभ्यङ्गमभ्यङ्गार्थं [तैलं घृतादि][8]। अत्र दानवाक्ये दीर्घायुःप्राप्तिकामोऽहमेतमभ्यङ्गं[9] प्रतिग्रहीतृवाक्ये अभ्यङ्गोऽयं विष्णुदैवत इति[10] विशेषः।

तथा :—

शनैश्चरदिने दत्त्वा तैलं विप्रेषु शक्तितः।

नित्यमेव महाभाग रोगनाशमवाप्नुयात् ॥१२॥

यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तैलमर्चितम् ॐ अद्यादि [11]युष्मभ्यमन्तमुक्त्वा दद्यात्। रोगनाशप्राप्तिकामोऽहमेतत्तैलं ददानि। प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तैलमिदं विष्णुदैवतमिति वदेयुः। कामस्तुत्यादि पूर्ववत्। अत्र नित्यमिति पद[12]-श्रवणाद् यथेच्छमावृत्त्या[13] दानम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [14]वारदानावर्तः।

---

1 I. O. पुष्टिमुपश्नुते, A पृष्टिमुपाप्नुते
2 I. O. अयनं
3 A शुक्रे
4 A स्त्रिया:
5 A स्त्रिया
6 A omits the bracketed protion
7 I. O. अङ्ग
8 A घृततैलादि for the b. p.
9 A ॰मेतदभ्यङ्गं
10 I. O. विष्णुदैवतमिति
11 A तुभ्य॰
12 A and I. O. omit पद
13 A ॰वृत्त
14 A omits वार

अथ नानादैवत-मासोप-[लक्षित-नियतदिनदानावर्तः][1] । (६२)

वामनपुराणे (६४।२३ख-२४क) :—

माघे मासि तिलाः शस्तास्तिलधेनुश्च दानव ।
[इध्मेन्धनादयश्चान्ये माधवप्रीणनाय तु][2] ॥१॥

[3]इध्मं होमोपयोगि दारु । इन्धनमग्निज्वलनोचितम् । आदिशब्देन शीतहरतैलतूल-पटीकम्बलाः[4] परिगृहीताः । अत्र [5]माघमासिकयथेष्टदिने यजमानोऽर्चिताय ब्राह्मणायार्चितान्[6] तिलान् दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुक[7]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं माधवप्रीतये एतांस्तिलान् ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा तिला एते प्रजापतिदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा तिलमुष्टिं[8] गृह्णीयात् । तिलधेनुर्धेनुदानावर्तस्थ[9]-मत्स्यपुराणोक्त-तिलधेनुदानविधिना[10] देया । अत्र कामनायां माधवप्रीतय इति विशेषः । इध्मादिदाने तु वाक्ये तिलपदस्थाने इध्मादीना-मन्यतमपदस्य [निवेशो विशेषः][11] । एतानि विष्णुदैवतानीन्धनानि एष बृहस्पतिदैवतः कम्बलः एषा[12] बृहस्पतिदैवता तूलपटी एतद्विष्णुदैवतं तैलमिति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीता ब्रूयात् । कामस्तुत्यादि पूर्ववत् । धेनोः पुच्छग्रहणमिध्मेन्धनयोः स्पर्शः कम्बलतूलपट्योर्दशाग्रहणपूर्वकं परिधानं [13]तैलस्य स्पर्शनञ्च स्वीकारः । एतानि चैकैकदिने प्रत्येकमेकैकस्मै[14] देयानि । एकस्मिन्नेव वा दिने प्रतिद्रव्यं वाक्यं कृत्वा बहुभ्यो दद्यात् । एकैकस्मै वा समुदितानि । तत्र च दानवाक्ये एतांस्तिलान् एतां तिलधेनु-मेतानीध्मानि एतानीन्धनानि एतं कम्बलमेतां तूलपटीमेतत्तैलमिति निवेशो विशेषः[15] ।

---

1 A रक्षितनियतदानावर्तः for the bracketed portion
2 Vāmana P. reads the b. p. as इन्धनानि च देयानि माधवः प्रीयतामिति
3 A इध्म होमोपयोगी
4 A क for कम्बलाः
5 A omits माघ
6 A ब्राह्मणाय
7 A omits वेदामुक
8 A तिलानमुष्टीं
9 A तिलधनुदानावर्त्तेषु for तिल... वर्तस्थ
10 I. O. विटपा for विधिना
11 A निवेषः for the bracketed portion
12 A एष
13 I. O. तैलस्पर्शनञ्च
14 A ०कस्मिन
15 A adds विशी before विशेषः

प्रतिग्रहीतृवाक्यं पूर्ववत्। एवं वक्ष्यमाणमासोप-[1]लक्षितेषु मुद्गादिदानेष्वपि बोद्धव्यम्। [2]अशक्त उक्तानामेकमपि दद्यात्।

तथा (६५।२४ख-२५क) :—

फाल्गुने व्रीहयो मुद्गा[3] वस्त्रं कृष्णाजिनादिकम्।
गोविन्दप्रीणनार्थाय[4] दातव्यं पुरुषर्षभ[5] ॥२॥

आदिशब्देन कृष्णेतरमृगचर्मग्रहणम्। फाल्गुनमासिकाभीष्ट[6]-दिने अर्चिताय ब्राह्मणायार्चितानि षष्टिकादिधान्यानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गोविन्दप्रीतये एतान् व्रीहीन् ददानि। [स्वस्तिसावित्रीपाठान्ते व्रीहय एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्][7]। कामस्तुत्यादि पूर्ववत्।

[8]व्रीहीणां [मुष्टिग्रहणञ्च स्वीकारः। मुद्गादिदानवाक्ये व्रीहिपदस्थाने मुद्गादीनामन्यतम-पदस्य निवेशो विशेषः। एते प्रजापतिदैवता मुद्गा एतद् बृहस्पतिदैवतं वस्त्रमेतत् प्रजापति-दैवतं कृष्णाजिनमेतद्विष्णुदैवतं मृगाजिनमिति [9]स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्][10]।

मुद्गानां मुष्टिग्रहणं वस्त्रस्य दशाग्रहणपूर्वकं परिधानं शेषयोः पुच्छग्रहणं स्वीकरणम्।

तथा (६५।२५ख-२६क) :—

चैत्रे [11]चित्राणि वस्त्राणि शयनान्यासनानि च।
विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ[12] ॥३॥

ब्राह्मणेष्विति बहुवचनं देयबहुत्वापेक्षम्। चैत्राभीष्टदिने अर्चिताय ब्राह्मणायार्चितानि [13]विचित्रवस्त्राणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुप्रीतये एतानि विचित्र-वस्त्राणि ददानि। [14]स्वस्तिसावित्रीपाठान्ते वस्त्राण्येतानि बृहस्पतिदैवतानि इति

---

1 A °लक्षितो मुद्गादि°, I. O. °लक्षितेष्वेकादशसु
2 A अशक्तानामेकमपि देयं
3 A स्वङ्, I. O. मद्गा, Vāmana P. वस्त्रं तथा for मुद्गा वस्त्रं
4 A °प्रीणनयैव, Vāmana P. °प्रीणनार्थं च
5 Vāmana P. पुरुषर्षभैः
6 A omits ष्ट
7 I. O. स्वस्तिसावित्रीपाठान्त प्रतिग्रहीतृवाक्यं for the bracketed portion
8 Supplied by conjecture
9 A omits स्वस्ति
10 I. O. omits the bracketed portion
11 Vāmana P. विचित्र
12 Vāmana P. ब्राह्मणेषु च
13 I. O. चित्र°
14 A स्वस्त्यादि for स्वस्ति

प्रतिग्रहीतृवाक्यम्[1]। कामस्तुल्यादि पूर्ववत्। [दशाग्रहणपूर्वकं परिधानञ्च स्वीकारः। शयनादिदानवाक्ये [2]विचित्रवस्त्रपदस्थाने [3]शयनासनयोरन्यतरपदस्य निवेशो विशेषः। एतानि प्रजापतिदैवतानि शयनानि स्वस्तिसावित्रीपाठानन्तरं प्रतिग्रहीतृवाक्यम्[4]। कामस्तुल्यादि पूर्ववत्।][5] शयनासनयोः[6] स्पर्शः स्वीकारः।

तथा (६५।२६ख-२७क) :—

[गन्धानि माल्यानि [7]तथा][8] वैशाखे सुरभीनि च।

देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥४॥

द्विजमुख्येभ्यो [9]विद्यातपःसम्पन्नेभ्यः। [10]वैशाखाभीष्टदिने ब्राह्मणेभ्योऽर्चितेभ्यश्चन्दना-गुरुकुङ्कुम-[11][कर्पूरकस्तूरिका]-काकलीयकानामन्यतममर्चितं दद्यात्। ॐ अद्यामुकामुकस-गोत्रेभ्योऽमुकामुकवेदामुकामुक[12]-शाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो[13] युष्मभ्यं मधुसूदन-तुष्टये एतान् गन्धान् ददानि। स्वस्तिसावित्रीपाठान्ते गन्धा एते गन्धर्वदैवता इति प्रति-ग्रहीतृवाक्यम्[14]। कामस्तुल्यादि पूर्ववत्। स्पर्शश्च स्वीकारः। माल्यदाने गन्धपदस्थाने एतानि माल्यानीति निवेशो विशेषः। स्वस्तिसावित्रीपाठान्ते एतानि माल्यानि विष्णुदैवता-नीति प्रतिग्रहीतृवाक्यम्[15]। कामस्तुल्यादि पूर्ववत्। स्पर्शश्च स्वीकारः।

तथा (६५।२७ख-ग)

[[16]उदकुम्भश्च [17]धेनुश्च][18]तालवृन्तं सचन्दनम्।

त्रिविक्रमस्य प्रीत्यर्थं दातव्यं साधुभिः सदा ॥५॥

सदेति [संवत्सरापेक्षं प्रति][19]-संवत्सरं जैष्ठे देयमित्यर्थः। अत्र वैशाखानन्तरोक्तत्वात्ति-

---

1 I. O. ०वाच्यं

2 I. O. चित्र०

3 I. O. शयनाशनयो०

4 I. O. ०वाच्यं

5 A omits the bracketed portion

6 A शयनाशनयो

7 A omits तथा

8 Vāmana P. गन्धयाणीमि वस्तूनि for the b. p.

9 A विद्यते for विद्या

10 I. O. वैशाखीभीष्टदिने

11 A कर्पूर and I. O. कस्तूरिका for the bracketed portion

12 A वेदामुक for वेदामुकामुक

13 A ०मुकदेवशर्मभ्यो, I. O. ०मुका-मुकशर्मभ्यो

14 I. O ०वाच्यं, A प्रतिग्रहीवाक्यं

15 I. O. ०वाच्यं

16 A उदककुम्भाश्च

17 A and I. O. धेनुश्च

18 Vāmana P. उदकुम्भाटाधेनुं च for the b. p.

19 I. O. omits the bracketed portion

विक्रमनामकत्वाच्चानुकल्पैरग्रहणम् । अर्चिताय ब्राह्मणायार्चितानुदकुम्भान्[1] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [2]त्रिविक्रमप्रीत्यर्थमेतानुदकुम्भान्[3] ददानि । स्वस्तिसावित्रीपाठान्ते [उदकुम्भा एते वरुणदैवता इति][4] प्रतिग्रहीतृवाक्यम्[5] । कामस्तुल्यादि पूर्ववत् । स्पर्शनञ्च स्वीकारः । इतरदानवाक्ये [6]उदकुम्भपदस्थाने धेनु-सचन्दनतालवृन्तपदयोरन्यतरस्य निवेशो विशेषः । एषा रुद्रदैवता धेनुः एतद्विष्णुदैवतं सचन्दनं तालवृन्तमिति प्रतिगृहीतृवाक्यम्[7] । कामस्तुल्यादि पूर्ववत् । पुच्छग्रहणं स्पर्शनञ्च यथाक्रमं स्वीकारः ।

तथा (६५।३८) :—

उपानद्युगलं छत्रं [8][नवकम्बलकानि च] ।
आषाढे वामनप्रीत्यै दातव्यानि [9][तु भक्तितः] ॥६॥

नवकम्बलकानि तु[10] नूतनकम्बलाः । [11]आषाढाभीष्टदिने ब्राह्मणायार्चिताय उपानद्युगलमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वामन-[प्रीत्यै एतदुपानद्युगलं ददानि । स्वस्तिसावित्रीपाठान्ते उपानद्युगलमिदमुत्तानाङ्गिरोदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । आरोहणञ्च स्वीकारः । छत्रादिदानवाक्ये उपानद्युगलपदस्थाने छत्र-नवकम्बलपदयोरन्यतरस्य निवेशो विशेषः । एतत् प्रजापति][12]-दैवतं छत्रमेते बृहस्पतिदैवता [13]नवकम्बला इति प्रतिग्रहीतृवाक्यम्[14] । कामस्तुल्यादिकञ्च पूर्ववत् । दण्डग्रहणं [15]दशाग्रहणपूर्वकाङ्गस्पर्शनञ्च यथाक्रमं[16] स्वीकारः ।

तथा :—

घृतञ्च क्षीरकुम्भाश्च घृतधेनुः फलानि च ।
श्रावणे श्रीधरप्रीत्यै दातव्यानि विपश्चितैः[17] ॥७॥

---

1 A ०दककुम्भान्
2 A त्रिविक्रमस्य for त्रिविक्रम
3 A ०दककुम्भान्
4 A वरुणदैवत इति for the bracketed portion
5 I. O. ०वाक्यं
6 A उदककुम्भ०
7 I. O. ०वाक्यं
8 Vāmana P. लवणामलकादिकम् for the b. p.
9 Vāmana P. विपश्चिता for the b. p.
10 I. O. omits तु
11 A आषाढेभीष्टदिने
12 A omits the bracketed portion
13 A कम्बला
14 I. O. ०वाक्यं
15 A दशाग्रहणं पूर्ववदङ्गस्पर्शनञ्च
16 I. O. omits it
17 I. O. विनिश्चितैः

[1]श्रावणाभीष्टदिने अर्चिताय ब्राह्मणायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । श्रीधरप्रीत्यै एतद्घृतं ददानि । स्वस्तिसाविव्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्[2] । कामस्तुत्यादि पूर्ववत् । स्पर्शनञ्च स्वीकारः । [3]अपरदानवाक्ये घृतपदस्थाने क्षीरकुम्भादिपदाना[4]-मन्यतमस्य [5]निवेशो विशेषः । एते विष्णुदैवताः क्षीरकुम्भाः एषा विष्णुदैवता घृतधेनुः एतानि[6] वनस्पतिदैवतानि फलानि इति प्रतिग्रहीतृवाक्यम्[7] । कामस्तुत्यादि पूर्ववत् । [स्पर्शनं पुच्छग्रहणं स्पर्शनञ्च यथाक्रमं][8] स्वीकारः । घृतधेनुदानं मत्स्यपुराणोक्तविधिना ।

तथा (६५।३६) :—

मासि भाद्रपदे दद्यात् पायसं मधुसर्पिषा[9] ।
हृषीकेशप्रीणनार्थं लवणं [10]सगुडौदनम् ॥८॥

[11]भाद्रपदाभिमतदिने ब्राह्मणायार्चिताय घृतमधुयुक्तं पायसमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । हृषीकेशप्रीणनार्थमेतत्सर्पिर्मधुसहितं पायसं ददानि । स्वस्तिसाविव्रीपाठान्ते [12]पायसमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[13] । कामस्तुत्यादि पूर्ववत् । [स्पर्शनञ्च स्वीकारः ।][14] [15]सगुडौदनलवणदानवाक्ये [16]एतत् गुडौदनसहितलवण-[मिति व्यूहनीयम्][17] । स्वस्तिसाविव्रीपाठानन्तरं लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम्[18] । [19][पूर्ववत् कामस्तुत्यादिकम्] । [20]स्पर्शनञ्च स्वीकारः ।

---

1 A श्रावणाभीष्टद्दिने
2 I. O. ०वाच्यं
3 A क्षीर for अपर
4 I. O. दानानाम् for पदानाम्
5 A निवेशन
6 A एता
7 I. O. ०वाच्यं
8 I. O. स्पर्शनपुच्छग्रहणं for the bracketed portion
9 Vāmana P. ०सर्पिषौ
10 A सगुडोदनम्
11 I. O. भाद्रपदायभिमतद्दिने, A भाद्रपदान्यतमद्दिने
12 I. O. पायसं प्रजा...मिति, A पायसोऽयं प्रजापतिदैवत इति
13 I. O. ०वाच्यं
14 A omits the bracketed portion
15 A सगुडोदन०
16 I. O. एतत् सगुडोदन०, A सगुडोदनसहितं
17 A मित्यूहनीयं for the b. p.
18 I. O. ०वाच्यं
19 A कामस्तुत्यादि पूर्ववत् for the bracketed portion
20 A पूर्ववत् before स्पर्शनञ्च

तथा (६५।४०) :—

> [1]तिलांस्तुरङ्गं वृषभं दधिताम्रायसादिकम् ।
> प्रीत्यर्थं पद्मनाभस्य [देयमाश्वयुजे नरैः][2] ॥९॥

आदिशब्देन पित्तलकांस्ययोर्ग्रहणम् । आश्विनाभिमतदिने ब्राह्मणायार्चिताय तिलानर्चितान् ॐ अद्यादि तुभ्यमहंसम्प्रददे इत्युक्त्वा दद्यात् । पद्मनाभप्रीत्यर्थमेतांस्तिलान् ददानि । स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्[3] । कामस्तुतिर्दक्षिणा च पूर्ववत् । [4]मुष्टिग्रहणञ्च स्वीकारः । अपरदानवाक्ये तिलपदस्थाने तेषामन्यतमपदस्य [5][निवेशो विशेषः] । एष यमदैवतस्तुरङ्गः एष विष्णुदैवतो वृषभः एतद्विष्णुदैवतं [दधि एतदग्निदैवतं][6] ताम्रं अयः पित्तलं[7] कांस्यं वेति स्वस्तिसावित्रीपाठान्ते[8] यथायथं [9]प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । अश्वस्य [10]कर्णग्रहणं [11]वृषभस्य [12]पुच्छग्रहणं स्पर्शन-[13]ञ्चेतरद्रव्याणां स्वीकारः ।

तथा (६५।४१) :—

> रजतं कनकं [14]दीपं मणिमुक्ताफलादिकम् ।
> दामोदरस्य प्रत्यर्थं दद्याद्वै[15] कार्त्तिके नरः ॥१०॥

आदिशब्देन प्रवालराजपट्टयोर्ग्रहणम् । कार्त्तिकाभिमतदिने ब्राह्मणायार्चिताय रजतमर्चितम् ॐ अद्यादि तुभ्यमहंसम्प्रददे इत्युक्त्वा दद्यात् । दामोदरप्रीत्यर्थमेतद्रजतं[16] ददानि । स्वस्तिसावित्रीपाठान्ते [17]रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

---

1 Vāmana P. नीलं तुरङ्गं
2 Corrected from Vāmana P. I. O. देयान्यश्वमनोजवैः and A देयाश्विनदिने नरै; for the bracketed portion
3 I. O. ०वाक्यं
4 A मुष्टिग्रहणं
5 A निवेश: for the bracketed portion
6 A omits the bracketed portion
7 A पित्तले
8 I. O. स्वस्तिसावित्रीपाठान्तं, A स्वस्तिसावित्रीपाठे तु
9 I. O. ०वाक्यं
10 A कर्णं ग्रहणं
11 I. O. वृषस्य
12 A पुच्छे ग्रहणं
13 A ०ञ्चेति०
14 A दीप, I. O. दीपा, Vāmana P. दीपान्
15 A दद्यात्, Vāmana P. प्रदद्यात्
16 A ०द्रतं
17 I. O. रजतमिति अग्नि०

स्पर्शनञ्च स्वीकारः। अपरदानवाक्ये रजतपदस्थाने तेषामन्यतमपदस्य निवेशो विशेषः। [एतदग्निदैवतं कनकमेते विष्णुदैवता[1] दीपा एतद्विष्णुदैवतं [2]मुक्ताफलमेष विष्णुदैवतो राजपट्ट एतद्विष्णुदैवतं प्रवालमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। सर्वेषां स्पर्शनं स्वीकारः।

तथा (६५।४२) :—

खरोष्ट्राश्वतरान्नागान्शकटाद्यमजाविकम्[3]।
दातव्यं केशवप्रीत्यै मासि मार्गशिरे[4] नरैः ॥११॥

खरो गर्दभः अश्वतरोऽइति प्रसिद्धः। मार्गशीर्षेऽभिमतदिने ब्राह्मणायार्चिताय खरमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। केशवप्रीत्यै एतं खरं ददानि। स्वस्तिसावित्रीपाठान्ते खर एष यमदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। कर्णग्रहणं स्वीकारः। अपरदानवाक्ये खरपदस्थाने तेषामन्यतमपदस्य निवेशो विशेषः।][5] एष निर्ऋतिदैवत उष्ट्रः एष विष्णुदैवतोऽश्वतरः एष प्रजापतिदैवतो गज एष उत्तानाङ्गिरोदैवतः शकटः एषप्रजापतिदैवतो रथः[6] एषोऽग्निदैवतोऽजः एष वरुणदैवतोऽ[7]विरिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। उष्ट्रारोहणम् अश्वतरपुच्छग्रहणं गजारोहणं[8] शकटारोहणं रथस्येशाग्रहणम् अजस्य कर्णग्रहणमवेः[9] पुच्छग्रहणं स्वीकारः।

तथा (६५।४३) :—

प्रासादनगरादीनि गृहप्रावरणादिकम्।
[10]नारायणस्य तुष्ट्यर्थं पौषे देयानि [11]शक्तितः ॥१२॥

प्रथमेनादिशब्देन [12]ग्रामखर्वटयोर्ग्रहणम्। द्वितीयेन शय्यायाः प्रावरणमुत्तरीयवस्त्रम्। पौषाभीष्टदिने[13] ब्राह्मणायार्चिताय प्रासादमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नारायणतुष्ट्यर्थमेतं[14] प्रासादं ददानि। स्वस्तिसावित्रीपाठान्ते प्रासादोऽयं विष्णुदैवत

1 A विष्णुदैवतं
2 A मुक्ताफल
3 The entire line corrected from Vāmana P. I. O. and A have lacunæ here
4 Corrected from Vāmana P. I. O. and A ०शीर्षे
5 I. O. omits the bracketed portion
6 A वृषभः
7 I. O. अरिरिति
8 A omits it
9 I. O. ०ग्रहणं हरे
10 Vāmana P. वामनस्य च
11 Vāmana P. भक्तितः
12 I. O. ग्रामकर्कटयोर्ग्रहणं, A ग्रामकर्वटग्रहणं
13 A पौषाभीदिने
14 A तुष्ट्यर्थं again after this

इति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । प्रवेशश्च स्वीकारः । अपरदानवाक्ये प्रासादपद[1]-स्थाने [2]तेषामन्यतमपदस्य निवेशो विशेषः । [एतद्विष्णुदैवतं नगरम्][3] एष विष्णुदैवतो ग्रामः एष विष्णुदेवतः खर्वटः[4] एतद्विष्णुदैवतं गृहम् [5]एतद्बृहस्पतिदैवतं प्रावरणम् [6]एषा प्रजापतिदैवता शय्येति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । नगरग्रामखर्वटानां[7] [8]प्रदक्षिणकरणं गृहस्य प्रवेशो वस्त्रस्य दशाग्रहणपूर्वकं परिधानं [शय्यायाः स्पर्शनं स्वीकरणम्][9] ।

महाभारते (अनु—६६।८) :—

माघे मासि तिलान् यस्तु ब्राह्मणेभ्यः प्रयच्छति ।
सर्वसत्त्व[10]-समाकीर्णं नरकं स न पश्यति[11] ॥१३॥

[12]माघे मास्यभिमतदिने ब्राह्मणेभ्योऽर्चितांस्तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-माघमासिकतिलदानफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्वोक्ततिलदानवत् ।

तथा (अनु—६६।६२) :—

कौमुदे शुक्लपक्षे तु योऽन्नदानं करोति हि ।
स सन्तरति दुर्गाणि [13]प्रेत्य चानन्त्यमश्नुते ॥१४॥

कौमुदे कार्तिके कार्तिकाभिमतशुक्लतिथौ अन्नमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-कौमुदविहितान्नदानफलप्राप्तिकामोऽहमेतदन्नं ददानि । स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । [14]स्पर्शश्च स्वीकारः ।

पद्मपुराणे :—

रसधेनुं तथा दत्त्वा कार्तिके मासि पार्थिव ।
सर्वान् कामानवाप्नोति नित्यं सुगतिभाग् भवेत् ॥१५॥

---

1 I. O. omits पद
2 A प्रासादमन्यतरपदस्य
3 A omits the bracketed portion
4 I. O. खर्व्वटः, A घकटः
5 A एतद्विष्णुदैवतं
6 A एष प्रजापतिदैवत०
7 I. O. ०कर्व्वटानां, A ०कवटानां
8 I. O. पदक्षिण०
9 A शय्यास्पर्शनं स्वीकारः for the bracketed portion
10 I. O. and A ०सत्व
11 A गच्छति
12 A माघ
13 A लोकसानन्त्य०
14 A स्पर्शनञ्च

[1]पार्थिवेति सम्बोधनम्। तथा दत्त्वेति पद्मपुराणोक्तरसधेनुपरिग्रहः। [2]कार्तिकमासिकाभिमतदिने धेनुदानविधिना[3] रसधेनुं दद्यात् मत्स्यपुराणपद्मपुराणयोर्विधानसाम्यात्। दानवाक्ये तु कामनायाममुककामोऽहमिति विशेषः।

विष्णुधर्मोत्तरे (३।३१७।६ख) :—

तिलप्रदानान्माघे तु याम्यं लोकं न गच्छति।

[4]माघमासिकाभीष्टदिने [5]ब्राह्मणायार्चिताय तिलानर्चितान् ॐ अद्यादि तुभ्यमहं सम्प्रददे दद्यात्। यमलोकानुपसर्पणप्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणञ्च स्वीकारः।

तथा (३।३१७।१०क) :—

प्रियङ्गुं [6]फाल्गुने दत्त्वा प्रियो भवति भूतले ॥१६॥

[प्रियङ्गुः काउनीति][7]। [8]फाल्गुनमासिकाभिमतदिने अर्चिताय ब्राह्मणायार्चितां प्रियङ्गुम् ॐ अद्यादि तुभ्यमहं सम्प्रददे दद्यात्। विष्णुधर्मोत्तरोक्तफाल्गुनविहितप्रियङ्गुदानफलप्राप्तिकामोऽहमेतां प्रियङ्गुं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१७।१०ख) :—

चैत्रे चित्राणि वस्त्राणि [सौभाग्यं महदश्नुते][9]।

दत्त्वेति सम्बन्धः। चैत्रमासिकाभिमतदिने अर्चिताय ब्राह्मणायार्चितानि [10]विचित्रवस्त्राणि ॐ [अद्यादि तुभ्यमहं सम्प्रददे दद्यात्][11]। महासौभाग्य-[12]प्राप्तिकामोऽहमेतानि [13]विचित्रवस्त्राणि ददानि। स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानि बृहस्पतिदैवतानि इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकपरिधान[14] स्वीकारः।

तथा (३।३१७।११क) :—

अपूपानां प्रदानेन वैशाखे स्वर्गमश्नुते ॥१७॥

---

1 A प्राथिवेति
2 I. O. कार्त्तिके०
3 I. O. धेनुदानविधया
4 A माघे०
5 A ब्राह्मणायार्चिताय तिलान्
6 I. O. भाल्गुने
7 A कामानां for the bracketed portion
8 A फाल्गुने मासिकाभिमतं दिने
9 A सौभाग्यमवाप्नुते for the bracketed portion
10 I. O. चित्र०
11 A स्वस्त्यादिस्वीकारान्तं पूर्ववत् for bracketed portion
12 A ०फलप्राप्तिकामो
13 I. O. omits विचित्र
14 I. O. ०पूर्वकं परिधानं

अपूपा पूया[1] इति प्रसिद्धाः । [2]वैशाखमासिकाभीष्टदिने [3]ब्राह्मणायार्चितायापूपानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गप्राप्तिकामोऽहमेतानपूपान् ददानि । स्वस्तिसावित्रीपाठान्ते अपूपा एते प्रजापतिदेवता इति[4] प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । स्पर्शनञ्च स्वीकारः ।

तथा (३।३१७।११ख) :—

छत्रदानात्तथा ज्यैष्ठे सर्वकामानुपाश्नुते[5] ।

[6]ज्यैष्ठमासिकाभीष्टदिने [ब्राह्मणायार्चिताय छत्रमर्चितम्][7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [8]अमुकप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्तिसावित्रीपाठान्ते छत्रमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । दण्डग्रहणञ्च स्वीकारः ।

तथा (३।३१७।११ग) :—

दत्त्वा चोपानहौ [9]स्वर्गमाषाढे ध्रुवमश्नुते ॥१८॥

आषाढमासिकाभिमतदिने ब्राह्मणायार्चितायार्चिते उपानहौ[10] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [विष्णुधर्मोत्तरोक्ताषाढविहितोपान-][11]द्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि । स्वस्तिसावित्रीपाठान्ते उपानहावेत उत्तानाङ्गिरोदैवत इति[12] प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । आरोहण[13] स्वीकारः ।

तथा (३।३१७।१२क) :—

श्रावणे वस्त्रदानस्य कीर्तितं सुमहत् फलम् ।

[14]श्रावणमासिकाभिमतदिने [15]ब्राह्मणायार्चितायार्चितं वस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तश्रावणविहितवस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि । स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । दशाग्रहणपूर्वकञ्च [16]परिधानं स्वीकारः ।

---

1 A पूपा
2 A वैशाखे मासि अभीष्टदिने, I. O. वैशाखे मासिकाभीष्टदिने
3 A ब्राह्मणायार्चितानपूपान्
4 A दैवतानि for दैवता इति
5 A सर्वकाममुपाश्नुते, I. O. सर्वकामानपाश्नुते
6 I. O. and A ज्यैष्ठे for ज्यैष्ठ
7 A ब्राह्मणायमर्चितं for the bracketed portion
8 A adds ॐ here
9 A स्वर्ग आषाढे ध्रुवमश्नुते
10 I. O. adds ददानि after उपानहौ
11 I. O. विष्णुधर्मोक्ताषाढविहितो for the bracketed portion
12 I. O. दैवते for दैवत इति
13 A आरोहणञ्च
14 A and I. O. श्रावणे for श्रावण
15 A ब्राह्मणायातायार्चिते
16 I. O. omits it

तथा (३।३१७।१२ख) :—

प्रोष्ठपदे [तथा मासि][1] प्रदानात् फाणितस्य तु[2] ॥१६॥

कीर्तितं सुमहत्फलमित्येतेन सम्बन्धः। फाणितं [खण्डशालुकमिति प्रसिद्धम्][3]। [4]भाद्रमासिकाभिमतदिने ब्राह्मणायार्चितायार्चितं फाणितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तप्रोष्ठपदविहितफाणितदानफलप्राप्तिकामोऽहमेतत् फाणितं ददानि। स्वस्तिसावित्रीपाठान्ते फाणितमिदं [5]सोमदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१३क) :—

आश्विने घृतदानेन रूपवानभिजायते ॥२०॥

[6]आश्विनमासिकाभिमतदिने [7]ब्राह्मणायार्चितायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [8]उत्कृष्टरूपप्राप्तिकामोऽहमेतद्घृतं ददानि। स्वस्तिसावित्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३०६।६४ख-६५क) :—

तक्रमाश्वयुजे मासि यस्तु दद्याद्द्विजातिषु।

आरोग्यं महदाप्नोति यत्र यत्राभिजायते ॥२१॥

[9]तक्रं चतुर्थभागजलप्रक्षेपमथितं दधि। आश्विनमासिकाभिमतदिने ब्राह्मणेभ्योऽर्चितेभ्यस्तक्रमर्चितम् ॐ[10]अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्ताश्विनविहिततक्रदानफलप्राप्तिकामोऽहमेतत्तक्रं ददानि। स्वस्तिसावित्रीपाठान्ते[11] तक्रमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तक्रस्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१३ख) :—

कार्तिके दीपदानेन सर्वतौज्ज्वल्यमाप्नुयात्।

---

1 I. O. मासे for the bracketed portion

2 A and V. D. च

3 A खण्डशालुकेति प्रसिद्धं and I. O. खण्डशालुकं for the bracketed portion

4 A भाद्रपदे for भाद्र

5 A विष्णु for सोम

6 I. O. आश्विने मासिका...दिने, A आश्विनमासिकाभीष्टदिने

7 A ब्राह्मणार्चितं

8 A ॐ ततः कृष्ण for उत्कृष्ट

9 A तक्रञ्च त्रिभाग०

10 A omits ॐ

11 A adds तु here

कार्तिकमासाभिमतदिने अर्चिताय ब्राह्मणायार्चितं दीपं यथाशक्ति पित्तलताम्रलोहकाष्ठ-[1]मृत्तिकायष्टीनामन्यतमयष्टिस्थं[2] ज्वालयित्वा [3]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [4]सर्व-तौज्ज्वल्यप्राप्तिकामोऽहमेतं दीपं ददानि। प्रतिग्रहीता [5]स्वस्तिसावित्रीपाठान्ते दीपोऽयं विष्णुदैवत इति वदेत्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः। अत्रानुक्तमपि पित्तलयष्ट्यादिकं फलबाहुल्याद् यथाशक्ति ग्रहीतव्यम्।

तथा (३।३१७।१४क):—

लवणं मार्गशीर्षे तु दत्त्वा सौभाग्यमश्नुते[6]।

मार्गशीर्षाभिमतदिने अर्चिताय ब्राह्मणायार्चितं लवणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतल्लवणं[7] ददानि। [8]स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम्। [9]कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१४ख):—

पौषे कनकदानेन परां पुष्टिं तथैव च ॥२२॥

[10]अश्नुत इत्यनुवर्तते। पौषमासिकाभिमतदिने ब्राह्मणायार्चितायाभिमतपरिमाण-मर्चितं कनकम् ॐ अद्यादि [तुभ्यमन्तमुक्त्वा दद्यात्। अतिशयितपुष्टिकामोऽहमेतत् कनकं ददानि। स्वस्तिसावित्रीपाठान्ते [11]कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्। काम-स्तुत्यादि][12]पूर्ववत्। स्पर्शनञ्च स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
दानसागरे [13]मासोपलक्षितनियतदिनदानावर्तः।

---

1 I. O. मृत्तिकायस for मृत्तिका
2 A ॰यष्टिना
3 A omits ॐ
4 A सर्वत्रौज्ज्वल्यप्राप्तिकामो
5 A स्वस्त्यौत्युक्त्वा for स्वस्ति
6 A सौभाग्यमाप्नुयात्
7 I. O. ॰मेतं लवणं
8 A स्वस्त्यादि for स्वस्ति
9 A कामस्तुत्यादिकं
10 A आप्नुत
11 A कनकमग्निदैवतमिति
12 A repeats the bracketed portion
13 I. O. मासोपलक्षितानियतदिन-दानावर्त्तः, A मासोपलक्षितनियत-दानावर्त्तः

[1][अथ नानादैवतानियतमासिक[2]-तिथिदानावर्तः] । (६३)

विष्णुधर्मोत्तरे (३।३१७।२७ख—३१क) :—

प्रतिपद्यथ पुष्पाणां द्वितीयायां घृतस्य च ।
तृतीयायान्तु वस्त्राणां चतुर्थ्यां कनकस्य तु ।
पञ्चम्यान्तु फलानां वै षष्ठ्यां स्नानस्य मानदाः[3] ॥१॥

स्नानस्य स्नानीयतैलामलकादेः[4] ।

[5]सप्तम्याश्च ह्यपूपानामष्टम्याश्च गुडस्य च ।
कुन्माषस्य नवम्यान्तु दशम्यां रजतस्य च ॥२॥

कुन्माषो राजमाषः[6] ।

एकादश्यां सुवर्णस्य द्वादश्यां वसनस्य च ।
त्रयोदश्यां सुगन्धानां सितायास्तदनन्तरम् ॥३॥

सुगन्धाश्चन्दनादयः[7] [8]सिता शर्करा ।

दानञ्च परमान्नस्य पञ्चदश्यां महाफलम् ॥४॥

परमान्नं पायसम्[9] । दानं[10] महाफलमिति सर्वत्रानुषङ्गो बोद्धव्यः । अत्र विशेषाश्रवणादिच्छया[11] शुक्ले कृष्णे वा[12] पक्षे दानम् । तदत्र यजमानः प्रतिपदि[13] पुष्पाण्यर्चितान्यर्चिताय[14] ब्राह्मणाय दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुक[15]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-[प्रतिपद्विहित-पुष्प][16]-दानफलप्राप्तिकामोऽहमेतानि

---

1 A omits the bracketed portion
2 I. O. ॰मासक॰
3 A मानद:
4 A स्नौनीयतैलामामलकादेः
5 A सप्तम्याश्चापूपानां, I. O. सप्तम्याश्च ह्यपूपानाम्
6 A पश्चिमदेशे राजमासप्रसिद्धो व्रीहिविशेषः
7 A देयाः for दयः
8 A शित
9 A पायसः, I. O. पायस
10 A omits it
11 A विशेषभावादिच्छया
12 A च
13 I. O. प्रदिपदि
14 A पुष्पाण्यर्चिताय
15 A omits वेदामुक
16 A प्रतिपद्विविहितपुष्प and I. O. यद्विहित for the bracketed portion

पुष्पाणि ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पुष्पाण्येतानि वनस्पति-दैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा पुष्पाणि स्पृशेत्। तथा द्वितीयायां घृतदानवाक्ये विष्णुधर्मोत्तरोक्तद्वितीयाविहित-घृतदानफलप्राप्तिकामोऽहमेतद्घृत-मिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। तृतीयायां वस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्ततृतीया-विहित-वस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणीति निवेशनीयम्। स्वस्तिसावित्रीपाठा-नन्तरं वस्त्राणीमानि बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। चतुर्थ्यां कनकदानवाक्ये विष्णुधर्मोत्तरोक्त-चतुर्थी-विहित-कनकदानफलप्राप्तिकामोऽहमेतत् [1]कनकमिति निवेशनीयम्। [स्वस्तिसावित्रीपाठा-नन्तरं कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्][2]। [कामस्तुत्यादि पूर्ववत्।][3] पञ्चम्यां फलदानवाक्ये[4] विष्णुधर्मोत्तरोक्त-पञ्चमीविहित-फलदान[5]-फलप्राप्तिकामोऽहमेतानि फलानीति[6] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं[7] फलानीमानि[8] वनस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। षष्ठ्यां स्नानीयद्रव्यदानवाक्ये विष्णुधर्मोत्त-रोक्त-षष्ठीविहित-[9]स्नानीयद्रव्यदानफलप्राप्तिकामोऽहमेतत् [10]स्नानीयद्रव्यमिति [11]निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं [12]स्नानीयमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। सप्तम्यामपूपदानवाक्ये विष्णुधर्मोत्तरोक्त-सप्तमीविहितापूपदानफलप्राप्तिकामोऽहमेतान-पूपानिति[13] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरमपूपा एते प्रजापतिदैवता इति प्रति-ग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। अष्टम्यां गुडदानवाक्ये विष्णुधर्मोत्तरोक्ताष्टमी-विहित[14]-गुडदानफलप्राप्तिकामोऽहमेतं[15] गुडमिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं गुडोऽयं सोमदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। नवम्यां राजमाषदानवाक्ये

---

1 A काञ्चनं इति

2 A काञ्चनमिदं अग्निदैवतमिति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीता वदेत् for the bracketed portion

3 A omits the bracketed portion

4 I. O. कनकादिफलदानादिवाक्ये

5 A omits फलदान

6 A एतत् फलानीति for एतानि फलानीति

7 A °पाठानन्त

8 A फलानीमा

9 I. O. स्नान for स्नानीयद्रव्य

10 I. O. स्नान for स्नानीयद्रव्य

11 I. O. निवेश्यं

12 I. O. स्नान for स्नानीय

13 I. O. एतान्यपूपानीति

14 A विष्णुधर्मोत्तरोक्त अष्टमीविहित

15 A °मेतां

विष्णुधर्मोत्तरोक्तनवमीविहित कुन्माषदानफलप्राप्तिकामोऽहमेतं कुन्माषमिति निवेशनीयम् । स्वस्तिसावित्रीपाठानन्तरं कुन्माषोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [1]मुष्टिग्रहणञ्च स्वीकारः । दशम्यां रजतदानवाक्ये विष्णुधर्मोत्तरोक्त-दशमीविहित-रजतदानफल[2]-प्राप्तिकामोऽहमेतद्रजतमिति निवेशनीयम्[3] । स्वस्तिसावित्री-पाठानन्तरं[4] [5]रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । एकादश्यां सुवर्णदानवाक्ये विष्णुधर्मोत्तरोक्तैकादशीविहितसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णमिति निवेशनीयम् । स्वस्तिसावित्रीपाठानन्तरं सुवर्णमिदमग्निदैवतमिति प्रतिग्रहीतृ-वाक्यम् । कामस्तुत्यादि पूर्ववत् । द्वादश्यां वस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्तद्वादशी-विहित-वसनदानफलप्राप्तिकामोहऽमेतद्वसनमिति निवेशनीयम् । स्वस्तिसावित्रीपाठानन्तरं वसनमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । दशाग्रहण-[6]पूर्वकं परिधानं स्वीकारः । त्रयोदश्यां चन्दनादीनामन्यतमसुगन्धद्रव्यस्य दानवाक्ये विष्णुधर्मोत्तरोक्तत्रयोदशीविहितसुगन्धदानफलप्राप्तिकामोऽहमेतान् सुगन्धानिति निवेश-नीयम् । स्वस्तिसावित्रीपाठानन्तरं सुगन्धा इमे गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । चतुर्दश्यां शर्करादानवाक्ये विष्णुधर्मोत्तरोक्तचतुर्दशीविहित[7] सितादानफलप्राप्तिकामोऽहमेतां[8] सितामिति निवेशनीयम् । स्वस्तिसावित्रीपठानन्तरं सितेयं सोमदैवतेति प्रतिग्रहीतृवाक्यम् । [9]कामस्तुत्यादि पूर्ववत् । पञ्चदश्यां पायसदानवाक्ये विष्णुधर्मोत्तरोक्तपञ्चदशीविहितपरमान्नदानफल[10]-प्राप्तिकामोऽहमेतत् [11]परमान्नमिति निवेशनी-यम् । स्वस्तिसावित्रीपाठानन्तरं परमान्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

कूर्मपुराणे (२।२६।२६-३०) :—

> कृष्णाष्टम्यां विशेषेण धार्मिकाय द्विजातये ।
> स्नात्वाभ्यर्च्य यथान्यायं [12]पादप्रक्षालनादिभिः ॥५॥

---

1 A स्वस्वीकरणच
2 A omits फल
3 I. O. निवेश्यं
4 A ०पाठानन्तं
5 A रजतमिदं चन्द्रदैवतमिति
6 A ०पूर्वकपरिधानं
7 I. O. ०विहि०
8 A ०मेतं
9 A कामस्तुत्या
10 A omits फल
11 I. O परमान्नं
12 I. O. पादप्रक्षालनादिभिः

प्रीयतां मे महादेवो दद्याद्द्रव्यं स्वकीयकम् ।
सर्वपापविनिर्मुक्तः प्राप्नोति परमां गतिम् ॥६॥

स्वकीयमिति [1]सद्द्रस्यार्जितं न रणादिना [2]परस्यापकृतमित्यर्थः। कृष्णाष्टम्यां शङ्करमुद्दिश्य पादप्रक्षालन-सुखोपवेशन-गन्धपुष्पधूपवस्त्रादिभिः [3]शिववत्तपःशालिनं ब्राह्मणमभ्यर्च्य तस्मै न्यायार्जितं द्रव्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपापविनिर्मुक्ति-[4]पूर्वक-[5]परमगतिप्राप्तिकामोऽहमेतदमुकं ददानि। [6]प्रीयतां मे महादेवः। ततः स्वस्तिसावित्रीपाठानन्तरम् [7]अमुकमिदम् अमुकदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [8]प्रतिग्रहविध्युक्तश्च स्वीकारः।

तथा :—

यस्तु कृष्णाचतुर्दश्यां स्नात्वा देवं पिनाकिनम्।
[9]आराधयेद्द्विजमुखं न तस्यास्ति पुनर्भवः ॥७॥

आराधयेद्द्विजमुखमिति[10] ब्राह्मणं शिवरूपं ध्यायन् [11]पाद्यार्घ्य-सुखोपवेशन-गन्धमाल्यधूपदीप[12]-वस्त्रादिभिः शिववत् पूजयित्वा तस्मै [13]स्वेष्टद्रव्यं [14]दद्यादित्यर्थः अष्टमोदाने[15] तथा श्रवणात्। स्नातः शिवमुद्दिश्य पाद्यादिभिरर्चिताय ब्राह्मणायार्चितमभिमतद्रव्यम्[16] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अपुनर्भवप्राप्तिकामोऽहमेतदमुकं ददानि। पिनाकी प्रीयताम्। स्वस्तिसावित्रीपाठानन्तरम् [17]अमुकमिदममुकदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [18]प्रतिग्रहविध्युक्तश्च स्वीकारः।

तथा :—

अमावास्यामनुप्राप्तां[19] ब्राह्मणाय तपस्विने।
यत्किञ्चिद्देवदेवेशं दद्यादुद्दिश्य शङ्करम् ॥८॥

---

1 A स्वद्रव्यार्जितं
2 I. O. परस्याकृतमिति
3 I. O. शिववते यः शालिनं
4 A सर्वपापविमुक्ति॰
5 A परमा॰
6 A प्रीयतामेमहादेवः
7 I. O. परमाऽमिदं
8 I. O. प्रतिग्रहविधुक्तश्च, A प्रतिग्रहश्च
9 I. O. omits the entire line
10 I. O. ॰मुखेति
11 I. O. पाद्यार्घं॰
12 A ॰दीपा॰
13 A दृष्टद्रव्यं
14 I. O. पद्यादित्यर्थः
15 A adds तु here
16 A ब्राह्मणायार्चितमेतद्द्रव्यं
17 A omits अमुकमिदं
18 A प्रतिग्रहविध्युक्तः
19 A ॰प्राप्तं

ज्ञात्वेति शेषः ।

प्रीयतामीश्वरः सोमो महादेवः सनातनः ।
ममजन्मकृतं पापं तत्क्षणादेव नश्यति ॥६॥

शङ्करमुद्दिश्य तपःशालिने अर्चिताय ब्राह्मणायाभिमतं यत्किञ्चिद्द्रव्यमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सप्तजन्मकृतपापक्षयकामोऽहमेतदमुकं ददानि । [1][प्रीयतामीश्वरः सोमो महादेवः सनातनः । स्वस्तिसावित्रीपाठानन्तरममुकमिदममुकदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।] प्रतिग्रहविध्युक्तश्च स्वीकारः ।

स्कन्दपुराणे :—

तिलपात्राणि यो दद्याद्विप्रेभ्यः शुद्धमानसः ।
अमावास्यां समासाद्य कृष्णानां सुसमाहितः ॥१०॥

कृष्णानामिति तिलविशेषणम् ।

स्वपितॄंस्तर्पयित्वा तु अक्षयं नरपुङ्गवः ।
पितृलोकं समाप्नोति चिरञ्च सुखमेधते ॥११॥

[2]अथेष्टामावास्यायामर्चितेभ्यो [3]ब्राह्मणेभ्यस्त्रीणि कृष्णतिलपूर्णान्यर्चितानि पात्राणि दद्यात् । ॐ [4]अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं स्कन्दपुराणोक्ततिलपात्रदानफलप्राप्तिकामोऽहमेतानि तिलपात्राणि ददानि । स्वस्तिसावित्रीपाठानन्तरं तिलपात्राणीमानि [5]विष्णुदैवतानीति [6]प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

महाभारते :—

द्वादश्यां पौर्णमास्याञ्च[7] मासि मासि [8]घृताक्षतम् ।
ब्राह्मणेभ्यः प्रयच्छेद्यस्तस्य [9]धर्मं निबोधत ॥१२॥
सोमश्च वर्धते तेन समुद्रश्च महोदधिः ।
अश्वमेधचतुर्भागं फलं सृजति वासवः ॥१३॥

---

1 A omits the bracketed portion
2 A अथेष्टामावास्यायमर्चितेभ्यो
3 I. O. ब्राह्मणेभ्यः त्रीणी
4 A omits अमुकसगोत्रेभ्यो
5 A विष्णुदैवतानि
6 I. O. प्रतिग्रहीतृणां वाक्यं
7 A पौर्णमास्यान्वा
8 A घृताक्तं
9 A धर्मांश्च बोधत, I. O. धर्मं निबोधित

ब्राह्मणेभ्य इति बहुवचनं मासि मासीति श्रवणात् [1]प्रयोगबहुत्वापेक्षम्। पौर्णमास्युप-[2]संहारात् द्वादश्यपि[3] शुक्ला ग्राह्या। यथेच्छकालं प्रतिमासिकशुक्लद्वादशीपञ्चदश्योरर्चिताय ब्राह्मणायार्चितान् यवान् ॐ अद्यादि तुभ्यमन्तमुक्ता दद्यात्। [महाभारतोक्तघृताक्षतदानफलप्राप्तिकामोऽहमेतं घृताक्षतं ददानि। स्वस्तिसावित्रीपाठानन्तरं घृताक्षतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।][4] [5]मुष्टिग्रहणाश्च स्वीकारः।

इति महाराजाधिराजनिःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
दानसागरेऽनियत-[6]मासिकतिथिदानावर्तः।

1 A बहुत्वापेक्षं
2 I. O. ०सम्पादनात्
3 A द्वादस्य
4 A omits the bracketed portion
5 I. O. मुष्टिग्रहणाच
6 A and I. O. ०मासक०

अथ नानादैवत-मासनियत-तिथिदानावर्तः । (६४)

आग्नेयपुराणे :—

> यो ददाति द्विजेभ्यस्तु[1] तृतीयायामुपानहौ ।
> वैशाखशुक्लपक्षे तु सच्छत्रकरकान्विते ॥१॥

द्विजेभ्य इति बहुवचनं प्रयोगबहुत्वापेक्षम् ।

> न तस्य मनसो [दाहो मर्त्ये][2]-लोके हि जायते ।
> सर्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति ॥२॥
> कालादिह [3]यदा याति [4]यमलोकाद्द्विजोत्तमः ।
> यानञ्चाश्वतरीयुक्तं सर्वहेमविभूषितम्[5] ॥३॥
> दिव्याङ्गनाभिराकीर्णं [6]सर्वरत्नमयं शुभम् ।
> उपतिष्ठति विप्रेन्द्र सर्वकामफलप्रदम् ॥४॥

अत्र यजमानो वैशाखशुक्लतृतीयायां ब्राह्मणायार्चिताय छत्रकमण्डलसहितमुपानद्युग[7]-मर्चितम् [8]दद्यात । [9]ॐ अद्यामुकसगोत्रायामुकवेदामुक[10]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-च्छत्र-[11]करकान्वितोपानद्युगदानफल[12]-प्राप्तिकामोऽहमेतच्छत्रकरकान्वित-मुपानद्युगं[13] ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उपानद्युग[14]-मिदमुत्ता-नाङ्गिरोदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [सावित्रीं पठित्वा][15] उपानद्युगं[16] परिदध्यात ।

---

1 A द्विजेभ्यश्च
2 I. O. देह्रो मृत्यु for the bracketed portion
3 A समायाति
4 A यमलोका
5 A सर्वहेममयं शुभं
6 A सर्वरत्नविभूषितं
7 A ०उपानद्युगल०
8 I. O. omits it
9 A omits ॐ
10 A omits वेदामुक
11 I. O. ०करणान्वितो०
12 A omits फल
13 A ०करकान्वित उपानद्युगलं
14 A उपानद्युगल०
15 A omits the bracketed portion
16 A उपानद्युगलं

विष्णुः :—

वैशाखे मासि तृतीयायामुपोषितोऽक्षतैर्वासुदेव-[1][मभ्यर्च्य तानेव हुत्वा दत्वा च] पापेभ्यः पूतो भवति। [2]यच्च तस्मिन्नहनि प्रयच्छति [3]तदक्षय्यमवाप्नोति ॥५॥

वैशाखशुक्लप्रतिपदि[4] कृतनित्यो घटिकाधिकप्रहरत्रयोपरि हविष्यं भुक्त्वाऽऽचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः ॐ सूर्य्यः सोमो यमः कालः पञ्च महाभूतानि [5]विष्णूक्त-वैशाखशुक्लतृतीयाविहित-सोपवासवासुदेवार्चन-होमयवदानकर्म मया कर्तव्यमित्युक्त्वा गृहीतोदकपूर्णताम्रपात्र[6] उदङ्मुखः सङ्कल्पयेत्। ॐ [7]श्व उपोष्या-परदिने[8] विष्णूक्त-शुक्लतृतीयाविहित वासुदेवार्चन-होमयवदान-कर्माहं करिष्ये। ततो नियमेन सुप्त्वा [9]द्वितीयायामुपोष्य तृतीयायां[10] प्रातः स्नात्वा यवैर्भगवन्तं वासुदेवं पूजयित्वा यवानेव वासुदेवाय स्वाहेत्यग्नौ[11] हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणायार्चितायार्चितान् यवान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णूक्ताक्षतदानफलप्राप्ति-कामोऽहमेतानक्षतान् ददानि। स्वस्तिसावित्रीपाठान्तेऽक्षता एते प्रजापतिदैवता इति प्रति-ग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [12]मुष्टिग्रहणाच्च स्वीकारः। वस्त्वन्तरदाने [13]तु[14]तत्तद्वस्तुनाम तत्तद्दैवतोत्कीर्तनं [15]स्वीकारश्चोन्नेयः। अक्षयतृतीया चैषा।

विष्णुधर्मोत्तरे (३।३१७।३१ख-३२क) :—

[16]वैशाखे शुक्लपक्षे तु तृतीयायां द्विजोत्तमाः[17]।
[18]यद्ददाति [19]नरश्रेष्ठास्तत्तदक्षयमुच्यते ॥६॥

अतएवाक्षयतृतीयेयं प्रसिद्धा।

विशेषेण तथा [20]दानमक्षतानां महाफलम् ॥७॥ (३।३१७।३२ख)

[21]ब्राह्मणायार्चितायार्चितानक्षतान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-

1 A भ्यच्य न् च हुत्वाश्च for the b. p.
2 A यच्च तस्मिन्नहनि, I. O. तृतीया-स्मिन्नहनि
3 A तदक्षयमवाप्नोति, I. O. तदक्षय्य-माप्नोति
4 I. O. ०प्रदिपदि, A वैशाखशुक्ल-तृतीयापूर्वतरदिने
5 A विष्णुधर्मोत्तरोक्त०
6 A and I. O. ०पात्र
7 A स्वः, I. O. श्वः
8 A उपोष्य परेद्युरि
9 A तृतीयायाम्०
10 A adds तिथौ here
11 I. O. स्वाहेत्यग्नौ
12 A मुष्टिग्रहण
13 I. O. omits तु
14 I. O. तद्वस्तुनाम, A तद्वस्तुनाम
15 A स्वीकारश्चोन्नेयः, I. O. स्वीकार-स्तून्नेयः
16 A वैशाख
17 A द्विजोत्तम
18 I. O. यद्ददाति
19 I. O. नरश्रेष्ठास्तदक्षयमश्नुते, A नरश्रेष्ठास्तदक्षयमुच्यते
20 A दान
21 A ब्राह्मणायार्चितायाक्षतान्

शुक्लतृतीयाविहिताक्षतदानफलप्राप्तिकामोऽहमेतानक्षतान् ददानि। स्वस्त्यादिस्वीकारान्तं [1]पूर्ववत्। वस्त्वन्तरदाने तु [2]तत्तद्द्रव्यनाम तत्तद्दैवतोत्कीर्त्तनं [3]स्वीकारश्चोन्नेयः।

तथा (३।३१७।३४) :—

मासि भाद्रपदे शुक्लनवम्यां द्विजपुङ्गवाः।

[4]गोधूमभक्तान् सगुडान् दत्त्वा पुण्यमवाप्नुयात् ॥८॥

अर्चिताय ब्राह्मणायार्चितं[5] सगुडं गोधूमभक्तम्[6] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुण्यप्राप्तिकामोऽहमेतत्[7] सगुडं गोधूमभक्तं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते गोधूमभक्तमिदं प्रजापतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [8]स्पर्शनं स्वीकारः।

[9]यमः :—

कार्त्तिकस्य तमिस्रे तु [10]माघस्य नवमीतिथौ।

अहोरात्रोषितः स्नात्वा धर्मराजाय भोजयेत्।

विधिवद् ब्राह्मणान् शक्त्या [11]स्वर्गलोके महीयते ॥९॥

शक्तेरत्यभिधानाद् यथेष्टं [ब्राह्मणानां बहुत्वमत्र][12] विवक्षितम्। कार्त्तिककृष्णनवम्यां माघकृष्णनवम्यां वा दानम्। [13]तत्र दानदिनपूर्वतरदिने [14]पूर्ववद्धविष्यभोजनादि कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वकयमोक्त-कार्त्तिककृष्णनवमीविहित-ब्राह्मणभोजनकर्म मया कर्त्तव्यमिति निवेद्य ॐ श्व उपोष्योपरदिने धर्मराजोद्देशेन ब्राह्मणान् भोजयिष्यामीति सङ्कल्पयाष्टम्यामुपोष्य नवम्यां धर्मराजोद्देशेन यथाशक्त्युपस्थापितब्राह्मणेभ्योऽर्चितेभ्यो[15]ऽर्चितानि भोजनानि दद्यात्। ॐ [16]अद्यामुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽ[17]मुकदेवशर्मभ्योऽर्चितेभ्यो[18] युष्मभ्यं सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतान्युपकरणसहितानि भोजनानि

---

1 I. O. अनन्तरोक्तदानवत्
2 A तद्वस्तुनाम तत्तद्दैवताकीर्त्तनं
3 I. O. स्वीकारायोन्नेयाः, A स्वीकारश्चोन्नेयः
4 I. O. गोधूमभक्तान्
5 A ब्राह्मणाय
6 A adds अर्चितं here
7 A °मेतं
8 A स्पर्शनम
9 I. O. omits this
10 I. O. माघादि
11 A स्वर्गलोक
12 A ब्राह्मणानामत्वमत्र for the bracketed portion
13 I. O. तत्र दानपूर्वतरदिने, A तद्दाने दिनपूर्व्वतरदिने
14 A हविष्यभोजनादि
15 A omits अर्चितेभ्यो
16 A अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदा°
17 A °मुकामुकदेवशर्मभ्यो
18 A omits अर्चितेभ्यो

ददानि। धर्मराजः प्रीयताम्। प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते [1]भोजनानीमानि प्रजापतिदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः। [सम्प्रदानबहुत्वञ्च बहुवचनोहेन][2]। दक्षिणा पूर्ववत्। [3]स्पर्शः स्वीकारः। एवं माघ-[4]कृष्णनवम्यामपि दद्यात्। तत्र च निवेदनवाक्ये कार्त्तिकपदस्थाने माघपदनिवेशो विशेषः।

विष्णुः :—

पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः [5][स्नातः तिलोदकं] दत्त्वा[6] तिलैर्वासुदेवमभ्यर्च्य [7]तानेव हुत्वा दत्त्वा [8]भुक्त्वा च सर्वपापेभ्यः पूतो भवति ।१०॥

पौषपौर्णमासीमतिक्रम्य या कृष्णद्वादशी तस्याः पूर्वतरदिने पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्यो [9]विष्णुक्तसोपवास-[10]कृष्णद्वादशीविहिततिलस्नानतिलतर्पण-तिलद्रव्यकवासुदेवार्चन[11]-तिलहोम[12]-[तिलदानतिलभोजनकर्म मया कर्त्तव्यमिति निवेद्य श्व उपोष्यापरदिने तिलस्नान-तिलतर्पण-तिलद्रव्यकवासुदेवार्चन-तिलहोम-तिलदान][13]-तिलभोजनान्यहं करिष्ये इति सङ्कल्पं कुर्यात्। ततो नियमेन सुप्त्वा [14]एकादशीदिन उपोष्य द्वादश्यां प्रातस्तिलैः स्नात्वा पितॄंस्तिलैस्तर्पयित्वा तिलैर्वासुदेवमर्चयित्वा वासुदेवाय स्वाहेति तिलानग्नौ हुत्वा [शूद्रो ब्राह्मणद्वारा कारयित्वा][15] अर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [16][सर्वपापपूतत्वप्राप्तिकामोऽहमेतांस्तिलान् ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेत।] कामस्तुत्यादि पूर्ववत्। [17]मुष्टिग्रहणञ्च स्वीकारः। ततो भोजनं तिलैः कुर्य्यात्।

यमः :—

माघान्धकारद्वादश्यां तिलैर्हुत्वा हुताशनम्।
तिलान् दत्त्वा च विप्रेभ्यः सर्वपापैः प्रमुच्यते ॥११॥

---

1 A भोजनानी
2 I. O. संप्रदानबहुवचनोहेन for the bracketed portion
3 A स्पर्शनञ्च
4 A omits कृष्ण
5 A स्नाततिलोकं for the bracketed portion
6 I. O. हुत्वा
7 A तानव
8 A omits भुक्त्वा
9 A विष्णुविष्णु॰
10 A omits कृष्ण
11 A ॰वासुदेवपूजा
12 A तिलहोम twice
13 A omits the bracketed portion
14 A एकादशीदिनम्
15 A ब्राह्मणद्वारा for the bracketed portion
16 I. O. omits the bracketed portion
17 A स्वस्तिग्रहणञ्च

माघकृष्णद्वादश्यां [1]कृतनित्यो [2]यथाविध्यग्निमुपसमाधाय [3]ॐ प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा[ऽर्चितेभ्यो यथेष्टसंख्यब्राह्मणेभ्य][4]-स्तिलान-र्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [5][सर्वपापप्रमोचकत्व]-प्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादि-[स्वीकारान्तमनन्तरोक्त][6]-तिलदानवत्।

[7][कूर्मपुराणे (२।२६।२५) :—

माघमासे[8] [तमिस्रे तु][9] द्वादश्यां समुपोषितः।
शुक्लाम्बरधरः कृष्णैस्तिलैर्हुत्वा हुताशनम् ॥१२॥
[प्रदद्याद् ब्राह्मणेभ्यस्तु [10]तिलानेव समाहितः।][11]
जन्मप्रभृति यत् पापं सर्वं तरति वै द्विजः ॥१३॥

माघकृष्णद्वादश्याः पूर्वतरदिने [12]पूर्ववद्धविष्यभोजनादि[13] कृत्वा सूर्यादिदेवताभ्यः कूर्म-पुराणोक्तसोपवास-तिलदानकर्म मया कर्तव्यमिति निवेद्य ॐ[14] श्व उपोष्य द्वादश्यां तिलहोम-पूर्वकतिलदानकर्माहं करिष्य इति सङ्कल्प्य नियमेन सुप्त्वा [15]परदिने कृत्यनित्य [16]उपोष्यापरदिने तथाविध्यग्निमुपसमाधाय प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। जन्मप्रभृतिकृतपापतरणकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व-तिलदानवत्[17] ।]

---

1 A कृतकृत्यो
2 A अग्निमुपसमाधाय
3 I. O. omits ॐ
4 A ऽर्चिताय ब्राह्मणेभ्यो for the bracketed portion
5 A यम: । सर्व्वपापप्रशमन for the bracketed portion
6 A स्वीकारान्तं मन्वन्तरोक्त for the bracketed portion
7 I. O. reads the bracketed portion twice
8 A माघे मासि
9 K. P. तु विप्रस्तु for the b. p.
10 A तिलानेव
11 I. O. omits this line in the second and more correct reading of the previously indicated bracketed portion but reads it in the first and less correct reading of the same.
12 A omits पूर्ववत्
13 I. O. ०भोजनादिषु
14 I. O. omits ॐ in both the readings
15 A अपरदिने
16 A उपोष्य परदिने
17 A पूर्व्ववत्

आग्नेयपुराणे :—

जलधेनुं प्रवक्ष्यामि सर्वकिल्विषनाशिनीम्[1] ।
[2]दत्ता या प्रीतये राजन् जलशायिजगत्पतेः[3] ॥१४॥
जलकुम्भं सभृङ्गारं सुवर्णरूप्यसंयुतम् ।
गर्भस्थानानि [4]रत्नानि दत्त्वा च सप्त मुख्यतः[5] ॥१५॥

सप्तरत्नानीति परिभाषोक्त-[नवरत्नमध्ये बहुमूल्यसप्तरत्नग्रहणम् ।

सप्तधान्ययुतं तद्वद् गुडधेनुर्यथा पुरा ।
सितवस्त्रयुगच्छन्नं [7]दूर्वापल्लवशोभितम् ॥१६॥

सप्तधान्यानि परिभाषोक्तानि ।][8] गुडधेनुर्यथा पुरेति आग्नेयपुराणोक्त-गुडधेन्वलङ्कारोपकरणग्रहणम्[9] ।

गन्धपात्रैर्युतं [10][दिक्षु सित]-यज्ञोपवीतिनम् ।
सच्छत्रं [11]सहोपानत्कं विष्टरैः परिवारितम् ॥१७॥

गन्धपात्रैर्गन्धयुतैः[12] पात्रैश्चतुर्भिः ।

चत्वारि तिलपात्राणि [13]खदिरौदुम्बराणि च ।
[14]दधिपात्रेण संयुक्तं [15]घृतक्षीरवता मुखे ॥१८॥

औदुम्बराणि ताम्रमयानि ।

द्वादश्यां शुक्लपक्षे तु आषाढस्य नृपोत्तम ।
उपोषितः समभ्यर्च्य केशवं जलशायिनम् ॥१९॥
गन्धपुष्पोपहारैश्च यथाविभवविस्तरात् ।
सङ्कल्प्य जलधेनुञ्च पूजयेद्व्रतसक्तं तथा[16] ॥२०॥

---

1 A ॰नाशिनी, I. O. ॰नाशनम्
2 I. O. and A दत्तया
3 I. O. जलशायीजगत्पतिः, A जलसायीजगत्पतिः
4 A पात्राणि
5 I. O. सप्तमुखतः, A सप्तमुख्यातः
6 A सप्तपात्राणीति
7 I. O. पूर्वा॰
8 A omits the bracketed portion
9 I. O. ॰गुडधेन्वलङ्कारोपग्रहणं, A ॰गुडधेनोरलङ्कारोपकरणं
10 A दिक्षयित for the bracketed portion
11 I. O. सोपानत्कं, A स उपानत्वं
12 I. O. गन्धयुक्तं गन्ध for गन्धयुतैः
13 I. O. स्वद्रियौडुम्बराणि
14 A दीपपात्रं
15 A घृतक्षीरताम्रमे
16 I. O. omits it

[1]वत्सकं [2]जलकुम्भचतुर्थभागनिर्मितं गुडधेनौ तथा दर्शनात् ।

सितवस्त्रधरः शान्तो वीरो विगतमत्सरः ।
दद्यादनेन मन्त्रेण प्रीतये जलशायिनः ॥२१॥
जलशायी जगद्योनिः प्रीयतां मम केशवः ।
[3]पयोमेधी [4]पयोवासो पयसा शयनं हरेः ॥२२॥
पयोधरासि मे देवि इह लोके परत्र च ।
[5][इति मत्वा] जगन्नाथं विप्राय प्रतिपादयेत् ।
[6][अपक्वान्नेन तिष्ठेत] अहोरात्रमतः परम् ॥२३॥
अनेन विधिना दत्त्वा जलधेनुं [7]यतव्रतः ।
सर्वान् कामानवाप्नोति ये दिव्या ये च मानुषाः ॥२४॥
कदा शरीरे [8][न व्याधिमाप्नोति] [9]पुरुषो नृप ।
[10]दत्त्वा [11]जलमयीं धेनुं [12]विष्णुलोकञ्च गच्छति ॥२५॥

आषाढे शुक्लद्वादश्याः पूर्वतरदिने पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्य आषाढ-शुक्लद्वादशीविहित-[13]जलशायिपूजापूर्वक-जलधेनुदानकर्म[14] मया कर्तव्यमिति निवेद्य सङ्कल्पयेत् । [15]ॐ श्व उपोष्यापरदिने [16]जलशायिपूजापूर्वकजलधेनु-[17][दानकर्माहं करिष्ये] । ततो नियमेन सुप्त्वा [18]परदिन उपोष्य द्वादश्यां यथाशक्ति गन्धमाल्योपहारैः[19] केशवाय जलशायिने नम इति मन्त्रेण केशवं[20] जलशायिनं सम्पूज्य गोमयोपलिप्तभूभागे कुशानास्तीर्य्य तत्रोपरि कृष्णाजिनमास्तीर्य्य तथैव स्वल्पकृष्णाजिनं प्रसार्य्य चतुर्हस्ताजिने जलशायिने[21]

---

1 I. O. and A omit it
2 I. O. जल । कुम्भ॰
3 A पयोमधी, I. O. पयोमया
4 I. O. पयोवर्त्ता
5 A omits the bracketed portion
6 A अपक्वान्नवर्तितिष्ठेत् for the bracketed portion
7 A यत: व्रत:
8 I. O. नोपाधामाप्नोति and A नोवाधामाप्नोति for the bracketed portion
9 I. O. पुरुषोत्तम
10 A ज्ञात्वा
11 I. O. and A जलमयी
12 A विष्णुलोकं स
13 I. O. and A जलशायी॰
14 A omits कर्म
15 I. O. omits ॐ
16 A जलशायी॰
17 A दानमहं करिष्यामि for the bracketed portion
18 I. O. परदिने, A अपरदिन
19 A पुष्पोपहारैः
20 A केशव
21 I. O. omits it

जलकुम्भमयी[1]-[2]मत्र यथोक्तोपकरणयुतां [3]धेनुदानावर्तस्थाग्नेयपुराणोक्त-गुडधेन्ववयवालङ्कारोपकरणयुतां धेनुचतुर्थभागजलनिर्मितैवंरूपवत्स[4]-सहितां जलधेनुमर्चिता[5]-मर्चिताय ब्राह्मणाय जलशायी जगद्योनिरित्यादि सार्द्धश्लोकं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्ताषाढ--शुक्लद्वादशीविहितजलधेनुदान[6]--फलप्राप्तिकामोऽहमेतां[7] लघ्वेण--काजिनस्थापितकुम्भस्थधेनुचतुर्थांशजलमय--सभृङ्गार--सुवर्णरौप्य--सप्त--[रत्न-सप्त][8]-- धान्ययुत-शुक्तिकर्णेक्षुपाद-[9]शुचिमुक्ताफलेक्षणसितसूत्रसिराल[10]-सितकम्बल-ताम्रपात्र[11]--पृष्ठ--सितचामर-रोमकविद्रुमौष्ठयुगल[12]-नवनीतस्तनक्षौमपुच्छकांस्योपदोहेन्द्रनीलतारक नानाफलसमायुक्त-[13]गन्धकरण्डकघ्राण सितवस्त्रयुगच्छन्न[14]--[15]दूर्वापल्लवशोभित-गन्धपात्रसहित-सितयज्ञोपवीति-[16]सच्छत्रोपानत्क--विष्टर--तिलपूर्णताम्रपात्रचतुष्टययुत--घृतक्षीरदधिपूर्णपात्रयुत--[17]सुखवत्ससहितां कृष्णाजिनस्थजलकुम्भमयीं भृङ्गारसुवर्णरौप्य-सप्त-[18]रत्न-सप्तधान्ययुतां शुक्तिकर्णामिक्षुपादां मुक्ताफलेक्षणां सितसूत्रसिरालां सितकम्बलगलकम्बलां[19] ताम्रपात्रपृष्ठां[20] सितचामररोमिकां विद्रुमौष्ठयुगां[21] नवनीतस्तनीं क्षौमपुच्छां कांस्योपदोहामिन्द्रनीलतारकां नानाफलसमायुक्तां गन्धकरण्डघ्राणां सितवस्त्रयुगच्छन्नां [22]दूर्वापल्लवशोभितां [23]गन्धपात्रचतुष्टययुतां सितयज्ञोपवीतिनीं [24]सच्छत्रोपानत्कां [25]विष्टरतिलपूर्णताम्रपात्रचतुष्टययुतां दधिघृतक्षीरपूर्णपात्र-[26]संयुक्तमुखीं जलधेनुं ददानि। स्वस्तिसावित्रीपाठान्ते जलधेनुरियं विष्णुदैवतेति

---

1 A जलकुम्भं मयं
2 A अत्र यथोक्तोपकरणमुद्रां, I. O. अवत्यक्तोपकरणयुतां
3 A धेनुदानावर्त्तांधे पुराणोक्त०
4 A ०निर्मितवत्स०
5 A omits अर्चिताम्
6 A ०दाना०
7 A ०मेतं
8 A रत्न for the bracketed portion
9 I. O. वि for शुचि
10 A सितराल for सिराल
11 A omits पात्र
12 I. O. ०विद्रूमौष्ठयुग
13 A गन्धकघ्राण, I. O. गन्धकरण्डक-घ्राण
14 A ०च्छत्र
15 A दूर्व्व०
16 A छत्रोपानह०
17 A सुखवत्सासहितं
18 A रत्न०
19 I. O. सितकम्बलगलकम्बल
20 I. O. ताम्रकपात्रपृष्ठा, A ताम्रपात्रकपृष्ठां
21 A विद्रुमौष्ठयुतां
22 A सर्व्वा०
23 A omits it
24 A छत्रोपानत्क
25 I. O. विष्टरतिलपूर्णं०, A reads विष्टतिलकपूर्णं० and omits ताम्र
26 I. O. ०समायुक्तमुखीं

प्रतिग्रहीता वदेत्। कामस्तुतिर्दक्षिणा च पूर्ववत्। पुच्छग्रहणं स्वीकारः। [ततो दान-दिने अपक्वान्नाशी[1] भवेत्।][2]

विष्णुधर्मे[3] :—

श्रावणे शुक्लपक्षे तु द्वादश्यां प्रीयते नृप।
गोप्रदानेन देवेशो[4] यत् पूर्वं कथितं तव ॥२६॥

यत् पूर्वं कथितमिति विष्णुधर्मोक्तालङ्कृतगवीदानग्रहणम्। ब्राह्मणायार्चितायालङ्कृत-गवीदानावर्तस्थ[5] विष्णुधर्मोक्त-गोविन्दस्नपनपूर्वकगोदानविधिना गामर्चितां दद्यात्।

तथा :—

पौषशुक्ले तु तद्वच्च द्वादश्यां घृतधेनुकाम्।
घृतार्चिः-प्रीणनार्थाय[6] प्रदद्यात् फलदायिनीम् ॥२७॥

तद्वच्चेति विष्णुधर्मोक्त-घृतधेनुपरिग्रहः। ब्राह्मणायार्चिताय धेनुदानावर्तस्थ[7]-विष्णु-धर्मोक्त[8]-घृत[9]-धेनुदानविधिना[10] घृतधेनुमर्चितां दद्यात्।

[तथा :—

तथैव माघद्वादश्यां प्रदत्ता तिलगौर्नृप।
केशवं प्रीणयत्याशु सर्वकामांश्च[11] यच्छति ॥२८॥

अत्रापि तथैवेति विष्णुधर्मोक्ततिलधेनुग्रहणम्। ब्राह्मणायार्चिताय धेनुदानावर्तस्थ-विष्णुधर्मोक्ततिलधेनुदानविधिना तिलधेनुमर्चितां दद्यात्।][12] दानवाक्ये अमुककामोऽहमिति विशेषः।

तथा :—

ज्यैष्ठे मासि सिते पक्षे द्वादश्यां जलधेनुकाम्[13]।
[14]दत्त्वा यथावद्विधिना प्रीणयत्यम्बुशायिनम्[15] ॥२९॥

---

1 A अपक्वान्नासी
2 I. O. omits bracketed portion
3 A adds तु after this
4 A देवेशो
5 A omits स्थ
6 A घृतार्चिप्रीणनार्थेन
7 A omits स्थ
8 A विष्णुधर्मोत्तरोक्त
9 I. O. omits घृत
10 I. O. विधया, A विधाय
11 I. O. सर्वकामां
12 A omits the bracketed portion
13 I. O. जलधेनुदः
14 I. O. दत्ता
15 A °शायिनीं

यथावद्विधिनेति विष्णुधर्मोक्त[1]-जुलधेनुविधि[2]-ग्रहणम् । ब्राह्मणायार्चिताय धेनु-दानावर्तस्थ[3]-विष्णुधर्मोक्त जलधेनुमर्चितां दद्यात् ।

विष्णुधर्मोत्तरे (३।३१६।२६-३१) :—

द्वादश्यां चैत्रशुक्लस्य चित्रवस्त्रप्रदो नरः ।
अक्षय्यं फलमाप्नोति नाकलोकञ्च गच्छति ॥३०॥

वैशाखमासद्वादश्यां [4]रुक्मदानात्तथैव च ।
छत्रोपानहयोर्दानाज्ज्यैष्ठे मासि द्विजोत्तमाः ॥३१॥

तथैव चेति प्रथममासोक्त-फलानुषङ्गः[5] ।

[6][आस्तीर्णं शयनं दत्त्वा प्रीणयेद्भोगिशायिनम् ।]
आषाढशुक्लद्वादश्यां श्वेतद्वीपे महीयते ॥३२॥

[7][आस्तीर्णं शयनं दत्त्वा श्वेतद्वीपे महीयते] [इति सम्बन्धः ।][8]

श्रावणे वस्त्रदानेन विष्णुलोके महीयते ।
गोदः प्रयाति गोलोकं मासि[9] भाद्रपदे द्विजाः ॥३३॥

प्रीणयेदश्वशिरसमश्वं[10] दत्त्वा तथाश्विने ।
विष्णुलोकमवाप्नोति कुलमुद्धरति स्वकम् ॥३४॥

सरोमवस्त्रदानेन कार्त्तिके दिवमाप्नुयात् ।
प्रदानं लवणानान्तु मार्गशीर्षे महाफलम्[11] ॥३५॥

[सरोमवस्त्रमित्यनेन तूलपटीकानां ग्रहणम्[12] ।][13]

तथा (३।३१६।३२) :—

[14][धान्यानाञ्च तथा] पौषे [15]दारूणां चाप्यनन्तरे ।
फाल्गुने सर्वगन्धानां नात्र कार्य्या विचारणा ॥३६॥

---

1 A विष्णुधर्मोत्तरोक्त
2 A जलधेधि०
3 A omits स्थ
4 A धूपदानात्तथैव
5 A फलानुसङ्गः, I. O. फलानुकर्षः
6 A reads the bracketed portion as स्वास्तीर्णसंश्रयं दत्वा प्रीणयेज्जलशायिनं
7 A omits the bracketed portion
8 I. O. omits the bracketed portion
9 I. O. माघे
10 A अन्नं for अश्वं
11 A शुभप्रदं
12 I. O. तूलपटीकाम्बानाञ्च
13 A omits the bracketed portion
14 Supplied from V. D. I. O. and A omit it
15 I. O. and A दारुणां

[1][अनन्तरे माघे] दानं महाफलमित्यनुषज्यते[2]। अत्र यत्रापि द्वादश्युल्लेखो नास्ति तत्रापि समभिव्याहारात द्वादश्योन्नेया[3]।

चैत्रशुक्लद्वादश्यां यथाशक्ति नानावर्णवस्त्रमर्चित[4]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-द्वादशीविहितचित्र[5]-वस्त्रदानफलप्राप्तिकामोऽहमेतच्चित्र[6]-वस्त्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानञ्च[7] स्वीकारः। वैशाखशुक्ल-द्वादश्यां काञ्चनदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-रुक्मदानफलप्राप्तिकामोऽहमेतद्रुक्म-मिति निवेश्यम्[8]। स्वस्तिसावित्रीपाठानन्तरं [9]रुक्ममिदमग्निदैवतमिति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च स्वीकारः। [10]ज्येष्ठशुक्लद्वादश्यां छत्रोपानद्-युग[11]-दानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-छत्रोपानद्युग[12]-दानफलप्राप्तिकामोऽहमेत-च्छत्रोपानद्युगमिति[13] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरमेतच्छत्रोपानद्युगे प्रजा-पत्युत्तानाङ्गिरोदैवते[14] इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। छत्रदण्डग्रहण-मुपानद्युगारोहणञ्च[15] स्वीकारः। आषाढशुक्लद्वादश्यां खट्वोपरि-तूलिकादिविरचित[16]-शयनीय-दानवाक्ये सोत्कर्षश्वेतद्वीपप्राप्तिकामोऽहमेतच्छयनीयमिति[17] निवेश्यम्[18]। वाक्यानन्तरं प्रीयतां भोगिशायीति वदेत्। स्वस्तिसावित्रीपाठानन्तरम् एतच्छयनं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च[19] स्वीकारः। श्रावणशुक्लद्वादश्यां वस्त्रदानवाक्ये सोत्कर्षविष्णुलोकप्राप्ति-[20]कामोऽहमेतद्वस्त्रमिति [21]निवेश्यम्। स्वस्तिसावित्री-

---

1 A अनन्तमाघे for the b. p.

2 A दानं महाफलमित्यनुसज्यते, I. O. omits महाफलम्

3 A अत्र यत्रापि... तत्रापि स be-fore पौषे in the 1st line of V. 36 above and अत्र यत्रापि द्व समभि...न्नेया here, the two together making up the present sentence.

4 A omits अर्चितम्

5 A ०विचित्र

6 A ०चित्रं

7 A ०पूर्वकः परिधानं

8 A निवेशनीयं

9 I. O. कर्म्म for रुक्म

10 A ज्यैष्ठ

11 A युगल for युग

12 A युगल for युग

13 A ०पानद्द्युगे इति

14 A उत्तानाङ्गीरसोदैवते

15 A छत्रोपानद्युगारोहणञ्च for उपा-नद्···णञ्च

16 A ०विरचिरत

17 A ०च्छयनमिति

18 I. O. reads निवेश्य and omits वाक्यानन्तरं···वदेत्, A निवेशनीयम्

19 A स्पर्शनञ्च

20 A कामनया for कामोऽहम्

21 A निवेशनीयम्

पाठानन्तरं वस्त्रमेतद्बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1][दशाग्रहणपूर्वकं परिधानं] स्वीकारः। [2][भाद्रपदशुक्लद्वादश्यां गोदानवाक्ये गोलोकप्राप्तिकामोऽहमेतां गामिति निवेश्यम्[3]। स्वस्तिसावित्रीपाठानन्तरं गौरियं[4] रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।] आश्विनशुक्लद्वादश्यामश्वदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहिताश्वदानफलप्राप्तिकामोऽह-[5]मेतमश्वमिति निवेश्यम्[6]। वाक्यानन्तरञ्च[7] प्रीयतामश्वशिरा इति[8] वदेत्। स्वस्तिसावित्रीपाठानन्तरमश्वोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। कर्णग्रहणं[9] स्वीकारः। कार्त्तिकशुक्लद्वादश्यां तूलपटी[10]-दानवाक्ये स्वर्गप्राप्तिकामोऽहमेतत्सरोमवस्त्रमिति[11] निवेश्यम्[12]। स्वस्तिसावित्रीपाठानन्तरं वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [दशाग्रहणपूर्वकं परिधानं][13] स्वीकारः। [मार्गशीर्ष[14]-शुक्लद्वादश्यां सैन्धव-साम्भरि-कर्कचाख्यलवणानामन्यतमदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहितान्येतानि[15] लवणान्यहं ददानि। स्वस्तिसावित्रीपाठान्ते लवणान्येतानि समुद्रदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।][16] [17]पौषशुक्लद्वादश्यां धान्यदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-धान्यदानफलप्राप्तिकामोऽहमेतद्धान्यमिति[18] निवेश्यम्। स्वस्तिसावित्रीपाठानन्तरं[19] धान्यमिदं[20] प्रजापतिदैवतमिति[21] प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [22][मुष्टिग्रहणं[23]स्वीकारः।] माघशुक्लद्वादश्यां दारुदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-

---

1 I. O. स्पर्शं and A दशाग्रहणपूर्व्वकञ्च for the bracketed portion
2 I. O. omits the bracketed portion
3 A निवेश्य
4 A गौरीयं
5 I. O. ०मेतदश्वमिति
6 A निवेशनीयम्
7 A वाक्यान्तरञ्च
8 I. O. शिरामिति
9 A कर्णग्रहणञ्च
10 A तूलपट्टी०
11 I. O. ०सरोममिति, A ०सरोमवस्त्रं
12 A निवेशनीयं
13 A omits परिधानं, I. O. स्पर्शनं for the b. p.
14 A मार्गशुक्ल०
15 A ०विहितमेतानि
16 I. O omits the bracketed portion
17 A पौषधान्यदान्यदानवाक्ये
18 A एतानि धान्यानीति for एतद्धान्यमिति
19 A ०पाठान्ते
20 A एतानि धान्यानि
21 A वानस्पत्यानि इति
22 A omits the bracketed portion
23 I. O. स्पर्शग्रहणं

दारुदानफलप्राप्तिकामोऽहमेतानि दारूणीति निवेश्यम्[1]। स्वस्तिसावित्रीपाठानन्तरं दारूण्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्त्वित्यादि पूर्ववत्। स्पर्शनं[2] स्वीकारः। फाल्गुनशुक्लद्वादश्यां परिभाषोक्त-[सर्वगन्धदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित][3]-सर्वगन्धदानफलप्राप्तिकामोऽह-[मेतानि सर्वगन्धानीति निवेश्यम्। स्वस्तिसावित्रीपाठानन्तरं सर्वगन्धा एते गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्त्वित्यादि पूर्ववत्। स्पर्शनं स्वीकारः। सर्वश्चैतन्निवेशनं विष्णुधर्मोत्तरोक्त-द्वादशीविहित-चित्रवस्त्रदानफलप्राप्तिकामोऽह][4] मेतच्चित्रवस्त्रमिति स्थाने कार्य्यम्। एतास्वेव द्वादशीषु[5] तत्तदुक्त-[6]नक्षत्रयुक्तासु तत्तदुक्तद्रव्यदाने[7] फलाधिक्यम्।

तथा हि[8] (३।३१६।३३-३७) :—

[9]भाग्यर्क्षसंयुता चैवं द्वादशी स्यान्महाफला।

[10]भाग्यर्क्षं पूर्वफल्गुनी। महाफलेत्यनन्तरोक्त-द्वादशीविहित-[11][तत्तद्दानफलान्येवात्र] महान्ति भवन्तीत्यर्थः[12]।

हस्तयुक्ता च वैशाखे जैष्ठे च स्वातिना[13] तथा।
[प्रौष्ठपदे तथाषाढे][14] मूलोपेता च वैष्णवे ॥३७॥

वैष्णवे[15] श्रावण इत्यर्थः।

तथा भाद्रपदे मासि[16] [17]श्रवणेन च संयुता।
[18][आश्विने द्वादशी पुण्या भवत्याजर्क्षसंयुता ॥३८॥

आजर्क्षं पूर्वभाद्रपदा।

कार्त्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा।

---

1 A निवेशनीयं
2 A स्पर्शनञ्च
3 A omits the bracketed portion
4 A मेत' सर्व्वगन्ध for the bracketed portion
5 A द्वादशीयुत
6 A ०नक्षत्रयुक्तास्वतदुक्तद्रव्य०
7 I. O. दान
8 A तथा च
9 A भाग्याख्यसंयुता
10 A भाग्यं
11 A तद्दानफलप्राप्तिकामोऽहं एतानि for the bracketed portion
12 I. O. भवतीत्यर्थः
13 A स्वाति
14 A पौष्ठपदे तदाषाढे and I. O. आषाढे for the bracketed portion
15 A omits it
16 A मासे
17 A श्रावणेन तु
18 A omits the bracketed portion

सौम्यो मार्गशीर्षः ।

पौषे मृगशिरोपेता माघे चादित्यसंयुता ॥३९॥]

[1]आदित्यं पुनर्वसु ।

फाल्गुने पुष्यसहिता द्वादशी [2]पावनी परा ।

नक्षत्रयुक्तास्वेतासु तथा दानमुपोषितम् ।

सर्वं महाफलं ज्ञेयमनन्तं द्विजसत्तमाः ॥४०॥

तथा दानमुपोषितमिति [3]यथाप्रोक्तद्रव्याणां दानं महाफलं [4]तथोपवासोऽपि महाफलः । तान्येव तत्तदानोक्तानि [5]फलान्यत्यर्थं ददातीत्यर्थः । एवञ्च [6]सङ्कल्पमपि कुर्य्यात । द्रव्य-दाने तु विष्णुधर्मोत्तरोक्त-पूर्वफल्गुनीयुक्त-द्वादशीविहित-[7]चित्रवस्त्रदानफलप्राप्तिकामोऽहमेतच्चित्र-वस्त्रं ददानि । तथा विष्णुधर्मोत्तरोक्त-हस्तानक्षत्रयुक्त-द्वादशीविहित-रुक्मदानफलप्राप्तिकामोऽ-हमेतद्रुक्ममिति विशेषः । एवं ज्यैष्ठादिष्वपि मासेषु [8]तत्तन्नक्षत्र-[युक्तत्वेन वाक्यरचनोहनीया][9] ।

महाभारते(अनु-६८।१९क-२०क) :—

वैशाख्यां पौर्णमास्याञ्च तिलान् [10][दद्याद् द्विजातिषु] ।

तिला भक्षयितव्याश्च सदा [11]त्वालभनञ्च तैः ।

सदेति प्रत्यब्दमित्यर्थः ।

कार्य्यं सततमिच्छद्भिः [12]श्रेयः सर्वात्मना गृहे ॥४१॥

यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यो[13]ऽर्चितांस्तिलान्[14] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात । महाभारतोक्त-वैशाखपौर्णमासीविहित-[15]तिलदानफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः । कामस्तुत्यादि पूर्ववत् । मुष्टिग्रहणञ्च स्वीकारः । यजमानेन [16]तद्दिने तिलैरुद्वर्तनं[17] तिलभक्षणञ्च कार्य्यम् ।

1 A आदित्य
2 I. O. याचनी
3 A यथाप्रोक्तं द्रव्याणां
4 A उपवासोपि
5 A फलानि
6 I. O. सङ्कल्पोपवासमपि
7 A omits चित्रवस्त्र
8 I. O. तन्नक्षत्र॰
9 A युक्ता for the bracketed portion, I. O. ॰वाक्य वचनो॰
10 A दद्यात् द्विजादिषु, I. O. दत्वा द्विजातिभिः
11 A त्वालोभनञ्च
12 A सदा
13 A omits अर्चितेभ्यो
14 A अर्चिताय तिलान्
15 A omits तिल
16 A तद्दिने, I. O. omits it
17 I. O. तिलैर्वोद्वर्त्तनं

जावालः :—

[1]शृतान्नमुदकुम्भञ्च वैशाख्यान्तु विशेषतः ।
निर्दिश्य धर्मराजाय [2]गोदानफलमाप्नुयात् ॥४२॥

[3]शृतान्नं पक्वान्नम् । वैशाख्यां पौर्णमास्यां [4]धर्मराजायार्चिताय [5]शृतान्नमुदकुम्भं चार्चितं [6]दद्यात् । ॐ अद्य गोदानफलप्राप्तिकामोऽहं [धर्मराजाय शृतान्नोदकुम्भं][7] ददानि । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं [8]भगवते धर्मराजाय दक्षिणामेतत् काञ्चनं ददानि ।

तथा :—

सुवर्णतिलयुक्तैस्तु ब्राह्मणान् सप्त पञ्च वा[9] ।
तर्पयेदुदपात्रैस्तु[10] ब्रह्महत्यां व्यपोहति ॥४३॥

अत्र प्रकरणाद्वैशाख्यामेव यथोक्तसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तावत्संख्यार्चितयथोक्तोदपात्रदानम्[11] । ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । जावालोक्त-सुवर्णतिलसहितोदपात्रदानफलप्राप्तिकामोऽहमेतानि सुवर्णतिलसहितानि उदपात्राणि ददानि । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते उदपात्राण्येतानि[12] वरुणदैवतानीति वदेयुः । [13]स्पर्शनं स्वीकारः ।

यमः :—

वैशाख्यामेव विधिवद् भोजयेद् ब्राह्मणान् दश ।
त्रिरात्रमुषितः स्नात्वा कृषरं प्रयतः शुचिः ॥४४॥

गौरान् वा यदि वा कृष्णान् तिलान् क्षौद्रेण संयुतान् ।
दत्त्वा दशसु विप्रेषु तानेव स्वस्ति वाचयेत् ॥४५॥

---

1 A घृतान्नमुदकुम्भन्तु
2 A गोदाने for गोदान
3 A घृतान्नं
4 A धर्मराजार्चिताय
5 A घृतान्न०
6 A omits it
7 A धर्मराजफलप्रीत्यर्थं उदकुम्भं for the bracketed portion
8 A भगवते वा
9 I. O. and A पञ्चधा
10 A ०पात्रैश्च
11 I. O. ०यथोक्तोदपात्रं दानं, A ०यथोक्त उदकपात्रदानं
12 A उदपात्राण्येति
13 A स्पर्शनञ्च

[1][स्वस्ति वाचयेत्] प्रतिग्रहविधिं कारयेदित्यर्थः ।

प्रीयतां धर्मराजेति [2]पितॄन् देवांश्च तर्पयेत् ।
यावज्जीवकृतं पापं [3]तत्क्षणादेव नश्यति ॥४६॥

[4]पितॄन् देवांश्च तर्पयेदित्यनेन पार्वणश्राद्धं कुर्य्यादित्युक्तम् ।

[5]अयुतायुतञ्च तिष्ठेत स्वर्गलोके न संशयः ।
मामेव तु न पश्येत्तु न च पापेन लिप्यते ॥४७॥

पौर्णमास्याः पूर्वे [6]पञ्चमदिने [7]कृतैकभक्तादिः पूर्ववत् सूर्य्यादिदेवताभ्यस्त्रिरात्रोपवास-[8][पूर्वक-यमोक्त]-वैशाखपौर्णमासी-विहित-मधुतिलदान-ब्राह्मण-[9]कृषरभोजन-[10][कर्म मया कर्तव्यमिति निवेद्य सङ्कल्पयेत् । ॐ श्व आरभ्य] त्रिरात्रमुपोष्यापरेऽहनि[11] पौर्णमास्यां दशभ्यो [12]ब्राह्मणेभ्यो मधुयुक्तांस्तिलान्[13]-चितान् ॐअद्यादि [14]युष्मभ्यमन्तमुक्त्वा दद्यात् । यमोक्तदश-ब्राह्मण सम्प्रदानक-मधु-[15]युक्ततिलदानफलप्राप्तिकामोऽहमेतान् [16]सक्षौद्रान् तिलान् ददानि । प्रीयतां धर्मराजः । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः । कामस्तुत्यादि पूर्ववत् । [मुष्टिग्रहणञ्च स्वीकारः ।][17] ततो [18]यत्नतस्तानेव ब्राह्मणान् कृषरं भोजयेत् । [19]ततः पार्वणविधिना [20]श्राद्धं समधुतिलैरेव कुर्य्यात् । [21]एतत्तु दानं ब्राह्मणक्षत्रिययोरेव [22]वैश्यशूद्रयोस्त्रिरात्रनिषेधात् ।

तथा च महाभारते :—

चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते[23] ।
त्रिरात्रन्तु न [24]धर्मज्ञैरीरितं ब्रह्मवादिभिः ॥४८॥

---

1 A omits the bracketed portion
2 A पितृं
3 I. O. तं क्षणादेव
4 I. O. पितॄन् देवांस्तर्प०, A पितृं देवांश्च तर्प०
5 A अयुतायुतं
6 I. O. पञ्चदिनं
7 A कृतैकभक्तादि
8 A पूर्वोक्त for the bracketed portion
9 A omits कृषर
10 I. O. विवास्य इति सङ्कल्प्य for the bracketed portion
11 I. O. omits अपरेऽहनि
12 A omits it
13 A omits तिलान्
14 I. O. तुभ्यं for युष्मभ्यम्
15 A घृत for युक्त
16 A घृतक्षौद्र
17 A omits the bracketed portion
18 A यत्र स्थाने
19 A तत्र
20 A श्राद्धं
21 A तत्त
22 A वैश्यवैश्यशूद्रयो त्रिरात्रं निषेधात्
23 A विधीयधीयते
24 I. O. धर्मज्ञविहितं

तथा :—

वैशाख्यां पौर्णमास्याञ्च[1] ब्राह्मणान् सप्त [2]पञ्च वा ।
क्षौद्रयुक्तैस्तिलैः कृष्णैर्वाचयेद्[3] यदि वेतरैः[4] ॥४६॥

[5]इतरैः श्वेतैस्तिलैः । [6]कृष्णैर्वाचयेदिति तिलांस्तेभ्यो दत्त्वा [प्रीयतां धर्मराजेति तानर्चयेदित्यर्थः ।][7]

[8]प्रीयतां धर्मराजेति यद्वा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥५०॥

यद्वा मनसीति इष्टदेवताप्रीतये[9] वा । तदा चामुकदेवता प्रीयतामिति [10]प्रतिवचनम् । वैशाख्यां पौर्णमास्यां सप्तभ्यः पञ्चभ्यो [ब्राह्मणेभ्योऽर्चितेभ्यो][11]ऽर्चितान् समधुतिलान् ॐ अद्यादि[12]युष्मभ्यमन्तमुक्त्वा दद्यात् । यावज्जीवकृतपापक्षयप्राप्ति[13]-कामोऽहमेतान् [14]सक्षौद्रान् तिलान् ददानि । प्रीयतां धर्मराजेति [अमुकदेवता इति][15]वा ब्रूम [16][इति ब्राह्मणान् वदेत् । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठित्वा प्रीयतां धर्मराज इति अमुकदेवता इति वा ब्रूयुः ।] दक्षिणा पूर्ववत् । [17]मुष्टिग्रहणञ्च स्वीकारः ।

[18]विष्णुः :—

अथ वैशाख्यां पौर्णमास्यां कृष्णाजिनं सखुरं मुक्तालाङ्गूलभूषितं कृत्वा आविके वस्त्रे प्रसारिते [प्रसारयेत्ततस्तिलैः][19]प्रच्छादयेत् । [20]सुवर्णनाभत्वं कुर्य्यात् । [21][अहतेन

1 A पौर्णमास्यान्तु
2 A पञ्चधा
3 I. O. and A वाचयेद्
4 I. O. वेतनैः
5 A omits it
6 I. O. क वाचयेदिति
7 I. O. omits it, A प्रियता धर्मराजेति तान्वाचयेदित्यर्थः for the b. p.
8 A प्रियतां
9 A ॰प्रीतिर्वा
10 I. O. वाचनम्
11 A omits the bracketed portion
12 A युष्मम् and I. O. तुभ्यम् for युष्मभ्यम्
13 A omits प्राप्ति
14 A सक्षौद्रतिलान्
15 A omits the bracketed portion
16 A omits the bracketed portion
17 I. O. स्वस्तिग्रहणञ्च
18 A omits it
19 A तिलैः for the bracketed portion
20 I. O. सुवर्णनाभित्वं
21 A आहतेन वासयुगेन for the bracketed portion
22 A चेति for चतत्त्व

वासोयुगेन] प्रच्छादयेत्। सर्वरत्नगन्धैश्चालङ्कुर्य्याच्चतसृषु[22] दिक्षु चत्वारि तैजसानि पात्राणि क्षीरदधिमधुसर्पिःपूर्णानि [1]निधायाहिताग्नये ब्राह्मणाय [2]वासोयुगप्रच्छादिताय दद्यात् ॥५१॥

अत्र च [3]गाथा भवन्ति :—

यस्तु कृष्णाजिनं दद्यात् सखुरं शृङ्गसंयुतम्।
तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ॥५२॥
ससमुद्रगुहा तेन सशैलवनकानना।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥५३॥

वैशाख्यामाहिताग्नये ब्राह्मणायार्चिताय वस्त्रयुगेनाच्छादिताय शृङ्गखुरयुक्तं मुक्ताभूषितलाङ्गूलं[4] कम्बलोपरि प्रसार्य्य यथोक्तोपकरणयुक्तं कृष्णाजिनमभ्यर्च्य ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णूक्त-वैशाखपौर्णमासीविहित-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतन्मुक्ताभूषितलाङ्गूलमाविकवस्त्रस्थं[5] तिलप्रच्छादितं [6]सुवर्णनाभमहत[7]-वासोयुगप्रच्छादितं सर्वरत्नसर्वगन्धक्षीरदधिमधु[8]-सर्पिःपूर्णतैजस[9]-पात्रचतुष्टययुतं कृष्णाजिनं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते कृष्णाजिनमिदं प्रजापतिदैवत-[मिति वदेत्।][10] कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।

वैशाखाधिकारे वशिष्ठः :—

कृष्णाजिने तिलान् दत्त्वा[11] हिरण्यं मधुसर्पिषम्[12]।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥५४॥

वैशाखपौर्णमास्यां जन्मसंस्कारविद्यायुक्ताय ब्राह्मणायार्चिता-[13]योक्तोपकरणयुतं कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। समस्तदुष्कृतनिस्तार[14]-प्राप्तिकामोऽहमेतत्तिलाच्छादितं[15] हिरण्यमधुसर्पिर्युतं[16] कृष्णाजिनं ददानि। स्वस्त्यादिस्वीकारान्तमनन्तरोक्तदानवत्।

---

1 A विधायाह्निताग्नये
2 A वासः प्रच्छादिताय
3 A शाखा
4 A मुक्तालाङ्गुल'
5 A ०वस्त्रस्थ
6 I. O. सुवर्णनाभि०
7 A आहत for अहत
8 A omits मधु
9 I. O तिल for तैजस
10 I. O. मित्युक्ता for the bracketed portion
11 A कृत्वा
12 A मधुसर्पिसी
13 I. O. ०योक्त उपकरणयुत', A ०योक्तपकरणयुत'
14 A ०तरण
15 I. O. ०च्छान्नित
16 A ०सर्पियुक्त'

तथा वैशाखाधिकारे :—

सुवर्णनाभं कृत्वा तु सखुरं कृष्णमार्गकम् ।
तिलैः प्रच्छाद्य यो दद्यात्तस्य पुण्यफलं[1] शृणु ॥५५॥
ससमुद्रगुहा तेन सशैलवनकानना ।
चतुरन्ता[2] भवेद्दत्ता पृथिवी नात्र संशयः ॥५६॥

वैशाख्यां पौर्णमास्यां ब्राह्मणायार्चिताय कृष्णाजिनमुक्तरूपमुक्तोपकरणमर्चितम्[3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वशिष्ठोक्त-सुवर्णनाभकृष्णमृगाजिनदानफलप्राप्तिकामोऽह-मेतत् सुवर्णनाभं तिलप्रच्छादितं कृष्णमार्गकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

कूर्मपुराणे (२।२६।२३) :—

[4]शृतान्नमुदकुम्भञ्च [5]वैशाख्याञ्च विशेषतः ।
निर्दिश्य धर्मराजाय विप्रेभ्यो मुच्यते भयात् ॥५७॥

यथेच्छसंख्यब्राह्मणेभ्योऽर्चितेभ्यो[6]ऽर्चितानुदकुम्भान् [7]शृतान्नानि [8]चार्चितानि ॐ अद्यादि [9]युष्मभ्यमन्तमुक्त्वा दद्यात् । [10]भयमुक्तिकामोऽहमेतानि [11]शृतान्नानि एतानुदकुम्भान् ददानि । [12]धर्मराजः प्रीयताम् । ततः स्वस्तिसावित्रोपाठानन्तरं [13]शृतान्नमिदं प्रजापति-दैवतमुदकुम्भोऽयं[14] वरुणदैवत इति प्रत्येकं प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [15]स्पर्शः स्वीकारः ।

तथा (२।२६।१९-२१) :—

वैशाख्यां पौर्णमास्याञ्च[16] ब्राह्मणान् सप्त पञ्च वा ।
उपोष्य विधिना शान्तान्[17] [शुचिः प्रयतमानसः][18] ॥५८॥
पूजयित्वा तिलैः कृष्णैर्मधुना च विशेषतः ।
[19][गन्धादिभिः समभ्यर्च्य वाचयेद्वा स्वयं वदेत् ॥५९॥]

---

1 A फलं for पुण्यफलं
2 A चतुरन्ता
3 I. O. युक्तं for मर्चितम्
4 A शृतञ्च and K. P. कृतान्न for शृतान्न
5 A वैशाख्याञ्च
6 A अर्चिते for अर्चितेभ्यो
7 A शृतान्नानि
8 A omits चार्चितानि
9 A युष्मभ्यमुक्त्वा
10 I. O. उभययुक्त for भयमुक्ति
11 A शृतान्नानि
12 A धर्मराज
13 A शृतान्नमिदं
14 A उदकुम्भो for उदकुम्भोऽयं
15 A स्पर्शश्च
16 K. P. ०स्तु
17 Supplied from K. P. I. O. शस्तान्, A नेन
18 K. P. शुचीन् प्रयतमानसाः for the b. p.
19 Supplied from K. P. I. O. and A omit it

प्रीयतां धर्मराजेति यद्वा[1] मनसि वर्तते ।
[2]यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥६०॥

यद्वा मनसि [वर्तत इत्यभीष्ट][3]-देवताप्रीतये वा। वैशाखपौर्णमास्याः पूर्वतरदिने [4]कृतैक-भक्तादिः पूर्ववत् सूर्य्यादिदेवताभ्य उपवासपूर्वक-[5]कूर्मपुराणोक्त-समधुतिलदानकर्म मया कर्तव्यमिति निवेद्य सङ्कल्पं कुर्य्यात्। ॐ श्व उपोष्य पञ्चदश्यां [6]पूजापूर्वकसमधुतिलदान-कर्माहं करिष्ये। ततो नियमेन सुप्त्वाऽपरदिने उपोष्यापरदिने स्नातः शुचिः शान्तमनाः स्वेच्छया सप्त पञ्च वा शान्तान् [7]ब्राह्मणानभ्यर्च्य तेभ्यो ब्राह्मणेभ्यो[8] मधुसहितान् कृष्णतिलान् ॐ अद्यादि [9]युष्मभ्यमन्तमुक्त्वा दद्यात्। यावज्जीवकृत-पापक्षयकामोऽहमेतान् [10]समधून् तिलान् ददानि। [11][धर्मराजः प्रीयताम् अमुकदेवो वा प्रीयताम्।] प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः। कामस्तुत्यादि पूर्ववत्। [12]मुष्टिग्रहणं स्वीकारः।

आदित्यपुराणे :—

ज्यैष्ठे मासि तिलान् दत्त्वा पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत् पुण्यं तत् प्राप्नोति न संशयः ॥६१॥

ज्यैष्ठपौर्णमास्यां ब्राह्मणायार्चितायार्चितान् तिलान्[13] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अश्वमेधफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि। प्रतिग्रहीता स्वस्तिसावित्री-पाठान्ते एते तिलाः प्रजापतिदैवता इति वदेत्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणञ्च स्वीकारः।

आग्नेयपुराणे :—

एतच्छ्रुत्वाम्बरीषोऽपि वशिष्ठं प्रत्यभाषत ।
कथं [वृषे च धेनूनां][14] दशानां फलमिष्यते ॥१॥

---

1 A दत्त्वा
2 Corrected from K. P. I. O. and A यावज्जीवन्तु तत्
3 I. O. वर्त्तन्त इतीष्ट for the bracketed portion
4 A कृतैततत्कभक्तादि
5 A ब्रह्मपुराणोक्त
6 I. O. पूजापूर्वकमधुतिल०, A समधुकतिल०
7 A omits ब्राह्मणान्
8 I. O. omits ब्राह्मणेभ्यो
9 A मध्वभ्यमनुमुक्त्वा
10 A समधु
11 A धर्मराजः प्रीयतामिति। अमुकप्रदेवो वा प्रीयतामिति for the bracketed portion
12 A स्वस्तिग्रहणञ्च
13 A omits तिलान्
14 A वसिष्ठ वृषैका for the b. p.

सर्वमेतन्ममाचक्ष्व प्रवक्तु[1] [2]कुशलोऽह्यसि ।
[3][तमाह स] वशिष्ठोऽपि शृणुष्व गदतो मम ॥२॥
[4]त्वमेकाग्रमना भूत्वा महर्षे[5] दानमुत्तमम् ।
[6][यतो नाभ्यधिकं] किञ्चित्त्रिषु लोकेषु विद्यते ॥३॥
यद्दत्त्वा दिति-[7][जोऽप्येष बली] राजा समाहितः ।
रसातलगतो भुङ्क्ते दिव्यान् भोगाननुत्तमान् ॥४॥

तथा :—

[8]सुरवसुचक्र × × नाथोऽयं दिवि मोदते ।
[9]यद्दानेन नरश्रेष्ठ त्रैलोक्यैश्वर्य्यबृंहितः[10] ॥५॥
तथान्येऽपि हि राजानो धर्मकृत्येषु ये मताः ।
तत्र [11]तद्दानमाहात्म्याद्गता पुण्यकृतां गतिम् ॥६॥
[12]आषाढपौर्णमास्यान्तु मिथुनस्थे दिवाकरे ।
श्रद्दधानैर्जितक्रोधैर्देयमेतद् यथाविधि ॥७॥
जाम्बूनदस्य शुद्धस्य पलैस्त्रिंशति-[13]भिस्तथा ।
[14][तदर्धमर्धमर्धेन यथाशक्ति पलैस्त्रिभिः ॥८॥]

[15]तदर्धं तदर्धमयं पञ्चदशपलमयमित्यर्थः । [16]तदर्ध-[स्यार्धं पलसप्तकमयमित्यर्थः [17]अर्धपादेन][18] पलचतुष्टयेन वा कुर्य्यादित्यर्थः ।

द्वाभ्यामेकेन वा कुर्य्या-[19]द्वृषं सर्वाङ्गशोभनम् ।
पलादूनो न[20] कर्तव्यो दुःखशोकभयावहः[21] ॥९॥

---

1 I. O. प्रवक्तुं
2 A केशवोह्यसि
3 A ततमोह for the bracketed portion
4 A एकाग्रमनसो
5 A राजर्षे
6 A येन नास्त्यधिकं for the b. p.
7 A ज्योप्रेष फली for the bracketed portion
8 I. O. omits this
9 I. O. यद्दाशेन
10 I. O. त्रैलोक्यैश्वर्यबृंहितः
11 I. O. ॰माहात्म्या कृता
12 A आषाढे
13 A ॰शोभनं
14 A तदर्धमर्धेन यथा यथाशक्ति पलैस्त्रिभिः for the bracketed portion
15 I. O. omits this
16 I. O. तदर्धसार्धं॰
17 I. O. अर्धपादेन
18 A omits the bracketed portion
19 A ॰वृषं पक्षाङ्गशोभनं
20 A पलादूनोन, I. O. फलादूनोन
21 I. O. ॰भयापहः

मण्डपं कारयेद्दिव्यं पराध्यर्यपटनिर्मितम् ।
तन्मध्ये तण्डुलैः शुक्लैर्मण्डलं कारयेच्छुभम् ॥१०॥

पराध्यर्यमुतकृष्टम् ।

ततः प्रभाते विमले समुत्थाय जितेन्द्रियः ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥११॥
कृतनित्यक्रियः शुक्लरत्नमाल्यविभूषितः ।
नरो वा यदि वा नारी दिव्यभोगाभिलाषिणी ॥१२॥

शुक्लरत्नं मुक्ता ।

सितवस्त्रयुगच्छन्नं स्थापयित्वा ततो वृषम् ।
सुवर्णमण्डपे तस्मिन् सुरत्नैर्बहुभिश्चितम ॥१३॥
चन्दनागुरुकर्पूरैः[1] सुमनोभिस्तथा सितैः[2] ।
सम्पूजयेत्ततः सम्यङ्मन्त्रैः पुराणसम्मितैः ॥१४॥
नमस्ते जगदाधार प्रियः पुण्यकृतामसि ।
त्वद्विहीने जगत्यस्मिन्न कश्चिच्छुभमश्नुते ॥१५॥
नमस्ते धर्मराजाय वृषरूपधराय वै ।
त्वं मामुद्धर देवेश दुःखसंसारसागरात् ॥१६॥
यशः कीर्त्तिर्धनं धान्यं यदन्यदपि संस्तुतम् ।
तत् प्रयच्छेह देवेश परत्र च शुभां गतिम् ॥१७॥
इति सम्पूज्य विधिवत्तं [3]देवं वृषरूपिणम् ।
नैवेद्यं सम्भवेत्तत्र हविषा निर्मितं शुभम् ॥१८॥
कालोद्भवं[4] मूलफलं [5]सर्वं देयं समन्ततः ।
हविष्यान्नेन [6]भुञ्जीत भोजयित्वा द्विजोत्तमान् ॥१९॥
सायाह्ने च ततः कुर्य्यात् पुष्पं गृहमनुत्तमम् ।
[7][सितपुष्पैः शुभैर्गन्धलुब्धमाधुकरालयैः ।२०॥]

---

1 I. O. चन्दनागुरुकपूरै, A चन्दाना-गुरुकर्पुरैः
2 I. O. सुमनोभिस्तस्तथासितैः
3 I. O. दैवं
4 I. O. कालोद्भव
5 I. O. सर्व्वं, A omits it
6 I. O. भुञ्जात
7 A सितवस्त्रैः शुभैः गन्धैर्बद्धैर्म कराालयः for the bracket portion

फलमूलानि धान्यानि दीपाः शुक्लदशान्विताः ।

[1][घृतपूर्णास्तु कर्त्तव्याः] [2][सम्प्रद्योतितमण्डपाः ॥२१॥

दशा वर्त्तिः ।

रात्रौ जागरणं कार्य्यं देवदेवस्य सन्निधौ ।

वारमुख्यासमानार्य्यगन्धर्वानतिसौख्यदान् ॥२२॥

गन्धर्वानतिगायनान् ।

गीतवादित्रशब्देन ब्रह्मघोषरवेण च ।

नर्मालापैश्च नृत्यैश्च गमयेत्तां निशां ततः ॥२३॥

अरुणोदयवेलायां] समुत्थाय जितेन्द्रियः ।

पूजयित्वा [3]द्विजानत्र गोहिरण्यैर्नरोत्तम[4] ॥२४॥

वृषरूपं तनो धर्मं प्रीयतां वृषभध्वजः ।

इत्युच्चार्य्य [5]परं मन्त्रमाचार्य्याय निवेदयेत् ॥२५॥

दत्त्वा दानमिदं [6]सर्वं विधिनानेन [7]पार्थिवः ।

[8][कुर्य्याद्दिग्विजयं विप्रो वेदकर्म समारभेत् ।

वैश्यः[9] समुद्रगमनं [10]शूद्रः कर्म यथेप्सितम् ॥२६॥

फाल्गुन्यामथवा दद्याद दानमेतन्नृपोत्तमः ।

रौद्रं पर्वणि [11]निर्दिष्टं ब्रह्मणः शङ्करस्य हि ॥२७॥]

[12]सौराषाढपौर्णमास्याः पूर्वतरदिने प्रातः स्नात्वा [13]कृतनित्यो गृहीतोदपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्य्यात् । तद्यथा— ॐ आग्नेयपुराणोक्त-पूर्वदिन[14]-हविष्यभोजनपूर्वक-वृषदान-कर्माहं करिष्ये । ततो यथेष्ट-[15]मुत्कृष्टवस्त्रमयमण्डपं कारयित्वा तन्मध्ये सिततण्डुलै-

---

1 A घृतपूर्णान्तु कर्त्तव्यः for the bracketed portion

2 A omits the bracketed portion

3 A द्विजान तत्र

4 A नरोत्तमाः for नरोत्तम

5 I. O. नरं

6 I. O. सर्व्वौ

7 I. O. पार्थिव

8 I. O. omits the bracketed portion

9 A वैश्य

10 A पूर्व्व

11 A निर्दिष्टं

12 I. O. सौराषाढस्य

13 I. O. कृतनित्य

14 I. O. पूर्व्वदिने

15 A ०मुक्तावस्त्रमयं मण्डपं

मण्डलं[1] कुर्य्यात्। ततो [2]परदिने प्रातः[3]कृतनित्यः शुक्लमाल्याम्बरधरो[4] [5]भृतमुक्ताहारः पूर्वोक्तमण्डले शक्त्यनुरूप-[6]मुक्तपरिमाणानामन्यतमपरिमाणेन[7] सुवर्णेन घटितं [8]यथेच्छ-रत्नखचितं वृषं स्थापयित्वा सितवस्त्रयुगेनाच्छाद्य यथाशक्त्युक्तोपचारैरुक्तमन्त्रैश्च सम्पूज्याभीष्ट-संख्यब्राह्मणेभ्यो भोज्यानि दत्त्वा स्वयं हविष्यं भुक्त्वा सायं पुष्प-[9]गृहविरचनादिपूर्वकमुक्तक्रमेण रात्रौ जागरणं कुर्य्यात्। अपरदिने कृतनित्यः सूर्य्योदयसमये यथेच्छसंख्यान् [10]ब्राह्मणान् गोभिर्हिरण्यैश्चाभ्यर्च्य[11] साङ्गवेदविदं ब्राह्मणमभ्यर्च्यार्चितं वृषं[12] तस्मै [13]ॐ अद्यादि तुभ्यमहमुक्त्वा दद्यात्। आग्नेयपुराणोक्त-पूर्वदिनहविष्यभोजनपूर्वक-वृषदानफलप्राप्तिकामोऽहमेतं तण्डुलारोपितं विविधरत्नखचितं[14] वस्त्रयुगाच्छादितं वृषभं[15] ददानि। प्रीयतां वृषभध्वजः। ततः प्रतिग्रहीता स्वस्तिसावित्रीपाठानन्तरं वृषोऽयं [विष्णुदैवत इति वदेत्][16]। कामस्तुत्यादि पूर्ववत्। [17][पुच्छग्रहणञ्च स्वीकारः। फाल्गुनपौर्णमास्यां वा अनेन विधिना वृषमेतं दद्यात्।

विष्णुधर्मोत्तरे (३।३१६।२२-२४क) :—

माघ्यां कृत्वा तिलैः श्राद्धं सर्वपापैः प्रमुच्यते ॥१॥

अत्र पार्वणविधिना तिलैः श्राद्धकरणं सुगमम्।

तथा :—

[18]स्वास्तीर्णशयनं दत्त्वा फाल्गुन्यां ब्राह्मणाय तु।
रूपद्रविणसम्पन्नां भार्य्यां [19]पत्नवतीं तथा ॥२॥

[20]स्वास्तीर्णं दारुमयखट्टोपरि-सुप्रसारित- तूलिकादिरूपं पत्नवतीं कुटुम्बिनीम्।

नरः प्राप्नोति धर्मज्ञाः पुष्टिमाप्नोत्यनुत्तमाम्।
तथा नार्य्यपि भर्त्तारं नात्र कार्य्या विचारणा ॥३॥

---

1 A सिततण्डुलैर्मण्डलं
2 I. O. परद्दिने
3 A कृतनित्यं
4 A शुक्लमाल्याम्बर
5 I. O. and A वृतमुक्ताहारः
6 I. O. युक्त for मुक्त
7 A ०परिमाण
8 A यथेष्ट बहुवर्णैश्चित्रितं
9 A omits गृह
10 A omits it
11 A गोभिर्हिरण्यश्चाभ्यर्च्य I. O. गोभिर्हिरण्यैः
12 I. O. omits it
13 A omits it
14 A विविधवर्णखचितं
15 A वृषं
16 A विष्णुदैवतं for the bracketed portion
17 A omits the bracketed portion
18 I. O. आस्तीर्णं
19 I. O. यत्नवतीं
20 I. O. स्वास्तीर्णां

धर्मज्ञा इति सम्बोधनम् । नार्य्यपि [1]यज्ञवत्त्वादिगुणयुक्तं भर्त्तारं प्राप्नोतीत्यर्थः । यथाशक्ति शय्यामुपकल्प्यार्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तपौर्णमासीविहित-शयनदानफलप्राप्तिकामोऽहमेतत् स्वास्तीर्णं शयनं ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते शयनमिदं प्रजापतिदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् ।] स्पर्शनं स्वीकारः ।

[2]तथा (३।३१६।२-३क) :—

संप्राप्य चैत्रमासस्य [3]शुक्लां पञ्चदशीं नरः ।
चित्रवस्त्रयुगं [4]दत्त्वा सोपवासो द्विजातये ।
ब्राह्मणां-[5]स्तर्पयन् विप्राः सौभाग्यं महदाप्नुयात् ॥४॥

दानपूर्वतरदिने पूर्ववद्धविष्याहारादि [6]कृत्वा सूर्य्यादिदेवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त-चित्रवस्त्र-[7]युगदान-ब्राह्मण-[8]तर्पणकर्म मया कर्तव्यमिति निवेद्य सङ्कल्पयेत । [9]ॐ श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-चित्रवस्त्रयुगदान-ब्राह्मणतर्पणकर्माहं करिष्ये । ततो नियमेन सुप्त्वा परदिने [उपोष्यापरदिनेऽर्चिताय][10] ब्राह्मणाय चित्रवस्त्रयुगमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महासौभाग्यप्राप्तिकामोऽहमेतच्चित्रवस्त्रयुगं ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रयुगमिदं बृहस्पतिदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । दशाग्रहणपूर्वकं परिधानं[11] स्वीकारः । ततो यथेच्छं[12] सुवर्णवस्त्रभोज्यादिना[13] ब्राह्मणां-स्तर्पयेत् ।

तथा :—

वैशाखपौर्णमास्यनुवृत्तौ[14] (३।३१६।५ख-६) :—

[15]तस्मिन्नेव तथाकाले [16]सखुरं कृष्णमार्गणम्[17] ।

---

1 I. O. यत्त०
2 A omits it
3 A शुक्ला
4 I. O. हष्ट्वा
5 A ०स्तर्पयेच्च
6 I. O. भूत्वा, A हत्वा
7 A ०युगव०
8 A ०सन्तर्पण०
9 A omits it
10 A अर्चिताय for the bracketed portion
11 I. O. परिधान
12 A यथेष्ट०
13 A ०भोज्यामि द्विना
14 I. O. ०स्यानुवृत्तौ
15 A अस्मिन्नेव
16 I. O. सुखरं
17 I. O. कृष्णमार्गकं

तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ।
[1]तपस्विने तु दातव्या मही सवनकानना ॥५॥

[2]सर्वरत्नानि परिभाषोक्तानि । एवम्भूतकृष्णाजिनमेव [3]सवनकानना मही । [4][कृष्णाजिनदाने तथाभूतमही]-दानफलमेव भवतीत्यर्थः । तपःशालिनं ब्राह्मणमभ्यर्च्य तस्मै यथोक्तमुक्तोपकरणसहितं[5] कृष्णमृगाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्नमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त[6]--पौर्णमासीविहित--[7][कृष्णाजिनदान]--फलप्राप्तिकामोऽहमेतत्तिलप्रच्छादितं [8]वस्त्राच्छादितं [9]सर्वरत्नालङ्कृतं कृष्णमार्गणं ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते कृष्णमार्गणमिदं प्रजापतिदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । पुच्छग्रहणं[10] स्वीकारः ।

तथा (३।३१६।८):—

सोपवासस्तथा ज्यैष्ठे पूर्ण[च शश][11]-लक्षणे ।
उपानहौ तथा छत्रं [दत्त्वात्यन्तं सुखी][12] भवेत् ॥६॥

तथेति [13]देयसमुच्चयार्थम् । ज्यैष्ठपौर्णमासीपूर्वतरदिने पूर्ववद्घटिकाधिकप्रहरत्रये[14] हविष्याहारादिकं कृत्वा सूर्य्यादिदेवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त पौर्णमासीविहित-च्छत्रोपानद्युगदान-[15][कर्म [16]मया कर्तव्यमिति निवेद्य[17] सङ्कल्पयेत् । ॐ श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-च्छत्रोपानद्युगदान]-कर्माहं करिष्ये । [18]ततो नियमेन सुप्त्वा परदिने उपोष्यापरदिने अर्चिताय ब्राह्मणाय उपानद्युगं[19] छत्रं चार्चितम्[20] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात । अत्यन्तसुखप्राप्तिकामोऽहमेतदुपानद्युग[21]-मेतच्छत्रं ददानि ।

---

1 A तपसन्ते
2 A सर्व्ववनि
3 A शरणकानना
4 I. O. omits the bracketed portion
5 I. O. °सहित
6 A विष्णुधर्मोक्त°
7 A कृष्णाजिन for the bracketed portion
8 A omits this
9 A सर्व्वरत्नोलङ्कृतं
10 A पुच्छग्रहणम
11 A दमस for the bracketed portion
12 A दत्वान्तं सुसुखी for the b. p.
13 I. O. देवसमुच्चयार्थं, A देहसंस्ट-पातम्
14 A °घटिकाधिकाधिकप्रहरये
15 I. O. omits the b. p.
16 A omits कर्म
17 A निवेषण
18 I. O. reads ततो नियमेन सुप्त्वा परदिने उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-च्छत्रोपानद्युगदानकर्माहं करिष्ये between करिष्ये and ततो
19 A उपानद्युगलं
20 A अर्चितं, I. O. चार्चितं
21 A उपानद्युगल°

प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते एतदुपानद्युगमुत्तानाङ्गिरोदैवत-[मेतच्छत्रं प्रजापतिदैवत][1]-मिति वदेत्। कामस्तुत्यादि पूर्ववत्। उपानद्युगारोहणं[2] छत्रदण्डग्रहणञ्च स्वीकारः।

तथा (३।३१९।९क) :—

आषाढ्यामन्नदानेन प्राप्नोत्यन्नं नरो बहु।

ब्राह्मणायार्चितायान्नमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। प्रचुरान्नप्राप्तिकामोऽहमेतदन्नं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [3]स्पर्शनं स्वीकारः[4]।

[5][[6]तथा(३।३१९।९ख) :—

जलधेनुप्रदानेन श्रावण्यां शुभमाप्नुयात्॥७॥

विष्णुधर्मोत्तरोक्तविधिना जलधेनुमुपकल्प्यार्चितामर्चिताय ब्राह्मणाय[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [8]शुभप्राप्तिकामोऽहमेतां जलधेनुं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते जलधेनुरियं विष्णुदैवतेति वदेत्। कामस्तुत्यादि पूर्ववत्।]

तथा (३।३१९।१०क) :—

गोदानं [9]प्रौष्ठपादे तु पौर्णमास्यां महाफलम्॥८॥

प्रौष्ठपादे[10] भाद्रपदे ब्राह्मणायार्चिताय [11]गामर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाफलप्राप्तिकामोऽहमेतां गां ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते गौरियं रुद्रदैवतेति वदेत्। [12][कामस्तुत्यादि पूर्ववत्।] पुच्छग्रहणं स्वीकारः।

तथा (३।३१९।१०ख-११क) :—

[13]अश्वयुक्तु कांस्यपात्रं [घृतपूर्णं द्विजातये][14]।
[15]ससुवर्णं तथा दत्त्वा [16]दीप्ताङ्गस्त्वभिजायते॥९॥

---

1 A omits the bracketed portion
2 A ०रोहन
3 A स्पर्शनञ्च
4 I. O. स्वीकारं
5 A omits the bracketed portion
6 I. O. omits तथा
7 I. O. adds अर्चिताय after this
8 I. O. स्वर्ग for शुभ
9 A प्रोष्ठपदे
10 A प्रोष्ठपदं
11 A omits it
12 I. O. omits the bracketed portion
13 A अश्वयुक्ति, I. O. अश्वयुक्
14 I. O. घृतपूर्णद्विजातये for the b. p.
15 I. O. ससुवर्णं
16 A दीप्ताङ्गस्त्वाभिजायते

अर्चिताय ब्राह्मणाय कांस्यपात्रं घृतेन पूरयित्वा सुवर्णं [1]तन्मध्ये दत्त्वार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दीप्ताङ्गप्राप्तिकामोऽह-[2]मेतद्घृतपूर्णं [3]ससुवर्णं कांस्यपात्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते [4]कांस्यपात्रमिदं विष्णुदैवतमिति वदेत्। [5][कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा :—

अश्वयुक्कृष्णपक्षे तु या तु पञ्चदशी भवेत्।
विष्णुद्वारेषु दातव्यास्तदा दीपा यदूत्तम।]
अन्यत्रापि तदा दीपैर्महत् पुण्यफलं लभेत ॥१०॥

अन्यत्रापीत्यादि-[6]त्यपुराणोक्तदानेषु।

तथा चादित्यपुराणे[7] :—

प्रदोषसमये लक्ष्मीं[8] पुजयित्वा यथाक्रमम्।
दीपवृक्षास्ततः कार्य्याः[9] शक्त्या देवगृहेषु च ॥११॥
चतुष्पथश्मशानेषु नदीपर्वतवेश्मसु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥१२॥

[पर्वतवेश्मसु गुहासु।][10] आश्विनपौर्णमास्यनन्तरिता[11]-याममावास्यायां विष्णुद्वारेषु[12] आदित्यपुराणोक्तस्थानेषु च दीपं गृहीतोदपूर्णताम्र-[पात्र उद][13]ङ्मुखः सङ्कल्प्य[14] दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्ताश्वयुक्[15]-कृष्ण[16]-पञ्चदशीविहित-दीपदानफलप्राप्तिकामोऽहं विष्णु[17]-द्वारादिनानास्थानेषु दीपान् दास्ये इति सङ्कल्प्य तत्तत्स्थानेषु शरावस्थान् दीपान् दद्यात्।

1 A तन्मध्ये
2 A omits मेतद्
3 A स्वसुवर्णं
4 A कांश्यपात्रमिदं
5 A omits the bracketed portion
6 I. O. omits त्य and reads स्थानेषु for दानेषु, A reads the whole line as अन्यत्रापि आदित्यपुराणोक्तदानेषु
7 I. O. चादिपुराणे, A चादिपुराणं
8 A लक्ष्मं
9 I. O. कुर्या:
10 A पर्व्वतवेश्मसु गृहासु for the b. p.
11 I. O. ०मास्यान्तरिता०
12 A विष्णुद्वारेषु
13 A मुद for the bracketed portion
14 A सङ्कल्प्यं
15 A युक for श्वयुक्
16 A कृष्णपक्ष for कृष्ण
17 A विष्ण०

तथा (वि. ध. ३।३१६।११ख-१४क) :—

कार्त्तिक्यां चन्द्रवर्णाभमन्यवर्णमथापि वा ।

[1]रत्नैर्गन्धैस्तथा धान्यैर्बीजै[2]-र्वस्त्रैस्तथैव च ॥१३॥

अत्र चन्द्रवर्णाभवर्णस्य पृथग् ग्रहणात् [सातिशयत्वमतस्तदभावे अन्यवर्णदानम्][3] ।

[कृत्वा युक्त][4]-मथोक्षाणं दत्त्वा दीपान् समन्ततः ।

चन्द्रोदये नरो दत्त्वा सर्वपापैः प्रमुच्यते ॥१४॥

कान्तारे यममार्गे तु तेनासौ व्रजते सुखम् ।

सर्वाणि चास्य[5] भोगानि तत्र चासौ प्रयच्छति ॥१५॥

अर्चिताय ब्राह्मणाय चतुर्दिग् दत्तदीपचतुष्टयमभ्यस्थापितं यथोक्तवर्णं नव-[रत्न-सप्त][6]-धान्य-कुष्माण्डादिवीजकर्पूरागुरुचन्दनकस्तूरी[7]-युक्तं वस्त्रैराच्छादितं[8] वृषभमर्चितं[9] चन्द्रोदये ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त पौर्णमासीविहित-चन्द्राभोक्ष[10] दानफलप्राप्ति-कामोऽहमेतं [11]रत्नगन्धधान्यबीजवस्त्रदीपचतुष्टययुक्त[12]-मुक्षाणं ददानि । प्रतिग्रहीता स्वस्ति-सावित्री-[पाठान्त उच्चार्य विष्णुदैवत इति][13] वदेत् । कामस्तुत्यादि पूर्ववत् । पुच्छग्रहणं स्वीकारः । अन्यवर्णदाने तु तत्तद्वर्णोल्लेखः[14] कार्य्यः ।

तथा :—

दीपा नदीषु दातव्याः कार्त्तिक्यान्तु विशेषतः ।

कार्त्तिक्यां कार्त्तिकपौर्णमास्यां[15] । अत्र विशेषत[16] इति पददर्शनात् विष्णुधर्मोत्तरोक्त[17]-मेव फलम् ।

× × × × × ×

तेजस्वी च यशस्वी च रूपवानभिजायते ॥१६॥

अतिसम्बन्धात् कार्त्तिकपौर्णमास्यां पूर्ववत् नद्यां दीपदानं सङ्कल्पयेत् । ॐ अद्य विष्णु-

---

1 A नवं for रत्नैं
2 I. O. धान्यैर्धवंजै for धान्यैर्बीजै
3 A अतिशयत्वात्तदभावेऽन्यसुवर्णदानं for the b. p.
4 A मुक्ता for the b. p.
5 A यानि
6 A रत्न for the b. p.
7 A कर्पूर for कस्तूरी
8 A वस्त्रैश्छादितं, I. O. वस्त्रैश्छान्वि-तम्
9 A omits it
10 I. O. adds वृषभ after this
11 A omits रत्न
12 A ॰युतं॰
13 A पाठान्त उच्चार्य विष्णुदैवतमिति for the bracketed portion
14 A ॰ल्लेख
15 A कार्त्तिकञ्चाचतुर्द्दश्यां पौर्णमास्यां
16 A विशेष
17 I. O. विष्णुधर्मोक्त॰

धर्मोत्तरोक्त-पौर्णमासीविहित-दीपदानफलप्राप्तिकामोऽहं नद्यामेतान्[1] दीपान् दास्ये । ततो नद्यां जले [2]यष्टीरारोप्य कदलीस्तम्भनिर्मित-[3]पत्रवोपरि वा दीपान् दद्यात् ।

तथा (वि. ध. ३।३१६।१४ख-१७क) :—

मार्गशीर्षे[4] तथा मासे[5] पूर्णे शिशिरदीधितौ ।
महारजनरक्तेन वाससा द्विजपुङ्गवम् ॥१७॥

महारजनरक्तेन कुसुम्भरञ्जितेन ।

आच्छाद्य कांस्यपात्रस्थं[6] प्रस्थं कृत्वा समाहितः ।
लवणस्य तु मुख्यस्य चूर्णितस्य[7] द्विजोत्तमाः ॥१८॥

प्रस्थो[8] द्वात्रिंशत् पलानि[9] । मुख्यस्य हविष्यस्य ।

दत्त्वा [सुवर्णनाभन्तु तस्मिन्नेव][10] द्विजातये ।
सौभाग्यरूप[11]-लावण्ययुक्तो भवति मानवः ॥१६॥

सुवर्णनाभं मध्यन्यस्तसुवर्णम् । सिन्दूरी[12]-वस्त्रेण ब्राह्मणमाच्छाद्य कांस्यपात्रे चूर्णित-सैन्धवप्रस्थं निधाय[13] तन्मध्ये[14] सुवर्णं[15] दत्त्वाभ्यर्च्यार्चिताय तस्मै ॐ अद्यादि तुभ्यमहन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-पौर्णमासीविहितलवणप्रस्थदानफलप्राप्तिकामोऽहमेतं[16] कांस्य-पात्रस्थं[17] सुवर्णनाभं लवणप्रस्थं ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । स्पर्शः[18] स्वीकारः ।

तथा (वि. ध. ३।३१६।१७ख-२१ख, २४ख-२५ख) :—

गौरसर्षपकल्केन [19]पौष्यामुत्सादितो नरः ।
गव्यस्याज्यस्य[20] कुम्भेन सोऽभिषिक्तस्त्वनन्तरम् ॥२०॥

1 A एतां नद्यां
2 A यष्टिमारोप्य
3 A reads पत्रोप and omits वा
4 A मार्गशी
5 A माघ
6 A कांस्यपात्रपात्रस्थं
7 A वर्णितस्य
8 A प्रस्थं
9 I. O. फलानि
10 A सुवर्णनाभं तनुस्मे अर्चिताय for the b. p.
11 A रूप वा for रूप
12 A सिन्धरि०
13 A विधाय
14 I. O. मध्ये
15 A सुर्ग
16 A मेतत्
17 A कांस्यं पात्रस्थ
18 I. O. स्पश, A स्वर्णस्य
19 A गात्र for पौष्या
20 I. O. गव्यस्याज्यस्य

उत्सादित उद्वर्त्तितगात्रः ।

विरूक्षितस्तथा स्नातः[1] सर्वबीजौषधि[2]-जलैः ।

[3]रत्नगन्धफलोपेतैर्घृतेन[4] तदनन्तरम् ॥२१॥

सर्वबीजौषधि[5]-जलैः परिभाषोक्त-सप्तधान्य-सर्वौषधि[6]-मिश्रितजलैरित्यर्थः ।

सप्तवर्णमुखं दृष्ट्वा तद् प्रदद्याद्[7]-द्विजातये ।

घृतेन [स्नपितं विष्णुं][8] शक्त्या सम्पूजयेत्ततः ॥२२॥

घृतञ्च जुहुयाद्वह्नौ[9] घृतं दद्याद्द्विजातये ।

[10]कर्ले वस्त्रयुगं दद्यात् सोपवासः समाहितः ॥२३॥

कर्मणानेन[11] धर्मज्ञाः[12] पुष्टिमाप्नोत्यनुत्तमाम्[13] ।

पौर्णमासीषु चैतासु[14] मासर्क्षसहितासु च ॥२४॥

एतेषामेव दानानां फलं दशगुणं भवेत् ।

[महत्पूर्वासु चैतासु फलमक्षयमश्नुते ॥२५॥

एतास्वेव पौर्णमासीषु यदा माससंज्ञनक्षत्रयोगो भवति, तदोक्तदानफलेभ्यो दशगुणं फलम् ।][15] यदा तु पौर्णमास्यामेव माससंज्ञ[16]-नक्षत्रे चन्द्रबृहस्पती भवतः, तदा महामाघ्यादि-शब्दवाच्या[17] भवति । तत्राक्षय्यं फलम् ।

तथा च विष्णुः :—

[18]दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।

पौर्णमासी तु महती [प्राप्ता सम्वत्सरे तु या][19] ।

तस्यां दानोपवासाद्यमक्षयं[20] परिकीर्तितम् ॥२६॥

---

1 A स्नातं

2 I. O. बीजौषधी and A बीजौषधी for बीजौषधि

3 A बहु for रत्न

4 I. O. घृते च

5 I. O. and A सर्वबीजौषधी०

6 I. O. सर्व्वौषधी and A सर्व्वौषधीनां for सर्वौषधि

7 A प्रदद्यात्

8 I. O. स्नपितुं विष्णुं and A स्नपितो विष्ण for the bracketed portion

9 A जुहुयाद्वह्नौ

10 A कार्त्त

11 A कर्मणा नेन

12 A धर्मज्ञः

13 A पुष्टिमाप्नोत्यनुत्तमं

14 A चैतासु

15 A omits the bracketed portion

16 A माससंज्ञा०

17 A मध्यो for वाच्या

18 I. O. and A दृश्यते

19 A प्राप्ता संवत्सरे तु या and I. O. प्रोक्ता सम्वत्सरेण तु for the bracketed portion

20 A दानोपवासादि अक्षयं

दानदिनपूर्वतरदिने सायं पूर्ववत् घटिकाधिकप्रहरत्रये[1] हविष्यभोजनादि कृत्वा सूर्य्यादि-देवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त-[2]पौषपौर्णमासी विहित-सर्षपोद्वर्त्तनादिपूर्वक-घृतदानकर्म मया कर्त्तव्यमिति निवेद्य सङ्कल्पयेत्। ॐ [3]श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्तपौष[4]-पौर्णमासी-विहित-सर्षपोद्वर्तनादि-[5][पूर्वक[6]-घृतदानमहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिन उपोष्यापरदिने प्रातः[7] श्वेतसर्षपकल्केनोद्वर्त्य गव्यघृतकुम्भेन स्नातः[8] तण्डुलचूर्णादिभि-र्विरूक्षण[9] कृत्वा परिभाषोक्त-[10]सप्तधान्य-सर्वौषधिमिश्रेण[11][रत्नगन्धफलयुतेन जलेन] स्नातो मुखं सुवर्णसहिते घृते वीक्ष्य तद्घृतं यस्मिन् [12]कस्मिंश्चिद् ब्राह्मणे प्रतिपाद्य घृतस्नपितं भगवन्तं[13] विष्णुं यथाशक्ति सम्पूज्यxxब्राह्मणद्वारा ॐ[14] विष्णवे स्वाहेति घृतेन होमं कारयेत। ततो होमस्य कर्त्रे वासोयुगं दक्षिणाम् ॐ[15] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। कृतैतद्धोमकर्मप्रतिष्ठार्थं दक्षिणामिदं वासोयुगं ददानि। होमस्य कर्ता[16] स्वस्तीति वदेत्। ततः प्रतिग्रहीतृब्राह्मणमानाय्या-[17]भ्यर्च्यार्चितं घृतं तस्मै ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ॐ[18] विष्णुधर्मोत्तरोक्त-[19]पौषपौर्णमासी-विहित-[सर्षपोद्वर्तनादिसहित][20]-घृतदानफलप्राप्ति-कामोऽ[21][हमेतद् घृतं ददानि।] [कृतैतद् घृतदानविहितकर्मप्रतिष्ठार्थं दक्षिणामिदं काञ्चनं ददानि।][22] प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते[23] घृतमिदं विष्णुदैवतमिति वदेत्। काम-

1 I. O. घटिकाचेकाधिकप्रहरत्रये
2 A omits पौष
3 I. O. श्वोपोष्यापरदिने
4 I. O. and A omit पौष
5 A reads the bracketed portion from here to p. 633, seven folios below within नानादैवतकृतदानावर्तः
6 A पूर्वकं
7 A adds स्नात्वा here
8 A स्नानः
9 I. O. विरूक्षणं
10 A सर्वधान्यसर्वौषधीमिश्रेण
11 A बहुगन्धफलयुतेन जलेन, I. O. omits जलेन
12 I. O. कश्चिद्
13 I. O. भगवन्तं
14 I. O. omits ॐ
15 A omits it
16 A कर्त्ता
17 I. O. reads भ्यार्चितं and omits घृतं, A प्रतिग्रहीतृब्राह्मणायार्चितं घृतं
18 I. O. omits ॐ
19 I. O. and A omit पौष
20 I. O. omits the bracketed portion
21 A reads the bracketed portion as विष्णुदैवतं सर्षपोद्वर्तनादिसहितं घृतमहं ददानि
22 I. O. omits the bracketed portion
23 A स्वस्त्युक्त्वा

स्तुल्यादः पूर्ववत्। स्पर्शः[1] स्वीकारः। नक्षत्रयोगे [तु विष्णुधर्मोत्तरोक्त-पुष्यानक्षत्रसंयुक्त-पौष्णमासी][2]-विहित-घृतदानफलप्राप्तिकामोऽहमिति दानवाक्ये निवेशनीयम्। एवं माघे मघायोगे फाल्गुने फल्गुनीद्वयस्यान्यतरयोगे चैत्रे चित्रायोगे वैशाखे विशाखायोगे ज्यैष्ठे ज्येष्ठायोगे आषाढे आषाढा[3]-द्वयस्यान्यतरयोगे [4]श्रावणे श्रवणायोगे [5]भाद्रपदे [6]भाद्रपदद्वय-स्यान्यतरयोगे आश्विने अश्विनीयोगे कार्तिके [7]कृत्तिकायोगे मार्गशीर्षे मृगशिरोयोगे [8]दान-वाक्यमुन्नेयम्। एवं महापौषी-महामाघी-महाफाल्गुन्यादिषु द्वादशसु विष्णुधर्मोत्तरोक्त-महापौषीविहित-घृतदानफलप्राप्तिकामोऽहमित्या-[9]वृहनीयम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे मासनियततिथिदानावर्त्तः।

---

1 A प्रतिग्रहश्च

2 A reads the bracketed portion as विष्णुधर्मोक्तपुष्यानक्षत्रपौष-मास

3 I. O. and A आषाढ॰

4 A श्रवणे

5 A भाद्रे

6 I. O. भाद्रपदा॰, A भाद्रपदद्वय-स्यान्यतन्यतयोयोगे

7 A कृत्तिकोयोगे

8 I. O. दानवाक्यसुन्नेयं, A दान-वाक्यमुन्येयं

9 I. O. ॰नूाहनीयं

अथ नानादैवत-नक्षत्रनियततिथिदानावर्तः । (९५)

विष्णुः :—

[1][मार्गशीर्षशुक्लपञ्चदश्यां मृगशिरोयुक्तायां] चूर्णितलवणप्रस्थमेकं[2] सुवर्णनाभं चन्द्रोदये ब्राह्मणाय प्रतिपादयेत् । [3]अनेन कर्मणा रूपसौभाग्य-[4]भागभिजायते ॥१॥

अत्र यजमानो यथोक्तपौर्णमास्यां चन्द्रोदये ब्राह्मणं वस्त्रादिनाभ्यर्च्य चूर्णितसैन्धवस्य [दशरत्तिकमानेन षोडशपलमेकं प्रस्थमभ्यर्चितं मध्यविन्यस्तसुवर्णं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णूक्तलवणप्रस्थ][5]-दानफलप्राप्तिकामोऽहमेतं सुवर्णनाभं लवणप्रस्थं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा लवण-[6]प्रस्थोऽयं सोमदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं [7]दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा लवणं स्पृशेत ।

तथा :—

पौषी चेत्[पुष्यायुक्ता तस्यां][8] गौरसर्षपकल्केरुत्सादितशरीरो गव्यघृतकुम्भे-[9]नाभिषिक्तः सर्वौषधीभिः सर्वगन्धैः [10]सर्ववीजैश्च स्नातो घृतेन च[11] भगवन्तं वासुदेवं स्नपयित्वा [12]गन्धपुष्पधूपदीपनैवेद्यादिभिश्चाभ्यर्च्य वैष्णवैः शाक्रै-[13]र्बार्हस्पत्यैश्च मन्त्रैः [14]पावकं हुत्वा ससुवर्णेन च घृतेन ब्राह्मणान् स्वस्ति वाचयेत् । [ससुवर्णघृतमर्चितेभ्यो ब्राह्मणेभ्यो दद्यात् ।][15] [16][वासोयुगं कर्त्रे प्रदद्यात् । अनेन कर्मणा पुष्यते ॥२॥

1 A मार्गशीर्षे मार्गशीर्षपञ्चदश्यां मार्गशिरयुक्तायां for the bracketed portion

2 I. O. ०प्रस्थमेक

3 A चनेक

4 I. O. and A ०भाग्यभिजायते

5 A reads the bracketed portion as द्वाविंशत्पलमनेन प्रस्थमेकं लवणं सुवर्णनाभं कृत्वा सुवर्णनाभप्रस्थलवण

6 I. O. ०स्थोऽयं

7 A omits दक्षिणाम्

8 I. O. पुष्ययुक्तास्तस्यां and A पुष्यायुक्तायां for the bracketed portion

9 A ०नाभिषक्तः

10 A सर्ववीजैः

11 A omits it

12 A गन्धपुष्पनैवेद्यश्चाभ्यर्च्य

13 A ०र्बार्हस्पत्यैर्मन्त्रै

14 A omits it

15 I. O. omits the bracketed portion and A reads it, preceded by इति and followed by इत्यर्थः

16 A omits the bracketed portion

उत्सादितशरीर उद्वर्तितगात्रः। सर्वौषध्यः सर्ववीजानि सर्वगन्धाश्च परिभाषोक्ताः। स्नातो[1] तन्मिश्रितजलैरित्यर्थः।] [2]दानवाक्यं यथा—[3]ॐ अ द्यामुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽमुकशर्मभ्यो युष्मभ्यं [4]पुष्टिप्राप्तिकामोऽहमिदं [5]समुवर्णं घृतं ददानि। स्वस्तिसावित्री-[6]पाठानन्तरं घृतमिदं विष्णुदैवतमिति [7]प्रतिग्रहीतॄभिर्वाच्यम्। [8]कामस्तुतिः पूर्ववत्। दक्षिणादाने सम्प्रदानबहुत्वं पूर्ववाक्याद्विशेषः। [9]स्पर्शः स्वीकारः। वासोयुगं [10]कर्त्रे प्रदद्यादिति [11]होमकर्त्रे दक्षिणाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। कृतैतद्धोमकर्म[12]-प्रतिष्ठार्थं दक्षिणामेतद्वासोयुगं ददानि। [13]स्वस्तीति ब्राह्मणो वदेत्।

तथाः—

माघी मघायुक्ता चेत्तस्यां तिलैः श्राद्धं कृत्वा पूतो भवति [14]पार्वणविधिनोक्तम्॥३॥

तथा[15]:—

[16]फाल्गुनी [17]फल्गुनीयुक्ता चेत्तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनीयं निवेद्य भार्यां मनोज्ञां [18]पत्नवतीं द्रविणवतीं चाप्नोति नार्यपि भर्तारम्॥४॥

[19]पक्षवतीं कुटुम्बिनीं[20] स्वास्तीर्णं खट्वोपरिविस्तीर्णोत्कृष्ट तूलिकादि-[21]रूपं सुसंस्कृतं[22] शोभननिर्माणम्[23] अर्चिताय ब्राह्मणाय यथोक्तमर्चितं[24] शयनीयम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [25]विष्णूक्त-पौर्णमासीविहित-शयनीयदानफलप्राप्तिकामोऽहमेतच्छयनीयं ददानि।

---

1 I. O. omits it
2 I. O. and A तद्
3 A omits it
4 A पुष्टिकामोऽहं
5 A ससुवर्णघृतं
6 A ०पाठान्ते
7 A प्रतिग्रहीतृवाक्यं
8 A कामस्तुत्यादि
9 A स्पर्शश्च
10 I. O. कर्त्रे प्रदद्यादिति, A कर्त्रे दद्यात्
11 I. O. होमस्य
12 I. O. omits कर्म
13 I. O. स्वस्ति
14 A पार्वणविधिनेति युक्तं
15 I. O. and A omit it
16 A omits it
17 I. O. फल्गुनीति युक्ता, A फाल्गुनीति युक्ता
18 I. O. पक्षवतीं, A प्रेक्षावतीं
19 I. O. पक्षवतीं, A प्रेक्षावतं
20 A कुटुम्बिनं
21 I. O. रूपी
22 I. O. सुसंस्तीर्ण
23 A शोभनं निर्माय
24 A शयनीमर्चितं
25 A विष्णुधर्मोत्तरोक्त०

स्वस्तिसावित्रीपाठान्ते [1]शयनीयमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[2] । कामस्तुत्यादि पूर्ववत् ।

तथाः—

[3]चैत्री चित्रायुक्ता चेत्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति ॥५॥

अर्चिताय ब्राह्मणायार्चितं [4]चित्रवस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सौभाग्यप्राप्तिकामोऽहमेतच्चित्रवस्त्रं ददानि । स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्[5] । कामस्तुत्यादि पूर्ववत् । दशाग्रहणपूर्वकं[6] परिधानं स्वीकारः ।

तथाः—

वैशाख्यां पौर्णमास्यां ब्राह्मणसप्तकं क्षौद्रयुक्तैस्तिलैः[7] सन्तर्प्य धर्मराजानं प्रीणयित्वा पापेभ्यः पूतो भवति ॥६॥

तत्तन्नक्षत्रयुक्तासु-पौर्णमासीषु[8] दान-[श्रवणात्तन्मध्य-[9]पातित्वादत्रापि विशाखानक्षत्रयुक्त-पौर्णमास्यां दानम् । अर्चितेभ्यः सप्तभ्यो ब्राह्मणेभ्योऽर्चितान् मधुयुतांस्तिलान् ॐ अद्यादि [10]युष्मभ्यमन्तमुक्त्वा दद्यात् । [11]विष्णूक्त-पौर्णमासीविहित मधुयुक्त-तिलदान][12]-फलप्राप्तिकामोऽहमेतान् क्षौद्रयुक्तांस्तिलान् ददानि । प्रीयतां धर्मराजः । स्वस्तिसावित्री-पाठान्ते तिला एते प्रजापतिदैवता इति [13]प्रतिग्रहीतृभिर्वाच्यम् । कामस्तुत्यादि पूर्ववत् । [[14]मुष्टिग्रहणं स्वीकारः ।][15]

तथा :—

ज्यैष्ठी [16][ज्येष्ठायुक्ता [17]चेत्तस्यां] [18]छत्रोपानत् प्रदानेन [19]नगराधिपत्यमाप्नोति ॥७॥

---

1 A omits इदं
2 I. O. वाच्यं for वाक्यम्
3 A चित्रं
4 I. O. वस्त्रं
5 I. O. वाच्यं for वाक्यम्
6 A ०पूर्वकं
7 I. O. ०स्तिलैश्च
8 A पौर्णमासीस्व
9 A ०जाति०
10 A तुभ्य०
11 A विष्णुधर्मोत्तरोक्त०
12 A reads the bracketed portion twice
13 A प्रतिग्रहीतृवाक्यं
14 I. O. स्वस्तिग्रहणं
15 A omits the bracketed portion
16 A ज्येष्ठायुतश्चेत् तस्यां for the b. p.
17 I. O. चेत्स्या
18 A छत्रोपानत्०
19 I. O. नगाधिपत्य०

अर्चिताय ब्राह्मणायार्चित [1][छत्रोपानहौ ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नमराधिपत्य-प्राप्तिकामोऽहमेते छत्रोपानहौ ददानि ।] स्वस्तिसावित्रीपाठान्ते एतच्छत्रोपानहौ प्रजापत्युत्ता-नाङ्गिरोदैवत इति प्रतिग्रहीतृवाक्यम्[2] । कामस्तुत्यादि पूर्ववत् । छत्रस्य दण्डग्रहणमुपा-नहोरारोहण[3] स्वीकारः ।

तथा :—

आषाढ्या-[4]माषाढायुतायामन्नपानदानेन [5]तदेवाक्षय्यमाप्नोति ॥८॥

अन्नपानमित्यन्न' [6]पानञ्च । अर्चिताय ब्राह्मणायार्चितमन्नपानम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात् । विष्णूक्त-पौर्णमासीविहितान्नपानदानफलप्राप्तिकामोऽहमेतदन्नपानं ददानि । स्वस्तिसावित्रीपाठान्ते अन्नपानमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[7] । कामस्तुत्यादि पूर्ववत् ।

तथा :—

श्रावण्यां [8]श्रवणायुक्तायां जलधेनुं [9]सान्नां वासोयुगाच्छादितां दत्त्वा [10]स्वर्गलोकम-वाप्नोति ॥९॥

मत्स्यपुराणोक्तं [11]जलधेनुमन्नसहितां कृत्वा वासोयुगेनाच्छाद्यार्चितामर्चिताय ब्राह्मणाय धेनुदानावर्तोक्त-मत्स्यपुराणीयजलधेनुदानविधिना[12] दद्यात् । [13][तत्र स्वरूपे सान्नां] वासो-युगाच्छादितामिति कामनायाञ्च स्वर्गलोकप्राप्तिकामोऽहमिति च[14] विशेषः ।

तथा :—

प्रोष्ठपद्यां तद्युक्तायां [15]गोप्रदानेन सर्वपापविनिर्मुक्तो भवति ॥१०॥

तद्युक्तायां पूर्वभाद्रपदोत्तरभाद्रपदयोरन्यतरनक्षत्रेण युक्तायामित्यर्थः । [16][ब्राह्मणाया-

---

1 A adds मेतच्छत्रोपानहौ ददानि स्वस्तिसावित्रीपाठान्ते एते before the bracketed portion

2 I. O. वाच्यं for वाक्यम्

3 I. O. °मुपानहौ वारोहणं, A °मुपानहारोहणं

4 I. O. °माषायुतायां°, A °माषाढ-युतायां°

5 I. O. तदेवाक्षय°, A तदक्षय्य°

6 A पानकञ्च

7 I. O. वाच्यं for वाक्यम्

8 A श्रवणयुक्तायां

9 A सान्ये

10 A स्वर्गलोकप्राप्तिरेव

11 A जलधेनुं मन्त्रसहितां

12 I. O. °विधया

13 A ततृस्वरूपमान्य for the bracketed portion

14 A omits it

15 A च गुदानेन

16 A reads the bracketed portion as ब्राह्मणाय अर्चितां

चिंतायार्चितां गाम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपाप-[1]विनिर्मोकप्राप्तिकामोऽहमेतां गां ददानि। स्वस्तिसावित्रीपाठान्ते गौरियं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्[2]। पुच्छग्रहणं स्वीकारः।

तथा :—

[3]आश्वयुज्यामश्विनीगते चन्द्रमसि घृतपूर्णं [भाजनं सुवर्णयुतं][4] विप्राय दत्त्वा [दीप्ताग्निर्भवति ॥११॥

अर्चिताय ब्राह्मणाय यथोक्तं भाजनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।][5] दीप्ताग्नित्वप्राप्तिकामोऽहमेतत् घृतपूर्णं सुवर्णयुतं[6] भाजनं ददानि। स्वस्तिसावित्रीपाठान्ते भाजनमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा :—

कार्तिकी चेत् कृत्तिकायुता [7]स्यात्तस्यां सितमुक्षाणमन्यवर्णं वा शशाङ्कोदये सर्वशस्य-[8]रत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दद्यात्। [9]कान्तारभयं न पश्यति ॥१२॥

अत्र सितोपादानात् सितोक्षदाने फलाधिक्यं दीपमध्य इति दीपचतुष्टयमध्ये। [10]सर्वरत्नानि सर्वशस्यानि सर्वगन्धाश्च परिभाषोक्ता ग्राह्याः। ब्राह्मणायार्चिताय चन्द्रोदयसमये यथोक्तं वृषमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णूक्त-पौर्णमासीविहित-सितोक्षदानफलप्राप्तिकामोऽहमेतं सर्वशस्य-[11][सर्वरत्न सर्वगन्धोपेतमुक्षाणं] ददानि। स्वस्तिसावित्रीपाठान्ते उक्षायं विष्णुदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः। अन्यवर्णदाने तु तद्वर्णनिवेशो[12] विशेषः।

विष्णुधर्मोत्तरे (३।३१७।३३) :—

माघे [13]श्रवणसंयुक्ता कृष्णा [14]स्याद्द्वादशी यदा।
[15]तिलदानं [16]महत् पुण्यम् [विनापि श्रवणेन तु][17] ॥१३॥

---

1 A विनिर्मुक्ति for विनिर्मोक
2 I. O. वाच्यं for वाक्यम
3 A अश्वयुज्याश्विनीगते
4 A स्वर्णयुतं for the bracketed portion
5 A omits the bracketed portion
6 I. O. omits it
7 A तस्यां
8 A वस्त्र for रत्न
9 I. O. कान्तारतभयं
10 A सर्व्ववस्त्र
11 A सर्व्वगन्धोयुक्तमुक्षाणं for the bracketed portion
12 I. O. तद्वर्णविशेषो
13 A श्रवणयुक्ता
14 A च द्वादशी
15 I. O. द्विजदानं
16 A महापुण्यं
17 I. O. omits the bracketed portion

[1][लभेतेति फलं सम्बध्यते।][2]श्रवणायुक्त-माघकृष्णद्वादशीदिने ब्राह्मणायार्च्चिताय तिलानर्च्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। बृहत्पुण्यप्राप्तिकामोऽहमेतांस्तिलान् ददानि। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [3]मुष्टिग्रहणं स्वीकारः। [4][अत्र विनापि] श्रवणेनेति पददर्शनाच्छ्रवणारहित[5]-माघकृष्णद्वादश्यामपि तिलदानं कर्तव्यम्।

तथा :—

श्रवणद्वादशीयोगे[6] कृष्णपक्षे तथैव च।
घृतेन दीपा दातव्यास्तैलैर्वा यदुनन्दन ॥१४॥

तथैव चेत्युक्ते [7]वाक्यान्तरोक्तं [8][महत् पुण्यं लभेतेति फलं] सम्बध्यते। [9]श्रवणायुक्तद्वादश्यां पूर्ववद्दीपान् सङ्कल्प्याभिमतदेशे दद्यात्। ॐ अद्य बृहत्पुण्यप्राप्तिकामोऽहं घृतेन दीपान्[10] दास्ये इति सङ्कल्प्य दद्यात्। तैलेन दीपदाने[11] तु घृतपदस्थाने तैलपदनिवेशो विशेषः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे नक्षत्रनियततिथिदानावर्त्तः।

---

1 A omits the bracketed portion
2 A श्रवणयुक्तमाघद्वादशीदिने
3 I. O. स्वस्तिग्रहणं
4 A' अत्रापि for the bracketed portion
5 A •विहित•
6 I. O. •युक्ते
7 I. O. वाक्यान्तरोक्तं
8 A reads the bracketed portion as महत्पुण्यफलं लभेतेति
9 A श्रवण•
10 I. O. दीपा
11 I. O. दीपादाने

[1][अथ नानादैवतनक्षत्रदानावर्तः । (६६)]

महाभारते (अनु—६४।५) :—

कृत्तिकासु महाभागे पायसेन ससर्पिषा ।

सन्तर्प्य ब्राह्मणान् [2]साधून् लोकानाप्नोत्यनुत्तमान् ।।१।।

अत्र यजमानो ब्राह्मणेभ्यः [3][सदाचारसम्पन्नशीलेभ्यो]ऽर्चितेभ्योऽर्चितं [4]सघृतपायसं दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यमनुत्तम-लोकप्राप्तिकामोऽहमेतं [5]ससर्पिष्कं पायसं ददानि । प्रतिग्रहीतारः [6]स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पायसोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं [7]पठेयुः । ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं [8]युष्मभ्यमहं [9]दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा पायसं स्पृशेयुः ।

तथा (अनु—६४।६) :—

रोहिण्यां प्रथितैर्मांसै-[10][र्मार्गैर्यत्नेन] [11]सर्पिषा ।

पयोऽन्नपानं[12] दातव्यमानृण्यार्थं[13] [14]द्विजातये ।।२।।

प्रथितैर्विहितै-[15][र्मार्गैर्मृग]-सम्बन्धिभिः [पानं पानकम् । अर्चिताय ब्राह्मणायार्चितं][16] घृतमांससहितं दुग्धमन्नं पानकञ्च दद्यात्। ॐ अद्यामुकसगोत्रायामुक-[17]वेदामुकशाखा-ध्यायिनेऽमुकदेवशर्मणे तुभ्यमानृण्यप्राप्तिकामोऽहमेतत् [18]घृतमांसयुक्तं पयोऽन्नपानं[19] ददानि ।

---

1 A omits the bracketed portion
2 A साधुनो
3 A सदा दानशीलेभ्यः सम्पन्नेभ्यो for the bracketed portion
4 I. O. omits स
5 A ससर्पिषं
6 A स्वस्ती
7 I. O. पठेत्
8 I. O. युष्ममहं
9 A एतत्
10 I. O. माल्यैर्यत्ने and A मार्गैर्यत्नं for the bracketed portion
11 A ससर्पिषा
12 I. O. पयोऽन्नदानं, A पयोऽन्नपान
13 A ०मनृण्यार्थं
14 A द्विजायते
15 A र्मांसैः पशु for the bracketed portion
16 A यानं पानकाऽर्चितं for the bracketed portion
17 A omits वेदामुक
18 I. O. omits घृत
19 I. O. पयोऽन्नदानं

स्वस्तिसावित्रीपाठान्ते पयोन्नपानमिदं[1] विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।७) :—

दोग्ध्रीं दत्त्वा सवत्सान्तु नक्षत्रे सोमदैवते।
गच्छते मानुषाल्लोकात्[2] स्वर्गवासमनुत्तमम् ॥३॥

सोमदैवतं मृगशिरः। अर्चिताय ब्राह्मणायार्चितां धेनुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमस्वर्गवासप्राप्तिकामोऽहमेतां सवत्सां दोग्ध्रीं ददानि। स्वस्तिसावित्रीपाठानन्तरं दोग्ध्रीयं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।

तथा(अनु—६४।८) :—

आर्द्रायां कृशरं दत्त्वा तैलमिश्रमुपोषितः।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥४॥

आर्द्रानक्षत्रयुक्तदिनपूर्वतरदिने प्रातः कृत्यनित्यो घटिकाधिकप्रहरत्रये हविष्यं [3]भुक्त्वाऽऽचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः [4]ॐ [5][सूर्य्यः सोमो यमः कालः पञ्च महाभूतानीति पठित्वा] महाभारतोक्तकृशरदानकर्म मया कर्तव्यमित्युक्त्वा उदङ्मुखो गृहीतजलपूर्णताम्रपात्रः सङ्कल्पं कुर्यात्। ॐ श्व उपोष्यापरदिने महाभारतोक्त-कृशरदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा परदिने [6]कृतनित्य उपोष्यापरदिने [7]तिलतण्डुलमिश्रदुग्धं तैलयुत-[8]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-कृशरदानफलप्राप्तिकामोऽहमेतं[9] तैलमिश्रं कृशरं ददानि। [10]स्वस्तिसावित्रीपाठान्ते कृशरोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

---

1 I. O. ०द्यानमिदं
2 I. O. मानुषान् लोकात्, A मानुषाल्लोका
3 A भुक्त्वा
4 A omits it
5 I. O. reads the bracketed portion as सूर्यसोमयमकालपञ्चमहाभूतानि
6 I. O. कृतनित्योपोष्यापरदिने
7 I. O. तिलतण्डुलमिश्रं
8 A omits अर्चितम्
9 A omits एतं
10 A reads ॐ before this

तथा(अनु—६४।६) :—

[1]पूपान् पुनर्वसौ दत्त्वा तथैवान्नानि शोभने ।
यशस्वी रूपसम्पन्नो बह्वन्ने[2] जायते कुले ॥५॥

अर्चिताय ब्राह्मणायार्चितान् पूपान् [अन्नानि चार्चितानि][3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-पुनर्वसुविहित पूपान्नदान-फलप्राप्तिकामोऽहमेतात् [4]पूपान् [5]एतान्यन्नानि ददानि । स्वस्तिसावित्रीपाठान्ते पूपा एते प्रजापतिदैवता अन्नान्येतानि प्रजापतिदैवतानीति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

तथा(अनु—६४।१०) :—

पुष्ये तु कनकं दत्त्वा [6][कृतं वाकृतमेव] च ।
अनालोक्येषु लोकेषु सोमवत् स [7]विराजते ॥६॥

[8]कृतमलङ्कारी [9]अकृतमघटितम । [10][अर्चिताय ब्राह्मणायार्चितं] यथोक्तं कनकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-पुष्यर्क्षविहित-कनकदानफलप्राप्तिकामोऽहमेतत् [11]कृताकृतं कनकं ददानि । स्वस्तिसावित्रीपाठान्ते कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्[12] । कामस्तुत्यादि पूर्ववत् ।

तथा(अनु—६४।११) :—

[13]अश्लेषासूत्तमो रूप्यं [14][वृषभं वा] प्रयच्छति ।
स सर्वभयनिर्मुक्त-[15]वैभवानधितिष्ठति ॥७॥

अर्चिताय ब्राह्मणायार्चितं रजतं [16]वृषभं वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्ताश्लेषाविहितरूप्यदानफलप्राप्तिकामोऽहमेतद्रूप्यं ददानि । स्वस्तिसावित्रीपाठान्ते [17]रूप्यमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [18][वृषभदाने

---

1 A पूपान्न
2 I. O. बह्वन्ने, A बह्वान्न
3 A omits the bracketed portion
4 I. O. अपूपान, A पूवपान
5 A omits it
6 A दद्यात स्वीकृतमेव for the bracketed portion
7 A विजायते
8 A स्वीकृतमलङ्का
9 I. O. omits अ, A कृतेमयुसम-घटितं
10 A अर्चितं for the bracketed portion
11 A कृतं
12 I. O. वाच्यं for वाक्यम्
13 A अश्लेषासुभयो
14 I. O. वृषं वास for the bracketed portion
15 A सर्वभानधि०, I. O. भावबानधि०
16 A वृषभ्वा
17 A रूप्यमिदं चन्द्रदैवतमिति
18 A omits the bracketed portion

ये रूप्यपदस्थाने वृषभपदनिवेशो विशेषः। स्वस्तिसावित्रीपाठान्ते वृषभोऽयं विष्णु-ति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।] पुच्छग्रहणं स्वीकारः[1]।

तथा (अनु—६४।१२) :—

मघासु तिलपूर्णानि वर्द्धमानानि मानवः।

प्रदाय पुत्र-[2]वसुमानिह [3]प्रेत्य च जायते ॥८॥

र्द्धमानानि शरावान्। अर्चिताय ब्राह्मणायार्चितं[4] तिलपूर्णशरावत्रयम् ॐ अद्यादि तमुक्त्वा दद्यात्। महाभारतोक्ततिलपूर्णवर्द्धमानदानफलप्राप्तिकामोऽह-[5]मेतानि तिल-वर्द्धमानानि ददानि। स्वस्तिसावित्रीपाठान्ते [6]वर्द्धमानानि एतानि विष्णुदैवतानीति तृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।१३) :—

फाल्गुनी-[7]पूर्वसमये ब्राह्मणानामुपोषितः।

[8][भक्ष्यान् फाणित]-संयुक्तान्[9] दत्त्वा सौभाग्यमृच्छति[10] ॥९॥

[फाणितं खण्डशालूक इति प्रसिद्धम्।] पूर्वफल्गुनीयुक्तदिन-पूर्व-[12]तरदिने पूर्व-ाहारादि कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वक-[महाभारतोक्त-पूर्व][13]-फल्गुनीविहित-युक्त-भक्ष्य[14]-दान-[15]कर्म मया कर्त्तव्यमिति निवेद्य सङ्कल्पं कुर्यात्। ॐ श्व उपोष्या-महाभारतोक्त-पूर्वफल्गुनीविहित-फाणितयुक्त-भक्ष्यदानकर्माहं करिष्ये।][16] ततो भुक्त्वा परदिने [उपोष्यापरदिने ब्राह्मणेभ्योऽर्चितान् फाणितयुक्तान् यथालाभं फल-युक्तान्][17] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतानि

I. O. स्वीकार

I. O. ०पशुमानिह

A प्रेत्य

A ०र्चिताान

I. O. ०मेताम् तिलपूर्णाम् वर्द्ध-मानाम्

I. O. वर्द्धमाना एते विष्णुदैवता

I. O. ०सर्वसमये

A भक्ष्यामफाणितं for the bracketed portion

I. O. ०संयुक्तां

I. O. ०मर्छति

11 A फाणित खण्डशालूक इति प्रसिद्धः for the bracketed portion

12 A omits तर

13 E. O. omits the bracketed portion

14 I. O. and A ०भक्ष०

15 I. O. कर्माहं करिष्ये इति

16 I. O. omits the bracketed portion

17 A reads the bracketed portion as महाभारतोक्त-पूर्वफल्गुनी-विहित-फाणितयुक्तभक्ष्याणि

फाणितयुक्तभक्ष्याणि ददानि। स्वस्तिसावित्रोपाठान्ते भक्ष्याणीमानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।१४-१५) :—

घृतक्षीरसमायुक्तं विधिवत् [1]षष्ठिकौदनम्।
उत्तराविषये दत्त्वा स्वर्गलोके महीयते ॥१०॥
यद्यत् प्रदीयते दानमुत्तराविषये नरैः।
[महाफलमनन्तं[2] तद्भवतीति][3] विनिश्चयः[4] ॥११॥

अर्चिताय ब्राह्मणायार्चितं घृतक्षीरयुतं [5]षष्ठिकौदनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षस्वर्गलोकप्राप्तिकामोऽहमेतद्घृतक्षीरयुक्त-[6]षष्ठिकौदनं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्। स्वेच्छया गोदान-[7][स्वर्णदानादिकं यदत्र] विधीयते तदनन्तर-फलहेतुः[8]। यस्मात् पुण्यतमेय[9]-मुत्तरफल्गुनी, तत्र च देयद्रव्यदेवतास्वीकारौ च प्रतिग्रह-विधावनुसन्धेयौ।

तथा (अनु—६४।१६) :—

हस्ते हस्तिरथं दद्याच्चतुर्युक्त-[10]मुपोषितः।
प्राप्नोति परमाल्लोँकान्[11] पुण्यकामसमन्वितान् ॥१२॥

[12][चतुर्युक्तं चतुर्भिर्गजैर्युक्तमित्यर्थः।] [13]हस्तानक्षत्रयुक्तदिन-पूर्वतर[14]-दिने पूर्ववद्ध-विष्याहारादिकं कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वक-महाभारतोक्त-हस्तिरथदानं मया कर्तव्यमिति निवेद्य सङ्कल्पं कुर्यात्। ॐ श्व उपोष्यापरदिने महाभारतोक्त-हस्तिचतुष्टययुक्त-रथदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिने [15]उपोष्यापरदिनेऽर्चिताय ब्राह्मणा-यार्चितं यथोक्तरथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-[16]चतुर्हस्तियुक्त-

---

1 A षष्ठिकोदनं
2 I. O. महाफलमन्तं
3 A reads the bracketed portion as महाफलं समं तत्र भवतीति
4 I. O. निश्चयः
5 A षष्टीकोदनं
6 A ०षष्ठिकोदनं
7 A reads the bracketed portion as स्वर्गदानानि यदं
8 A ०प्राप्तिः
9 I. O. ०तामय०
10 I. O. ०मतन्द्रितः
11 I. O. परमान् लोकान्
12 A चतुर्युक्तगजैरित्यर्थः for the b. p.
13 I. O. हस्त०
14 A omits तर
15 A omits उपोष्या...दिने
16 A omits चतुर्हस्तियुक्त

रथदानफलप्राप्तिकामोऽहमेतं [1]हस्तिचतुष्टययुक्तं [2]रथं ददानि। स्वस्तिसाविबीपाठान्ते रथोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [3]ईशाग्रहणं स्वीकारः।

तथा (अनु—६४।१७) :—

चित्रायां[4] वृषभं दत्त्वा [5][पुण्यान् गन्धांश्च] भारत।
चरत्यप्सरसां लोके रमते नन्दने तथा ॥१३॥

पुण्यान् मनोज्ञानुत्कृष्टानित्यर्थः[6]। अर्चिताय ब्राह्मणायार्चितं वृषभं सुगन्धिद्रव्याणि चार्चितानि चन्दनागुरु-[7]कर्पूरकालीयकानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-चित्राविहितर्षभ-पुण्यगन्धदानफलप्राप्तिकामोऽहमेतमृषभ[8]-मेतांश्च गन्धान् ददानि। [9]स्वस्तिसाविबीपाठान्ते [10]ऋषभोऽयं विष्णुदेवतो गन्धा एते गन्धर्वदेवता][11] [12][इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। वृषपुच्छग्रहणं गन्धस्य स्पर्शश्च स्वीकारः।

तथा (अनु—६४।१८) :—

स्वात्यामथ धनं दत्त्वा यदिष्टतममात्मनः।
प्राप्नोति लोकान् स शुभानिह चैव महद्यशः ॥१४॥

अर्चिताय ब्राह्मणाय सुवर्णरजतताम्रकांस्यरक्तवस्त्रादीनामिच्छयान्यतममर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-स्वातीविहितेष्टतमधनदानफलप्राप्तिकामोऽहमेतद्धनं ददानि। स्वस्तिसाविबीपाठान्ते धनमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।१९-२१) :—

विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम्।
[13][सप्रासङ्गं च शकटं सधान्यं वस्त्रसंयुतम् ॥१५॥]

---

1 A महाभारतोक्त just before it
2 A omits युक्तं
3 I. O. कण्ठा०
4 I. O. and A चित्राया
5 A पुण्यामन्यांश्च for the b. p.
6 I. O. ०कृष्टानीत्यर्थः
7 A ०कुङ्कुमकालियकानि
8 A ०मेतं वृषभ०
9 A प्रतिगृहीता just before it
10 A वृषभोयं
11 A reads the portion bracketed from p. 620 above up to here within the chap. नानादैवत नक्षत्रदानावर्तः
12 A omits the portion bracketed from here up to p. 641 below
13 Supplied from M. bh. I. O. omits it.

सप्रासङ्गमित्याकर्षयुगद्वयसहितमित्यर्थः। एवं चत्वारो वृषा योज्याः।

पितृदेवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते।
न स दुर्गाण्यवाप्नोति स्वर्गलोकञ्च गच्छति ॥१६॥
दत्त्वा यथोक्तं विप्रेभ्यो वृत्तिमिष्टां स विन्दति।
नरकादींश्च संक्लेशान्नाप्नोतीति विनिश्चयः ॥१७॥

अर्चितेभ्यो ब्राह्मणेभ्यो वृषं धेनुं शकटमाकर्षक-वृषचतुष्टययुक्तं धान्यवस्त्रसहितमर्चितम् ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तविशाखाविहितानडुद्धेनुशकटदान-फलप्राप्तिकामोऽहं यथासंख्यमेतमनड्वाहम् एतां धेनुम् एतं सप्रासङ्गं सधान्यं वस्त्रसंयुतं शकटं ददानि। स्वस्तिसावित्रीपाठान्तेऽनड्वानयं विष्णुदैवतो धेनुरियं रुद्रदैवता शकटोऽयमुत्तानाङ्गिरोदैवत इति प्रतिग्रहीतारो वदेयुः। कामस्तुत्यादि पूर्ववत्। वृषधेन्वोः पुच्छ-ग्रहणं शकटस्यारोहणञ्च स्वीकारः।

तथा (अनु—६४।२२) :—

अनुराधासु प्रावारं वस्त्रान्तरमुपोषितः।
दत्त्वा युगशतञ्चापि नरः स्वर्गे महीयते ॥१८॥

प्रावार-[1]मुत्तरीयं वस्त्रान्तरं परिधानीयवस्त्रम् एवं वस्त्रयुगम्। अनुराधायुक्तदिनपूर्वतर-दिने पूर्ववद्धविष्याहारादि कृत्वा सूर्यादिदेवताभ्यः सोपवासमहाभारतोक्तानुराधाविहित-वस्त्रयुगदानकर्म मया कर्तव्यमिति निवेद्य यथाविधि सङ्कल्पयेत्। ॐ श्व उपोष्यापरदिने महाभारतोक्तानुराधाविहितवस्त्रयुगदानकर्माहं करिष्ये। ततो नियमेन सुप्ता परदिने उपोष्या-परदिने ब्राह्मणायार्चितायार्चितमुत्कृष्ट[2]-वस्त्रयुगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तानुराधाविहितवस्त्रयुगदानफलप्राप्तिकामोऽहमेतं प्रावारमेतद्वस्त्रान्तरञ्च ददानि। स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः।

तथा (अनु—६४।२३) :—

कालशाकञ्च विप्रेभ्यो दत्त्वा मर्त्यः समूलकम्।
ज्येष्ठायामृद्धिमिष्टां वै गतिमिष्टाञ्च गच्छति ॥१९॥

अर्चितेभ्यो ब्राह्मणेभ्योऽर्चितसमूलककालशाकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-समूलकालशाकदानफलप्राप्तिकामोऽहमेतत् समूलकं कालशाकं ददानि स्वस्ति-

---

1 I. O. ०मुत्तारक्तं 2 I. O. ०सुतृष्ट

सावित्रीपाठान्ते कालशाकमिदं वनस्पतिदैवतमिति प्रतिग्रहीतारो वदेयुः। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।२४) :—

मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः।
पितृन् स संप्रीणयति गतिमिष्टाञ्च गच्छति ॥२०॥

अत्र प्रसिद्धफलमूलानामलाभेनापि फलानि मूलानि चार्चितानि अर्चितेभ्यो ब्राह्मणेभ्यः ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-मूलर्क्षविहित-फलमूलदानफलप्राप्तिकामोऽहमेते फलमूले ददानि। स्वस्तिसावित्रीपाठानन्तरं फलमूले एते वनस्पतिदैवते इति प्रतिग्रहीतारो ब्रूयुः। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।२५क-२६क) :—

[1]अथ [2]पूर्वास्वाषाढासु दधिपात्राण्युपोषितः।
कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे।
पुरुषो जायते प्रेत्य कुले स बहुगोकुले ॥२१॥

× × परदिने महाभारतोक्त-दधिपात्रदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिने उपोष्यापरदिने कुलवृत्तशालिने वेदविदेऽर्चिताय ब्राह्मणायार्चितानि दधिसहितानि पात्राणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-दधिपात्रदानफलप्राप्तिकामोऽहमेतानि दधिपात्राणि ददानि। स्वस्तिसावित्रीपाठान्ते दधिपात्राण्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।२६ख-२७क) :—

उदसक्तुं ससर्पिष्कं प्रभूतमधुफाणितम्।
[3]दत्त्वोत्तरास्वाषाढासु सर्वकामानवाप्नुयात् ॥

उदसक्तो घृतशर्करायुक्ता जलक्लिन्नाः सक्तवः। अर्चिताय ब्राह्मणायार्चितमुदसक्तुं[4] घृतयुतं [5]बहुतरमधुखण्डशालूकीयुक्तञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुकप्राप्तिकामोऽहमेतत् घृतमधुफाणितयुक्तमुदसक्तुं ददानि। स्वस्तिसावित्रीपाठान्ते [6]उदसक्तोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

---

1 Supplied from M. bh. I. O. omits it.
2 I. O. पूर्वासुषाढासु
3 I. O. दत्तोत्तरासुषाढासु
4 I. O. °मुदसक्तु
5 I. O. मधुतरमधुखाण्ड°
6 I. O. उदसक्तोऽयं

तथा (अनु—६४।२७ख-ग) :—

दुग्धं त्वभिजितो योगे दत्त्वा मधुघृतप्लुतम्[1] ।
धर्मनित्यो मनीषिभ्यः स्वर्गलोके महीयते ॥२३॥

उत्तराषाढान्त्यचतुर्भागे श्रवणाद्यनाडिकाचतुष्टयावधिके अभिजितो नक्षत्रस्य योगः। अर्चितेभ्यो विद्वद्ब्राह्मणेभ्योऽर्चितं मधुघृतमिश्रं दुग्धम ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-समधुघृतदुग्धदानफलप्राप्तिकामोऽहमेतं मधुघृतयुतं दुग्धं ददानि। स्वस्तिसावित्रीपाठानन्तरं दुग्धमिदं विष्णुदैवतमिति प्रतिग्रहीतारो ब्रूयुः। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।२८) :—

श्रवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च।
श्वेतेन याति यानेन सर्वलोकान् समावृतान् ॥२४॥

वस्त्रान्तरितं वस्त्राच्छादितम्। अर्चिताय ब्राह्मणायार्चितं [वस्त्राच्छादितश्च कम्बलं][2] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तवस्त्रान्तरित-कम्बलदानफलप्राप्तिकामोऽहमेतं वस्त्रान्तरितं कम्बलं ददानि। स्वस्तिसावित्रीपाठान्ते कम्बलोऽयं बृहस्पतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकमाच्छादनं स्वीकारः।

तथा (अनु—६४।२९) :—

गोप्रयुक्तं धनिष्ठासु यानं दत्त्वा समाहितः।
वस्त्ररश्मिधरं[3] सद्यः[4] प्रेत्य राज्यं समश्नुते ॥२५॥

गोप्रयुक्तमाकर्षकवृषभद्वयसहितं वस्त्ररश्मिधरं वस्त्रमयरज्जुसहितम् अर्चिताय ब्राह्मणायार्चितं यथोक्तं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-धनिष्ठाविहित-गोप्रयुक्तरथदानफलप्राप्तिकामोऽहमेतं गोप्रयुक्तं वस्त्ररश्मिधरं रथं ददानि। स्वस्तिसावित्रीपाठानन्तरं रथोऽयं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। कशाग्रहणं स्वीकारः।

तथा (अनु—६४।३०) :—

गन्धान् शतभिषायोगे दत्त्वा सागुरुचन्दनान्।
प्राप्नोत्यप्सरसां लोकान् प्रेत्य गन्धांश्च शाश्वतान् ॥२६॥

---

1 I. O. मधुघृतं प्लुतं
2 I. O. reads the b. p. as कम्बलञ्च वस्त्राच्छादितं
3 I. O. वस्त्ररश्मिधुरं
4 I. O. सद्य;

गन्धान् कस्तूरिकाम्। अर्चिताय ब्राह्मणायार्चितां[1] यथोक्तद्रव्यसहितां[2] कस्तूरिकाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-शतभिषाविहित-गन्धदानफलप्राप्ति-कामोऽहमेतान् सागुरुचन्दनान् गन्धान् ददानि। स्वस्तिसावित्रीपाठान्ते गन्धा एते गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।३१) :—

पूर्वभाद्रपदायोगे राजमाषान् प्रदाय तु।
[3]सर्वभक्ष्यफलोपेतः स वै प्रेत्य सुखी भवेत् ॥२७॥

अर्चिताय ब्राह्मणायार्चितान् राजमाषान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-राजमाषदानफलप्राप्तिकामोऽहमेतान् राजमाषान् ददानि। स्वस्तिसावित्रीपाठान्ते राजमाषा एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्।

तथा (अनु—६४।३२) :—

औरभ्रमुत्तरायोगे यस्तु मांसं[4] प्रयच्छति।
स पितॄन् प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ॥२८॥

औरभ्रं मेषभवम्। अर्चिताय ब्राह्मणायार्चितं मेषमांसम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तौरभ्र-मांसदानफलप्राप्तिकामोऽहमेतदौरभ्रं मांसं ददानि। स्वस्तिसावित्रीपाठान्ते मांसमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।३३) :—

कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति।
स प्रेत्य कामानादाय [5]दाता समुपतिष्ठति ॥२९॥

अर्चिताय ब्राह्मणायार्चितां धेनुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-रेवतीविहित-धेनुदानफलप्राप्तिकामोऽहमेतां कांस्योपदोहनां धेनुं ददानि। स्वस्तिसावित्री-पाठानन्तरं धेनुरियं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।

तथा (अनु—६४।३४) :—

रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः।
हस्त्यश्वरथसम्पन्ने वर्चस्वी जायते कुले ॥३०॥

---

1 I. O. ०र्च्चितायां
2 I. O. ०सहितायां
3 I. O. सर्व्वभक्ष०
4 I. O. माषं
5 I. O. दातारमुपतिष्ठति

अर्चिताय ब्राह्मणायार्चितं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्ताश्वरथदानफलप्राप्तिकामोऽहमेतमश्वयुक्तरथं ददानि। स्वस्तिसावित्रीपाठान्ते रथोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। कशाग्रहणं स्वीकारः।

तथा (अनु—६४।३५) :—

भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै।

[1]गाश्च प्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥३१॥

द्विजातिभ्य इति जात्याख्यायामेकस्मिन् बहुवचनम्। मत्स्यपुराणोक्तां तिलधेनुमुत्पाद्यार्चितामर्चिताय ब्राह्मणाय धेनुदानावर्तस्थ[2]-मत्स्यपुराणीयतिलधेनुदानविधिना दद्यात्। तत्र कामनायां महाभारतोक्त-भरणीविहित-तिलधेनुदानफलप्राप्तिकामोऽहमिति वाक्ये विशेषः।

विष्णुधर्मोत्तरे (३।३१७।२०-२७क) :—

कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम्।

रक्तवस्त्रस्य रोहिण्यां सौम्यभे लवणस्य च ॥३२॥

सौम्यभे मृगशिरसि।

कृसरस्य तथार्द्रायामादित्ये[3] रजतस्य तु।

घृतस्य तु तथा पुष्ये[4] चन्दनानाञ्च सर्पभे ॥३३॥

आदित्ये पुनर्वस्वोः सर्पभे अश्लेषायाम्। चन्दनानामितिश्वेतचन्दनरक्तचन्दनकुचन्दनानाम्।

तिलानाञ्च मघायोगे प्रियङ्गोर्भगदैवते।

आर्यम्णे चाप्यपूपानां सावित्रे पायसस्य तु ॥३४॥

भगदैवते पूर्वफल्गुन्याम् आर्यम्णे उत्तरफल्गुन्याम् सावित्रे हस्तायाम्।

चित्रायां चित्रवस्त्राणां सक्तूनां वायुदैवते।

ऐन्द्राग्ने[5] चैव लोहानां मैत्रे माल्यफलस्य च ॥३५॥

वायुदैवते स्वात्याम् ऐन्द्राग्ने विशाखायां मैत्रेऽनुराधायाम्।

छत्रस्य[6] च तथा शाकं मूले मूलफलस्य च।

हिमस्य मधुयुक्तस्य दानमाप्ये महाफलम् ॥३६॥

---

1 I. O. गोश्च
2 I. O. धेनुदानावर्त०
3 I. O. तथार्द्रायादित्ये च
4 I. O. पुष्य
5 I. O. तत्राग्ने
6 I. O. चंद्रस्य

शाक्रे ज्येष्ठायाम् आप्ये पूर्वाषाढायाम् ।

विश्वेश्वरेऽन्नदानस्य श्रवणे वसनस्य च ।

धान्यस्य वासवे[1] विप्रा वारुणे चौषधस्य च ॥३७॥

विश्वेश्वरे उत्तराषाढायां वासवे धनिष्ठायां विप्रा इति सम्बोधनम् । वारुणे शतभिषायाम् ।

आजे पुराणबीजानां शस्यानां तदनन्तरे ।

गोरसानां तथा पौष्णे स्नानानामथ चाश्विने ।

आजे पूर्वभाद्रपदायां पाष्णे रेवत्याम् ।

तिलानाञ्च तथा दानं भरणीषु महाफलम् ॥३८॥

कृत्तिकानक्षत्रे अर्चिताय ब्राह्मणाय सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तकृत्तिकाविहितसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्तिसावित्रीपाठान्ते सुवर्णमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । रोहिण्यां लोहितवस्त्रदाने तु विष्णुधर्मोत्तरोक्त-रोहिणीविहितरक्तवस्त्रदानफलप्राप्तिकामोऽहमेतद्रक्तवस्त्रमिति वाक्ये विशेषः । स्वस्तिसावित्रीपाठान्ते रक्तवस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । दशाग्रहणपूर्वकं परिधानं स्वीकारः । मृगशिरसि लवणदाने तु वाक्ये विष्णुधर्मोत्तरोक्तसौम्यविहितलवणदानफलप्राप्तिकामोऽहमेतल्लवणमिति विशेषः । स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । आर्द्रायां तिलतण्डुलपक्वान्नदाने तु वाक्ये विष्णुधर्मोत्तरोक्तार्द्राविहितकृसरदानफलप्राप्तिकामोऽहमेत कृसरमिति विशेषः । स्वस्तिसावित्रीपाठान्ते कृसरोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । रजतदाने वाक्ये विष्णुधर्मोत्तरोक्तादित्यर्क्षविहित-रजतदानफलप्राप्तिकामोऽहमेतद्रजतमिति विशेषः । स्वस्तिसावित्रीपाठान्ते रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । पयोघृतदानवाक्ये विष्णुधर्मोत्तरोक्त-पुष्यर्क्षविहितघृतदानफलप्राप्तिकामोऽहमेतद् घृतमिति विशेषः । स्वस्तिसावित्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । अश्लेषायां चन्दनदाने वाक्ये विष्णुधर्मोत्तरोक्ताश्लेषाविहितचन्दनदानफलप्राप्तिकामोऽहमेतानि चन्दनानीति विशेषः । स्वस्तिसावित्रीपाठान्ते चन्दनान्येतानि गन्धर्वदेवतानीति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । मघायां तिलदाने वाक्ये विष्णु-

---

1 I. O. वासवे

धर्मोत्तरोक्त-मघाविहित-तिलदानफलप्राप्तिकामोऽहमेतानि तिलानीति विशेषः। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। पूर्वफल्गुन्यां प्रियङ्गुदाने वाक्ये विष्णुधर्मोत्तरोक्त-भगदैवतर्क्षविहित-प्रियङ्गुदानफलप्राप्तिकामोऽहमेतां[1] प्रियङ्गुमिति विशेषः। स्वस्तिसावित्रीपाठान्ते प्रियङ्गुरियं[2] प्रजापतिदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। उत्तरफल्गुन्या[3]-मपूपदाने वाक्ये विष्णुधर्मोत्तरोक्तार्य्यमविहितापूपदानफलप्राप्तिकामोऽहमेतान[4]-पूपानिति विशेषः। स्वस्तिसावित्रीपाठान्ते अपूपा एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। हस्तायां पायसदाने तु वाक्ये विष्णुधर्मोत्तरोक्त-हस्तानक्षत्रविहित-पायसदानफलप्राप्तिकामोऽहमेतं पायसमिति विशेषः। स्वस्त्यादिस्वीकारान्तं प्रथमदानवत्। चित्रायां नानावर्णवस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्तचित्राविहित-वस्त्रदानफल-प्राप्तिकामोऽहमेतानि चित्रवस्त्राणीति विशेषः। स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानी बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। स्वात्यां सक्तुदाने वाक्ये विष्णुधर्मोत्तरोक्त-स्वातीनक्षत्रविहित-सक्तुदानफलप्राप्तिकामोऽहमेतान् सक्तूनिति विशेषः। स्वस्तिसावित्रीपाठान्ते सक्तव एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। विशाखायां सुवर्ण-रजत-ताम्र-कांस्य-सीसक-पित्तल-रङ्गकृष्णायसानां दाने तु वाक्ये विष्णुधर्मोत्तरोक्त-विशाखाविहित[5]-लोहदान-फलप्राप्तिकामोऽहमेतानि लोहानीति विशेषः। स्वस्तिसावित्रीपाठान्ते लोहान्येतान्यग्निदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। अनुराधायां फलमाल्यदाने तु वाक्ये [6]विष्णुधर्मोत्तरोक्तानुराधाविहित-फलमाल्यदानफलप्राप्तिकामोऽमेतानि फलमाल्यानीति विशेषः। स्वस्तिसावित्रीपाठान्ते फलमाल्यान्येतानि विष्णुवनस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। ज्येष्ठायां छत्रदानवाक्ये विष्णुधर्मोत्तरोक्त-ज्येष्ठा[7]-विहित-छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रमिति विशेषः। स्वस्तिसावित्रीपाठान्ते छत्रमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। दण्डग्रहणं स्वीकारः। मूले मूलस्य फलस्य च दाने वाक्ये विष्णुधर्मोत्तरोक्त-मूलर्क्षविहित-फलमूलदानफलप्राप्तिकामोऽहमेतत्फलमूलमिति विशेषः। स्वस्तिसावित्रीपाठान्ते फलमूलमिदं वनस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

---

1 I. O. ०मेतं
2 I. O. प्रियङ्गुरिदं
3 I. O. उत्तरफल्गुन्यां पूपदाने
4 I. O. ०मेतान् पूपान् इति
5 I. O. ०विशाखाविहित
6 I. O. विष्णुधर्मोक्ता०
7 I. O. ०मूलर्क्ष

पूर्वाषाढायां मधुयुक्त-शिशिरजलदाने वाक्ये विष्णुधर्मोत्तरोक्त-पूर्वाषाढाविहित-हिमदानफलप्राप्ति-कामोऽहमेतन्मधुयुक्ततिलमिति विशेषः। स्वस्तिसावित्रीपाठान्ते हिममिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1]उत्तराषाढायामन्नदाने वाक्ये [2]विष्णुधर्मोत्तरोक्तोत्तराषाढा-विहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठान्तेऽन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। श्रवणे वस्त्रदान-वाक्ये विष्णुधर्मोत्तरोक्त-श्रवणाविहितवस्त्रदानफलप्राप्तिकामोऽहमेतद्वसनमिति विशेषः। स्वस्ति-सावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। धनिष्ठायां [3]धान्यदाने वाक्ये विष्णुधर्मोत्तरोक्त-धनिष्ठा-विहित-धान्यदानफलप्राप्तिकामोऽहमेतद्धान्यमिति विशेषः। स्वस्तिसावित्रीपाठान्ते धान्य-मिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। शतभिषायां वनपाचितगुग्गुलु-पाचिततैलानामौषधानामन्यतमस्य दाने वाक्ये विष्णुधर्मोत्तरोक्त-शतभिषाविहितौषध-दानफलप्राप्तिकामोऽहमेतदौषधमिति विशेषः। स्वस्तिसावित्रीपाठान्ते औषधमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पूर्वभाद्रपदायान्धा-न्यादीनामन्यतमस्य चिरन्तनशस्यस्य दाने वाक्ये विष्णुधर्मोत्तरोक्त-पुराण-बीजदानफलप्राप्ति-कामोऽहमेतानि पुराणबीजानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं बीजान्येतानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। उत्तर-भाद्रपदायां यथालाभं शस्यत्रयदानवाक्ये विष्णुधर्मोत्तरोक्तोत्तरभाद्रपदाविहित-शस्यदानफल-प्राप्तिकामोऽहमेतानि शस्यानीति विशेषः। स्वस्तिसावित्रीपाठान्ते शस्यान्येतानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। रेवत्यां दुग्धदधितक्रघृतादीनां दानवाक्ये विष्णुधर्मोत्तरोक्तरेवतीविहित-गोरसदानफलप्राप्तिकामोऽहमेतं[4] गोरसमिति विशेषः। स्वस्तिसावित्रीपाठान्ते गोरसा एते विष्णुदैवता इति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। अश्विन्यां स्नानीयसुगन्धामलकादिदानवाक्ये विष्णु-धर्मोत्तरोक्ताश्विनीविहित][5]-स्नानदानफलप्राप्तिकामोऽहमेतत् स्नानमिति विशेषः। स्वस्ति-सावित्रीपाठान्ते स्नानमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। भरण्यां तिलदानवाक्ये विष्णुधर्मोत्तरोक्त-भरणीविहित-तिलदानफलप्राप्तिकामोऽहमेतांस्तिला-

---

1 I. O. उत्तराषाढामन्नदाने
2 I. O. विष्णुधर्मोत्तरोक्त उत्तराषाढा
3 I. O. धान्यदाने
4 I. O. ०मेतां
5 A omits the portion bracketed from p. 633 above up to here

निति विशेषः[1]। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति [2]प्रतिग्रहीतृवाक्यम् [3][कामस्तुत्यादि पूर्ववत्।] [4]मुष्टिग्रहणं स्वीकारः।

तथा :—

[5]श्रवणे दीपकं दत्त्वा नदीद्वितयसङ्गमे।
[6][तेजस्वी च यशस्वी च रूपवानभिजायते ॥३९॥

श्रवणानक्षत्रयुक्तदिने नदीद्वितयसङ्गमे] दीपदानं[7] गृहीतजलपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पयेत्। ॐ विष्णुधर्मोत्तरोक्त-[8]श्रवणर्क्षविहित-दीपदानफलप्राप्तिकामोऽहं नदीद्वयसङ्गमे दीपं दास्ये इति [9]सङ्कल्प्य दद्यात्।

तथा (३।३०६।६८) :—

मासे मासे तु रेवत्यां ब्राह्मणान् घृतपायसम्।
सदक्षिणं भोजयित्वा रूपमाप्नोत्यनुत्तमम् ॥४०॥

यथेच्छं प्रतिमासं रेवत्यां ब्राह्मणेभ्योऽर्चितेभ्या [10]घृतसहितं पायसमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमरूपप्राप्तिकामोऽहमेतं घृतपायसं ददानि। [11]स्वस्तिसावित्री-पाठानन्तरं घृतपायसोऽयं [12]प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे नक्षत्रदानावर्तः।

---

1 I. O. शेष:
2 I. O. प्रतिग्रहीतृवाच्यं
3 A reads the b. p. twice
4 A मुष्टिग्रहणञ्च
5 A श्रावणे
6 A omits the b. p.
7 A गृहीतजलदापूर्णपात्र
8 A श्रवणाख्य०
9 A सङ्कल्प
10 A घृतसहित०
11 A ०पाठान्ते
12 A प्रजपति०

[अथ नानादैवत-मासव्यापिदानावर्तः ।][1] (६७)

विष्णु :—

आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं घृतं[2] प्रदायाश्विनौ प्रीणयित्वा रूपभाग् भवति ।।१।।

[3]अथ [4]सौराश्विनशुक्लप्रतिपदि प्रातर्यजमानोऽर्चितेभ्यो यथेष्टसंख्यब्राह्मणेभ्यो घृतमर्चितं[5] दद्यात्[6] । ॐ[7] अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुक[8]-शाखाध्यायिभ्योऽमुकामुकदेव[9]-शर्मभ्यो युष्मभ्यं विष्णूक्त-मासावच्छिन्न-घृतदानफलप्राप्तिकामोऽहमेतद्[10] घृतं ददानि । [11]अश्विनौ प्रीयेताम् । [12]प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा घृतमिदं विष्णुदैवत-मित्युक्त्वा यथाशास्त्रं कामस्तुतिं[13] पठेयुः । ततः [ॐ अद्य][14] कृतैतद्दानप्रतिष्ठार्थं [15][युष्मभ्यं दक्षिणामेतत्] काञ्चनं ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा घृतं स्पृशेयुः[16] । [17]एव-मागाम्यमावास्यां यावत् प्रत्यहं दद्यात् ।

तथा :—

तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा आरोग्यभाग् भवति ।।२।।

तस्मिन्नेवाश्विन[18] इत्यर्थः । सौराश्विनकृष्ण[19]-प्रतिपद्यर्चितेभ्यो यथेष्टसंख्य[20]-ब्राह्मणेभ्यो दुग्धदधितक्रघृतानामन्यतममर्चितम् ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात् । आरोग्य-प्राप्तिकामोऽहमेतान् [21]गोरसान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । [22]एवमागाम्य-मावास्यां यावत् प्रत्यहं दद्यात् ।

---

1 A omits the bracketed portion
2 I. O. घृत
3 I. O. and A अत
4 I. O. सचाश्विन० and A सौव आश्विन०
5 A omits अर्चितम्
6 A omits this
7 A omits this
8 A omits वेदामुकामुक
9 A omits देव
10 I. O. ०मेतं
11 A अश्विनी
12 A प्रीति०
13 A कामस्तुति
14 A omits the bracketed portion
15 I. O. दक्षिणामिदं युष्मभ्यमहमेतत् for the b. p.
16 A स्पृशेत
17 A एवं मागंस्य मावस्यां
18 A तस्मिन्न आश्विन
19 A omits कृष्ण
20 I. O. मुख्या for संख्य
21 A adds तिलान before this
22 A एवमाषढामावास्यां

तथा :—

माघे [1]मास्यग्निं प्रत्यहं तिलैर्हुत्वा [2]सघृतं कुन्माषं [3]ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवति ॥३॥

कुन्माषो [4]राजमाष इति प्रसिद्धः। सौर-[माघशुक्लप्रतिपद्यग्नौ][5] ॐ प्रजापतये स्वाहेति मन्त्रेण तिलान् [6]यथाशक्ति हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा यथेष्टसंख्य-ब्राह्मणेभ्योऽर्चितं सघृतं[7] कुन्माषम् ॐ अद्यादि [8]युष्मभ्यमन्तमुक्त्वा दद्यात्। [9]दीप्ताग्नित्व-प्राप्तिकामोऽहमेतं[10] सघृतं कुन्माषं ददानि। [11]स्वस्तिसावित्रीपाठान्ते कुन्माषोऽयं प्रजापतिदैवत[12] इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं[13] स्वीकारः। [14][एवमागाम्यमावास्यावधि] प्रत्यहं होमं कृत्वा सघृतं कुन्माषं दद्यात्।

भविष्यपुराणे :—

दिने दिने [15]जपन्नाम भास्करस्य महात्मनः।
ददाति कार्त्तिके यस्तु [16]तस्यायतनदीपकम् ॥४॥
जातिस्मरत्वं[17] प्रजाश्च प्राकाश्यं सर्वजन्तुषु।
अव्याहतेन्द्रियत्वञ्च स प्राप्नोति न संशयः ॥५॥

सौरकार्त्तिक-शुक्लप्रतिपदि गृहीतजलपूर्णताम्रपात्र उदङ्मुखः सूर्यायतनदीपं [18][सङ्कल्प्य आगाम्यमावास्यां] [19]यावद्दद्यात्। ॐ भविष्यपुराणोक्त-कार्त्तिकव्यापि-दीपदानफलप्राप्तिकामोऽहं [सूर्यायतने दीपं दास्ये][20]। ततो यथाशक्ति भास्कराय नम इति जपित्वा[21] प्रज्वाल्य दद्यात्। [22]एवमपरदिनेष्वपि [23]सङ्कल्पव्यतिरेकेण दीपदानम्।

---

1 A मासि
2 A घृतं, I. O. omits it
3 A ब्राह्मणं
4 I. O. राजमास and A कृष्णमास
5 A मासप्रतिपदौ for the b. p.
6 I. O. यथाशक्तिर्हुत्वा
7 I. O. घृतं
8 I. O. तुभ्यमन्तमुक्त्वा
9 A दीप्ताग्निं for दीप्ताग्नित्व
10 A ॰मेतत्
11 I. O. adds स्वस्त्यादि पूर्व्ववत् before this
12 A प्रजापतिदैव
13 A मुष्टिग्रहणञ्च
14 A एवमागंस्यामावास्यां यावत् दृषिदान for the bracketed portion
15 A जपन्मन्त्रं, I. O. जयन्नाम
16 A तथायातनदीपकं, I. O. भगायतनदीपकं
17 A वृत्तिमन्तञ्च
18 A संकल्प्यागामावास्यां for the bracketed portion
19 A यावत् कुर्यात्
20 A सूर्यायतनदीपं दानस्य for the bracketed portion
21 I. O. पूजयित्वा
22 A एवमपरदिनेषु
23 A सङ्कल्पव्यतिरेकेन

विष्णुधर्मोत्तरे :—

अश्वयुज्यामतीतायां यावद्राजेन्द्र [1][कार्त्तिकी ।
तावद्दीपप्रदस्योक्तं फलं राजेन्द्र[2]] शाश्वतम् ॥६॥
तावत्कालं प्रयच्छन्ति ये तु दीपं [3]सदा निशि ।
तुङ्गे देशे बहिस्तेषां[4] [महत्पुण्यफलं भवेत्][5] ॥७॥
अप्यन्धकारे गहने [प्राकाश्यं तेन][6] जायते ।
[7]प्राकाश्याद् यदुशार्दूल तेन यान्ति हि[8] तत् सुखम् ॥८॥

कृष्णप्रतिपदादिपौर्णमास्यन्त-[9]कार्त्तिके दीपदानम् । बहिरुच्च[10]-दीपस्थानं निर्माय [तत्र निशि][11] दीपं दातुं कृष्णप्रतिपदि[12] पूर्ववत् सङ्कल्पयेत् । [13]ॐ अद्यारभ्य कार्त्तिकपौर्णमासीपर्यन्तं[14] प्रत्यहं विष्णुधर्मोत्तरोक्तकार्त्तिकमासविहित-[15]बहिस्तुङ्गस्थदीपदानफलप्राप्तिकामोऽहं बहिस्तुङ्गस्थाने दीपं दास्ये इति सङ्कल्प्य प्रत्यहं दद्यात् ।

तथाः—

द्विजवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम्[16] ।
अग्निष्टोमफलं तस्य वदन्ति च मनीषिणः ॥९॥

पौर्णमास्यन्तकार्त्तिकोपक्रमदिने पूर्ववद्दीपं सङ्कल्प्य द्विजगृहे मासमेकं दद्यात् । ॐ अग्निष्टोमफलप्राप्तिकामोऽहं मासमेकं द्विजगृहे दीपं दास्ये । अस्य [17]फलभूयस्त्वात् मासव्यापिदानत्वं प्रयुक्तम्[18] ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे [19]मासव्यापिदानावर्तः ।

---

1 A omits the bracketed portion
2 I. O. राजे
3 A महानिशि
4 I. O. बहिस्तेयां
5 A reads the bracketed portion as महापुण्यं फलं लभेत्
6 A reads the bracketed portion as प्रकाश्यन्ते न
7 I. O. प्राकाशाद्यदुशार्दूल, A प्राकाश्याद्यदुशार्दूल
8 A omits it
9 A कार्त्तिकदीपदन
10 A बहिस्तुङ्ग०
11 I. O. तत्रनिशि for the bracketed portion
12 A कृष्णप्रतिपदादि
13 A omits it
14 A कार्त्तिपौर्णमासीपर्यन्त
15 A omits बहि
16 A कामदं
17 A भूयिष्ठात्
18 A युक्तं
19 I. O. omits मास

[अथ नानादैवतसंक्रान्तिदानावर्तः][1] । (६८)

विष्णुधर्मोत्तरे (३।३१६।३८-४५) :—

मेषसंक्रमणे [2]भानोर्मेषदानं महाफलम् ।

[3]वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥१॥

गवां वृषाणाम्[4] ।

[5]शयनासनदानञ्च [6]मिथुनोपक्रमे तथा ।

[7]शयनासनदानमिदमेकैकस्योभयोर्वा स्वेच्छया द्वन्द्व[8]-निर्देशस्तूभयोर्महाफलत्वार्थः ।

[9]कर्कप्रवेशे [10]शक्तुश्च सितया च तथैव च ।

गुडफाणितखण्डानां सितायाश्च तथैव च ॥२॥

[11]सितया [12]शर्करया [13]सहितमित्यर्थः । [फाणितं खण्डशालूकम्][14] ।

लवणाज्यफलानाञ्च तथा [15]हरितकस्य च ।

तथा चैवोदकुम्भानां [दानं ज्ञेयं महाफलम्][16] ॥३॥

[17][हरितकं पत्रशाकम्] । [18]कर्कप्रवेशमुपन्यस्य शर्करासहितशक्त्वाद्युद-[19]कुम्भान्तदानश्रुतेः सिंहप्रवेशमुपन्यस्य [20][च देयान्तरश्रुतेः] सशर्कर-[21][शक्त्वाद्युदकुम्भान्तानां] दानं [22]कर्कसंक्रमण एव । एषाञ्च दशानां द्रव्याणां प्रत्येकमेव दानं महाफलम् । [एकस्य दानात्][23] द्वित्र्यादि-दाने[24] समस्तदाने च फलातिशयः । अत्राप्यनेकद्रव्योपादान एवं बोद्धव्यम् ।

---

1 A omits the bracketed portion
2 A भानौ मेषदान
3 A वृषभं संक्रमणे
4 A वृषानान
5 A शयनमासनदानञ्च
6 A मिथुनोपगमे
7 A सयनाशनदानानि दानैकस्योभयो-र्व्वा
8 I. O. omits द्वन्द्व
9 A कर्किप्रवेशे
10 A शक्तष, I. O. omits it
11 I. O. सितायां
12 A सर्कराय
13 I. O. सहितामामित्यर्थः
14 A फणितं खण्डवस्तूनां for the b. p.
15 A हनितथास्य
16 A ज्ञेयं फलहरीतकं for the b. p.
17 A यथाशकं for the b. p.
18 A and I. O. कर्कि०
19 I. O. कुम्भ for कुम्भान्त
20 A देयान्तरश्रुते: for the bracketed portion
21 I. O. सशक्त्वाद्युदकुम्भादीनां for the b. p
22 A कर्किसंक्रम
23 A reads एकस्य दानानात् for and I. O. omits the bracketed portion
24 I. O. द्विवादिदाने, A omits it

सिंहप्रवेशे पात्राणां तैजसानां तथैव च ।

कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च ॥४॥

सुरभीणां धूपितानाम् ।

तुलाप्रवेशे धान्यानां बीजानामपि [1]चोत्तमम् ।

[2]उत्तमदानमिति सम्बन्धः । बीजानां धान्येतरशस्यानाम् । बीजग्रहणेनैव धान्यग्रहणसिद्धेः पृथग्धान्यग्रहणं फलातिरेकार्थम् ।

कीटप्रवेशे [3]शस्त्राणां [4]वेश्मनां दानमेव च ॥५॥

[5]धनुःप्रवेशे वस्त्राणां यानानाञ्च महाफलम् ।

मृगप्रवेशे दारूणां दानमग्नेस्तथैव च ॥६॥

[6]अग्नेर्दानं दारुण्युपादाय स्वयं [7]ज्वालयित्वा शीतापनोदार्थं, [दारूणा अग्निसमिन्धनाय च][8] दारूणाम् ।

कुम्भप्रवेशे दानन्तु गवामर्थे तृणस्य तु ।

मीनप्रवेशे [स्नानानां माल्यानामपि चोत्तमम्][9] ॥७॥

स्नानानां [10]स्नानीयसुगन्धामलकादीनाम् ।

[11]दानान्यथैतानि मया द्विजेन्द्राः प्रोक्तानि काले [12][तु नरश्च] दत्त्वा ।

प्राप्नोति कामान् [13]मनसस्त्वभीष्टांस्तस्मात् प्रशंसन्ति हि कालदानम् ॥८॥

[अत्र मेषे][14] रवेः संक्रमणे यजमानोऽर्चिताय ब्राह्मणायार्चितं मेषं दद्यात् । ॐ अद्यामुकसगोत्रायामुक-[15]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-मेष-संक्रमणविहित-मेषदानफलप्राप्तिकामोऽहमेतं[16] मेषं ददानि । [17]प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा मेषोऽयं वरुणदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य

---

1 A चोत्तमां
2 A दानमिति
3 I. O. and V. D. वस्त्राणां
4 I. O. वेश्मानां, A वैश्मानां
5 I. O. and V. D. धन्विप्रवेशे, A धनुप्रवेशे
6 A अर्घ दानं
7 A ज्वालयि
8 I. O. दारूणामग्निसमिन्धनाय and A दारुणामग्निसमिन्धनाय for the bracketed portion
9 I. O. omits the bracketed portion
10 I. O. स्नानाय गन्धामलकीदानं
11 I. O. दानायथैतानि
12 A नवयाश्च for the b. p.
13 A सकलानभिष्टान
14 I. O. अनुमेषे for the bracketed portion
15 A omits वेदामुक
16 A omits एतं
17 I. O. प्रतिग्रहीत

कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा [1][मेषं पुच्छे गृह्णीयात्]।

तथा वृषसंक्रमणे[2] वृषदानवाक्ये विष्णुधर्मोत्तरोक्त-वृषसंक्रमणविहितगोदानफलप्राप्तिकामोऽहमेतान् वृषानिति विशेषः। स्वस्तिसावित्रीपाठान्ते[3] वृषा एते विष्णुदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा मिथुनसंक्रमणे शयनदानवाक्ये विष्णुधर्मोत्तरोक्त-मिथुनसंक्रमणविहित-शयनदानफलप्राप्तिकामोऽहमेतच्छयनमिति विशेषः। स्वस्तिसावित्रीपाठान्ते[4] शयनमिदं [5]प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत। [स्पर्शः स्वीकारः][6]। एवमासनदानवाक्ये [7]शयनपदस्थाने आसनपदनिवेशो विशेषः।

तथा कर्कटसंक्रमणे शर्करासहितशक्तुदानवाक्ये विष्णुधर्मोत्तरोक्तसितासहितशक्तुदानफलप्राप्तिकामोऽहमेतान् सितासहितान् [8][शक्तूनिति विशेषः]। स्वस्तिसावित्रीपाठानन्तरं शक्तव एते [9]प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [10]स्पर्शः स्वीकारः। एवं गुड-खण्डशालूक-खण्ड[11]-शर्करालवणघृतफलहरितकोदकुम्भानां प्रत्येकं दानवाक्ये[12] सितासहितान् शक्तूनिति[13]पदस्थाने एषामन्यतमस्य[14] [15]कर्कसंक्रमणविलिखितपदस्य च निवेशो विशेषः। एष सोमदैवतो गुडः [16]एतत् सोमदैवतं फाणितम् एष सोमदैवतः खण्डः [एषा सोमदैवता सिता][17] एतत् सोमदैवतं लवणम् एतद्विष्णुदैवतमाज्यम् एतद्वनस्पतिदैवतं फलम् एतद्वनस्पतिदैवतं हरितकम् एष वरुणदैवत उदकुम्भ इति स्वस्तिसावित्रीपाठानन्तरं[18] प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [सर्वेषां स्पर्शः स्वीकारः ।][19]

---

1 I. O. मेषं for the b. p.
2 A वृषसंक्रमे
3 A स्वस्तिसावित्रीपाठानन्तरं
4 A स्वस्तिसावित्रीपाठानन्तरं
5 A विष्णुदैवतामिति
6 A सूत्रस्वीकाम; for the bracketed portion
7 A शयनस्थाने
8 A शक्तुं दास्ये for the bracketed portion
9 A प्रजापतिदैवत
10 A स्पर्श
11 I. O. omits शाल कखण्ड
12 I. O. दाने वाक्यं, A दानवाक्येषु
13 A omits इति
14 A एषामन्यतमपदस्य
15 I. O. and A कर्कि०
16 A एते
17 A omits the bracketed portion
18 A स्वस्तिसावित्रीपाठान्ते
19 A omits the bracketed portion

[1]सिंहसंक्रमणे यथाशक्ति सौवर्णादिपात्राणामन्यतमस्य[2] दानवाक्ये विष्णुधर्मोत्तरोक्त-सिंहसंक्रमण[3]-विहित-तैजसपात्रदानफलप्राप्तिकामोऽहमेतत्तैजसपात्रमिति विशेषः। स्वस्ति-सावित्रीपाठानन्तरं पात्रमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शः स्वीकारः।

कन्यासंक्रमणे धूपितवस्त्र[4]-दानवाक्ये विष्णुधर्मोत्तरोक्त-कन्यासंक्रमणविहित वस्त्रदानफल-प्राप्तिकामोऽहमेतानि वस्त्राणीति[5] विशेषः। स्वस्तिसावित्रीपाठानन्तरं वस्त्राणीमानि बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [दशाग्रहणपूर्वकं परि-धानं][6] स्वीकारः।

तुलासंक्रमणे [7][धान्यदानवाक्ये विष्णुधर्मोत्तरोक्त-तुलासंक्रमणविहित-धान्यदानफलप्राप्ति-कामोऽहमेतानि धान्यानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं धान्यानीमानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। एवं बीजदानवाक्ये]धान्यपदस्थाने बीजपद-[8][निवेशो विशेषः]।

वृश्चिकसंक्रमणे [9]खड्गादीनामन्यतमशस्त्रत्रयस्य दानवाक्ये विष्णुधर्मोत्तरोक्त-वृश्चिक-संक्रमणविहित-शस्त्रदानफलप्राप्तिकामोऽहमेतानि शस्त्राणीति विशेषः। स्वस्तिसावित्री-पाठानन्तरं शस्त्राणीमानि शक्रदैवतानीति [विष्णुदैवतानीति वा][10] प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [ग्रहणं स्वीकारः। एवं गृहत्रयदानवाक्ये शस्त्रपदस्थाने गृहपद-निवेशो विशेषः। स्वस्तिसावित्रीपाठानन्तरं गृहाणीमानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।][11]प्रवेशः स्वीकारः।

धनुःसंक्रमणे [12]वस्त्रत्रयदानवाक्ये विष्णुधर्मोत्तरोक्त-धनुःसंक्रमणविहित वस्त्रदानफलप्राप्ति-कामोऽहमेतानि[13] वस्त्राणीति विशेषः। [14]स्वस्तिसावित्रीपाठानन्तरं [15]वस्त्राण्येतानि बृहस्पति-

---

1 A सिंह०
2 I. O. सौ...स्या
3 I. O. and A सिंहक्रमण
4 I. O. omits वस्त्र
5 A इति
6 A दशाग्रहणपूर्वक for the bracketed portion
7 A omits the bracketed portion
8 A निवेश: for the bracketed portion
9 A खड्गादीना०
10 I. O. omits the bracketed portion
11 A omits the bracketed portion
12 A वस्त्रय for वस्त्रत्रय
13 A omits मेतानि
14 A omits this
15 A वस्त्राणीमानि

दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1][दशाग्रहणपूर्वकं परिधानं] स्वीकारः। दोलाचतुर्दोलनौकादीनामन्यतम[2]-यानत्रयस्य दानवाक्ये वस्त्रपदस्थाने यानपद-निवेशो विशेषः। स्वस्तिसावित्रीपाठानन्तरं यानान्येतानि[3] विष्णुदैवतानीति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। [4][आरोहणादि स्वीकारः।

मकरसंक्रमणे इन्धनदानवाक्ये मकरसंक्रमणविहितेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धना-नीति विशेषः। स्वस्तिसावित्रीपाठानन्तरमिन्धनान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।] स्पर्शः स्वीकारः। [5][अग्निदानन्तु शीतार्त्तत्राणायानुष्ठानमात्रम्।]

कुम्भसंक्रमणे गोग्रासदानम्। [6]ॐ विष्णुधर्मोत्तरोक्त-कुम्भसंक्रमणविहित-गोग्रासदान-फलप्राप्तिकामोऽहं गोभ्य-[स्तृणं दास्ये][7] इति सङ्कल्प्य तद्दिने यथालाभं गोभ्यो ग्रासं[8] दद्यात्।

[9][मीनसंक्रमणे स्नानीयदानवाक्ये विष्णुधर्मोत्तरोक्त]-मीनसंक्रमणविहित स्नानदानफलप्राप्ति-कामोऽहमेतानि स्नानानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं स्नानान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शः स्वीकारः।

[10]तथा :—

उत्तरे[तु गते][11] प्रोक्तं वस्त्रदानं महाफलम्। (३।३१७।४क)

तिलदानं तथा विप्रा दक्षिणोपगते[12] रवौ ॥६॥

विप्रा इति सम्बोधनम्। उत्तरायणेऽर्चिताय ब्राह्मणाय वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तोत्तरायणविहित-वस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति वदेत्[13]। पूर्ववत् कामस्तुत्यादि[14] दक्षिणा[15] च। [16]दशाग्रहणपूर्वकं परिधानं स्वीकारः। दक्षिणायने [तिलदान-वाक्ये विष्णुधर्मोत्तरोक्त-दक्षिणायनविहिततिलदान][17]-फलप्राप्तिकामोऽहमेतांस्तिलानिति विशेषः।

---

1 A दशग्रहणपूर्व्वकं for the bracketed portion
2 I. O. ०तमम
3 A एतानि
4 A omits the bracketed portion
5 A omits the bracketed portion
6 A omits it
7 A स्तृणं दास्ये for the bracketed portion
8 A ग्रासं
9 A omits the bracketed portion
10 I. O. omits तथा
11 I. O. त्वपरे for the bracketed portion
12 I. O. दक्षिणायनगे
13 I. O. पठेत्
14 I. O. कामस्तुति
15 I. O. दक्षिणे, A reads दक्षिणां
16 A दश०
17 A तितिलदानविहित for the bracketed portion

ास्तिसावित्रीपाठानन्तरं तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। काम-
तुत्यादि पूर्ववत्। [1]मुष्टिग्रहणं स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे संक्रान्ति-दानावर्त्तः।

---

1 A स्वस्तिग्रहणं

[अथ नानादेवत-ऋतुदानावर्तः।(६९)][1]

[2]सम्वर्तः :—

इन्धनानि [3]तु यो दद्याद्विप्रेभ्यः शिशिरागमे।
स सुखी दीप्तकायाग्निः सुभगश्चैव जायते ॥१॥

अत्र [4]शिशिरर्तूपक्रमदिने [5]यजमानो यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्योऽर्चितानीन्धनानि दद्यात्। [6][ॐ अद्यामुक]-सगोत्रेभ्योऽ[7][मुकवेदामुक]-शाखाध्यायिभ्योऽ[8]मुकदेवशर्मभ्यो युष्मभ्यं सम्वर्तोक्तेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धनानि ददानि। प्रतिग्रहीतारः स्वस्ति-सावित्रीं[9] पठित्वा इन्धनानीमानि विष्णुदैवतानीत्युक्त्वा [10][यथाशाखं कामस्तुतिं पठेयुः]। [11]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रति-ग्रहीतारः स्वस्तीत्युक्त्वा इन्धनानि स्पृशेयुः।

[12]स्कन्दपुराणे :—

काष्ठानि यः प्रयच्छेत हेमन्ते नरसत्तमः।
ब्राह्मणेभ्यः सदा देवि सोऽग्निलोकं समश्नुते ॥२॥

[13]हेमन्तोपक्रमदिने [14]प्रातर्गृहीतोदपूर्णताम्रपात्र उदङ्मुखः काष्ठदानं सङ्कल्पयेत्। [15]ॐ अद्यारभ्य हेमन्तसमाप्तिपर्यन्तं [16]यथासम्भवगोत्रनामभ्यो ब्राह्मणेभ्योऽग्निलोकप्राप्ति-कामोऽहं प्रत्यहं काष्ठानि दास्ये। ततः प्रभृति हेमन्तसमाप्त्यवधि[17] [प्रतिदिनं ब्राह्मण-गृहेषु][18] यथालाभं काष्ठानि दद्यात्। सदेति पदश्रवणात् ऋतुव्यापित्वमस्य।

---

1 I. O. omits the bracketed portion
2 A omits this
3 A च
4 A शिशिरसूर्यक्रमदिने
5 A यजमाने
6 A अद्यामुकामुक for the bracketed portion
7 A मुकाकामक for the b. p.
8 A मुकामुक for मुक
9 A पवित्रीं after सावित्रीं
10 A यथाशाकं कामस्तुति for the bracketed portion
11 A omits this
12 A स्कन्धपुराणे
13 A हेमन्तोत्क्रमदिने
14 A गृहीतोपूर्णताम्रपात्र, I. O. omits ताम्र
15 A omits it
16 I. O. यथासम्भ०
17 I. O. हेमन्तसमाप्त, A हेमन्त-समाप्य
18 I. O. देवब्राह्मणगृहेषु for the bracketed portion

आग्नेयपुराणे :—

हेमन्ते शिशिरे चैव पुण्याग्निं यः प्रयच्छति ।

सर्वलोकप्रतापार्थं स पुण्यां गतिमाप्नुयात् ॥३॥

[1]पुण्याग्निं चाण्डालादिगृहाग्निव्यतिरिक्तम् । हेमन्तोपक्रमदिने [2]नानासत्त्वशीताप-नोदाय सेन्धनमग्निं[3] प्रातः सायञ्च यथेच्छं पूर्ववत् [4]सङ्कल्प्य [5]शिशिरर्तुसमाप्तिं यावत् प्रत्यहं दद्यात् । ॐ अद्यादि [6]शिशिरर्तुसमाप्तिपर्यन्तं सर्वलोकप्रतापार्थं पुण्यगतिप्राप्ति-कामोऽहं पुण्याग्निं दास्ये ।

भविष्यपुराणे (१।६३।७३) :—

[7][शीते काष्ठेन्धनं] दद्यान्नराणां शीतनाशनम् ।

भानोरायतने देव अश्वमेधफलं लभेत् ॥४॥

शीतकालोपक्रमदिने पूर्ववत् नराणां प्रतापनार्थं [8]दारून् सङ्कल्प्य सूर्यायतने दद्यात् । ॐ अश्वमेधफलप्राप्तिकामोऽहम् अद्यादि यावच्छीतकालं[9] सूर्यायतने [10]नरप्रतापनार्थं [11][दारून् दास्ये] ।

नरसिंहपुराणे :—

शीतकाले महावह्निं प्रज्वालयति यो नरः ।

सर्वसत्त्वहितार्थाय स्वर्गञ्चाप्सरसं लभेत् ॥५॥

एतदप्यनुष्ठानमात्रम् । अतएव धार्मिकाः [12]स्नानघाटे शीतसमये [13]काष्ठकूटेषु अग्नि-मनुदिनं प्रज्वालयति ।

महाभारते (अनु—१२५।८०ख and ८१ख) :—

वर्षासु दीपदानेन [14]विष्णुलोकमवाप्नुयात् ।

[15][तमोरूपं न तस्यास्ति दीपकं यः प्रयच्छति] ॥६॥

---

1 I. O. and A पुण्याग्नि
2 A नराणां शीतनाशाय शीतकाले देयं
3 I. O. सुप्रसिद्धमग्निं
4 A omits it
5 A शिशिरसमाप्तिं
6 A शिशिरसमाप्तिपर्यन्तं
7 A शीतकालेन्धनं and Bh. p. शीतकाले घनं for the bracketed portion
8 A दारूणि
9 A ०काल
10 A नराणां for नर
11 A दारूणि दद्यात् for the bracketed portion
12 I. O. स्नानप्रान्ते
13 A काष्ठकूटे
14 A शिवश्लोभते नरः
15 I. O. तथारूपं न तस्याखिलरूपः प्रयच्छति for the bracketed portion

वर्षासु श्रावणभाद्रपदयोरित्यर्थः। सौरश्रावणप्रतिपदमारभ्य भाद्रपदसमाप्तिपर्यन्तं मासद्वयं शुचिस्थाने दीपं पूर्ववत् सङ्कल्प्य दद्यात्। [1][ॐ अद्यादि] [2]भाद्रपदसमाप्तिपर्यन्तम् अमुकसगोत्रायामुकदेवशर्मणे[3] दीपदानफलप्राप्तिकामोऽहं दीपं दास्ये। [4][फलभूयस्त्वेन ऋतुव्यापित्वमस्य।]

[5][विष्णुधर्मोत्तरे :—

इन्धनानां] प्रदानेन [6]शिशिरे स्यान्महाफलम्।
स्नानानुलेपनादीनां वसन्ते द्विजसत्तमाः ॥७॥ (३।३१७।४ख)

द्विजसत्तमा इति सम्बोधनम्। आदिशब्देन माल्यग्रहणम्।

[7][पानकानां तथा] ग्रीष्मे कट्टनां [8]तदनन्तरे।
शरद्यन्नस्य [9]धर्मज्ञा वस्त्राणामपि [10]हैमने ॥८॥ (३।३१७।५)

तदनन्तरे प्रावृषि। [11]धर्मज्ञा इति सम्बोधनम्। माघफाल्गुनयोरन्यतरस्य [12]यथेष्टदिनेऽर्चिताय [13]ब्राह्मणायार्चितानीन्धनानि दद्यात्। ॐ [14]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-[15]शिशिरर्तुविहितेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धनानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। तथा चैत्रवैशाखयोरन्यतरस्य यथेष्टदिने सुगन्धितैलामलकानुलेपनमाल्यानां दानवाक्ये विष्णुधर्मोत्तरोक्त-[16][वसन्तर्तुविहित-स्नानानुलेपनमाल्यानीति विशेषः]। [17]स्वस्तिसावित्रीपाठानन्तरं स्नानानुलेपनादीन्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [18]तथा ज्यैष्ठाषाढ-

---

1 I. O. omits the bracketed portion
2 A omits it
3 I. O. omits it
4 A omits the bracketed portion
5 A reads the bracketed portion as विष्णुधर्मोत्तरोक्त इन्धनानि
6 A and I. O. शिशिर
7 A पानकानान्तथा for the bracketed portion
8 A तदनन्तरं
9 A धर्मज्ञ
10 A हेमने
11 A धर्मज्ञ
12 A यथेष्टदिने
13 A ब्राह्मणायार्चितायार्चितमीन्धानं
14 A अद्यादिदमुक अमुकगोत्रायामुकशाखाध्यायिने अमुकदेवशर्मणे
15 A शिशिरविहित इन्धन०
16 A वसन्तविहितस्नानानुलेपनादिदानफलप्राप्तिकामोऽमेतानि स्नानानुलेपनादीनि दास्ये for the b. p.
17 A omits it
18 A omits it

योरन्यतरस्य यथेष्टदिने पानकानां दानवाक्ये विष्णुधर्मोत्तरोक्त-ग्रीष्मर्तु विहित-पानकदानफलप्राप्तिकामोऽहमेतानि पानकानीति विशेषः। स्वस्तिसावित्रीपाठान्ते पानकान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तथा श्रावणभाद्रयोरन्यतरस्य यथेष्टदिने कटुद्रव्यदानवाक्ये विष्णुधर्मोत्तरोक्त-कटुदानफलप्राप्तिकामोऽहमेतानि [1]कटूनीति विशेषः। स्वस्तिसावित्रीपाठान्ते कटून्येतानि सोमदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तथाश्विनकार्त्तिकयोरन्यतरस्य यथेष्टदिने अन्नदानवाक्ये [2]विष्णुधर्मोत्तरोक्तशरदृतु-विहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तथा मार्गपौषयोरन्यतरस्याभिमतदिने[3] वस्त्रत्रयदानवाक्ये[4] विष्णुधर्मोत्तरोक्त-हेमन्तर्तु विहितवस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणीति विशेषः। स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानि बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं[5] परिधानं स्वीकारः।

तथा—(३।३१७।६-७) :—

> बहिः स्नानं नरः कृत्वा सूर्यस्योदयनं प्रति।
> शिशिरे सततं[6] वह्निं तर्पयित्वा तथा तिलैः॥९॥
> कुन्माषं सघृतं दत्त्वा यथाशक्त्या द्विजातिषु[7]।
> [कायाग्निदीप्तिं प्राकाश्यं][8] शत्रुनाशञ्च विन्दति॥१०॥

[9]शिशिरर्तूपक्रमदिने उदितमात्रे सूर्ये ग्रामाद्बहिर्जलाशये स्नात्वाग्नौ ॐ प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा घृतसहितान् राजमाषानर्चितान् ब्राह्मणेभ्योऽर्चितेभ्यः [ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात्][10]। विष्णुधर्मोत्तरोक्तसघृतकुन्माषदानफलप्राप्तिकामोऽहमेतान् [सघृतान् कुन्माषान् ददानि][11]। प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते कुन्माषोऽयं प्रजापतिदैवत इति वदेयुः। पूर्ववत् कामस्तुतिदक्षिणे। मुष्टिग्रहणं स्वीकारः। एवं प्रत्यहं मासद्वयं दद्यात्।

---

1 A कटूकानीति
2 A विष्णुधर्मो क्तशरदृतु॰
3 A ॰हिमतद्दिने
4 A वस्त्रयद्दानवाक्ये
5 A ॰पूर्व्वक
6 A मतं
7 A द्विजादितिषु
8 A कामाग्निदीप्तप्राकाश्यं for the bracketed portion
9 A शिशिरर्तो पक्रमद्दिने
10 A omits the bracketed portion
11 A कुन्माषान् दास्ये for the bracketed portion

तथा :—

शक्तून् सिताखण्डयुतान् त्रपुषोर्वारुकान्वितान् । (३।३१७।८क)

लवणाज्ययुतान् दत्त्वा तथा हरितकान्वितान् ॥११॥

त्रपुषं तिमिष इति प्रसिद्धम् । उर्वारुः कर्कटी हरितकम् पत्रशाकम् ।

जलकुम्भोपरिकृतानक्षयं फलमश्नुते ।

मध्याह्ने प्रावृषि स्नातः सततं द्विजसत्तमाः ॥१२॥ (३।३१७।८ख-९क)

द्विजसत्तमा इति सम्बोधनम् । वर्षासमयोपक्रमदिने मध्याह्ने स्नात्वार्चिताय ब्राह्मणाय त्रपुष-कर्कटी-लवणघृतपत्रशाकसहितान् जलकुम्भोपरिस्थितान् शर्कराखण्डयुतान् शक्तूनर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-वर्षर्तु विहितशक्तुदानफलप्राप्तिकामो-ऽहमेतान् सिताखण्ड-त्रपुषोर्वारु[1]-लवणाज्यहरितकयुतान् जलकुम्भोपरिकृतान् शक्तून् ददानि । प्रतिग्रहीता स्वस्तिसाविलीपाठान्ते शक्तव एते प्रजापतिदैवता इति वदेत् । पूर्ववत् कामस्तुतिर्दक्षिणा च । एवं मासद्वयं दद्यात् ।

तथा :—

शिशिरं सकलं कालं ग्रासं[2] परगवे तथा ।

दत्त्वा स्वर्गमवाप्नोति संवत्सरशतानि षट् ॥१३॥

शिशिरर्तूपक्रमदिने[3] पूर्ववत् परगवे[4] ग्रासं सङ्कल्पयेत् । ॐ अद्यारभ्य यावच्छिशिरं प्रत्यहं विष्णुधर्मोत्तरोक्तशिशिरर्तु विहितगोग्रासदानफलप्राप्तिकामोऽहं परगवे[5] ग्रासं दास्ये । ततो यावच्छिशिरं प्रत्यहं परकीयगवे[6] घासं दद्यात् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे ऋतुदानावर्तः ।

---

1 A त्रपुषकर्कटी

2 I. O. भासं

3 A omits दिने

4 & 5 I. O. परगवार्थे

6 I. O. परकीयगवार्थे

अथ नानादैवत-वत्सरदानावर्त्तः[1] । (७०)

विष्णुधर्मोत्तरे (३।३१७।२-३) :—

> संवत्सरे तु दारूणां तिलस्य च महाफलम् ।
> परिपूर्वे तथा दानं [2]यवानां द्विजसत्तमाः ॥१॥
> [3]इदापूर्वेऽन्नवस्त्राणां धान्यानाञ्चानुपूर्व्वके ।
> उत्पूर्वे[4] रजतस्यापि दानं प्रोक्तं महाफलम् ॥२॥

अत्र संवत्सरादि-समयविशेषपरिचयाय[5] दानसागरनिर्माण-[6]वर्षस्यैव संवत्सरत्वप्रतिपादनाय लिख्यते । [7]निखिलभूपचक्रतिलक-श्रीमद्बल्लालसेन-देवेन[8] पूर्णे[9] शशिनवदशमित (१०९१[10]) शाकवर्षे दानसागरो रचितः ।

> **रविभगणाः [11]परजशिष्टा ये भूता दानसागरस्यास्य ।**
> **क्रमशोऽस्य सम्परीदानूदाद्या[12] वत्सराः पञ्च ॥३॥**

[13]तदेवमेकनव-[14]त्यधिकवर्ष-[सहस्रावच्छिन्ने शाके संवत्सरः पतति, स च विषुवादारभ्य ।][15] एवञ्च परिवत्सर-[16]इदावत्सर-[17]अनुवत्सर-उद्वत्सराः क्रमाद्भवन्ति । वर्षपञ्चकातिक्रमे च पुनरावर्त्तते ।

तदनु यजमानः साम्वत्सरिकेष्टमासपुण्यदिने अर्च्चिताय ब्राह्मणायार्च्चितानि दारूणि दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं विष्णु-धर्मोत्तरोक्त-सम्वत्सरविहित-दारुदानफलप्राप्तिकामोऽहमेतानि दारूणि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दारूण्येतानि विष्णुदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् ।

---

1 A नामादैवतविष्णुधो त्तरोक्तवतस-दानावर्त्तः
2 A पराणां
3 I. O. जदावर्त्त०
4 A उतपूर्व्व, I. O. उत्पूर्व्वे
5 A ०परिपादान
6 A ०कालस्यैव
7 A निखवर्गतिलक०
8 A नेना for देवेन
9 I. O. पूर्व्वे
10 A ३६
11 A सरजशिष्टा
12 I. O. ०दाद्या
13 A तद्देव०
14 I. O. ०त्याधिक
15 A सहस्रावेऽच्छिन्ने शाके सम्वत्सराः पतन्ति । विषपदारभ्य for the b. p.
16 I. O, जदारत्सर
17 A अनुवतस

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत्[1] काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा दारुणि स्पृशेत्। तिलदानवाक्ये तिलदानफलप्राप्तिकामोऽहमेतांस्तिलानिति विशेषः[2]। [3]स्वस्तिसावित्रीपाठानन्तरं तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। परिवत्सराख्यवर्षाभिमत-मासिकपुण्यदिनेऽर्चिताय ब्राह्मणायार्चितान् यवान् दद्यात्। तत्र दानवाक्ये परिवत्सरविहित-यवदानफलप्राप्तिकामोऽहमेतान् यवानिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं यवा एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत। मुष्टिग्रहणं स्वीकारः। [4]इदावत्सराख्यवर्षाभिमतमासिकपुण्यदिनेऽर्चिताय ब्राह्मणायार्चितमन्नं दद्यात्। [5][तत्र दानवाक्ये] [6]इदावत्सरविहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरमन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। [7][वस्त्रदाने वाक्ये] वस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणीति विशेषः। [8]स्वस्तिसावित्रीपाठानन्तरं वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि [9][पूर्ववत्। दशाग्रहण]-पूर्वकं परिधानं स्वीकारः। [10]अनुवत्सराख्यवर्षाभिमतमासिकपुण्यदिने अर्चिताय ब्राह्मणायार्चितानि [11]यथेष्टधान्यानि दद्यात्। तत्र दानवाक्ये अनुवत्सरविहित-धान्यदानफलप्राप्तिकामोऽहमेतानि धान्यानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं धान्यान्येतानि प्रजापतिदैवतानीति प्रतिग्रहीतृवाक्यम। कामस्तुल्यादि पूर्ववत। [12][मुष्टिग्रहणं स्वीकारः।] [13]उद्वत्सराख्यवर्षाभिमतमासिकपुण्यदिने अर्चिताय ब्राह्मणायार्चितं [14]रजतं दद्यात्। तत्र दानवाक्ये [15]उद्वत्सरविहितरजतदानफलप्राप्तिकामोऽहमेतद्रजतमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं रजतमिदं [16]चन्द्रदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे वत्सरदानावर्तः।

---

1 A दक्षिणामिद्
2 I. O. शेष:
3 A स्वस्तिसावित्रीपाठान्ते
4 I. O. इदा०
5 A omits the bracketed portion
6 I. O. इदा०
7 A वस्त्रदानवाक्ये
8 A स्वस्तिसावित्रीपाठान्ते
9 A omits the bracketed portion
10 I. O. अनुवत्सराख्याभिमत०
11 A यथेच्छधान्यानि
12 A omits the bracketed portion
13 A उद्वराख्य०, I. O. उद्वत्सराख्य०
14 A omits this
15 A उद्वसरविहित०
16 I. O. अग्निदैवतमिति

अथ नानादैवत-[1]विप्रकीर्णदानावर्तः । (७१)

सम्वर्तः :—

ताम्बूलञ्चैव यो दद्याद् ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥१॥

अत्र यजमानो [2]यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्योऽ[3]र्चितानि ताम्बूलानि दद्यात् । ॐ अद्यामुकसगोत्रेभ्योऽमुकामुक-[4]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुक-[5]देवशर्मभ्यो युष्मभ्यं [6]सम्वर्तोक्तताम्बूलदानफलप्राप्तिकामोऽहमेतानि ताम्बूलानि [7]ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा [8][सावित्रीं पठित्वा] ताम्बूलान्येतानि विष्णुदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । [9][तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं] युष्मभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीतारः[10] स्वस्तीत्युक्त्वा ताम्बूलं[11] स्पृशेयुः ।

तथा :—

फलमूलानि [12]पानानि शाकानि विविधानि च ।
[13]यानानि दत्त्वा विप्रेभ्यो मुदा युक्तः सुखी भवेत् ॥२॥

मूलानि [14]कशेरुशालुकादीनि । देयबहुत्वापेक्ष्यं सम्प्रदानबहुत्वम् । ब्राह्मणायार्चिताय विविधमूलान्यर्चितानि दद्यात् । [15][ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने ऽमुकदेवशर्मणे तुभ्यं] सम्वर्तोक्त-मूलदानफलप्राप्तिकामोऽहमेतानि मूलानि ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते मूलान्येतानि विष्णुदैवतानीति वदेत् । कामस्तुत्यादि

---

1 A ०प्रकीर्णं०
2 A यथेच्छ०
3 A omits अर्चितेभ्यो
4 A ०वेदामुक०
5 A omits देव
6 A सम्वर्त्तोक्त०
7 A दद्यात्
8 A सावित्रीपाठे
9 A reads the bracketed portion as ॐ अद्यादिदानप्रतिष्ठार्थं
10 I. O. प्रतिग्रहीतृवाच्यं
11 I. O. तम्बलं
12 A यानानि
13 I. O. पानानि
14 A क्री for कशेरु
15 A reads the bracketed portion as अमुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽमुकशर्मभ्यो युष्मभ्यं

[1]स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [2][दक्षिणावाक्ये त्वेकवचनान्तसम्प्रदान]-प्रयोगो विशेषः। शाकदाने तु सम्वर्तोक्तशाकदानफलप्राप्तिकामोऽहमेतानि [3]शाकानीति [प्रतिग्रहीतृवाक्ये शाकान्येतानि][4] वनस्पतिदैवतानीति च[5] विशेषः। [6][विविधानीति शाकानां नानाजातीयत्वप्रदर्शनार्थः] ।

तथा :—

गुडमिक्षुरसञ्चैव[7] लवणं व्यञ्जनानि च ।

सुरभीणि च पानानि [8]दत्त्वात्यन्तं सुखी भवेत् ॥३॥

ब्राह्मणाया-[9]र्चितायार्चितानि व्यञ्जनानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अत्यन्तसुखप्राप्तिकामोऽहमेतानि व्यञ्जनानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

तैलमामलकं [10]यच्छत् पादाभ्यङ्गं तथैव च ।

नरः सुहृष्टस्तेजस्वी [11]सुखवांश्चैव जायते ॥४॥

ब्राह्मणायार्चितायार्चितं तैलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सम्वर्तोक्ततैलदानफलप्राप्तिकामोऽहमेतत्तैलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। फलभूयस्त्वादुत्कृष्टतैलदानमावृत्त्या[12] वापि। [13]आमलकदानवाक्ये तैलपदस्थाने आमलक-[14]पदनिवेशो विशेषः।

[15]विष्णुः :—

मधुघृततैलदानेनारोग्यम् ॥५॥

ब्राह्मणायार्चितायार्चितं तैलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [16]आरोग्यप्राप्तिकामोऽहमेतत्तैलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. स्वीकारान्तं, A omits it

2 A reads the bracketed portion as दक्षिणाक्योक्त्यैकवचनान्तसंप्रदाना

3 A reads the following for शाकानीति प्रतिग्रहीतृवाक्ये:—शाकानि प्रतिग्रहीतृवाक्यं कामस्त्यादि पूर्ववत्

4 I. O. reads the bracketed portion twice

5 A omits च

6 A reads the bracketed portion as विधिनानीति शाकानां नानाजातित्वप्रदर्शनाय

7 A ०श्चैव

8 A दत्त्वात्यर्थं

9 I. O. ०र्चितायर्चितानि, A omits अर्चिताय

10 A यच्च

11 I. O. सुखरांश्चैव

12 I. O. and A ०वृत्या

13 I. O. and A ह्यामलक०

14 A omits पद

15 A विष्णुधर्मोत्तरोक्त

16 A चारोग्यल०

तथा :—

तालवृन्तचामर-[1]दानेनादुःखित्वम् ॥६॥

ब्राह्मणायार्चिताय तालवृन्तमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [2]अदुःखित्व-प्राप्तिकामोऽहमेतत्तालवृन्तं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। चामरदानवाक्ये तालवृन्तपद[3]-स्थाने चामरमिति विशेषः।

यमः :—

राजोपकरणं दत्त्वा [4][रत्नानि विविधानि च।

नगरञ्च तथा[5] दत्त्वा] राजा भवति भूतले ॥७॥

ब्राह्मणायार्चिताय सिंहासनकनक[6]-दण्डच्छत्र-सौवर्णदण्डसितचामर-भृङ्गाराणामिच्छ-यान्यतमं राजोपकरणमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। भूतलराज्य-प्राप्तिकामोऽहमेतद्राजोपकरणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। कनकदण्डस्य ग्रहणं भृङ्गारचामरसिंहासनानां स्पर्शः स्वीकारः।

आदित्यपुराणे :—

नवं श्लक्ष्णं सुविपुलं ये प्रयच्छन्ति पक्षकम्।

आवीज्यमानो धर्मोऽपि पवनो वाति शीतलः ॥८॥

श्लक्ष्णं कुटिलपक्षयुतं, सुविपुलं महत्, पक्षकं मयूरपक्षव्यजनम्। नव-मुकुलक्षणं मयूरपक्षव्यजनमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्त-पक्षकदानफलप्राप्तिकामोऽहमेतं पक्षकं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा :—

तीर्थतडागकूपादिनौकासेतुप्रदाश्च[7] ये।

स्कन्धेन तारयेद्[8] यस्तु तृषार्तानां जलप्रदः ॥९॥

तीर्थं जलाशयावतरणवर्त्म, स्कन्धेन जलेषु दुर्बलजन्तुतारणम्।

---

1 A' ०दाने दुःखत्वं
2 I. O. अदुःखित्व०, A अदुःख०
3 I. O. omits पद
4 A' omits the bracketed portion
5 I. O. दया
6 I. O. omits कनक
7 A' ०प्रदाश्च
8 A तारयेत्

षष्टिकोटिसहस्राणि अर्बुदानाञ्च वै त्रयम् ।
क्रीडन्ति[ते श्वेतपुरे][1] एतदुक्तं द्विजोत्तम[2] ॥१०॥

जलाशयावतरणार्थमिष्टकादिभिर्यथाशक्ति तीर्थं निर्माय सङ्कल्पयेत् । [3]ॐ आदित्यपुराणोक्ततीर्थदानफलप्राप्तिकामोऽहं जन्तुभ्यो [4]जलावतरणार्थमेतत्तीर्थमुत्सृजे[5] । सेतुदाने[6] आदित्यपुराणोक्तसेतुदानफलप्राप्तिकामोऽहं जन्तुभ्यो यथेष्ट-[7]सञ्चारार्थमेतं सेतुमुत्सृजे[8] । स्कन्धेन [9]दुर्बलजन्तुसन्तारणमनुष्ठानमात्रम् ।

तथा :—

यष्टिं[10] ये तु प्रयच्छन्ति [11][नेत्रहीनेऽथ दुर्बले] ।
तेषान्तु विपुलः पन्थाः[12] फलमूलोपशोभितः ॥११॥

भवतीति [13]शेषः ।

[14][तथा नन्दिपुराणे] :—

यष्टिं[15] [16]वृद्धाय यो दद्यात् पुरुषस्तु दयापरः ।
सदाश्रयो भवेन्नित्यं [17]गतभीः स्वर्गमाप्नुयात् ॥१२॥

एतदुभयमप्यनुष्ठानमात्रम् ।

तथा :—

वह्निवस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते ॥१३॥

वह्न्यर्थिने वह्निदानं सङ्कल्पयेत् । ॐ ब्रह्मलोकप्राप्तिकामोऽहं वह्न्यर्थिने वह्निं दास्ये । ततो यथेष्टकालावधि वह्न्यर्थिने वह्निं [18]प्रज्वाल्य दद्यात् ।

---

1 A तो सुतपुरे for the bracketed portion
2 A द्विजोत्तमः
3 A omits it
4 I. O. जलावतरणार्थतीर्थ०
5 A ०सृजेत्
6 A सेतुराले
7 A ०सञ्चारोपयुक्तं
8 A ०सृज्ये
9 A तुजन्तु संतराय०
10 I. O. यष्टिं
11 A नेत्रहीने च दुर्बलः for the b. p.
12 I. O. पथः
13 A विशेषः
14 I. O. omits the bracketed portion
15 I. O. यष्टिं
16 A विप्राय
17 A गतभीतः
18 A प्रज्वाल्या

नन्दिपुराणे :—

उष्णीषदायी यो मर्त्यो जायते [1]मुकुटोत्कटः ।

[2]विस्तीर्णे राजवंशे तु श्वेतच्छत्रः[3] [4]स लक्ष्मवान् ॥१४॥

णीषं [5]रोहितमुकुटाकृतिवासोविन्यासरूपम् । ब्राह्मणायार्चिताय उष्णीषमर्चितम्[6] दि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्तोष्णीषदानफलप्राप्तिकामोऽहमेतदुष्णीषं स्वस्त्यादिस्वीकारान्तं पूर्ववत् । परिधानं स्वीकारः ।

महाभारते (अनु—५७।३८) :—

[7]स्रग्गन्धधूपान्यनुलेपनानि [स्नानानि माल्यानि][8] च मानवो यः ।

दद्याद् द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च नरेन्द्रलोके ॥१५॥

नानि स्नानसाधनानि तिलामलकादीनि[9] । सम्प्रदानबहुत्वं देयबहुत्वापेक्षम् । ब्राह्मणाय [10]स्नानीयद्रव्याण्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महा- स्नानदानफलप्राप्तिकामोऽहमेतानि स्नानानि ददानि । स्वस्त्यादिस्वीकारान्तं

तथा (अनु—५७।३७क) :—

भक्ष्यान्नपानीयरसप्रदाता सर्वान् समाप्नोति रसान् [11]प्रकामान् ॥१६॥

लवणादयः । [12]ॐ अर्चिताय ब्राह्मणाय लवणादीनामन्यतमरस[13]-द्रव्यमर्चितम् ॐ तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-रसदानफलप्राप्तिकामोऽहमेतममुक[14] रसं स्वस्तिसावित्रीपाठान्ते रसोऽयं [15]सोमदैवत इति वदेत् । कामस्तुत्यादि पूर्ववत् ।

तथा :—

[16]पिपासया न म्रियते सोपच्छन्दश्च जायते ।

न [17]प्राप्नुयात् स व्यसनं करम्भान्[18] यः प्रयच्छति ।

प्रयतो ब्राह्मणेभ्यश्च श्रद्धया परया युतः ॥१७॥

A मुकुटोत्कटः
A विस्तीर्णं
A श्वेतच्छत्रं
A स्व
A परिविष्टि for रोहित
A omits अर्चितम्
A सुगन्धम॰
A reads the bracketed portion as माल्यानि स्नानानि
I. O. तिलामलकानीति
10 I. O. omits स्नानीय
11 A प्रकामं
12 I. O. omits ॐ
13 I. O. ॰रसं
14 A ॰ममुक
15 A सोमदैवतमिति
16 A पिपासाया
17 I. O. प्राप्नुयाश्च
18 I. O. करम्भान्

करम्भा[1] दधिशक्तवः[2]। [3]ब्राह्मणेभ्योऽर्चितेभ्यो दधिमिश्रान्[4] [5]शक्तूनर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-करम्भदानफलप्राप्तिकामोऽहमेतान् करम्भान् ददानि। स्वस्त्यादिस्वीकारान्तं[6] पूर्ववत्।

तथा (अनु—२३।१००) :—

निवेशनानां क्षेत्राणां वसतीनाञ्च भारत[7]।

दातारः प्रार्थितानाञ्च पुरुषाः स्वर्गगामिनः ॥१८॥

येन येन द्रव्येण धान्यहिरण्यादिना [8][यो हृव्यो भवति] [9]तत्तद्द्रव्यमर्चितम[10]-र्चिताय तस्मै ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतदमुकद्रव्यं ददानि। प्रतिग्रहीता स्वस्तिसाविलीपाठान्ते [11]अमुकद्रव्यमिदमुकदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [12][द्रव्यदेवतास्वीकारौ प्रतिग्रहविधावनुसन्धेयौ]।

विष्णुधर्मोत्तरे (३।३०६।६३ख-६४क) :—

[13]मस्तुपिण्डकिलाटादिकूर्चिकादानतस्तथा।

गोरसानां प्रदानेन तृप्तिमाप्नोत्यनुत्तमाम्[14] ॥१९॥

पिण्डं पिण्डितदुग्धम्, किलाटः [15]सुमृष्टदुग्धपिण्डः। [16]आदिशब्दात् दुग्धविकारान्तरग्रहणम्। कूर्चिका [17]दधिसरः, गोरसानां दधितक्रशिखरिण्यादीनाम्[18]। ब्राह्मणायार्चिताय मस्त्वर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमतृप्तिकामोऽहमेतत्[19] मस्तु ददानि। स्वस्त्यादि पूर्ववत्। एवं पिण्डदुग्धादिदाने [20]मस्तुपदस्थान एतत्पिण्डदुग्धम् [21]एतं किलाटम् एतां[22] कूर्चिकामेतं[23] गोरसमिति[24] पदनिवेशो वाक्ये विशेषः।

---

1 I. O. करम्भो
2 A adds प्रति after this
3 A ब्राह्मणो for ब्राह्मणेभ्यो
4 A दधिमिश्रितान्
5 I. O. सक्तू०
6 I. O. omits स्वीकारान्तं
7 A भारते
8 I. O. omits the bracketed portion
9 I. O. तन्तु द्रव्य०
10 A omits अर्चितम्
11 I. O. अमुकद्रव्यमिति
12 A reads the bracketed portion as द्रव्यदेवतास्वीकारो प्रतिद्रव्यमनुसन्धेयो
13 A यस्तु०
14 A ०तमं
15 A स्वयम्नष्ट for सुमृष्ट
16 A आदिशब्देन
17 I. O. दधिसर:, A दधिपर:
18 A ०शिखरिण्यादीनां
19 A ०मेतं
20 A मस्तुपिण्डपदस्थाने
21 A एता
22 I. O. एतं
23 A एतत्
24 I O. गोरस

तथा (३।३१५।८क) :—

लेह्यदोऽप्सरसां लोकम् ।

[1][प्राप्नोतीति शेषः । यथेष्ट] लेहनीयं पिण्डीकृतं दुग्धमर्चितम् अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [2]अप्सरोलोकप्राप्तिकामोऽहमेतल्लेह्यं[3] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[4]तथा (३।३१५।८क) :—

वसूनामपि चोष्यदः[5] ॥२०॥

[6]लोकमाप्नोतीति शेषः । [7]यथेच्छं [8]चोषणीय-[9]दुग्धाम्रादिकमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतच्चोष्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।११क) :—

इक्षु-[10]मृद्वीकयोर्दानात् परं सौभाग्यमाप्नुयात् ॥२१॥

अर्चिताय ब्राह्मणायार्चितमिक्षुम्[11] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [12]परम-सौभाग्यप्राप्तिकामोऽहमेतमिक्षुं[13] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[14][तथा—(३।३११।११क) :—

दन्तकाष्ठप्रदानेन सौभाग्यं महदाप्नुयात् ॥२२॥

ब्राह्मणायार्चिताय दन्तकाष्ठमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अतिशयित-सौभाग्यप्राप्तिकामोऽहमेतद्दन्तकाष्ठं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

तथा (३।३४१।८०क) :—

[15][जिह्वानिर्लेखनं दत्वा] विरोगस्त्वभिजायते ॥२३॥

---

1 A reads the bracketed portion as प्राप्नोति यथेच्छं
2 A अप्सरसां for अप्सरो
3 A ०मेतं तल्लेह्यं
4 I. O. omits it
5 A चोष्यतः
6 A लोकं प्राप्नोतीति
7 A omits it
8 I. O. चोषणाय
9 A ०दुग्धादिक०
10 A ०चर्विकयोर्दानात्
11 I. O. इक्षु for इक्षुम्
12 I. O. धन for परम
13 I. O. इक्षु for इक्षुं
14 A reads the bracketed portion a little below, just before तथा :—मृत्तिकायाः etc.
15 A जिह्वानिर्लेखनं कृत्वा and I.O. जिह्वानिर्लेपनं कृत्वा for the bracketed portion

अर्चिताय ब्राह्मणायार्चितं जिह्वानिर्लेखनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [1]विरोगत्वप्राप्तिकामोऽहमेतज्जिह्वानिर्लेखनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।११ख) :—

मृत्तिकायाः प्रदानेन शुचिः सर्वत्र जायते ॥२४॥

मृत्तिका तीर्थमृत्तिका स्नानार्था शौचार्था च। अर्चिताय ब्राह्मणायार्चितां[2] मृत्तिकाम्[3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त[4]-मृत्तिकादानफलप्राप्तिकामोऽहमेतां[5] मृत्तिकां ददानि। स्वस्त्यादिस्वीकारान्तं[6] पूर्ववत्। अत्र दन्तकाष्ठ-जिह्वानिर्लेखन-मृत्तिका-दानेषु [7]अनुत्सृज्यानुष्ठानमात्रेणापि [8]फलमुक्तम्। उत्सृज्य दाने तु[9] दक्षिणाधिक्यात्[10] फलाधिक्यम्।

तथा (३।३११।४क) :—

वितानकप्रदानेन सर्वपापैः प्रमुच्यते ॥२५॥

वितानं चन्द्रातपः। अर्चिताय ब्राह्मणायार्चितं वितानकम्[11] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [12]सर्वपापक्षयकामोऽहमेतद्वितानकं ददानि। स्वस्त्यादिस्वीकारान्तं[13] पूर्ववत्।

[14][तथा (३।३११।२३) :—

दत्त्वा पूगफलं विप्रा सफलां विन्दते क्रियाम्।

ताम्बुलस्य प्रदानेन सौभाग्यमपि विन्दति ॥२६॥

अर्चिताय ब्राह्मणायार्चितं ताम्बुलदानफलप्राप्तिकामोऽहमेतत्ताम्बूलं ददानि।] [स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।][15]

तथा (३।३११।१०) :—

यज्ञोपवीतदानेन वस्त्रदानफलं लभेत्।

उष्णीषदानस्य तथा फलमेतदुदाहृतम् ॥२७॥

---

1 A विरोग for विरोगत्व
2 I. O. °र्चितं
3 A मृत्तिकामर्चितां
4 A विष्णुधर्मोत्तरो
5 A एता for एतां
6 A omits स्वीकारान्तं
7 A उत्सृज्यानुष्ठानमात्रे पि
8 I. O. फलं युक्तं
9 A दत्त
10 A दक्षिणायां
11 A वितानकमर्चितं
12 A विष्णुधर्मोत्तरोक्त-वितानकदानफल-प्राप्ति for सर्वपापक्षय
13 I. O. omits स्वीकारान्तं
14 A omits the bracketed portion
15 A reads the bracketed portion after the first line of the next verse

अर्चिताय ब्राह्मणायोष्णीषमर्चितम्[1] ॐ[2] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [3]वस्त्रदानफलप्राप्तिकामोऽहमेतदुष्णीषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [4][परिधानं स्वीकारः।

तथा (३।३११।२५क) :—

कङ्कतस्य प्रदानेन परां बाधां प्रमुञ्चति ॥२८॥

कङ्कतं केशप्रसाधनोचितं काङ्करीति प्रसिद्धं बोद्धव्यम्। अर्चिताय ब्राह्मणायार्चितं कङ्कतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। प्रबाधाप्रमोक्षकामोऽहमेतत् कङ्कतं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

तथा (३।३१६।२२) :—

[5]बाले क्रीडनकं दत्त्वा मिष्टमन्नं[6] तथैव च।

फलं मनोहरञ्चापि[7] अग्निष्टोमफलं लभेत् ॥२९॥

क्रीडनकं क्रीडोचितद्रव्यं [8][कन्दुकादि। अर्चिताय वटवे क्रीडोचितकन्दुकमर्चितम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अग्निष्टोमफलप्राप्तिकामोऽहमेतत् क्रीडनकं ददानि। स्वस्त्यादि-[9]स्वीकारान्तं पूर्ववत्। [10][अनुपनीताय तु दाने] अनुष्ठानमात्रम्।

[11]तथा (३।३११।२४) :—

समुद्रजानां भाण्डानां शंखादीनां प्रदायकः।

पात्रीभवति कामानां यशसश्च न संशयः ॥३०॥

भाण्डानां पात्राणाम्। शंखादीनामित्यादिशब्देन शुक्तिग्रहणम्। शुक्तिशंखयोरन्यतरस्य पात्रत्रयमर्चितं ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-[12]समुद्रजभाण्डदानफलप्राप्तिकामोऽहमेतानि भाण्डानि ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते भाण्डानीमानि वरुणदैवतानीति वदेत्। कामस्तुत्यादि पूर्ववत्।

---

1 A ब्राह्मणायामर्चितमुष्णीषं
2 A omits it
3 A उष्णीष for वस्त्र
4 A omits the bracketed portion
5 A बाल
6 A तोमन्नं
7 A and V. D. मनोहरं वापि
8 I. O. reads the bracketed portion as कन्दुकाद्यार्चितं
9 I. O. and A omit स्वीकारान्तं
10 A अन्नदानं तोयदानं for the bracketed portion
11 I. O. omits it
12 A सामुद्र for समुद्रज

तथा (३।३११।२२) :—

स्नानानां सुखवासानां धूपानाञ्च प्रदायकाः[1]।

लोके प्रयान्ति प्रियतां भवन्ति च सुगन्धिनः ॥३१॥

ब्राह्मणायार्चिताय स्नानोपयुक्तं सुगन्धितिलामलकाद्यर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। लोकप्रियत्वसहितसुगन्धित्वप्राप्तिकामोऽहमेतानि स्नानानि ददानि। स्वस्त्यादि स्वीकारान्तं[2] पूर्ववत्। [3]सुखवास-[4]दानवाक्ये तु स्नानपदस्थाने सुखवासपदनिवेशो विशेषः।

तथा (३।३१४।१४क) :—

शक्तुदस्तृप्तिमाप्नोति ॥३२॥

ब्राह्मणायार्चिताय शक्तुमर्चितम्[5] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। तृप्तिकामोऽहमेतान् शक्तून् ददानि। स्वस्तिसावित्रीपाठान्ते शक्तव एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (३।३०६।६२ख-६३क) :—

आरण्यपशुदानेन वायुलोके महीयते।

एतदेव फलं प्रोक्तं प्रदानेन तु पक्षिणाम् ॥३३॥

अत्रारण्यपशुसमभिव्याहारेणा[6]-रण्यानामेव पक्षिणां मयूरादीनां ग्रहणम्[7]। एतदेव फलं वायुलोकप्राप्तिरित्यर्थः। अर्चिताय ब्राह्मणाय मयूरादिपक्षिद्वयमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वायुलोकप्राप्तिकामोऽहमेतान् पक्षिणो ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते पक्षिण एते वायुदैवता इति वदेत्। कामस्तुत्यादि पूर्ववत्।

तथा (३।३१०।१८):—

भोगमाप्नोति ताम्रदः[8]।

लोहारकूटयो-[9][र्दानात् कुप्य]-माप्नोत्यसंशयम्[10] ॥३४॥

---

1 A प्रदायकः
2 I. O. omits स्वीकारान्तं
3 I. O. अथवा ॥ सु०
4 A ०दाने तु वाक्ये
5 A शक्तूनर्चितान्
6 A ०व्याहाराद्दा०
7 I. O. omits ग्रहणम्
8 I. O. ताम्रदः
9 A र्स्ताना दीनाकुप्य for the bracketed portion
10 A ०संशयः

आरकूटं पित्तलम् इतरलोहानां खण्डोपात्तत्वात् । [अत्र लोह][1]-पदं कांस्यपरम्, कुप्यं हेमरूप्येतरधनम् ।

[2]अयसश्च प्रदानेन स्थैर्यं [3]सुमहदश्नुते ।

त्रपुसीसकयोर्दानाद् [4]बुद्धिवृद्धिमवाप्नुयात् ॥३५॥ (३।३१०।१६क)

त्रपु रङ्गम् । [5]यथेष्टपरिमाणं ताम्रमर्चितम् अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुच्चार्य दद्यात् । भोगप्राप्तिकामोऽहमेतत्ताम्रं ददानि । प्रतिग्रहीता स्वस्तिसाविलीपाठान्ते ताम्रमिदमग्निदैवतमिति वदेत् । [6]कामस्तुल्यादि पूर्ववत् । कांस्यदाने कुप्यप्राप्तिकामोऽहमेतल्लोह[7]-मिति [8]वाक्ये विशेषः । [9][पित्तलदाने कुप्यप्राप्तिकामोऽहमेतदारकूटमिति विशेषः । लोहदाने सुमहास्थैर्यप्राप्तिकामोऽहमेतदय इति विशेषः । रङ्गदाने [10]बुद्धिवृद्धिप्राप्तिकामोऽहमेत[11] त्रपु इति विशेषः । सीसकदाने [12]बुद्धिवृद्धिप्राप्तिकामोऽहमेतत् सीसकमिति विशेषः ।]

तथा (३।३१०।२०ख-२१क) :—

शिल्पभाण्डानि यो दद्याल्लोहानि विधिवद्द्विजाः ।

विद्यादानफलं तस्य कथितं नात्र संशयः ॥३६॥

शिल्पभाण्डानि [13]शिल्पनिर्माणोचितद्रव्यादीनि । गृहीतोदपूर्णताम्रपात्र [उदङ्मुख उपविष्टो][14] यथेष्टं शिल्पभाण्डानि कारुभ्यः शिल्पभाण्डार्थिभ्यः सङ्कल्पयेत् । ॐ विष्णुधर्मोत्तरोक्त-शिल्पभाण्डदानफलप्राप्तिकामोऽहं कारुभ्यः शिल्पभाण्डानि दास्ये इति सङ्कल्प्य [यो येनार्थी][15] तस्मै शिल्पिने तद्दद्यात् । अत्र कारुभ्यो दानं [विष्णुधर्मोत्तर एव स्थानान्तरे श्रवणात्][16] ।

---

1 A अत्र for the bracketed portion
2 A आयसस्य
3 A समहदश्नुते
4 A वृद्धि०
5 I. O. यथेष्ट twice and ०परिमाण
6 A ताम्रस्पर्शादि
7 A कांस्य for लोह
8 A omits it
9 A omits the bracketed portion
10 I. O. वृद्धि०
11 I. O. एतं for एतत्
12 I. O. वृद्धि०
13 A निर्माणोचितद्रव्याणि वास्यादीनि
14 I. O. उदङ्मुखोपविष्टो and A उदङ्मुख उपविश्य for the bracketed portion
15 A omits the bracketed portion
16 A reads the bracketed portion as विष्णुधर्मोत्तरोक्तस्थानान्तरश्रवणात्

तथा च[1] :—

येन जीवति भाण्डेन तस्य भाण्डस्य दायकः[2] ।
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥३७॥
यज्ञोपकरणद्रव्यं [3][ब्राह्मणस्य महाफलम् ।
[4]युद्धोपकरणद्रव्यं] क्षत्रिये[5] द्विजपुङ्गवाः ॥३८॥ (३।३१६।१२)
[6]पण्योपयोगि [7]तद्वैश्ये शूद्रे [8]शिल्पोपजीवनम् ।
यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत् ॥३९॥ (३।३१६।१३)
येन येन च भाण्डेन यस्य [9]वृत्तिरुदाहृता ।
तत्तत्तस्यैव दातव्यं पुण्यकामेन धीमता ॥४०॥ (३।३१६।१४)

[10]तथा (३।३१०।२१ख) :—

वर्मदाता नरो नित्यं रक्षां समधिगच्छति ।

[11][वर्म सन्नाहः ।] ब्राह्मणायार्चिताय वर्मार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तवर्मदानफलप्राप्तिकामोऽहमेतद्वर्म ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वर्मेदं शक्रदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । परिधानं स्वीकारः । एतच्च [12]दानं ब्राह्मणाय [13]तत्प्रकरणे पाठात् ।

तथा (३।३१०।२२क) :—

आयुधानां प्रदानेन रिपुनाशमवाप्नुयात् ॥४१॥

[14][यथेच्छमायुधान्यर्चितानि अर्चिताय] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । रिपुनाशकामोऽहमेतान्यायुधानि ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते आयुधानीमानि शक्रदैवतानीति वदेत् । कामस्तुत्यादि पूर्ववत् । [ग्रहणं स्वीकारः ।][15] [16][ब्राह्मण-

---

1 A omits च
2 A दायकः
3 V. D. omits the b. p.
4 A अन्योपकरणं द्रव्यं
5 I. O. क्षत्रियो
6 A पुण्यो॰, I. O. पाण्यो॰
7 A तवैश्ये, I. O. तद्वैश्य
8 I. O. शिल्पोपजीविनं
9 A वृत्ति॰
10 A omits it
11 A omits the bracketed portion
12 A omits it
13 A तत्प्रकरणेपि
14 A यथेच्छमायुधान्यर्चिताय for the bracketed portion
15 A omits the bracketed portion
16 A reads the bracketed portion as ब्राह्मणप्रकरणपाठान्ते एतदपि

प्रकरणे पाठादेतदपि] ब्राह्मणाय दानम्। एतानि च[1] दानानि [2]विशेषतः कथितानि अन्यान्यपि [3][स्वेष्टद्रव्यदानानि यथेष्टं] कर्तव्यानि ।

तथा च मनुः[4] :—

यद् यदिष्टतमं किञ्चिद् [5][यच्चास्ति दयितं गृहे] ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छति[6] ॥४२॥

तत्र च दानवाक्ये [7]मनूक्तामुकद्रव्यदानफलप्राप्तिकामोऽहममुकद्रव्यमिति [8]विशेषः। [9]तेषु सर्वेषु [10]विष्णुदैवतेति [11]एतेषाञ्च [12]तत्तदावर्तस्थितानां सर्वेषां दानानां विष्णुशङ्करोद्देशेनानुष्ठाने [13]श्रुतफलानामानन्त्यं भवति ।

तथा च कूर्मपुराणे (२।२६।३४) :—

यत् [14]किञ्चिद्देवमीशानमुद्दिश्य ब्राह्मणे शुचौ ।
दीयते [15]विष्णवे वापि तदनन्त-[16]फलं स्मृतम् ॥४३॥

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [17]विप्रकीर्णदानावर्तः ।

---

1 A omits च
2 A विशेष:
3 A reads the bracketed portion as श्रेष्ठद्रव्याणि दानानि
4 Cf. K. P. 2/26/52 which reads य......मं लोके यच्चापि......
...मिच्छता
5 I. O. यच्चान्यदपितं गृहे
6 I. O. ०मिच्छतेति
7 I. O. मनूक्तामुक०
8 I. O. शेष:
9 A adds च after this
10 I. O. दैवतेति
11 A एषाञ्च
12 I. O. तदावर्त स्थितानां
13 A श्रुतफलानानन्त्यम्
14 I. O. किञ्चिद्देव०
15 Supplied from K. P. A. विष्णुदेवार्थं and I. O. विष्णुमेवाथ
16 K. P. ०फलप्रदम्
17 A प्रकीर्णदानावर्त:

अथ सामान्यदेवतासम्प्रदानकदानावर्तः । (७२)

नन्दिपुराणे :—

> अलङ्कारन्तु यो दद्याद्विप्रायाथ [1][सुराय वा] ।
> स गच्छेद्वारुणं लोकं नानाभरणभूषितः ।
> जातः पृथिव्यां कालेन भवेद्द्वीपपतिर्नरः ॥१॥

अत्र प्रसिद्धालङ्काराणामन्यतम-[मर्चितमर्चिताय][2] यस्मै कस्मैचिद्देवाय दद्यात् । ॐ [3][अद्य नन्दिपुराणोक्त-सुरसम्प्रदानकालङ्कारदानफलप्राप्तिकामोऽहममुकदेवायैतमलङ्कारं ददानि । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थममुकदेवायाहं दक्षिणामेतत् काञ्चनं ददानीति । तस्मा एव देवाय दक्षिणां दद्यात् । अत्र फलोत्कर्षादुत्कृष्टालङ्कारदानं] बोद्धव्यम् ।

तथा :—

> [4]यश्चोभयमुखीं दद्याद्विप्रा- [य वेदवादिने][5] ।
> देवाय [6]वाप्यभीष्टाय स कुलान्येकविंशतिम् ॥२॥
> समुद्धृत्य [7]नरस्तिष्ठेन्नरकाद्ब्रह्मणो[8]ऽन्तिके ।
> युगानि रोमतुल्यानि [9]भक्तिश्रद्धापरो नरः ॥३॥

[10]प्रसूयमानां [11][दृश्यमान-वत्स]-शिरश्चरणां गामर्चिता[12]-मर्चितायेष्टदेवाय[13] दद्यात् । ॐ [14]अद्य नन्दिपुराणोक्तोभयमुखीदानफलप्राप्तिकामोऽहममुकदेवाय एतामुभयतोमुखीं गां ददानि । दक्षिणा पूर्ववत् ।

---

1 A स्वराय च
2 I. O. अर्चितं and A अर्चिताय for the bracketed portion
3 A reads the bracketed portion as 'नन्दिपुराणोक्तफलोत्कर्षादुत्कृष्टानालङ्कारदानं'
4 I. O. यश्चोभय०
5 I. O. वै वेदवादिनि for the b. p.
6 I. O. दाप्यभीष्टाय
7 A समुत्तिष्ठे०
8 A ब्राह्मणो for ब्रह्मणो
9 I. O. यद्दि०
10 A असूयमानां
11 A व्यक्तवत्स for the bracketed portion
12 I. O. omits अर्चिताम्
13 I. O. ०देवताय
14 A omits अद्य

तथा :—

दीपं ददाति यो मर्त्यः सुरब्राह्मणवेश्मनाम्[1] ।

स दिव्येन तु यानेन[2] महाभागप्रकाशिना[3] ।

[4]गच्छति स्वर्गमण्डलं वसेत्तत्र समाः शतम् ॥४॥

गृहीतोदपूर्णताम्रपात्र उदङ्मुखो दीपदानं सङ्कल्प्य सुरवेश्मसु यथेच्छकालावधि दद्यात्। [5]ॐ नन्दिपुराणोक्त-[6]सुरवेश्म-दीपदानफलप्राप्तिकामोऽहं सुरवेश्मसु दीपं दास्ये। अत्र फलभूयस्त्वाद् यथेष्टचिरकालदीपदानम्।

शाम्बपुराणे :—

दीपं ददाति यो नित्यं देवतायतनेषु च ।

[7]चतुष्पथेषु रथ्यासु रूपवान् सुभगो भवेत् ॥५॥

अत्राप्यनन्तरदीप-[8]सङ्कल्पवत् सङ्कल्पयेत्। ॐ शाम्बपुराणोक्त-दीपदानफलप्राप्तिकामोऽहं [देवायतनेषु दीपं][9] दास्ये। ततो यथेष्टचिरकालावधि दद्यात्।

आदित्यपुराणे :—

[10]ये च शय्यां प्रयच्छन्ति देवेषु च[11] गुरुष्विह ।

[12]ज्ञानवृद्धेषु विप्रेषु दत्त्वा नश्यति कण्टकम्[13] ॥६॥

देवेष्विति बहुवचनं दातृबहुत्वापेक्षम्। अर्चितायाभिमतदेवायार्चितां[14] शय्यां दद्यात्। ॐ अद्य [15]कण्टकनाशप्राप्तिकामोऽहं[16]-ममुक-[17]देवायैतां शय्यां ददानि। दक्षिणा पूर्ववत्।

तथा सुवर्णदानानुवृत्तौ :—

यं देवमर्चयेत्तेन यस्य चैव प्रयच्छति ।

तस्य लोके [18]निवसति [19]नित्यमेव ददाति यः ॥७॥

---

1 A वेश्मन
2 I. O. यामेन
3 A महाभागप्रभाषिना, I. O. महाभातप्रकाशिना
4 I. O. गच्छते
5 A omits it
6 A omits सुरवेश्म
7 I. O. चतुःपथेषु
8 A omits सङ्कल्प
9 A reads the bracketed portion as देवतने प्रदीपं
10 A येन
11 A व
12 A ज्ञानविक्तेषु
13 A दुःकृतं
14 I. O. and A ०र्चितं
15 A कृ for कण्टक
16 A adds भगवते after अहं
17 I. O. ०देवतादैतां, A ०देवायै
18 A निरस्यति
19 A नित्यं चैव

अभिमतदेवायार्चितायार्चित[1] सुवर्णं दद्यात्। ॐ अद्यामुक-[2]देवलोकप्राप्तिकामोऽहम-मुक-[3]देवायैतत् काञ्चनं ददानि। दक्षिणा पूर्ववत्।

[4]तथा :—

छत्रं ये तु प्रयच्छन्ति गुरुविप्रसुरेषु च।
न तेषां [5]पतते घोरमग्निवर्षं[6] सुदारुणम् ॥८॥

अर्चितायाभिमतदेवायार्चितं छत्रं दद्यात्। ॐ [7]आदित्यपुराणोक्तसुर-[8]सम्प्रदानक-छत्रदानफलप्राप्तिकामोऽहं भगवते अमुक-[9]देवायैतच्छत्रं ददानि। दक्षिणा पूर्ववत्।

शिवपुराणे :—

दीपप्रदानं यो दद्याद् [10]देवेषु ब्राह्मणेषु च।
तेन दीपप्रदानेन अक्षय्यां गतिमाप्नुयात् ॥९॥

[11]अर्चितायाभिमतदेवायार्चितं दीपं दद्यात्। ॐ अद्याक्षय्य[12]-गतिप्राप्तिकामोऽहं भगवते अमुकदेवायैतं दीपं ददानि। दक्षिणा पूर्ववत्।

विष्णुधर्मोत्तरे (३।२८८।४०ख-४१) :—

यानं शय्यासनं छत्रं पादुके [13]वाप्युपानहौ।
वाहनं गाश्च [14]धर्मज्ञास्त्रिदशेभ्यो ददाति यः।
एकैकस्मादवाप्नोति वह्निष्टोमफलं नरः ॥१०॥

यानं रथं पादुके काष्ठोपानहौ वाहनं हस्त्यादि। अर्चितायाभिमतदेवायार्चितं यानं दद्यात्। [15]ॐ अद्याग्निष्टोमफलप्राप्तिकामोऽहममुकदेवायैतद्यानं ददानि। दक्षिणा पूर्ववत्।

---

1 A omits अर्चिताय, I. O. omits अर्चितं
2 A ०सदेव०
3 A ०देवतायैतत्
4 I. O. omits it
5 I. O. यतते
6 A ०वर्षं
7 A अद्यादित्य०
8 A ०सम्प्रदानकाद०
9 A ०देवतायै एतच्छत्रं
10 I. O. दैवते
11 A अर्चिताभिमत०
12 A अद्यानन्द०
13 I. O. चाप्युपानहे
14 I. O. धर्मच विप्रेभ्योऽपि
15 A omits ॐ, I. O. reads ॐ अद्यादित्यमग्निष्टोम०

तथा (३।२८८।४२ख):—

निवेद्य [1]शस्यानि तथा [2]गतिमाप्नोत्यनुत्तमाम्[3] ।

[4]शस्यानि [5]धान्ययवादीनि अर्चितानि । [6][अभिमतदेवाय [7]शस्यान्यर्चितानि] [8]दद्यात् । [9]ॐ अद्यानुत्तमगति-[10]प्राप्तिकामोऽहममुक-[11]देवायैतानि [12]शस्यानि [13]ददानि । दक्षिणा पूर्ववत् ।

[14]तथा :—

[15]उपधानप्रदानेन श्रियमाप्नोत्यनुत्तमाम्[16] ॥११॥

[17]उपधानं [18]स्नानपूजाद्युपयोगिकलशादिकम् [19]अर्चितायाभिमतदेवायार्चितं कलसादीनामन्यतमं दद्यात् । [20]ॐ अद्यानुत्तमश्रीप्राप्तिकामोऽहममुकदेवायैतदुपधानं[21] ददानि । दक्षिणा पूर्ववत् ।

तथा (३।२८८।२५ख, cf ३।३१०।२२ख) :—

राजलिङ्गप्रदानेन [22]राजैव भवति क्षितौ ।

[23][राजलिङ्गं कनकदण्डादि] । [24]अर्चितायाभिमतदेवायार्चितं[25] राजलिङ्गं दद्यात् । ॐ अद्य क्षितिराज्यप्राप्तिकामोऽहममुकदेवायैतद्राजलिङ्गं ददानि । दक्षिणा पूर्ववत् ।

[26]तथा (३।२८८।२५क) :—

विभूषणप्रदानेन राजा भवति भूतले ॥१२॥

---

1 A सस्यानि
2 I. O. मु०, A वि०
3 A ०मं
4 A सस्यानि
5 I. O. धान्ययवान्ययवादीनि
6 I. O. अभिमतदेवं य सस्यान्यार्चितानि
7 A सस्यान्यर्चितानि
8 A ददानि
9 A omits it
10 A ०प्राप्ति०
11 A ०देवतायैतानि
12 A सस्यानि
13 I. O. and A दद्यात्
14 A omits it
15 I. O. उपस्नान०
16 A ०मं
17 I. O. उपस्नानं
18 I. O. स्नानं
19 I. O. अनुत्तम श्रीअर्चितान्यभिमत०
20 A omits it
21 I. O. ०मुपस्करं
22 A राजैव
23 I. O. reads the bracketed portion as राजलिङ्गी कनकदण्डादि
24 I. O अर्चिताभिमत०
25 I. O. ०र्चित
26 A omits it

विभूषणं मुक्ताहारकेयूरकङ्कणादि। अर्चिताय देवायार्चितं मुक्ताहारादीनामन्यतमं विभूषणं दद्यात्। ॐ अद्य क्षितिराज्य[1]-प्राप्तिकामोऽहं भगवते अमुकदेवाय विभूषणं ददानि। दक्षिणा पूर्ववत्।

तथा (३।२८८।१४) :—

प्रतिपाद्य तथा भक्त्या ध्वजं त्रिदशवेश्मनि।
निर्दहत्याशु पापानि महापातकजान्यपि ॥१३॥

अर्चितायाभिमतदेवाय ध्वजमर्चितं दद्यात्। ॐ अद्य [2]पापापनोदकामोऽहम् अमुकदेवायैतं ध्वजं ददानि। दक्षिणा पूर्ववत्।

भूमिं कृत्वा तु यः कुर्याद्देवब्राह्मणसान्नरः।
स्वर्गलोकमवाप्नोति पुरुषोऽतिसुदारुणः ॥१४॥

अतिसुदारुण इत्यत्रापिशब्दोऽध्याहार्यः[3]। [4]तेनातिदारुणोऽपि स्वर्गं प्राप्नोतीत्यर्थः। अर्चितायाभिमतदेवायार्चितां[5] [6]भूमिं दद्यात्। [7]ॐ अद्य स्वर्गलोकप्राप्तिकामोऽहममुक[8]देवायैतां प्रियदत्तां भूमिं ददानि। [9]दक्षिणा पूर्ववत्।

तथा (३।२८८।२६क) :—

[10]वस्त्रदानेन लोकेऽस्मिन् [11]सुवेशस्त्वभिजायते।

अर्चितायाभिमतदेवायार्चितं वस्त्रं दद्यात्। अद्यैतल्लौकिकसुवेशत्वप्राप्तिकामोऽहममुक[12]देवायैतद्वस्त्रं ददानि। दक्षिणा पूर्ववत्।

तथा :—

फलानि दत्त्वा देवेभ्यः सफलां[13] विन्दति क्रियाम् ॥१५॥

[फलानि बीजपुरादीनि][14] अर्चितायाभिमतदेवाय फलं बीजपूरादिफलानामन्यतमं दद्यात्। ॐ अद्य[15] विष्णुधर्मोत्तरोक्तदेवसम्प्रदानकफलप्राप्तिकामोऽहं [16]भगवतेऽमुक[17]देवायैतानि फलानि ददानि। दक्षिणा पूर्ववत्।

---

1 A omits राज्य
2 A पापापनोदककामोहम्
3 A ०ध्याहार्यः
4 I. O. तेतानि दारावयपि, A तेनाति दारुण
5 A ०र्चितं, I. O. ०र्चिताय
6 I. O. adds सतद्रूपकीतां before भूमिं
7 A omits it
8 A ०देवतायैतां
9 A दक्षिणा
10 I. O. वस्त्रप्रदानेन
11 A परिसदुतिजायते
12 A ०देवतायैतद्वस्त्रं
13 I. O. सफलं
14 I. O. omits the bracketed portion
15 I. O. and A अद्यादि
16 I. O. भगवतो०
17 A ०देवतायैतानि

तथा :—

गीतवाद्यप्रदानेन सौख्यं प्राप्नोत्यनुत्तमम्[1] ॥१६॥

गीतवाद्ययोरन्यतरदुभयं [2]वाऽभिमतदेवाग्रे [3]सङ्कल्प्य कारयेत्। [4]ॐ अनुत्तमसौख्यप्राप्तिकामोऽहं भगवते अमुकदेवाय[5] गीतं दास्ये। वाद्यदाने [6]उभयदाने वा वाद्यं दास्ये इति वाक्ये विशेषः।

तथा :—

प्रेक्षणीयप्रदानेन रूपवान् भुवि जायते।
औज्ज्वल्यमाप्नोति तथा यत्र यत्राभिजायते ॥१७॥

प्रेक्षणीयं दृश्यं सङ्कल्प्याभिमतदेवताभ्यो [7]दातव्यम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे सामान्यदेवता-[8]सम्प्रदानकदानावर्तः।

---

1 I. O. ०त्तमां
2 I. O. वाभिमतदेवाग्रे, A वाऽभिमतदेवाय
3 A संकल्प्य
4 A omits it
5 I. O. omits it
6 I. O. उभयदानमेव
7 I. O. दातव्यानि
8 I. O संप्रदानदानावर्त्तः, A संप्रदानावर्त्तः

अथ सूर्यसम्प्रदानकदानावर्तः । (७३)

[1]भविष्यपुराणे (१।६३।५७, ५८ख) :—

[2][गावो वाथ महिष्यो वा] [3]गजानश्वांश्च शोभनान् ।
यः प्रयच्छति सूर्याय तस्य पुण्यफलं [4]लभेत् ।
सहस्रगुणितं [5]तत्र [6]दानमस्योपतिष्ठति ॥१॥

[7]दानमस्योपतिष्ठतीति दीयत इति दानं [8][गोमहिष्यादि एतदपि] [9]सहस्रगुणमुपतिष्ठति इत्यर्थः । अत्र यजमानो [10]गाः शोभना [11][उपादाय अर्चिताश्च] भगवते सूर्याय दद्यात् । ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानकानियत[12]-संख्य-[13][गवीदानफलप्राप्तिकामो[14][ऽहं सूर्याय] गवीर्ददानि[15] । दक्षिणा पूर्ववत् । महिषीदाने] [16]गवीपदस्थाने महिषीपदनिवेशो विशेषः । शोभनगजदाने गजपदप्रक्षेपः[17] । [18]शोभनाश्वदाने अश्वपदप्रक्षेपः ।

तथा (१।६३।४८-४६) :—

गोयुक्त-[19]मश्वयुक्तं[20][वा यो [21]दद्याद् रवये रथम् ।
काञ्चनं]वापि रौप्यं वा [22]मणिरत्नान्वितं शुभम् ॥२॥

---

1 A भविष्ये
2 Bh. P. reads the b. p. as गा वाथ महिषीर्वापि
3 I. O. गजानाश्वांश्च
4 Bh. P. भृशं
5 Bh. P. तच
6 I. O. दानमस्योपतिष्ठति
7 I. O. दानमस्योपतिष्ठतीति
8 I. O. reads the bracketed portion as गोमहिष्यादिमते तदपि
9 I. O. सहस्रं for सहस्र
10 A गां
11 I. O. उपादायान्यमर्चिताय and A उपादयो अर्चिताय for the bracketed portion
12 I. O. नि for नियत
13 I. O. omits the bracketed portion
14 A omits the bracketed portion
15 A गवीर्ददाति
16 I. O. गवीदादस्थाने
17 A ०प्रक्षपं
18 I. O. शोभनाश्वं दाने. A अश्वदाने
19 A and I. O. मश्वयुक्तं for मश्वयुक्तं
20 A omits the bracketed portion
21 Corrected from Bh. P. I. O. ददाति रवे
22 Corrected from Bh. P. I. O. मणिरत्नचितं and A मणिभौरचितं

स यानेनार्कवर्णेन किङ्किणीजालमालिना ।
स्वर्गलोकमितो गत्वा क्रीडते [स भवाङ्गने][1] ॥३॥

यथेच्छं सौवर्णमारोहणादियोग्यं रथं निर्माय मुक्तामाणिक्यालङ्कृतं कृत्वा कर्षकवृष-युगसहितमश्वयुग-[2][सहितं वार्चितमर्चिताय]सूर्याय दद्यात् । ॐ[3] अद्य भविष्यपुराणोक्त-सूर्यसम्प्रदानककाञ्चनरथदानफलप्राप्तिकामोऽहं भगवते सूर्याय [4]एतं गोयुक्तं काञ्चनं मणि-[5]रत्नखचितं रथं ददानि । दक्षिणा पूर्ववत् । अश्वयुक्तदाने तु गोपदस्थाने अश्वपदनिवेशो विशेषः । रौप्यरथदाने तु[6] काञ्चनपदस्थाने रौप्यपदनिवेशो विशेषः ।

तथा (१।६३।५०) :—

यस्तु दारुमयं कुर्याद्रवे[7] रथमनुत्तमम् ।
स यात्यर्कवर्णेन विमानेनार्कमण्डलम् ॥४॥

